# MANTRAMAHODADHI

A TREATISE ON

TANTRA SASTRA

WITH THE COMMENTARY OF

MAHIDHARA

EDITED AND PUBLISHED

BY

*PANDIT JIBANANDA VIDYASAGARA, B. A.*

*Superintendent Free Sanskrit College, Caloutta.*

SECOND EDITION.

CALCUTTA.

PRINTED AT THE SIDDHESWARA PRESS.

1892.

To be had From Pandit Jibananda Vidyasagara, B. A.
Superintendent Free Sanskrit College,
No. 2 Ramanatha Majumdara's Street, Calcutta.

SRI AUROBINDO LIBRARY
PONDICHERRY, INDIA

Fumigated MAY 1993

*But thought nor word can seize eternal truth*

# एतानि मुद्रितसंस्कृतपुस्तकानि ।

| | | |
|---|---|---|
| १ | आशुबोध व्याकरणम् | २ |
| २ | षट्कम् पाणिनीयम् | ॥० |
| ३ | उणादिसूत्रम् सटीक | २ |
| ४ | कविकल्पद्रुम (धातुपा:) | ।० |
| ५ | कलापव्याकरणं वा कातन्त्र | २ |
| ६ | धातुरूपादर्श: | १॥० |
| ७ | परिभाषेन्दुशेखर सटीक | १ |
| ८ | मुग्धबोधव्याकरणम् सटीक | १॥० |
| ९ | वाक्यमञ्जरी (वङ्गाचरै:) | ।० |
| १० | वैयाकरणभूषणसार | ॥।० |
| ११ | लघुकौमुदीव्याकरणम् | ॥० |
| १२ | लिङ्गानुशासनं सटीक | ।० |
| १३ | शब्दरूपादर्श: | ॥० |
| १४ | शब्दार्थरत्नम् | ॥।० |
| १५ | सारस्वतव्याकरण सटीक पूर्वार्द्धम् | १ |
| १६ | सारस्वतव्याकरणं सटीक उत्तरार्द्धं | २ |
| १७ | सिद्धान्तकौमुदी सरलासहिता | १० |
| १८ | ऋतुसंहार काव्य सटीक | ।/ |
| १९ | काव्यसंग्रह मूलमात्र | ५ |
| २० | काव्यसंग्रह सटीक प्रथमभाग: | ३ |
| २१ | काव्यसंग्रह सटीक द्वितीयभाग: | २ |
| २२ | काव्यसंग्रह सटीक तृतीयभाग: | २ |
| २३ | किरातार्जुनीयकाव्य सटीक | १॥० |
| २४ | कुमारसम्भवकाव्यपूर्वखण्ड सटीक | ॥० |
| २५ | कुमारसम्भवकाव्य उत्तरखण्डसटीक | ॥ |
| २६ | गीतगोविन्द काव्य सटीक | ॥० |
| २७ | चन्द्रशेखरचम्पूकाव्य | ३ |
| २८ | नलोदय काव्य सटीक | ।/ |
| २९ | नैषधचरितम् काव्य सम्पूर्ण सटीक | ५ |
| ३० | नैषधकाव्य नवमसर्गपर्य्यन्त सटीक | २॥ |
| ३१ | पुष्पबाणविलास काव्य सटीक | ।० |
| ३२ | विद्वन्मोदतरङ्गिणी (चम्पूकाव्य) | ॥० |
| ३३ | भट्टिकाव्य टीकाद्वयसहित | २ |
| ३४ | भामिनीविलासकाव्य सटीक | ॥० |
| ३५ | भामिनीविलास संक्षिप्तटीकासह | ।० |
| ३६ | चम्पूरामायणम् सटीक | १ |
| ३७ | (चम्पूरामायणम्) भोजचम्पू | ॥० |
| ३८ | शतकावलि: | ॥० |
| ३९ | माधवचम्पूकाव्य | ।० |
| ४० | मेघदूत मल्लिनाथकृत टीकासहित | / |
| ४१ | मेघदूत सटीक सुलभमूल्यकम् | /० |
| ४२ | रघुवंश काव्य सटीक | १॥० |
| ४३ | रघुवंश मूलमात्र ७,८,१२ सर्गा: | /० |
| ४४ | राजप्रशस्ति सटीक | / |
| ४५ | शिशुपालवधकाव्य सटीक (माघ) | २ |
| ४६ | गद्यकथासरित्सागर सम्पूर्ण | ६ |
| ४७ | कादम्बरी विस्तृतव्याख्यासहिता | ३ |
| ४८ | दशकुमारचरितगद्यकाव्य सटीक | १ |
| ४९ | द्वात्रिंशत्पुत्तलिकासिंहासन | १ |
| ५० | पञ्चतन्त्रम् विष्णुशर्मकृत सटीक | १ |
| ५१ | बहुविवाहवाद | ।० |
| ५२ | वासवदत्ता गद्यकाव्य सटीक | १ |
| ५३ | वेतालपञ्चविंशति: (सरलगद्य) | ॥० |
| ५४ | शङ्करविजय | १॥० |
| ५५ | भोजप्रबन्ध सरल गद्य | ॥० |
| ५६ | हर्षचरित सटीक बाणभट्टकृत | २॥० |
| ५७ | हर्षचरितबाणभट्टकृतगद्य | १ |
| ५८ | संस्कृतशिक्षामञ्जरी प्रथमभाग: | / |
| ६८ | संस्कृतशिक्षामञ्जरी द्वितीयभाग: | ।० |
| ६० | संस्कृतशिक्षामञ्जरी तृतीयभाग: | ॥० |
| ६१ | संस्कृतशिक्षामञ्जरी चतुर्थभाग: | ।० |
| ६२ | हितोपदेश सटीक | ॥० |
| ६३ | अमरकोष | ॥० |
| ६४ | वाचस्पत्यम् (बृहदभिधान) | १०० |
| ६५ | मेदिनीकोष | १ |
| ६६ | शब्दस्तोममहानिधि: | ८ |
| ६७ | अनर्घराघवनाटक सटीक [मुरारि] | २ |
| ६८ | अनर्घराघवनाटक मूलमात्र | १ |

# मन्त्रमहोदधिः ।

नौकाख्यटीकासमलङ्कृतः ।

श्रीमन्महीधरविरचितः ।

पण्डितकुलपतिना बि, ए उपाधिधारिणा

श्रीजीवानन्दविद्यासागरभट्टाचार्य्येण

संस्कृतः प्रकाशितश्च ।

द्वितीयसंस्करणम् ।

कलिकातानगरे

सिद्धेश्वरयन्त्रे मुद्रितः ।

इं १८९२ ।

প্রকাশক শ্রীজীবানন্দবিদ্যাসাগর বি, এ,
২ নং রমানাথমজুমদারের ষ্ট্রীট্ কলিকাতা।
প্রিণ্টর—শ্রীসিদ্ধেশ্বরপান
৩৮ নং শিবনারায়ণদাসের লেন কলিকাতা।

# मन्त्रमहोदधिः ।

## प्रथमस्तरङ्गः ।

प्रणम्य लक्ष्मीनृहरिं महागणपतिं गुरुम् ।
तन्त्राण्यनेकान्यालोक्य वक्ष्ये मन्त्रमहोदधिम् ॥ १ ॥
प्रातरुत्थाय शिरसि ध्यात्वा गुरुपदाम्बुजम् ।
आवश्यकं विनिर्वर्त्त्य स्नातुं यायात् सरित्तटे ॥ २ ॥
श्रौतेन विधिना स्नात्वा मन्त्रस्नानं समाचरेत् ।
स्मार्त्तसन्ध्यां मन्त्रसन्ध्यां कृत्वा देवं विचिन्तयेत् ॥ ३ ॥
गृहद्वारमथागत्य द्वारपूजां समाचरेत् ।
द्वारमस्त्राम्बुना प्रोक्ष्य गणेशं चोर्द्ध्वतो यजेत् ॥ ४ ॥
महालक्ष्मीं दक्षभागे वामभागे सरस्वतीम् ।
पुनर्दक्षे यजेद्विघ्नं गङ्गाञ्च यमुनामपि ॥ ५ ॥
पुनर्वामे क्षेत्रपालं स्वः सिन्धुयमुने अपि ।

---

नत्वा लक्ष्मीपतिं देवं स्वीये मन्त्रमहोदधौ ।
नावं विरचये रम्यां तरणाय गुणैर्युताम् ॥

तत्र तावन्मन्त्रमहोदधिनामकं तन्त्रं चिकीर्षुराचार्यः शिष्टाचारपरिपालनाय निर्विघ्नग्रन्थसमाप्तये चेष्टदेवतानमस्कारपूर्वकं ग्रन्थकरणं प्रतिजानीते प्रणम्येति । लक्ष्म्या युक्तो नृहरिर्लक्ष्मीनृहरिः मध्यमपदलोपीसमासः गुरुं श्रीनृसिंहाश्रमं मन्त्रा एव महान्त्युदकानि धीयन्तेऽस्मिन्निति मन्त्रमहोदधिः ग्रन्थः ॥ १ ॥

तत्र प्रातरारभ्य सन्निधः कृत्यमाह प्रातरिति स्पष्टं गुरुपादाम्बुजगलितामृत-धारया मानसं स्नानं कुर्यात् इत्यादि पूजातरङ्गे वक्ष्यति ॥ २ ॥ ३ ॥

पुनर्दक्षे तु धातारं विधातारन्तु वामतः ॥ ६ ॥
तद्वन्निधी शङ्खपद्मौ ततोऽर्चेद्द्वारपालकान्।
द्वारपूजां विधायेत्थं प्रविश्यार्चनमन्दिरम् ॥ ७ ॥
उपविश्यासने नत्वा गणेशगुरुदेवताः।
प्राणानायम्य तारेण पूरकुम्भकरेचकैः ॥ ८ ॥
द्वात्रिंशता चतुःषष्ट्या क्रमात् षोड़शसंख्यया।
देवार्चायोग्यताप्राप्त्यै भूतशुद्धिं समाचरेत् ॥ ९ ॥
मूलाधारस्थितां देवीं कुण्डलीं परदेवताम्।
विसतन्तुनिभां विद्युत्प्रभां ध्यायेत् समाहितः ॥ १० ॥
मूलाधारात् समुत्थाप्य सङ्गतां हृदयाम्बुजम्।
सुषुम्नामार्गमाश्रित्यादाय जीवं हृदम्बुजात् ॥ ११ ॥
प्रदीपकलिकाकारं ब्रह्मरन्ध्रगतां स्मरेत्।
जीवं ब्रह्मणि संयोज्य हंसमन्त्रेण साधकः ॥ १२ ॥
पादादिब्रह्मरन्ध्रान्तं स्थितं भूतगणं स्मरेत्।
स्ववर्णबीजाकृतिभिर्युतं तद्विधिरुच्यते ॥ १३ ॥
पादादिजानुपर्य्यन्तं चतुष्कोणं सवज्रकम्।
भूबीजाढ्यं स्वर्णवर्णं स्मरेदवनिमण्डलम् ॥ १४ ॥

---

अस्त्राम्बुना अस्त्राय फड़ित्यभिमन्त्रितजलेन ॥ ४—६ ॥

शङ्खपद्मौ निधी तद्दक्षवामयोः द्वारपालांस्तत्तद्देवानां वक्ष्यमाणान् ॥ ७ । ८ ॥

द्वात्रिंशद्वारं प्रणवं जपन् प्राणं पूरयेत् चतुःषष्टिवारं जपन् कुम्भयेत् षोड़शवारं जपन् रेचयेदित्यर्थः ॥ ९ ॥

मूलाधारात् कुण्डलिनीमुत्थाप्य समाहितः सन् ध्यायेत् ॥ १० ॥

हृदो जीवं गृहीत्वा सुषुम्नामार्गेण ब्रह्मरन्ध्रं गत्वा ब्रह्मणि स्थापयेदिति गरुपदेशगम्योऽर्थो योगिना ज्ञेयः योगाभावे स्मरणमात्रं विधेयम् ॥ ११ ॥ १२ ॥

वर्णाः पीतादयः बीजानि लमित्यादीनि आकृतयश्चतुष्कोणादयः तद्युक्तं भूतगणम् ॥ १३ ॥

तदेव दर्शयति पादादीति ॥ १४ ॥

जान्वाद्यानाभिचन्द्रार्द्धनिभं पद्मद्वयाङ्कितम्।
वं बीजयुक्तं श्वेताभमम्भसो मण्डलं स्मरेत्॥ १५॥
नाभेर्हृदयपर्य्यन्तं त्रिकोणं स्वस्तिकान्वितम्।
रं बीजेन युतं रक्तं स्मरेत् पावकमण्डलम्॥ १६॥
हृदो भ्रूमध्यपर्य्यन्तं वृत्तं षड्विन्दुलाञ्छितम्।
यं बीजयुक्तं धूम्राभं मरुतो मण्डलं स्मरेत्॥ १७॥
आब्रह्मरन्ध्रं भ्रूमध्याद्वृत्तं स्वच्छमनोहरम्।
हं बीजयुक्तमाकाशमण्डलं प्रविचिन्तयेत्॥ १८॥
पद्भ्यस्तपायूपस्थावाक् क्रमाद्ज्ञेया धरादिगाः।
स्वकीयविषयैर्युक्ता गमनग्रहणादिभिः॥ १९॥
घ्राणञ्च रसना चक्षुः स्पर्शनं श्रोत्रमिन्द्रियम्।
क्रमाज्ज्ञेयं धरादिस्थं गन्धादिगुणसंयुतम्॥ २०॥
ब्रह्मविष्णुशिवेशानाः सदाशिव इतीरिताः।
धरादिभूतसंघेशा ध्येयास्तन्मण्डलेषु ते॥ २१॥
निवृत्तिश्च प्रतिष्ठापि विद्या शान्तिश्चतुर्थिका।
शान्त्यतीतेति पञ्चैव कला ध्येया धरादिगाः॥ २२॥
समानोदानव्यानाश्चापानप्राणौ च वायवः।
धरादिमण्डलगताः पञ्च ध्येयाः क्रमादिमे॥ २३॥
एवम्भूतानि सञ्चिन्त्य प्रत्येकं प्रविलापयेत्।
भुवं जले जलं वह्नौ वह्निं वायौ नभस्यसुम्॥ २४॥
विलाप्य खमहङ्कारे महत्तत्त्वेऽप्यहङ्कृतिम्।
महान्तं प्रकृतौ मायामात्मनि प्रविलापयेत्॥ २५॥
शुद्धसच्चिन्मयो भूत्वा चिन्तयेत् पापपूरुषम्।

---

भूमण्डले यदिन्द्रियं घ्राणं प्राणं गन्धो ब्रह्मानिवृत्तिः समानः गन्तव्यो देशोऽपि

दक्षकुक्षिस्थितं कृष्णमङ्गुष्ठपरिमाणकम् ॥ २६ ॥
विप्रहत्याशिरोयुक्तं कनकस्तेयबाहुकम् ।
मदिरापानहृदयं गुरुतल्पकटीयुतम् ॥ २७ ॥
पापिसंयोगिपद्द्वन्द्वमुपपातकरोमकम् ।
खड्गचर्मधरं दुष्टमधोवक्त्रं सुदुःसहम् ॥ २८ ॥
वायुबीजं स्मरन् वायुं सम्पूर्य्यैनं विशोषयेत् ।
स्वशरीरयुतं मन्त्री वह्निबीजेन निर्दहेत् ॥ २९ ॥
कुम्भके परिजप्तेन ततः पापनरोद्भवम् ।
वह्निर्भस्म समुत्सार्य्य वायुबीजेन रेचयेत् ॥ ३० ॥
सुधाबीजेन देहोत्थं भस्म संप्लावयेत् सुधीः ।
भूबीजेन घनीकृत्य भस्म तत् कनकाण्डवत् ॥ ३१ ॥
विशुद्धमुकुराकारं जपन् बीजं विहाय सः ।
मूर्द्धादिपादपर्य्यन्तान्यङ्गानि रचयेत् सुधीः ॥ ३२ ॥
आकाशादीनि भूतानि पुनरुत्पादयेच्चितः ।
सोऽहंमन्त्रेण चात्मानमानयेद्धृदयाम्बुजे ॥ ३३ ॥
कुण्डलीं जीवमादाय परसङ्गात् सुधामयम् ।
संस्थाप्य हृदयाम्भोजे मूलाधारगतां स्मरेत् ॥ ३४ ॥
भूतशुद्धिं विधायैव प्राणस्थापनमाचरेत् ।
प्राणप्रतिष्ठामन्त्रस्य मुनयोऽजेशपद्मजाः ॥ ३५ ॥
छन्द ऋग्यजुषं साम प्राणशक्तिस्तु देवता ।

---

एवमष्टी पदार्थाश्चिन्त्याः एवं जलमण्डले उदानाः तेजसि व्यानाः वायौ अपानाः नभसि प्राणाः ॥ १५—२८ ॥

वायुबीजं यं वह्निबीजं रं ॥ २९ ॥ ३० ॥

सुधाबीजं वं भूबीजं लं नभोबीजं हं तेन शरीरं सावयवं कुर्य्यात् ॥ ३१ ॥

चित्तो ब्रह्मणः सकाशात् ॥ ३२—३५

पाशो बीजं त्रपा शक्तिर्विनियोगोऽसुसंस्थितौ ॥ ३६ ॥
ऋषीन् शिरसि वक्त्रे तु छन्दांसि हृदि देवताम्।
गुह्ये बीजं पदोः शक्तिं न्यस्य कुर्य्यात् षड़ङ्गकम् ॥ ३७ ॥
कवर्ग-नभ-आद्यैर्हृत् चुशब्दाद्यैः शिरः स्मृतम्।
टु श्रोत्राद्यैः शिखा प्रोक्ता तु वागाद्यैस्तनुच्छदम् ॥ ३८ ॥
पुवक्तव्यादिभिर्नेत्रमस्त्रं येनान्तरिन्द्रियैः।
आत्मनिष्ठान् अन्यूनाङ्गान् विन्यसेद्धृदयादिषु ॥ ३९ ॥
पञ्चमं प्रथमं पश्चात् द्वितीयञ्च चतुर्थकम्।
तृतीयमित्थं क्रमतो वर्गवर्णान् समुच्चरेत् ॥ ४० ॥
यवर्गेऽप्येवमुच्चार्य्य नभः श्वेतोऽन्तिमो भृगुः।
विमलश्चेति चोच्चार्य्याः क्रमाद्वर्णाः सविन्दवः ॥ ४१ ॥
नभोवायूग्निवार्भूमिर्नभ आदय ईरिताः।
शब्दस्पर्शरूपरसगन्धाः शब्दादयो मताः ॥ ४२ ॥
श्रोत्रं त्वग्नयनं जिह्वा घ्राणं श्रोत्रादयः स्मृताः।
वाक्पाणी पादपायू चोपस्थो वागादयः पुनः ॥ ४३ ॥
वक्तव्या दानगमनविसर्गानन्दसंज्ञकाः।
वक्तव्याद्या बुद्धिमनोऽहङ्काराश्चित्तसंयुताः ॥ ४४ ॥
अन्तरिन्द्रियसंज्ञाः स्युरेवमुक्तं षड़ङ्गकम्।
नाभेरारभ्य पादान्तं पाशवीजं प्रविन्यसेत् ॥ ४५ ॥
नाभ्यन्तं हृदयाच्छक्तिं हृदन्तं मस्तकाच्छृणिम्।
त्वगसृङ्मांसमेदोऽस्थिमज्जाशुक्राणि विन्यसेत् ॥ ४६ ॥

---

पाशं आं त्रपा ह्रीं असुसंस्थितौ प्राणस्थापने विनियोगः ॥ ३६ ॥ ३७ ॥

कवर्गेति। क्रमतः पञ्चममिति प्रयोगः ओं ङं खं घं गं आकाशवायुतेजोजल-पृथिव्यात्मने हृदयाय नम इत्यादि ॥ ३८—४५ ॥

शक्तिं ह्रीं सृणिं क्रों ॥ ४६ ॥

आत्मने हृदयान्तानि यादिसप्तादिकान्यपि ।
ओजः सद्यान्विताकाशपूर्वं प्राणन्तु खादिकम् ॥ ४७ ॥
भृग्वादिकं न्यसेज्जीवमेतान् हृदयदेशतः ।
यकाराद्या आद्यवर्णाः सर्वे स्युश्चन्द्रभूषिताः ॥ ४८ ॥
ततः समस्तमूलेन मूर्द्धादिचरणावधि ।
विधाय व्यापकन्यासं विन्यसेत् पीठदेवताः ॥ ४९ ॥
मण्डूकश्चाथ कालाग्निरुद्र-आधारशक्तियुक् ।
कूर्म्मो धरा सुधा सिन्धुः श्वेतद्वीपं सुराङ्घ्रिपाः ॥ ५० ॥
मणिहर्म्यं हेमपीठं धर्म्मो ज्ञानं विरागता ।
ऐश्वर्य्यं धर्म्मपूर्वास्तु चत्वारस्ते नञादिकाः ॥ ५१ ॥
धर्म्मादयः स्मृताः पादाः पीठगात्राणि चेतरे ।
मध्येऽनन्तस्तत्त्वपद्मं आनन्दमयकन्दकम् ॥ ५२ ॥
संविन्नाला ततः प्रोक्ता विकारमयकेसराः ।
प्रकृत्यात्मकपत्राणि पञ्चाशद्वर्णकर्णिका ॥ ५३ ॥
सूर्य्यस्येन्दोः पावकस्य मण्डलत्रितयं ततः ।
सत्त्वं रजस्तमः पश्चादात्मयुक्तोऽन्तरात्मना ॥ ५४ ॥
परमात्माथ ज्ञानात्मा तत्त्वे मायाकलादिके ।
विद्यातत्त्वं परं तत्त्वं कथिताः पीठदेवताः ॥ ५५ ॥
पूजने सर्वदेवानां पीठे ताः परिपूजयेत् ।
न्यासस्थानानि चैतासां शरीरे वह्निरर्चने ॥ ५६ ॥

---

आत्मने इति । आत्मने नम इत्यन्तानि त्वगादीनि हृदि न्यसेत् यादिवर्णपूर्वाणि यं आत्मने नम इत्यादि सद्यः ओङ्कारस्तदन्वित आकाशो हः तदाद्यबीजः ह्रौं हं ॐ आत्मने नमः खं एः तदादिकं प्राणं एं प्राणात्मने नमः ॥४७॥
भृगुः सः तदादिकं जीवं सं जीवात्मने नमः आदयो वर्णाश्चन्द्रेणानुस्वारेण भूषिता युताः कार्याः ॥ ४८ ॥

पूजातरङ्गे वक्ष्यन्ते सेन्द्वाद्यर्णयुताश्च ताः।
प्राणशक्तिस्ततः पूज्या अष्टौ पीठस्य शक्तयः॥ ५७॥
हृदयाम्भोजपत्रेषु नवमी त्वधिकर्णिकम्।
जयाख्या विजया पश्चादजिता चापराजिता॥ ५८॥
नित्या विलासिनी दोग्ध्री त्वघोरा मङ्गलान्तिमा।
पाशादिबीजत्रितयं प्रोच्य पीठं दिशेत्ततः॥ ५९॥
एवं देहमये पीठे ध्यायेद्देवीमसुप्रदाम्।
नवयौवनगर्वाढ्यां पीवरस्तनशोभिनीम्॥ ६०॥
पाशञ्चापास्त्रकपाले सृणीषून् शूलं हस्तैर्बिभ्रतीं रक्तवर्णाम्।
रक्तोदन्वत्पोतरक्ताम्बुजस्थां देवीं ध्यायेत् प्राणशक्तिं त्रिनेत्राम्॥६१
अष्टपत्रस्थषट्कोणे ध्यात्वैवं पूजयेत्तु ताम्।
प्रागग्रचो वायुकोणेषु ब्रह्मविष्णुशिवान् यजेत्॥ ६२॥
अग्निवारुणशैवेषु वाणीलक्ष्मीहिमाद्रिजाः।
केसरेषु षडङ्गानि पत्रेष्वष्टौ तु मातरः॥ ६३॥
ब्राह्मी माहेश्वरी चापि कौमारी वैष्णवी तथा।
वाराही च तथेन्द्राणी चामुण्डा सप्तमी मता॥ ६४॥

---

मण्डूक इत्यादि। पीठदेवताः सुधा ब्धिरित्यत्र समुद्रविशेषं वक्ष्यति विरागता वैराग्यं नञादिका अधर्माय नम इत्यादि॥ ४९—५६॥

पीठदेवतानां न्यासस्थानानि बहिर्भागे च पूजास्थानानि एकविंशे तरङ्गे वक्ष्यन्ते ताः मण्डूकाद्याः सेन्द्वाद्यर्णयुताः सानुस्वारप्रथमाक्षरयुताः मं मण्डूकाय नम इत्यादि॥ ५७॥

हृदयपद्मपत्रेष्वष्टौ नवमी कर्णिकायामित्याह जयेति॥ ५८॥

पाशादीति। पां ह्रीं क्रोमिति पीठमन्त्रः॥ ५९॥ ६०॥

ध्यानमाह पाशमिति। षड्भुजा देवी पाशधनुःशूलानि वामहस्तेषु रक्तकपालाङ्कुशबाणा दक्षेषु रक्तनयोऽयं उदन्वान् समुद्रस्तत्र पोतो नौस्तत्र रक्तपद्मं तत्र स्थिताम्॥ ६१—६४॥

अष्टमी तु महालक्ष्मीः प्रोक्ता विश्वस्य मातरः ।
देवतापूजने प्राची मध्ये पूजकपूज्ययोः ॥ ६५ ॥
इन्द्रादयः स्वदिक्ष्वेव पूजनीया दिगीश्वराः ।
इन्द्रः कृशानुः कीनाशो निर्ऋतिर्वरुणोऽनिलः ॥ ६६ ॥
सोम ईशाननामाधोऽनन्त ऊर्द्ध्वे चतुर्मुखः ।
तत इन्द्रादिकाष्ठासु पूज्या दिक्पालहेतवः ॥ ६७ ॥
वज्रं शक्तिर्दण्डखड्गौ पाशोऽङ्कुशगदे अपि ।
त्रिशूलचक्रपद्मानि दशदिक्पालहेतवः ॥ ६८ ॥
एवमिष्ट्वा प्राणशक्तिं पञ्चावरणसंयुताम् ।
ध्यायन् हृदि करं धृत्वा विजपेत्तन्मनुं सुधीः ॥ ६९ ॥
वक्ष्येऽधुना मनोस्तस्योद्धारं ध्यातृसुखावहम् ।
पाशं मायां सृणिं प्रोच्य यादीन् सप्तेन्दुसंयुतान् ॥ ७० ॥
तारान्वितं नभः सप्तवर्णं मन्त्रं ततोऽजपाम् ।
मम प्राणा इह प्राणा मम जीव इह स्थितः ॥ ७१ ॥
मम सर्वेन्द्रियाण्युक्त्वा मम वाङ्मन ईरयेत् ।
चक्षुःश्रोत्रघ्राणपदान् प्राणा इह समीर्य्य च ॥ ७२ ॥
आगत्य सुखमुच्चार्य्य चिरन्तिष्ठन्त्विदं पठेत् ।
वह्निजायां च सप्तार्णमन्त्रमन्ते पुनर्वदेत् ॥ ७३ ॥
प्राणप्रतिष्ठामन्त्रोऽयं स्मृतः प्राणनिधापने ।
ममेत्यस्य पदस्यादौ पाशादीनि समुच्चरेत् ॥ ७४ ॥
यन्त्रेषु प्रतिमादौ वा प्राणस्थापनमाचरन् ।
मम स्थाने तस्य तस्य षष्ठ्यन्तामभिधां वदेत् ॥ ७५ ॥

---

इन्द्रादयः प्रसिद्धदिक्पालाः पञ्चावरणे पूज्यपूजकयोर्मध्ये प्राची ॥६५—६९॥ ममसुदर्शन पाशमिति। आं ह्रीं क्रौं यं रं लं वं शं षं सं तारान्वितं नभः ॐसवर्णो वक्ष्यमाणः अजपा हंसः ॥ ७०—७५ ॥

सबिन्दवो मेरुहंसाकाशाः सर्गी भृगुः पुनः।
मायेति तारुरुद्धोऽयं मन्त्रः सप्ताक्षरो मतः ॥ ७६ ॥
एवं प्राणान् प्रतिष्ठाप्य मातृकान्यासमाचरेत्।
अकाराद्याः क्षकारान्ता वर्णाः प्रोक्तास्तु मातृकाः ॥ ७७ ॥
प्रजापतिर्मुनिस्तस्या गायत्रीच्छन्द ईरितम्।
सरस्वती देवतोक्ता विनियोगोऽखिलाप्तये।
हलो वीजानि चोक्तानि स्वराः शक्तय ईरिताः ॥ ७८ ॥
मूर्ध्नि वक्त्रे हृदि न्यस्येद्दृष्यादीन् साधकोत्तमः।
पञ्चवर्गैर्यादिभिश्च षड़ङ्गानि समाचरेत् ॥ ७९ ॥
क्लीवहीनशशाङ्काब्यक्रस्वदीर्घान्तरस्थितैः।
सानुस्वारैर्जातियुक्तैर्ध्यायेद्देवीं हृदम्बुजे ॥ ८० ॥
पञ्चाशद्वर्णैरचिताङ्गभागां धृतेन्दुखण्डां कुमुदावदाताम्।
वराभये पुस्तकमक्षसूत्रं भजे गिरं सन्दधतीं त्रिनेत्राम् ॥ ८१ ॥
ध्यात्वैवं पूजयेत् पीठे देवताः पूर्वमीरिताः।
पीठशक्तीस्तदुपरि सरस्वत्या नवार्चयेत् ॥ ८२ ॥
मेधा प्रज्ञा प्रभा विद्या श्रीर्धृतिस्मृतिबुद्धयः।
विद्येश्वरीति संप्रोक्ता मातृकापीठशक्तयः ॥ ८३ ॥

---

सप्तार्णमुद्धरति सबिन्दव इति। मेरुः घः हंसः सः आकाशो हः भृगुः सः माया ह्रीं तारुरुद्धः प्रणवपुटितः तेन ऊं घं हंसः ह्रीं ऊमिति सप्तार्णः ॥ ७६ ॥

मातृकामाह, आकाराद्या इति। प्रसिद्धा इत्यर्थः ॥ ७७ ॥ ७८ ॥

षड़ङ्गमाह पञ्चेति। क्लीवा ऋ ऌ ॡ तद्धीनाः सानुस्वारा ये ह्रस्वदीर्घास्तदन्तःस्थितैः सबिन्दुभिः जातयो हृदयाय नम इत्यादयस्तद्युक्तैः षड़्वर्गैः षड़ङ्गं अं कं खं गं घं ङं आं हृदयाय नम इत्यादि ॥ ७९ ॥ ८० ॥

ध्यानमाह पञ्चाशदिति। वर्णैरङ्गरचना न्यासाद्बोध्या वराक्षस्रजौ दक्षयोः पुस्तकाभये वामयोः गिरं सरस्वतीम् ॥ ८१ ॥

पूर्वमीरिता मण्डूकाद्याः ॥ ८२ ॥ ८३ ॥

वियद्भृगुस्थमनुयुक् विसर्गाढ्यश्च मातृका ।
योगपीठाय नत्यन्तो मनुरासनदेशने ॥ ८४ ॥
मूर्त्तिं सङ्कल्प्य मूलेन तस्यां वाणीं प्रपूजयेत् ।
आदावङ्गानि सम्पूज्य द्वितीये पूजयेत् स्वरौ ॥ ८५ ॥
द्वौ द्वौ तृतीये वर्गांश्च वर्गशक्तीश्चतुर्थके ।
व्यापिनी पालिनी चापि पावनी क्लेदनी पुनः ॥ ८६ ॥
धारिणी मालिनी पश्चाद्धंसिनी शाङ्खिनी तथा ।
वर्गशक्तय इत्युक्ताः पञ्चमे त्वष्टमातरः ॥ ८७ ॥
षष्ठे शक्रादयो देवाः सप्तमे वज्रपूर्वकाः ।
इत्थं सम्पूज्य देवेशि ! न्यसेद्वर्णांन्निजाङ्गके ॥ ८८ ॥
ललाटे मुखवृत्तेऽक्षिश्रवो नासासु गण्डयोः ।
ओष्ठयोर्दन्तपंक्त्योश्च मूर्ध्नि वक्त्रे न्यसेत् स्वरान् ॥ ८९ ॥
बाह्वोः सन्धिषु साग्रेषु कचवर्गौ न्यसेत् सुधीः ।
टतवर्गौ पदोस्तद्वत् पार्श्वयोः पृष्ठदेशतः ॥ ९० ॥
नाभौ कुचौ पवर्गञ्च हृदंसककुदंसतः ।
न्यस्य पादिचतुर्वर्णान् शादिषट्कं ततो न्यसेत् ॥ ९१ ॥
हृदादिकरयोरङ्घ्रोर्जठरे वदने तथा ।
सृष्टिन्यासं विधायैवं स्थितिन्यासं समाचरेत् ॥ ९२ ॥
ऋषिश्छन्दश्च पूर्वोक्तं देवता विश्वपालिनी ।
उपविष्टां वज्रभाङ्के ध्यायेद्देवीमनन्यधीः ॥ ९३ ॥
मृगबालं वरं विद्यामक्षसूत्रं दधत् करैः ।
मालाविद्यालसद्धस्तां वहन् ध्येयः शिवोगिरम् ॥ ९४ ॥

---

आसनमन्त्रमाह वियत् हः भृगुः सः मनुरौ तेन हसौः मातृकायोगपीठाय नम इति ॥ ८४—९१ ॥

हृदादीनि करपादोदरकुक्षिषु सन्न्यसेत् स्थितिन्यासे ध्यानमाह मृगेति ।

एवं ध्यात्वा डकाराद्यान् वर्णानङ्गेषु विन्यसेत् ।
गुल्फादिजानुपर्य्यन्तं स्थितिन्यासोऽयमीरितः ॥ ९५ ॥
न्यासे संहारसंज्ञे तु ऋषिश्छन्दश्च पूर्ववत् ।
संहारिणी सपत्नानां शारदा देवता स्मृता ॥ ९६ ॥
अक्षस्रक्टङ्कसारङ्गविद्याहस्तां त्रिलोचनाम् ।
चन्द्रमौलिं कुचानम्रां रक्ताजस्थाङ्घ्रिरभजे ॥ ९७ ॥
ध्यात्वैवं विन्यसेद्वर्णान् चाद्यानन्तान् विलोमतः ।
सृष्टिन्यासे तु सर्गान्ताः सर्गविन्दन्तिकाः स्थितौ ॥ ९८ ॥
विन्दन्ताः संहृतौ वैषा पूर्ववच्चाङ्गपूजने ।
न्यस्याः सर्वत्र नत्यन्ता वर्णा वा तारसम्पुटाः ॥ ९९ ॥
सृष्टिन्यासं स्थितिन्यासं पुनः कुर्य्यात् प्रयत्नतः ।
अन्ये तु मातृकान्यासाः कथ्याः पूजातरङ्गके ॥ १०० ॥
मन्त्रस्नानादिविधयो गद्यास्तत्रैव ते मया ।
भारतीमेवमाराध्य भजेदिष्टान् मनून् सुधीः ॥ १०१ ॥
विष्णुः शिवो गणेशोऽर्को दुर्गा पञ्चैव देवताः ।
आराध्याः सिद्धिकामेन तत्तन्मन्त्रैर्यथोदितम् ॥ १०२ ॥
आदौ देवं वशीकर्त्तुं पुनश्चरणमाचरेत् ।
तीर्थादौ निर्जने स्थाने भूमिग्रहणपूर्वकम् ॥ १०३ ॥
नवधा तां धरां कृत्वा पूर्वादिषु समालिखेत् ।
कोष्ठेषु सप्तवर्गांश्च लक्षौ मध्ये तथा स्वरान् ॥ १०४ ॥

---

स्रगविधे वामयोः वराभयमूर्ते दक्षयोः देव्या नाशाविधे दक्षवामयोः ॥ ९३—९५॥

संहारन्यासे ध्यानमाह अक्षेति । स्रगविधे वामयोः अक्षस्रक्टङ्कौ दक्षयोः टङ्कः परशुः ॥ ९६—९८ ॥

नत्यन्ताः अनमः तारसंपुटाः ओं अ ओंनित्यादि ॥ ९९—१०३ ॥

दीपस्थानमाह नवधेति । जपस्थानभूमिं नवधा कृत्वा पूर्वादिकोष्ठेषु कचट-

चैत्रनामादिमो वर्णो यत्र कोष्ठे भवेत्ततः ।
उपविश्य जपं कुर्य्यान्नान्यस्मिन् दुःखदे स्थले ॥ १०५ ॥
आमध्याह्नं जपं कुर्य्यादुपांशु वाथ मानसम् ।
हविष्यं निशि भुञ्जीत त्रिःस्नाय्यभ्यङ्गवर्जितः ॥ १०६ ॥
व्यग्रतालस्यनिष्ठीवक्रोधपादप्रसारणम् ।
अन्यभाषान्त्यजेक्षे च जपकाले त्यजेत् सुधीः ॥ १०७ ॥
स्त्रीशूद्रभाषणं निन्दां ताम्बूलं शयनं दिवा ।
प्रतिग्रहं नृत्यगीते कौटिल्यं वर्जयेत् सदा ॥ १०८ ॥
भूशय्यां ब्रह्मचर्य्यञ्च त्रिकालं देवतार्चनम् ।
नैमित्तिकार्चनं देवस्तुतिं विश्वासमाश्रयेत् ॥ १०९ ॥
प्रत्यहं प्रत्यहन्तावन्नैवं न्यूनाधिकं क्वचित् ।
एवं जपं समाप्यान्ते दश होमं समाचरेत् ॥ ११० ॥
तत्तत्कल्पोदितैर्द्रव्यैस्तद्विधानमुदीर्य्यते ।
प्राणायामं षड़ङ्गञ्च कृत्वा मूलेन मन्त्रवित् ॥ १११ ॥
कुण्डे वा स्थण्डिले कुर्य्यात् संस्कारांणाञ्चतुष्टयम् ।
मूलेनेक्षणमन्त्रेण प्रोक्षणं ताड़नं कुशैः ॥ ११२ ॥
वर्मणा मुष्टिना सिञ्चन् लिखेद् यन्त्रं तदन्तरे ।
वह्निकोणषड़स्राष्टदलभूमन्दिरात्मकम् ॥ ११३ ॥
मध्ये तारपुटां मायां लिखित्वा पीठमर्चयेत् ।
मण्डूकात् परतत्त्वान्तं पीठशक्तीर्जयादिकाः ॥ ११४ ॥

---

तपवशवर्गान् चच इत्यष्टमे विलिख्य मध्यकोष्ठमपि नवधा विधाय तत्र पूर्वादिषु स्वरद्वन्द्वं चैत्रनामादिवर्णो यत्र कोष्ठे तदेव दीपस्थानं सिद्धिदम् ॥ १०४ ॥ १०५ ॥

पुरश्चरणधर्मानाह आमध्याह्नमिति उपांशु शनैर्वर्णोच्चारणं मानसं मनसैव त्रिःस्नायी विषयस्नानशीलः ॥ १०६ ॥

अन्यैः सम्भाषणमन्यभाषाः अन्त्यजानामीक्षां दर्शनं त्यजेत् ॥ १०७—११० ॥

होमविधिमाह प्राणायाममिति ॥ १११ ॥

वागीशीवागीश्वरयोर्योगपीठात्मने नमः।
मायादिकः पीठमन्त्रस्तयोस्तेनासनं दिशेत्॥ ११५॥
यजेत्तौ तारमायाभ्यां गन्धाद्यैरुपचारकैः।
लक्ष्मीनारायणौ त्वर्चेद्वैष्णवे होमकर्मणि॥ ११६॥
सूर्यकान्तादरणितः श्रोत्रियागारतोऽपि वा।
पात्रेण पिहिते पात्रे वह्निमानाययेत्ततः॥ ११७॥
अस्त्रेणादाय तत्पात्रं वर्मणोद्घाटयेत्तु तम्।
अस्त्रमन्त्रेण नैरृत्ये क्रव्यादांशं ततस्त्यजेत्॥ ११८॥
मूलेन पुरतो धृत्वा संस्कारांश्च ततश्चरेत्।
वीक्षणाद्यान् पुरा प्रोक्तानभ्युक्षणमाचरन्॥ ११९॥
परमात्मानलेनाथ जाठरेणापि वह्निना।
स्मरन्नैक्यं वह्निबीजाच्चैतन्यं योजयेत्ततः॥ १२०॥
तारेण चाभिमन्त्र्याग्निं सुधया धेनुमुद्रया।
अमृतीकृत्य संरक्षेदस्त्रमन्त्रेण मन्त्रवित्॥ १२१॥
मुद्रया त्ववगुण्ठन्या कवचेनावगुण्ठयेत्।
कुण्डोपरि ततो वह्निं भ्रामयेत् त्रिर्ध्रुवं पठन्॥ १२२॥
शय्यागतामृतुस्नातां नीलेन्दीवरधारिणीम्।
देवेन भुज्यमानां तां स्मृत्वा तद्योनिमण्डले॥ १२३॥
ईश्वरेतोधिया वह्निं स्थापयेदात्मसम्मुखम्।
मूलं नवार्णञ्च पठन् जानुस्पृष्टधरातलः॥ १२४॥

---

अस्त्रं फट् वर्मणा हुङ्कारेण भूमन्दिरं चतुष्कोणम्॥ ११२—११७॥
क्रव्यादांशमिति मांसाशिना वह्नेर्यस्तत्र भागस्तं पश्चिमे त्यजेत्॥ ११८॥११९॥
वह्निबीजात् रमिति बीजात्॥ १२०॥
सुधया वं बीजेन धेनुमुद्राखण्डं वक्ष्यते॥ १२१॥
अवगुण्ठन्या अपि वक्ष्यते कवचेन हुं बीजेन ध्रुवम्॥ १२२—१२४॥

रेफाधीशेन्दुसंयुक्तं गगनं वह्निचै ततः ।
तन्याय हृदयान्तोऽयं नवार्णोऽग्निनिधापने ॥ १२५ ॥
विश्वाख्याचमनं देवीदेवयोर्ज्वालयेदसुम् ।
चतुर्विंशतिवर्णेन मन्त्रेण श्रवणादिभिः ॥ १२६ ॥
चित्पिङ्गलं हनद्वन्द्वं दहयुग्मं पचद्वयम् ।
सर्वज्ञाज्ञापय स्वाहा मन्त्रो वेदभुजाक्षरः ॥ १२७ ॥
प्रदर्श्य ज्वालिनीं मुद्रामुत्थाय विहिताञ्जलिः ।
श्लोकरूपेण मन्त्रेणोपतिष्ठेत हुताशनम् ॥ १२८ ॥
अग्निं प्रज्वलितं वन्दे जातवेदं हुताशनम् ।
सुवर्णवर्णममलं समिद्धं विश्वतोमुखम् ॥ १२९ ॥
अथाग्निमन्त्रं विन्यस्य तद्विधानमुदीर्य्यते ।
वैश्वानरान्ते जातेति वेदान्ते स्यादिहावह ॥ १३० ॥
लोहिताक्षपदात् सर्वकर्म्माण्यन्ते तु साधय ।
वह्निप्रियान्तो मन्त्रोऽयं षड्विंशत्यक्षरान्वितः ॥ १३१ ॥
ऋषिश्छन्दो देवतास्य भृगुगायत्र पावकाः ।
रं बीजं ठद्वयं शक्तिर्हं वने विनियोजनम् ॥ १३२ ॥

---

नवार्णमुद्धरति पर्वीश ज गगनं ह: शेषं स्वरूपं हृदयान्तो नमोऽन्तः तेन हं वह्निचैतन्याय नम इत्यग्निस्थापने नवाक्षरो मन्त्रः हं वह्निचैतन्याय नमः ॥ १२५ ॥

विश्वाख्य दत्त्वा ॥ १२६ ॥

चतुर्विंशतिवर्णमुद्धरति चिदिति चित्पिङ्गल हन हन दह दह पच पच सर्वज्ञाज्ञापय स्वाहा वेद ४ भुजाक्षरश्चतुर्विंशतिवर्णः ॥ १२७ ॥

ज्वालिनीमुद्रालक्षणं मणिबन्धयुतौ कृत्वा प्रसृताङ्गुलिकौ करौ कनिष्ठाङ्गुष्ठयुगले मिलितान्तःप्रसारिते । ज्वालिनीनाम मुद्रेयं वैश्वानरप्रियङ्करीति ॥१२८॥

श्लोकरूपं मन्त्रमाह अग्निमिति ॥ १२९ ॥

अग्निमन्त्रमाह वैश्वानर जातवेद इहावह लोहिताक्ष सर्वकर्माणि साधय स्वाहेति ॥ १३० ॥ १३१ ॥

ठद्वयं स्वाहा ॥ १३२ ॥

लिङ्गे पायौ मूर्ध्नि वक्त्रे नसि नेत्रेऽखिलाङ्गके।
वक्त्रेजिह्वाः स्वाबीजाद्या न्यसेत् ङेन्ता नमोऽन्विताः ॥१३३
हिरण्या गगना रक्ता कृष्णा सुप्रभयान्विता।
बहुरूपातिरक्तेति जिह्वादसुनसो मताः ॥ १३४ ॥
दीपिकानलवायुस्थाः स्वाद्या वर्णा विलोमतः।
सैन्दवः सप्तजिह्वानां सप्तानां बीजताङ्गताः ॥ १३५ ॥
गीर्वाणपितृगन्धर्वयक्षनागपिशाचकाः।
राक्षसाश्चेति जिह्वानां देवतास्तत्स्थले न्यसेत् ॥ १३६ ॥
न्यासेऽर्चने व्युत्क्रमः स्याद्बहुरूपातिरिक्तयोः।
नेत्रेऽतिरक्ता न्यस्तव्या सर्वाङ्गे बहुरूपिकी ॥ १३७ ॥
सहस्रार्चिषे हृदयं स्वस्तिपूर्णाय मस्तकम्।
उत्तिष्ठ पुरुषायेति शिखामन्त्रोऽयमीरितः ॥ १३८ ॥
धूमान्ते व्यापिने वर्म सप्तजिह्वाय नेत्रकम्।
अस्त्रं धनुर्धरायेति षडङ्गानि समाचरेत् ॥ १३९ ॥
मूर्ध्नि वामेऽंसके पार्श्वे कटौ लिङ्गे कटौ पुनः।
दक्षे पार्श्वेऽंसके न्यस्येत् मूर्त्तीरष्टौ विभावसोः ॥ १४० ॥
ताराग्नये पदाद्यास्ताश्चतुर्थी नमसान्विताः।

---

ङेन्ताश्चतुर्थ्यन्ताः ॥ १३३ ॥ १३४ ॥

जिह्वाबीजान्युद्धरन्ति दीपिकेति। दीपिका ऊ अनलो रः वायुर्यः एतेषु स्थिताः सकाराद्या विलोमवर्णाः स ष श वलरयेति सैन्दवोऽनुस्वाराद्या इमे सप्तहिरण्यादिजिह्वानां बीजानीत्यर्थः तत्र स्रूं हिरण्यायै नमः ष्रूं गगनायै नमः श्रूं रक्तायै नमः व्रूं कृष्णायै नमः ल्र्यूं सुप्रभायै नमः र्रूं बहुरूपायै नमः य्रूं अतिरक्तायै नमः ॥ १३५ ॥

गीर्वाणादयो जिह्वाधिदेवा जिह्वास्थानेषु न्यस्याः सुरेभ्यो नम .लिङ्गे इत्यादि प्रयोगः ॥ १३६ ॥ १३७ ॥

मस्तकं शिरोमन्त्रः ॥ १३८ ॥ १४० ॥

जातवेदाः सप्तजिह्वो हव्यवाहन इत्यपि ॥ १४१ ॥
अश्वोदरजसंज्ञोऽन्यस्तथा वैश्वानराह्वयः ।
कौमारतेजाः स्याद्विश्वमुखो देवमुखस्तथा ॥ १४२ ॥
ततो न्यसेन्निजे देहे पीठहाटकरेतसः ।
वह्निमण्डलपर्य्यन्तं मण्डूकादि यथोदितम् ॥ १४३ ॥
पीता श्वेतारुणा कृष्णा धूम्रा तीव्रा स्फुलिङ्गिनी ।
रुचिरा ज्वालिनी चेति कृशानोः पीठशक्तयः ॥ १४४ ॥
बीजं वह्न्यासनायेति हृदन्तः पीठमन्त्रकः ।
एवं विन्यस्य पीठान्तं पावकं चिन्तयेत्तनौ ॥ १४५ ॥
त्रिनेत्रमारक्ततनुं सुशुक्लवस्त्रच्छवर्णस्रजमग्निमीड़े ।
वराभयस्वस्तिकशक्तिहस्तं पद्मस्थमाकल्पसमूहयुक्तम्॥१४६
एवं ध्यात्वार्चनं कुर्य्यान्मानसं विधिवद्वसोः ।
परिषिञ्चेत्ततस्तोयैः कुण्डं स्थण्डिलमेव वा ॥ १४७ ॥
दर्भैः परिस्तरेदग्निं प्रागग्रैरुदगग्रकैः ।
प्रत्यग्दक्षिणसौम्यासु न्यसेत् त्रीन् परिधीन् क्रमात् ॥१४८॥
पालाशान् विल्वजांस्तेषु ब्रह्मविष्णुशिवान् यजेत् ।
वह्नौ तत् पीठमभ्यर्च्यावाहयेत् स्वहृदोऽनलम् ॥ १४९ ॥
गन्धादिभिः समभ्यर्च्य पूजयेत् पावकावृतीः ।
षट्सु कोणेषु मध्ये च जिह्वास्तद्दे वता यजेत् ॥ १५० ॥
ईशानादिषु वाय्वन्तकोणेषु षट् समर्चयेत् ।
हिरण्याद्यतिरक्तान्तां मध्ये तु बहुरूपिणीम् ॥ १५१ ॥

---

तारेति । प्रणवाग्रये पदपूर्वाः ङेनमोऽन्ताः ओं अग्नये जातवेदसे नमो मूर्भ्न्यादि ॥ १४१ ॥ १४२ ॥

हाटकरेतसो वह्नेः मण्डलपर्य्यन्तं एवं पीठदेवताः पूज्याः ततः पीताद्याः पीठशक्तयः ॥ १४३ ॥ १४४ ॥

बीजमिति । रं वह्न्यासनाय नमः इति पीठमन्त्रः ॥ १४५ ॥

केसरेष्वङ्गपूजा स्याद्दलेष्वष्टसु मूर्त्तयः ।
मातरोऽष्टौ दलान्तेषु भैरवाः स्युस्तदग्रतः ॥ १५२ ॥
धरापुरे तु शक्राद्या वज्राद्यायुधसंयुताः ।
एवमावरणैर्युक्तं सप्तभिः पावकं यजेत् ॥ १५३ ॥
असिताङ्गो रुरुश्चण्डः क्रोध उन्मत्तसंज्ञकः ।
कपाली भीषणश्चापि संहारश्चाष्टभैरवाः ॥ १५४ ॥
वामे कुशानथास्तीर्य्य तत्र वस्तूनि निक्षिपेत् ।
प्रणीताप्रोक्षणीपात्रे आज्यस्थालीस्रुवं स्रुचम् ॥ १५५ ॥
अधोमुखानि चैतानि होमद्रव्यं घृतं कुशान् ।
समिधः पञ्चपालाशीरन्यदप्युपयोगि यत् ॥ १५६ ॥
कृत्वा पवित्रे मूलेन प्रोक्षेत्तानि शुभाम्भसा ।
उत्तानानि विधायाथ प्रणीतां पूरयेज्जलैः ॥ १५७ ॥
तीर्थमन्त्रेण तीर्थानि सृण्या तत्राह्वयेत् सुधीः ।
पवित्रे अक्षतांस्तत्र निक्षिप्योत्पवनं चरेत् ॥ १५८ ॥
अथोदीच्यां निधायैतां प्रोक्षण्यां तज्जलं क्षिपेत् ।
हवनीयं द्रव्यजातमुक्षेत्तोयैः पवित्रगैः ॥ १५९ ॥
मूलेन मूलगायत्र्या यद्वा हृदयमन्त्रतः ।
दक्षिणे पीठमासाद्य तत्र ब्रह्माणमाह्वयेत् ॥ १६० ॥
अणिमाद्याः सिद्धयोऽष्टौ ब्रह्मणः पीठदेवताः ।

---

ध्यानमाह त्रिनेत्रमिति । वरस्वस्तिकौ दक्षयोः अभीतिशक्ती वामयोः आकल्पा आभरणानि तत्सद्युतम् ॥ १४६—१५३ ॥

भैरवानाह असिताङ्ग इति ॥ १५३—१५७ ॥

तीर्थमन्त्रेण गङ्गे च यमुने चैव गोदावरि सरस्वति नर्मदे सिन्धुकावेरि जलेऽस्मिन् सन्निधिं कुर्वित्यनेन सृण्याङ्कुशमुद्रया दक्षिणां मध्यमिकां कृत्वा तर्ज्जनीं मध्यपर्वणि । संयोज्याकुञ्चयेत् किञ्चिन्मुद्रैषाङ्कुशसंज्ञिकेति लक्षणम् ॥१५८—१६०॥

तारहृत्पूरको ङेऽन्तो ब्रह्ममन्त्रस्य पूजने ॥ १६१ ॥
हस्ताभ्यां स्रुक्स्रुवौ धृत्वा तापयेत्त्रिरधोमुखौ ।
वामहस्तेन तौ धृत्वा दर्भैर्दक्षेण मार्ज्जयेत् ॥ १३२ ॥
संप्रोक्ष्य प्रोक्षणीतोयैः प्रतप्य पूर्ववत् पुनः ।
न्यस्याग्नौ मार्ज्जनान् दर्भांस्तयोः शक्तित्रयं न्यसेत् ॥१६३॥
इच्छाज्ञानक्रियासंज्ञाश्चतुर्थी नमसान्विताः ।
दीर्घत्रयेन्दुयुक् व्योमपूर्वकं स्थानकत्रये ॥ १६४ ॥
हृदा स्रुचि न्यसेच्छक्तिं स्रुवे शम्भूं ततस्तु तौ ।
सूत्रत्रयेण संवेष्ट्य संपूज्य कुसुमादिभिः ॥ १६५ ॥
कुशोपरि न्यसेद्दक्षे तयोः संस्कार ईरितः ।
अस्त्रोक्षितायामाज्यस्य स्थाल्यामाज्यं विनिक्षिपेत् ॥ १६६॥
वीक्षणादिकसंस्कारसंस्कृतं मूलमन्त्रतः ।
गोमुद्रयामृतीकृत्य षट्संस्कारान् ततश्चरेत् ॥ १६७ ॥
कुण्डोद्धृते वायुकोणे स्थितेऽङ्गारे विनिक्षिपेत् ।
हृदेऽतितापनं प्रोक्तं दर्भयुग्मं प्रदीपितम् ॥ १६८ ॥
आज्ये क्षिपेत् हृदा मन्त्री पवित्रीकरणन्त्विदम् ॥ १६९ ॥
आज्यं नीराजयेद्दीप्तदर्भयुग्मेन वर्मणा ।
अभिद्योतनमुक्तं तत् दीप्तं दर्भत्रयं घृते ॥ १७० ॥
दर्शयेदस्त्रेणोद्योतो गृहीत्वा घृतपात्रिकाम् ।
संयोज्याग्नौ तदङ्गारात् सलिलं संस्पृशेत् सुधीः ॥ १७१ ॥

---

चपिमाद्या चटमी वक्तव्यं । ब्रह्ममन्त्रमुद्धरति तारेति । ओं नमो ब्रह्मणे इति ॥ १६१॥

स्रुक्स्रुवसंस्कारमाह हस्ताभ्यामिति ॥ १६२ ॥ १६३ ॥

शक्तित्रयमाह इच्छेति । दीर्घत्रयं आ ई ऊ व्योम हः तत्पूर्वकां ह्रां इच्छाशक्त्यै नमो मूले ह्रीं ज्ञानशक्त्यै नमः मध्ये ह्रूं क्रियाशक्त्यै नमः अग्रे ॥ १६२—१६६ ॥

अङ्गुष्ठानामिकाभ्यां तु दर्भावादाय निक्षिपेत् ।
त्रिरग्निसम्मुखे त्वाज्यमस्त्रेणोत्पवनं त्विदम् ॥ १७२ ॥
हृदात्मसम्मुखं तद्वदाज्यक्षेपस्तु संप्लवः ।
नीराजनादिसंस्कारेष्वग्नौ दर्भान् विनिक्षिपेत् ॥ १७३ ॥
दर्भत्रयं ग्रन्थियुतं घृतमध्ये विनिक्षिपेत् ।
वामदक्षिणयोः पक्षौ स्पृत्वा नाड़ीत्रयं स्मरेत् ।
दक्षिणाद्वामतो मध्यात् हृदादाय घृतं सुधीः ॥ १७४ ॥
अग्नयेऽग्निप्रिया सोमाय स्वाहेत्यग्निनेत्रयोः ।
जुहुयादग्नीषोमाभ्यां स्वाहेत्यक्षिण तृतीयके ॥ १७५ ॥
पातयेदाहुतिः शेषमाहुतिग्रहणस्थले ।
भूयो हृदा दक्षभागादादायाज्यं मुखे यजेत् ॥ १७६ ॥
अग्नये स्विष्टिकृते तत्तन्नेत्रस्योद्घाटनं मतम् ।
नरसिंहं विना विष्णुमन्त्रे नेत्रद्वयं यजेत् ॥ १७७ ॥
नरसिंहान्यदेवेषु वह्नेर्नेत्रत्रयं स्मृतम् ।
महाव्याहृतिभिर्व्यस्तसमस्ताभिश्चतुष्टयम् ॥ १७८ ॥
आहुतीनां त्रयं वह्निमन्त्रेणैव ततश्चरेत् ।
घृताहुतिभिरष्टाभिरेकैकां संस्कृतिं चरेत् ॥ १७९ ॥
ओमस्याग्नेरमुं संस्कारं करोम्यग्निवल्लभा ।
इत्यं मनुं जपन् गर्भाधानं पुंसवनं ततः ॥ १८० ॥
सीमन्तोन्नयनं जातकर्म कृत्वा ततश्चरेत् ।
वह्नौ पञ्चसमिद्धोमान्नालापनयनं वसोः ॥ १८१ ॥

---

गोमुद्रा धेनुमुद्रा ॥ १६७—१७२ ॥

नाड़ीत्रयमिति । इड़ा पिङ्गला सुषुम्णाख्यं तृतीयामध्ये चिन्त्या ॥ १७४ ॥

हृदा नम इति मन्त्रेण अग्नये स्वाहेति दक्षनेत्रे सोमाय स्वाहेति वामे तदाहुतिचतुष्टयेनाग्नेर्नेत्रमुखप्रकाशो भवतीत्यर्थः । ओं अस्याग्नेर्गर्भाधानसंस्कारं करोमि स्वाहेत्यादि ॥ १७५—१८० ॥

कुर्य्याद्देवाभिधानेन पूर्ववन्नामसङ्ग्रहम् ।
नामानन्तरमेतस्य पितरौ स्वेऽर्पयेद्धृदि ॥ १८२ ॥
अन्नप्राशनन्तथा चौलोपनयौ दारयोजनम् ।
संस्काराः स्युर्विवाहान्ता ह्त्यन्ताः क्रूरकर्मणि ॥ १८३ ॥
एकैकामाहुतिं कुर्य्याद्वह्नेर्जिह्वाङ्गमूर्त्तिभिः ।
इन्द्रादिभिश्च वज्राद्यैर्द्विठान्तैर्जुहुयात्ततः ॥ १८४ ॥
स्रुवेणाज्यं चतुर्वारं निधाय स्रुचि तां सुधीः ।
अपिधाय स्रुवेणैतौ गृह्णीयात् करयुग्मतः ॥ १८५ ॥
तिष्ठन्मूलं तयोर्नाभौ ह्रत्वाग्रे कुसुमं क्षिपेत् ।
वामस्तनान्तं तन्मूलं क्रत्वाग्निमनुना सुधीः ॥ १८६ ॥
जुहुयाद्वौषडन्तेन सम्यक्स्यर्थमतन्द्रितः ।
महागणेशमन्त्रेण व्यस्तेन दशधा ततः ॥ १८७ ॥
जुहुयाच्च समस्तेन चतुर्वारं घृताहुतीः ।
पूर्वपूर्वयुतं वीजषट्कं वाणाश्च सायकाः ॥ १८८ ॥
मुनयो मार्गणाश्चेति विभागस्तन्मनोः स्मृतः ।
तारो लक्ष्मीर्गिरिसुता कामो भूर्गणनायकः ॥ १८९ ॥
चतुर्थ्यन्तो गणपतिर्वरान्ते वरदेति च ।
सर्वान्ते जनमित्युक्त्वा मे वशान्ते तु मानय ॥ १९० ॥

---

पञ्चसमिधां होमाद्दसीरग्रे: । स्नापनयनाख्यः संस्कारः देवाभिधानेन देव- नाम्ना गुरूणोऽग्रे नामपूर्ववत् घृताहुत्यष्टकेन कुर्य्यात् रामाग्निः कृष्णाग्निरित्यादि। एतस्याग्रे: पितरौ वागीशीवागीशौ कुण्डात् स्वहृदि न्यसेत् उपनयनम् उपवीतं दारयोजनं विवाहम् ॥ १८१—१८५ ॥

कुसुमं पुष्पं दशधा व्यस्तेन विभक्तेन ॥ १८६—१८७ ॥

तस्यैव विभागमाह पूर्वेति । वीजषट्कं वाणः पञ्चवर्णाः सायकाः पञ्चैव मुनयः सप्तमार्गणाः पञ्च । गणेशमन्त्रमाह तार इति । तार ॐ लक्ष्मीः श्रीं गिरिसुता ह्रीं काम क्लीं भूः ग्लौं गणनायकः गं इति वीजषट्कं गणपतये वर-

स्वाहान्तो वसुयुग्मार्णो महागणपतेर्मनुः ।
एवं कृत्वाग्निसंस्कारं पीठं देवस्य पूजयेत् ॥ १९१ ॥
तत्रेष्टदेवमावाह्य मुद्रा आवाहनादिकाः ।
प्रदर्श्य वह्निरूपस्य देवस्य वदने पुनः ॥ १९२ ॥
मूलेन जुहुयात् पञ्चनेत्रसंख्या घृताहुतीः ।
वक्त्रैकीकरणं त्वग्निदेवयोस्तेन जायते ॥ १९३ ॥
नाड़ीसन्धानसिध्यर्थं वह्निरेव तयोस्ततः ।
जुहुयान्मूलमन्त्रेण रुद्रसंख्या घृताहुतीः ॥ १९४ ॥
इष्टदेवस्यावृतीनामेकैकामाहुतिं चरेत् ।
ततस्तु मूलमन्त्रेण दशधा जुहुयात् घृतं ॥ १९५ ॥
ततः कल्पोक्तद्रव्येण दशांशं जुहुयाज्जपात् ।
होमं समाप्य कुर्वीत पूर्णाहुतिमनन्यधीः ॥ १९६ ॥
होमावशिष्टेनाज्येन पूरयित्वा स्रुचं सुधीः ।
पुष्पं फलं निधायाग्नौ स्रुवेणाच्छाद्य तां पुनः ॥ १९७ ॥
उत्थितो वौषडन्तेन मूलेन जुहुयाद्वसौ ।
तद्द्रव्येणावृतीनाञ्च जुहुयादाहुतिं पृथक् ॥ १९८ ॥
देवं विसृज्य स्वहृदि वह्नेर्जिह्वाङ्गमूर्त्तिभिः ।
जुहुयादाहुतीर्हुत्वा प्रोक्षेत्तं प्रोक्षणीजलैः ॥१९९ ॥
सम्प्रार्थ्यानेन मनुना नत्वा तं विसृजेद्धृदि ।
भो भो वह्ने महाशक्ते ! सर्वकर्म्मप्रसाधक ! ॥ २०० ॥
कर्म्मान्तरेऽपि संप्राप्ते सान्निध्यं कुरु सादरम् ।

---

वरद सर्वजनं मे वशमानय स्वाहेति विभागाः पूर्वपूर्वयुताः कार्य्याः ॐ श्रीं ह्रीं क्लीं ग्लौं गं इत्यादि ॥ १८८—१९१ ॥

आवाहनादिका अग्रे वक्तव्याः ॥ १९२ ॥

पञ्चनेत्रसंख्याः पञ्चविंशतिः ॥ १९३—२०० ॥

वह्नौ पवित्रे निक्षिप्य प्रणीताम्बु भुवि क्षिपेत् ॥ २०१ ॥
विधिं विसृज्य सकुशान् परिधीन् विन्यसेद्वसौ ।
एवं होमं समाप्याथ तर्पयेद्देवतां जलैः ॥ २०२ ॥
आवाह्य तद्दशांशेन तर्पणादभिषेचनम् ।
तर्पयामि नमश्चेति द्वितीयान्तेष्ट-पूर्वकम् ॥ २०३ ॥
मूलान्ते तु पदं देयं सिञ्चामीत्यभिषेचने ।
ततो नानाविधैरन्नैस्तर्पयेद्द्विजसत्तमान् ॥ २० ॥
इष्टरूपान् समाराध्य तेभ्यो दद्याच्च दक्षिणाम् ।
न्यूनं सम्पूर्णतामेति ब्राह्मणाराधनान्नृणां ।
देवताश्च प्रसीदन्ति सम्पद्यन्ते मनोरथाः ॥ २०५ ॥

इति श्रीमहीधरविरचिते मन्त्रमहोदधौ भूतशुद्ध्यादिकथनं नाम प्रथमस्तरङ्गः ॥

---

पवित्रादिप्रतिपत्तिमाह वह्नाविति । विधिं ब्रह्माणं विसृज्य दक्षिणां दत्त्वेति शेषः । सकुशान् परिस्तरणसहितान् वसावग्नौ ॥ २०१ ॥ २०२ ॥

तर्पणमन्त्रमाह । मूलमन्त्रान्ते अमुं तर्पयामि नम इति तर्पणे अमुमभिषिञ्चामीत्यभिषेके । जपाद्दशांशाद्धोमः तद्दशांशेन तर्पणं तद्दशांशेनाभिषेकः तद्दशांशेन विप्रभोजनमिति पञ्चाङ्गं पुरश्चरणमिति कनीयान् पक्षः अभिषेकवर्ज्यो मध्यमः तर्पणाभिषेकवर्ज्यस्त्र्यङ्गस्तूत्तमः पक्षः होमदशांशं द्विजभोजनमिति किं बहुना बहुब्राह्मणभोजने देवताप्रसादो भवति ॥ २०३—२०५ ॥

इति श्रीमन्त्रमहोदधिटीकायां प्रथमस्तरङ्गः ॥

## द्वितीयस्तरङ्गः ।

गणेशस्य मनून् वक्ष्ये सर्वाभीष्टप्रदायकान् ।
जलं चक्री वह्नियुतः कर्णे द्वाव्या च कामिका ॥ १ ॥
दारको दीर्घसंयुक्तो वायुः कवचपश्चिमः ।
षड़क्षरो मन्त्रराजो भजतामिष्टसिद्धिदः ॥ २ ॥
भार्गवो मुनिरस्योक्तं छन्दोनुष्टबुदाहृतम् ।
विघ्नेशो देवता वीजञ्च शक्तिर्यमितीरितम् ॥ ३ ॥
षड़क्षरैः सविधुभिः प्रणवाद्यैर्नमोऽन्तकैः ।
प्रकुर्य्याज्जातिसंयुक्तैः षड़ङ्गविधिमुत्तमम् ॥ ४ ॥
भ्रूमध्यकण्ठहृदयनाभिलिङ्गपदेषु च ।
मनोर्वर्णान् क्रमान्न्यस्य व्यापय्याथो स्मरेत् प्रभुम् ॥ ५ ॥

उद्यद्दिनेश्वररुचिं निजहस्तपद्मैः
पाशाङ्कुशाभयवरान् दधतं गजास्यम् ।
रक्ताम्बरं सकलदुःखहरं गणेशं
ध्यायेत् प्रसन्नमखिलाभरणाभिरामम् ॥ ६ ॥

---

आदौ सकलविघ्ननिवर्त्तकस्य श्रीगणेशस्य मन्त्रान् वक्तुं प्रतिजानीते गणेश-स्येति मनून् मन्त्रान् मन्यन्ते सर्वैरिति मन्त्रमुद्धरति । जलं वः चक्री कः वह्नि रः तेन युतः कामिका त कर्णे द्वाव्या उ विन्दुयुता तेन तुं दीर्घं ना तेन युतो दारको डः वायुर्यः कवचं पश्चिममन्ते यस्य स तथा वक्रतुण्डाय हुमिति सवि-धुभिः सानुस्वारैः ॐ वं नमः हृदयाय नमः इत्यादि व्यापय्य सर्वमन्त्रं सर्वशरीरे न्यसेदित्यर्थः ॥ १—५ ॥

ध्यानमाह उद्यदिति । पाशाभये वामयोः वराङ्कुशावन्ययोः ॥ ६ ॥

ऋतुलक्षं जपेन्मन्त्रमष्टद्रव्यैर्दशांशतः ।
जुहुयान्मन्त्रसंसिध्यै वाड़वान् भोजयेच्छुचीन् ॥ ७ ॥
इक्षवः शक्तवो रम्भाफलानि चिपिटास्तिलाः ।
मोदका नारिकेलानि लाजा द्रव्याष्टकं स्मृतम् ॥ ८ ॥
पीठमाधारशक्त्यादिपरतत्त्वान्तमर्चयेत् ।
तत्राष्टदिक्षु मध्ये च सम्पूज्या नवशक्तयः ॥ ९ ॥
तीव्रा च चालिनी नन्दा भोगदा कामरूपिणी ।
उग्रा तेजोवती सत्या नवमी विघ्ननाशिनी ॥ १० ॥
विनायकस्य मन्त्राणामेताः स्युः पीठशक्तयः ।
सर्वशक्तिकमान्ते तुलासनाय हृदन्तिमः ॥ ११ ॥
पीठमन्त्रस्तदीयेन बीजेनादौ समन्वितः ।
प्रदायासनमेतेन मूर्त्तिं मूलेन कल्पयेत् ॥ १२ ॥
तस्यां गणेशमावाह्य पूजयेदासनादिभिः ।
अभ्यर्च्य कुसुमैरीशं कुर्य्यादावरणार्चनम् ॥ १३ ॥
आग्नेयादिषु कोणेषु हृदयञ्च शिरः शिखाम् ।
वर्माभ्यर्च्याग्रतो नेत्रं दिक्ष्वस्त्रं पूजयेत् सुधीः ॥ १४ ॥
द्वितीयावरणे पूज्याः प्रागाद्यष्टैव शक्तयः ।
विद्या चैव विधात्री च भोगदा विघ्नघातिनी ॥ १५ ॥
निधिप्रदीपा पापघ्नी पुण्या पश्चाच्छशिप्रभा ।
दलाग्रेषु वक्रतुण्ड एकदंष्ट्रो महोदरः ॥ १६ ॥
गजास्यलम्बोदरकौ विकटो विघ्नराजकः ।
धूम्रवर्णस्तदग्रेषु शक्राद्या आयुधैर्युताः ॥ १७ ॥
एवमावरणैः पूज्यः पञ्चभिर्गणनायकः ।

---

वाड़वान् विप्रान् ॥ ७ ॥
द्रव्याष्टकमाह इक्षव इति ॥ ८—१० ॥

पूर्वोक्ता च पुरश्चर्य्या कार्य्या मन्त्रस्य सिद्धये ॥ १८ ॥
ततः सिद्धे मनौ काम्यान् प्रयोगान् साधयेन्निजान्।
ब्रह्मचर्य्यरतो मन्त्री जपेद्रविसहस्रकम् ॥ १९ ॥
षण्मासमध्याद्दारिद्र्यं नाशयत्येव निश्चितम्।
चतुर्थ्यादिचतुर्थ्यन्तं जपेद्दशसहस्रकम् ॥ २० ॥
प्रत्यहं जुहुयादष्टोत्तरं शतमतन्द्रितः।
पूर्वोक्तं फलमाप्नोति षण्मासाद्भक्तितत्परः ॥ २१ ॥
आज्याक्तान्नस्य होमेन भवेद्धनसमृद्धिमान्।
पृथुकैर्नारिकेलैर्वा मरिचैर्वा सहस्रकम् ॥ २२ ॥
प्रत्यहं जुह्वतो मासाज्जायते धनसञ्चयः।
क्षीरसिन्धुमरीचाक्तैरष्टद्रव्यैः सहस्रकम् ॥ २३ ॥
जुह्वन् प्रतिदिनं पश्चात् स्यात् कुबेर इवार्थवान्।
चतुःशतं चतुश्चत्वारिंशदाद्यं दिनं प्रति ॥ २४ ॥
तर्पयेत् मूलमन्त्रेण मण्डलादिष्टमाप्नुयात्।
अथ मन्त्रान्तरं वच्मे साधकानां निधिप्रदम् ॥ २५ ॥
रायस्पोषस्भृगुर्याब्यो ददिता मेषसात्वती।
सदृशौ दीरलधातुमातश्चो गगनं रतिः ॥ २६ ॥
ससद्या वल शार्ङ्गी खं नो षड्‌स्वरसंयुतः।
एकत्रिंशद्वर्णयुक्तो मन्त्रोऽभीष्टप्रदायकः ॥ २७ ॥
सायकैस्त्रिभिरष्टाभिश्चतुर्भिः पञ्चभीरसैः।

---

पीठमन्त्रमाह गं सर्वशक्तिकमलासनाय नमः एतेनासनं दत्त्वा मूलेन मूर्त्तिं कल्पयेत् ॥ ११—१८ ॥

प्रयोगानाह ब्रह्मेति ॥ १९—२४ ॥

मण्डलादिकोनपञ्चाशद्दिनमध्ये इष्टं प्राप्नुयात्। मन्त्रान्तरमाह रायस्पोषेति। स्वरूपं भृगुः सः याब्यो यकारयुतः मेषो नः सात्वती षः तौ सदृशौ द्वयुतौ गगनं हः रतिर्यः ससद्या षोयुताः शार्ङ्गी गः खं हः अन्यत् स्वरूपं षड्‌स्वरः पूर्वोक्तः

मन्त्रोत्थितैः क्रमाद्वर्णैः षडङ्गं समुदीरितम् ॥ २८ ॥
ऋष्याद्यर्चाप्रयोगाः स्युः पूर्ववन्निधिदो ह्ययम् ।
पद्मनाभयुतो भानुर्मेधा सद्यसमन्विता ॥ २९ ॥
लकावनन्तमारूढौ वायुः पावकगेहिनी ।
षडक्षरोऽयमादिष्टो भजतामिष्टदो मनुः ॥ ३० ॥
पूर्ववत् सर्वमेतस्य समाराधनमीरितम् ।
लकुली द्व्यसमारूढौ भृगुती लोहितः सदृक् ॥ ३१ ॥
वकः सदीर्घशः साचिर्लिखे मन्त्रः शिरोऽन्तिमः ।
नवाक्षरो मुनिश्चास्य कङ्कोलः परिकीर्त्तितः ॥ ३२ ॥
विराट्छन्दो देवता तु स्यादुच्छिष्टविनायकः ।
द्वाभ्यां त्रिभिर्द्वयेनाथ द्वाभ्यां सकलमन्ततः ॥ ३३ ॥
पञ्चाङ्गान्यस्य कुर्वीत ध्यायेत्तं शशिशेखरम् ।
चतुर्भुजं रक्ततनुं त्रिनेत्रं पाशाङ्कुशौ मोदकपात्रदन्तौ ।
करैर्दधानं सरसीरुहस्थमुन्मत्तमुच्छिष्टगणेशमीड़े ॥ ३४ ॥
लक्षमेकं जपेन्मन्त्रं दशांशं जुहुयात्तिलैः ।
पूर्वोक्ते पूजयेत् पीठे विधिनोच्छिष्टविघ्नपम् ॥ ३५ ॥
आदावङ्गानि सम्पूज्य ब्रह्माद्या दिक्षु पूजयेत् ।

---

यथा रायस्पोषस्य ददिता निधिदो रत्नधातुमान् रक्षोहणोवलगहनो वक्रतुण्डाय हुमित्येकत्रिंशदर्णः ॥ २५—२८ ॥

पूर्ववत् षड्वर्णवत् मन्त्रान्तरमाह पद्मेति । भानुर्मः पद्मनाभ एतद्युतः मेधा घः सद्य ओं तद्युता लकौ लकारककारौ अनन्तमाकारमारूढौ वायुर्यः पावकगेहिनी स्वाहा मेघोल्काय स्वाहेति षडर्णः ॥ २९ ॥ ३० ॥

मन्त्रान्तरमाह लकुलीति । लकुली हकारः भृगुती सकारतकारौ द्व्यसमारूढौ इकारयुतौ तेन स्ति लोहितः पः सदृक् इयुतः वकः शः सदीर्घः आयुतः च स्वरूपं साचि इयुतः लिखे स्वरूपं शिरोऽन्तिमः स्वाहान्तः हस्तिपिशाचि लिखे स्वाहेति नवार्णः ॥ ३१ ॥ ३२ ॥

षडङ्गमाह द्वाभ्यामिति । हस्तिहृदयाय नमः इत्यादि ॥ ३३ ॥

ब्राह्मी माहेश्वरी चैव कौमारी वैष्णवी परा ॥ ३६ ॥
वाराही च तथेन्द्राणी चामुण्डा रमया सह।
ककुप्सु वक्रतुण्डाद्यान् दशसु प्रतिपूजयेत् ॥ ३७॥
वक्रतुण्डैकदंष्ट्रौ च तथा लम्बोदराभिधः।
विकटो धूम्रवर्णश्च विघ्नश्चापि गजाननः ॥ ३८ ॥
विनायको गणपतिर्हस्तिदन्ताभिधोऽन्तिमः।
इन्द्राद्यानपि वज्राद्यान् पूजयेदावृतिद्वये ॥ ३९ ॥
एवं सिद्धे मनौ मन्त्री प्रयोगान् कर्त्तुमर्हति।
स्वाङ्गुष्ठप्रतिमां कृत्वा कपिना सितभानुना ॥ ४० ॥
गणेशप्रतिमां रम्यासुक्तलक्षणलक्षिताम्।
प्रतिष्ठाप्य विधानेन मधुना स्नापयेच्च ताम् ॥ ४१ ॥
आरभ्य कृष्णभूतादि यावच्छुक्ला चतुर्दशी।
सगुडं पायसं तस्मै निवेद्य प्रजपेन्मनुम् ॥ ४२ ॥
सहस्रं प्रत्यहं तावज्जुहुयात् सघृतैस्तिलैः।
गणेशोऽहमिति ध्यायन्नुच्छिष्टोनाहतो रहः ॥ ४३ ॥
पश्चाद्राज्यमवाप्नोति नृपजोऽन्योपि वा नरः।
कुलालमृत्कृता प्रतिमा पूजितैवं सुराज्यदा ॥ ४४ ॥
वल्मीकमृत्कृता लाभमेवमिष्टा प्रयच्छति।
गौड़ी सौभाग्यदा सैवं लावणी क्षोभयेदरीन् ॥ ४५ ॥
निम्बजा नाशयेच्छत्रून् प्रतिमैवं समर्चिता।
मधूत्थौर्हीमतो लाजैर्वशयेदखिलं जगत् ॥ ४६ ॥

---

ध्यानमाह चतुर्भुजमिति। अङ्कुशमोदकपात्रे दक्षयोः अन्ययोरन्ये ॥३४—३९॥

प्रयोगानाह स्वेति। कपिना रक्तचन्दनेन सितभानुना श्वेतार्केण वा प्रतिमा कार्या ॥ ४०—४२ ॥

अनाहतो निर्वस्त्रः ॥ ४३ ॥ ४४ ॥

वल्मीकमृत्तिकाप्रतिमैवं पूजिता लाभदेति ॥ ४५ ॥ ४६ ॥

सुप्तोऽधिशय्यमुच्छिष्टो जपन् शत्रून् वशं नयेत्।
कटुतैलान्विते राजीपुष्पैर्विद्वेषयेदरीन्॥ ४७॥
द्यूते विवादे समरे जप्तोऽयं जयमावहेत्।
कुवेराख्यमनोर्जापान्निधीनां स्वामितामियात्॥ ४८॥
लेभाते राज्यमनरि वानरेशविभीषणौ।
रक्तवस्त्राङ्गरागाद्यं ताम्बूलं निस्त्यजदन् जपेत्॥ ४९॥
यद्वा निवेदितं तस्मै मोदकं भक्षयन् जपेत्।
पिशितंवा फलंवापि तेन तेन बलिं हरेत्॥ ५०॥
सेन्दुः स्मृतिस्तथाकाशं मन्विन्द्राढ्यौ च दृष्टिलौ।
पश्चान्तकशिवौ तद्वदुच्छिष्टगभगान्वितः॥ ५१॥
उमाकान्तः शायमान्ते ह्यायचाया सविन्दु यः।
बलिरित्येष कथितो नवेन्द्वर्णो बलेर्मनुः॥ ५२॥
ध्रुवो माया सेन्दुः शार्ङ्गी वीजाद्यश्च नवार्णकः।
द्वादशार्णो मनुः प्रोक्तः सर्वमस्य नवार्णवत्॥ ५३॥
ताराद्यश्च गणेशाद्यो नवार्णो दशवर्णकः।

---

अधिशय्यम् शय्यायाम् कटुतैलं सर्षपतैलम्॥ ४७॥ ४८॥

अनरि शत्रुहीनम्॥ ४९॥

तेन तेन ताम्बूलादिना॥ ५०॥

बलिमन्त्रमाह स्मृतिर्गः सेन्दुः सानुस्वारः आकाश हः तथा सानुस्वारः दृष्टिलौ ककारलकारौ कीदृशौ मन्विन्द्राढ्यौ औकारानुस्वारयुतौ पश्चान्तकशिवौ गकारलकारौ तद्वन्मन्विन्द्राढ्यौ ग्लौं उच्छिष्टगरूपं भगान्वित उमाकान्तः एकारयुतो णः णे सविन्दुर्यः सानुस्वारो यकारः अन्यत् स्वरूपम् मन्त्रो यथा गं हं क्लौं ग्लौं उच्छिष्टगणेशाय महायचायायं बलिः इत्येकोनविंशत्यर्णो बलिमन्त्रः॥ ५१॥ ५२॥

मन्त्रान्तरमाह ध्रुवेति। ध्रुवः ॐ माया ह्रीं शार्ङ्गीगः सेन्दुः अनुस्वारसहितः गं विघ्नेशाद्यः स्पष्टं यथा ॐ ह्रीं गं हस्तिपिशाचि लिखे स्वाहेति द्वादशार्णः॥ ५३॥

प्रोक्तो द्विधोपासनन्तु प्रोक्तमस्य नवार्णवत् ॥ ५४ ॥
ध्रुवो हृदुच्छिष्टगणेशायान्ते तु नवाक्षरः।
एकोनविंशत्यर्णाढ्यो मनुर्मुन्यादि पूर्ववत् ॥ ५५ ॥
त्रिभिः सप्तभिरक्षिभ्यां त्रिभिर्द्वाभ्यां द्वयेन च।
मन्त्रोत्थितैः सुधीर्वर्णैः कुर्य्यादङ्गं पुरार्चनम् ॥ ५६ ॥
तारो नमो भगवते किटीशश्चतुराननः।
दंष्ट्राय हस्तिमुचार्य्य खाय लम्बोदराय च ॥ ५७ ॥
उच्छिष्टमवियद्दीर्घात्मने पाशाङ्कुशे परा।
सेन्दुः शार्ङ्गी भगयुते हे मेधे वह्निकामिनी ॥ ५८ ॥
उच्छिष्टगणनाथस्य मनुरद्रिगुणाक्षरः।
गणको मुनिराख्यातो गायत्रीच्छन्द ईरितम् ॥ ५९ ॥
उच्छिष्टगणपो देवो जपेदुच्छिष्ट एव तम्।
सप्तदिग्वाणसप्ताब्धियुगार्णैरङ्गकं मनोः ॥ ६० ॥
शरान्धनुः पाशसृणी स्वहस्तैर्दधानमारक्तसरोरुहस्थम्।
विवस्त्रपत्नीं सुरतप्रवृत्तमुच्छिष्टमम्बासुतमाश्रयेऽहम् ॥ ६१ ॥
लक्षं जपेद्घृतैर्हुत्वा तद्दशांशं प्रपूजयेत्।

---

ताराद्यो यथा ओँ हस्तिपिशाचि लिखे स्वाहा गणेशाद्यो यथा गं हस्ति-पिशाचि लिखे स्वाहा द्वौ दशार्णौ ॥ ५४ ॥

मन्त्रान्तरमाह ध्रुवेति। ध्रुवः प्रणवः हृन्नमः स्वरूपमन्यत् मन्त्रः ओँ नम उच्छिष्टगणेशाय हस्तिपिशाचि लिखे स्वाहा इत्येकोनविंशतिवर्णः मुन्यादि ऋषि-श्छन्दो देवता नवार्णवत् ॥ ५५ ॥

षडङ्गमाह त्रिभिरिति। अर्चनं पूजा पूर्ववदित्यर्थः ॥ ५६ ॥

मन्त्रान्तरमाह तारेति। किटीशः ए चतुराननः कः दीर्घं वियत् हा पाशः आं अङ्कुशः क्रों परा ह्रीं सेन्दुः शार्ङ्गी गं भगयुते हे मेधे एकारयुतं धद्वयम् वह्नि-कामिनी स्वाहा अन्यत् स्वरूपम् ओँ नमो भगवते एकदंष्ट्राय हस्तिमुखाय लम्बो-दराय उच्छिष्टमहात्मने आं क्रों ह्रीं गं घे घे स्वाहा अद्रिगुणाक्षरः सप्तत्रिंश-दक्षरः। षडङ्गमाह सप्तेति ॥ ५७—६० ॥

पूर्वोक्तपीठे स्वाभीष्टसिद्धये पूर्ववद्विभुम् ॥ ६२ ॥
कृष्णाष्टम्यादितद्भूतं यावत्तावज्जपेन्मनुम् ।
प्रत्यहं साष्टसाहस्रं जुहुयात्तद्दशांशतः ॥ ६३ ॥
तर्पयेदपि मन्त्रोऽयं सिद्धिमेवं प्रयच्छति ।
धनं धान्यं सुतान् पौत्रान् सौभाग्यमतुलं यशः ॥ ६४ ॥
मूर्त्तिं कुर्याद्गणेशस्य शुभाहे निम्बदारुणा ।
प्राणप्रतिष्ठां कृत्वाथ तदग्रे मन्त्रमाजपेत् ॥ ६५ ॥
यं ध्यात्वा दासवत् सोऽपि वश्यो भवति निश्चितम् ।
नदीजलं समादाय सप्तविंशतिसंख्यया ॥ ६६ ॥
मन्त्रयित्वा मुखे तेन प्रक्षाल्येशसभां व्रजेत् ।
पश्येत् यं दृश्यते येन स वश्यो जायते क्षणात् ॥ ६७ ॥
चतुःसहस्रधत्तूरपुष्पाणि मनुनार्पयेत् ।
गणेशाय नृपादीनां जनानां वश्यताकृते ॥ ६८ ॥
सुन्दरीवामपादस्य रेणुमादाय तत्र तु ।
संस्थाप्य गणनाथस्य प्रतिमां प्रजपेन्मनुम् ॥ ६९ ॥
तां ध्यात्वा रविसाहस्रं सा समायाति दूरतः ।
श्वेतार्केणाथ निम्बेन कृत्वा मूर्त्तिं कृतासुकाम् ॥ ७० ॥
चतुर्थ्यां पूजयेद्रात्रौ रक्तैः कुसुमचन्दनैः ।
जप्त्वा सहस्रं तां मूर्त्तिं क्षिपेद्रात्रौ सरित्तटे ॥ ७१ ॥
स्वेष्टकार्य्यं समाचष्टे स्वप्ने तस्य गणाधिपः ।
सहस्रं निम्बकाष्ठानां होमादुच्चाटयेदरीन् ॥ ७२ ॥
वह्निणः समिधा होमाद्रिपुर्यमपुरं व्रजेत् ।

---

ध्यानमाह शरानिति । धनुःपाशौ वामयोः वराङ्कुशौ दक्षयोः ॥ ६१ ॥ ६२ ॥
तद्भूतं कृष्णचतुर्दशीपर्यन्तम् ॥ ६३—६९ ॥
कृतासुकां कृतप्राणप्रतिष्ठाम् ॥ ७०—७२ ॥

वानरस्यास्थिसंजप्तं चिप्तमुच्चाटयेद्गृहे ॥ ७३ ॥
जप्तं नरास्थिकन्याया गृहे चिप्तं तदाप्तिकृत् ।
कुलालस्य मृदा स्त्रीणां वामपादस्य रेणुना ॥ ७४ ॥
कृत्वा पुत्तलिकां तस्या हृदि स्त्रीनाम संलिखेत् ।
निखनेन्मन्त्रसंजप्तैर्निम्बकाष्ठैः चिताविमाम् ॥ ७५ ॥
सोन्मत्ता भवति चिप्रमुद्धृतायां सुखं भवेत् ।
शत्रोरेवं कृता सा तु लशुनेन समन्विता ॥ ७६ ॥
शरावान्तर्गता सम्यक् पूजिता द्वारि विद्विषः ।
निखाता पक्षमात्रेण शत्रूच्चाटनकृत् स्मृता ॥ ७७ ॥
विषमे समनुप्राप्ते सितार्कनिम्बदारुजम् ।
गणपं पूजितं सम्यक् कुसुमैः रक्तचन्दनैः ॥ ७८ ॥
मद्यभाण्डस्थितं हस्तमात्रे तं निखनेत् स्थले ।
तत्रोपविश्य प्रजपेन्मन्त्री नक्तं दिवा मनुम् ॥ ७९ ॥
सप्ताहमध्ये नश्यन्ति सर्वे घोरा उपद्रवाः ।
शत्रवो वशतां यान्ति वर्द्धन्ते धनसम्पदः ॥ ८० ॥
दुष्टस्त्रीवामपादस्य रजसा निजदेहजैः ।
मलैर्मूत्रपुरीषाद्यैः कुम्भकारमृदापि च ॥ ८१ ॥
एतैः कृत्वा गणेशस्य प्रतिमां मद्यभाण्डगाम् ।
संपूज्य निखनेद्भूमौ हस्तार्द्धे पूरिते पुनः ॥ ८२ ॥
संस्थाप्य वह्निं जुहुयात् कुसुमैर्हयमारजैः ।
सहस्रं सा भवेद्दासी तन्वा च मनसा धनैः ॥ ८३ ॥
एवमादिप्रयोगाणां नवार्णेनापि साधयेत् ।

---

वची कुही ॥ ७३—८२ ॥
हयमारजैः करवीरोत्थैः ॥ ८३ ॥
मन्त्रान्तरमाह तारेति। तारः श्रीं माद्यात्माङ्गे महात्मने .पाद्मादियुक्तम्

तारो हस्तिमुखायाथो ङेऽन्तो लम्बोदरस्तथा ॥ ८४ ॥
उच्छिष्टान्ते महात्मा ङे पाशाङ्कुशशिवात्मभूः ।
माया वर्म्म च घे घे उच्छिष्टाय दहनाङ्गना ॥ ८५ ॥
द्वात्रिंशदक्षरो मन्त्रो यजनं पूर्ववन्मतम् ।
रसेषु सप्तषट् षट्कनेत्रार्णैरङ्गमीरितम् ॥ ८६ ॥
उच्छिष्टगजवक्त्रस्य मन्त्रेष्वेषु न शोधनम् ।
सिद्धादिचक्रं मासादेः प्राप्तास्ते सिद्धिदा गुरोः ॥ ८७ ॥
मनवोऽमी सदा गोप्या न प्रकाश्या यतः कुतः ।
परीक्षिताय शिष्याय प्रदेया निजसूनवे ॥ ८८ ॥
माया त्रिमूर्त्तिचन्द्रस्थौ पश्चान्तकहुताशनौ ।
तारादिशक्तिवीजान्तो मन्त्रोऽयं चतुरक्षरः ॥ ८९ ॥
भार्गवोऽस्य मुनिश्छन्दो विराट्शक्तिर्गणाधिपः ।
देवो माया द्वितीये तु शक्तिवीजे प्रकीर्त्तितः ॥ ९० ॥
षट्दीर्घयुग्द्वितीयेन ताराद्येन षड़ङ्गकम् ।
विधाय सावधानेन मनसा संस्मरेत् प्रभुम् ॥ ९१ ॥
विषाणाङ्कुशवक्षसूत्रञ्च पाशन्दधानं करैर्मोदकं पुष्करेण ।

---

षात्मभूः क्रौं माया ह्रीं वर्म्म हुं दहनाङ्गना स्वाहा स्वरूपमन्यत् यथा ॐ हस्तिमुखाय लम्बोदराय उच्छिष्टमहात्मने आं क्रौं ह्रीं क्लीं ह्रीं हुं घे घे उच्छिष्टाय स्वाहा द्वात्रिंशदर्णः ॥ ८४ ॥ ८५ ॥

षड़ङ्गमाह रसेति ॥ ८६ ॥

उच्छिष्टगणेशा उक्ताः शक्तिविनायकसंज्ञं मन्त्रान्तरमाह मायेति । माया ह्रीं पश्चान्तकहुताशनौ गकाररेफौ त्रिमूर्त्तिचन्द्रस्थौ इकारानुस्वारयुक्तौ तेन ग्रीं तारादिशक्तिवीजान्तः प्रणवादिर्मायावीजान्तः प्रणवादिर्मायावीजान्तः यथा ॐ ह्रीं ग्रीं ह्रीं ह्रिं ग्रिं ॐ ह्रिं इति चतुर्वर्णः । देवेति पूर्वेण सम्बन्धः मायाशक्तिः द्वितीयं बीजम् षड़ङ्गमाह षड़िति ॐ ग्रां हृत् ॐ ग्रीं शिर इत्यादि ॥ ८७—९१ ॥

स्वपत्न्या युतं हेमभूषाभराढ्यं गणेशं समुद्यद्दिनेशाभमीडे ॥९२॥
एवं ध्यात्वा जपेल्लक्षचतुष्कं तद्दशांशतः।
अपूपैर्जुहुयाद्वह्नौ मध्वक्तैस्तर्पयेच्च तम् ॥ ९३ ॥
पूर्वोक्ते पूजयेत् पीठे केशरेष्वङ्गदेवताः।
दलेषु वक्रतुण्डाद्यान् ब्राह्मीत्याद्या दलाग्रगाः ॥९४॥
ककुप्पालांस्तदस्त्राणि सिद्ध एवं भवेन्मनुः।
घृताक्तमन्नं जुहुयादावर्षादन्नमान् भवेत् ॥ ९५ ॥
परमान्नैर्हुता लक्ष्मीरिक्षुदण्डैर्नृपप्रियः।
रम्भाफलैर्नारिकेलैः पृथुकैर्वश्यता भवेत् ॥ ९६ ॥
घृतेन धनमाप्नोति लवणैर्मधुसंयुतैः।
वामनेत्रां वशीकुर्य्यादपूपैः पृथिवीपतिम् ॥ ९७ ॥
तारो रमा चन्द्रयुक्तः स्वान्तः सौम्या समीरणः।
ङेन्तो गणपतिस्तोयं रवरान्ते द सर्वं च ॥ ९८ ॥
जनं मे वशमा दीर्घा वायुः पावककामिनी।
अष्टाविंशतिवर्णोऽयं मनुर्धनसमृद्धिदः ॥ ९९ ॥
अन्तर्यामी मुनिश्छन्दो गायत्री देवतामनोः।
लक्ष्मीविनायको वीजं रमा शक्तिर्वसुप्रिया ॥ १०० ॥
रमागणेशवीजाभ्यां दीर्घाढ्याभ्यां षड़ङ्गकम्।
दन्ताभये चक्रवरौ दधानं कराग्रगं स्वर्णघटं त्रिनेत्रम्।

---

ध्यानमाह विप्रार्येति। अङ्कुशाक्षसूत्रे दक्षयोः अन्ये वामयोः ककुप्पाला-निन्दादीन् ॥ ९२—९५ ॥

परमान्नं पायसं वामनेत्रा नारी ॥ ९६ ॥ ९७ ॥

मन्त्रान्तरमाह तारेति। तारः ओं रमा श्रीं चन्द्रयुक्तः स्वान्तः समीरणो यंस्तोयवः दीर्घो नः वायुर्यः पावककामिनी स्वाहा अन्यत् स्वरूपम् ओं श्रीं गं सौम्याय गणपतये सर्वजनं मे वशमानय स्वाहेति अष्टाविंशत्यर्णो लक्ष्मीगणेशो मन्त्रः ॥ ९८—१०० ॥

धृताजयालिङ्गितमब्धिपुत्र्या लक्ष्मीगणेशं कनकाभमीड़े ॥१०१

चतुर्लक्षं जपेन्मन्त्रं समिद्भिर्विल्वशाखिनः ॥ १०२ ॥
दशांशं जुहुयात् पीठे पूर्वोक्ते तं प्रपूजयेत् ।
आदावङ्गानि संपूज्य शक्तीरष्टाविमा यजेत् ॥ १०३ ॥
बलाकी विमला पश्चात् कमला वनमालिका ।
विभीषिका मालिका च शाङ्करी वसुमालिका ॥ १०४ ॥
शङ्खपद्मनिधी पूज्यौ पार्श्वयोर्दक्षवामयोः ।
लोकाधिपान्तदस्त्राणि तद्वहिः परिपूजयेत् ॥ १०५ ॥
एवं सिद्धे मनौ मन्त्री प्रयोगान् कर्त्तुमर्हति ।
जरुमात्रे जले स्थित्वा मन्त्री ध्यात्वार्कमण्डले ॥ १०६ ॥
एवं त्रिलक्षं जपतो धनवृद्धिः प्रजायते ।
विल्वमूलं समाश्रित्य तावज्जप्ते फलं हि तत् ॥ १०७ ॥
अशोककाष्ठैर्ज्वलिते वह्नावाज्याक्ततण्डुलैः ।
होमतो वशयेद्विश्वमर्ककाष्ठे स्रुचावपि ॥ १०८ ॥
खादिराग्नौ नरपतिं लक्षीपायसहोमतः ।
वक्रकर्णेन्दुयुक्पान्तौ खेडैकद्रंष्टाय मन्मथः ॥ १०९ ॥
माया रमा गजमुखो गणपान्ते भगो हरिः ।
वरवालाग्निसत्याः सरेफारूढं जलं स्थिरा ॥ ११० ॥
सेन्दुर्मेषो मे वशान्ते मानयोषर्वुधप्रिया ।
स्वाहत्रयस्त्रिंशदर्णाढ्यो मनुस्त्रैलोक्यमोहनः ॥ १११ ॥

---

षड़ङ्गमाह रमेति। श्रीं गां हृत् श्रीं गीं शिरः श्रूं गूं शिखेत्यादि। ध्यानमाह। दन्तेति दन्तशक्ती दक्षयोः अभयचक्रे वामयोः शुण्डाग्रे स्वर्णकुम्भः ॥ १०१—१०६ ॥

तावत् त्रिलक्षं तत्फलं धनवृद्धिः ॥ १०७ ॥ १०८ ॥

त्रैलोक्यमोहनगणेशमन्त्रमाह वक्रेति। स्वरूपं षान्तस्तः कर्णेन्दुयुक् अबिन्दुयुतः मन्मथः क्लीं माया ह्रीं रमा श्रीं गजमुखो गं भगो हरिः एयुतस्तः वाक्ती वः

गणकोऽस्य ऋषिश्छन्दो गायत्री देवता पुनः।
त्रैलोक्यमोहनकरो गणेशो भक्तसिद्धिदः ॥ ११२ ॥
रविवेदशरोदन्वद्रसनेत्रैः षड़ङ्गकम्।
गदावीजपूरे धनुः शूलचक्रे
सरोजोत्पले पाशधान्याग्रदन्तान् ॥ ११३ ॥
करैः सन्दधानं स्वशुण्डाग्रराज-
न्मणीकुम्भमङ्काधिरूढ़ं स्वपत्न्या ॥ ११४ ॥
सरोजन्मना भूषणानाम्भरेणो-
ज्ज्वलद्धस्ततन्व्या समालिङ्गिताङ्गम्।
करीन्द्राननं चन्द्रचूड़ं त्रिनेत्रं
जगन्मोहनं रक्तकान्तिं भजेत्तम् ॥ ११५ ॥
वेदलक्षं जपेन्मन्त्रमष्टद्रव्यैर्दशांशतः।
हुत्वा पूर्वोदितं पीठे पूजयेद्गणनायकम् ॥ ११६ ॥
अङ्गार्चा पूर्ववत् प्रोक्ता शक्तीः पत्रेषु पूजयेत्।
वामा ज्येष्ठा च रौद्री स्यात् काली कलपदादिका ॥११७॥
विकरिण्याह्वया तद्वद्बलाद्याः प्रमथिन्यपि।
सर्वभूतदमन्याख्या मनोन्मन्यपि चाग्रतः ॥ ११८ ॥
दिक्षु प्रमोदः सुमुखो दुर्मुखो विघ्ननाशकः।

---

वह्नी रः सव्यो दः रेफारूढ़जवर्म्म स्थिरा जः सेन्दुर्मेष नः उपर्बुधप्रिया स्वाहा स्वरूपमन्यत् यथा वक्रतुण्डैकदंष्ट्राय क्लीं ह्रीं श्रीं गं गणपते वरवरद सर्वजनं मे वशमानय स्वाहेति त्रयस्त्रिंशदर्णः ॥ १०९—११२ ॥

षड़ङ्गमाह रवीति। उदन्वंश्चत्वारः। ध्यानमाह गदेति। गदावीजपूर-शूलचक्रपद्मानि दक्षेषु अन्यान्येषु धान्याग्रं ब्रीहिमञ्जरी। किम्भूतया पत्न्या सरोजन्मना पद्मेन भूषणसमूहेन च क्रमात् ज्वलन् दीप्यमानो हस्तो ज्वलती तनुश्च यस्यास्तया ॥ ११३—११८ ॥

दीर्घाद्या मातरः पूज्या इन्द्राद्या आयुधान्यपि ॥ ११९ ॥
एवं सिद्धे मनौ कुर्यात् प्रयोगानिष्टसिद्धये ।
वशयेत् कमलैर्भूयान्मन्त्रिणः कुमुदैर्हुतैः ॥ १२० ॥
समिद्वरैश्चलदलसमुद्भूतैर्धरासुरान् ।
उदुम्बरोत्थैर्नृपतीन् प्लचैर्वाटैर्विशोन्तिमान् ॥ १२१ ॥
चौद्रेण कनकप्राप्तिर्गोप्राप्तिः पयसा गवाम् ।
ऋद्धिर्दध्योदनैरन्नं घृतैः श्रीर्वितसैर्जलम् ॥ १२२ ॥
तारो वर्म्मगणेशोभूर्हरिद्रागणलोहितः ।
आषाढीये वरवरसत्या सर्वजगर्जनौ ॥ १२३ ॥
हृदयं स्तम्भयं द्वन्द्वं वल्लभां स्वर्णरेतसः ।
द्वात्रिंशदचरो मन्त्रो मदनो मुनिरीरितः ॥ १२४ ॥
छन्दोऽनुष्टुप् देवता तु हरिद्रागणनायकः ।
वेदाष्टशरसप्ताङ्गनेत्रार्णैरङ्गमीरितम् ॥ १२५ ॥
पाशाङ्कुशौ मोदकमेकदन्तं करैर्दधानं कनकासनस्थम् ।
हरिद्रखण्डप्रतिमन्त्रिनेत्रं पीतांशुकं रात्रिगणेशमीड़े ॥१२६॥
वेदलचं जपित्वान्ते हरिद्राचूर्णमिश्रितैः ।
दशांशं तण्डुलैर्हुत्वा ब्राह्मणानपि भोजयेत् ॥ १२७ ॥
पूर्वोक्तपीठे प्रयजेदङ्गमातृदिशान्वितैः ।

---

दीर्घाद्या मातरः आं ब्राह्म्यै नमः ईं माहेश्वर्य्यै इत्यादि ॥ ११९ ॥ १२० ॥
चलदलोऽश्वत्थस्तस्य समिद्भिर्धरासुरान्विप्रान् वशयेत् प्लचसमिद्भिर्वैश्यान् वटजाभिरन्तिमान् शूद्रान् ॥ १२१ ॥ १२२ ॥
हरिद्रागणेशमनुमाह तार इति । तार ॐ वर्म हुं गणेशो गं भूः ग्लौं लोहितः पः आषढ़ीतः स्त्यौ दः तर्ज्जनीतः स्वर्णरेतसो वल्लभा स्वाहा स्वरूपमन्त्र यथा ॐ हुं गं ग्लौं हरिद्रागणपतये वरवरद सर्वजनहृदयं स्तम्भय स्तम्भय स्वाहेति द्वात्रिंशदर्णः ॥ १२३ ॥ १२४ ॥
षड़ङ्गमाह वेदेति ॥ १२५ ॥

एवमाराधितो मन्त्रः सिद्धो यच्छेन्मनोरथान् ॥ १२८ ॥
शुक्लपक्षे चतुर्थ्यान्तु कन्यापिष्टहरिद्रया ।
विलिप्याङ्गं जले स्नात्वा पूजयेद्गणनायकम् ॥ १२९ ॥
तर्पयित्वा पुरस्तस्य सहस्रं साष्टकं जपेत् ।
शतं हुत्वा साज्यपूपैर्भोजयेद्‌ब्रह्मचारिणः ॥ १३० ॥
कुमारीरपि सन्तोष्य गुरुं प्राप्नोति वाञ्छितम् ।
लाजैः कन्यामवाप्नोति कन्यापि लभते वरम् ॥ १३१ ॥
वन्ध्या नारी रजःस्नात्वा पूजयित्वा गणाधिपम् ।
पलप्रमाणगोमूत्रे पिष्ट्वा सिन्धुवचानिशाः ॥ १३२ ॥
सहस्रं मन्त्रयेत् कन्या वटून् सम्भोज्य मोदकैः ।
पीत्वा तदौषधं पुत्रं लभते गुणसागरम् ॥ १३३ ॥
वाणीस्तम्भं रिपुस्तम्भं कुर्य्यान्मनुरुपासितः ।
जलाग्निचौरसिंहास्त्रप्रमुखानपि रोधयेत् ॥ १३४ ॥
शार्ङ्गीमांसस्थितः सेन्दुर्बीजमुक्तं गणेशितुः ।
हरिद्राख्यस्य यजनं पूर्ववत् प्रोदितं मनोः ॥ १३५ ॥
प्रोक्ता एते गणेशस्य मन्त्रा इष्टसमीप्सता ।
गोपनीया न दुष्टेभ्यो वदनीयाः कथञ्चन ॥ १३६ ॥

इति महीधरविरचिते मन्त्रमहोदधौ गणेशमन्त्र-
कथनं नाम द्वितीयस्तरङ्गः ॥ २ ॥

---

ध्यानमाह पाशेति । अङ्कुशमोदकौ दक्षयोः पाशदन्तावन्ययोः रात्रिगणेशो हरिद्रागणपतिः । कुमारीरपीति भोजयेदित्यनेनान्वेति ॥ १२६—१३४ ॥

मन्त्रान्तरमाह शार्ङ्गीति । शार्ङ्गी गः मांसस्थो लकारस्थः ग्लमिति बीजं हरिद्रागणपतेः पूजनं पूर्ववत् ॥ १३५ ॥ १३६ ॥

इति मन्त्रमहोदधौ नौकाख्यायां टीकायां गणेश-
मन्त्रकथनं नाम द्वितीयस्तरङ्गः ॥ २ ॥

---

## तृतीयस्तरङ्गः ।

अथ कालीमनून् वक्ष्ये सद्यो वाक्सिद्धिदायकान् ।
आराधितैर्यैः सर्वेष्टं प्राप्नुवन्ति जना भुवि ॥ १ ॥
क्रोधीशत्रितयं वह्निवामाक्षिविधुभिर्युतम् ।
वराहद्वितयं वामकर्णचन्द्रसमन्वितम् ॥ २ ॥
मायायुग्मं दक्षिणे च दीर्घा सृष्टिः सहक् क्रिया ।
चक्रीकिंटीशमारूढ़ः प्रागुक्तं वीजसप्तकम् ॥ ३ ॥
मन्त्री वह्निप्रियान्तोऽयं द्वाविंशत्यक्षरो मतः ।
न चात्र सिद्धसाध्यादिशोधनं मनसापि च ॥ ४ ॥
न यत्रातिशयः कश्चित् पुरश्चर्य्यानिमित्तकः ।
विद्याराज्ञी स्मृतेरेव सिध्यष्टकमवाप्नुयात् ॥ ५ ॥
भैरवोऽस्य ऋषिश्छन्द उष्णिक् काली तु देवता ।
वीजं माया दीर्घवर्मशक्तिरुक्ता मनीषिभिः ॥ ६ ॥
षटदीर्घव्याद्या वीजेन विद्याया अङ्गमीरितम् ।
मातृकां पञ्चधा भक्ता वर्णान् दशदश क्रमात् ॥ ७ ॥
हृदये भुजयोः पादद्वये मन्त्री प्रविन्यसेत् ।

---

कालीमन्त्रान् वक्तुं प्रतिजानीते अथेति ॥ १ ॥

मन्त्रमुद्धरति क्रोधीशः कः तस्य त्रयं वह्निवामाक्षिविधुभिः रेफ ईकारानुस्वारैः युतं तेन क्रीं वराहो हः वामकर्णं ऊ दक्षिणे स्वरूपं सृष्टिः कः दीर्घा आकार-युता क्रिया लः सहक् इयुतः लि चक्री कः किंटीशमारूढ़ ऐयुतके प्रागुक्तं आदावुक्तं वीजानां सप्तकं वह्निप्रिया स्वाहा यथा क्रीं क्रीं क्रीं हूं हूं ह्रीं ह्रीं दक्षिणे कालिके क्रीं क्रीं क्रीं हूं हूं ह्रीं ह्रीं स्वाहेति। दीर्घं वर्म ह ॥ २—६ ॥

षडङ्गमाह षडिति। क्रां क्रीमित्यादि मातृकामिति अं आं इं ईं उं ऊं

व्यापकं मनुना कृत्वा ध्यायेच्चेतसि कालिकाम् ॥ ८ ॥
सद्यश्छिन्नशिरः कृपाणमभयं हस्तैर्वरं बिभ्रतीं
घोरास्यां शिरसां स्रजा सुरुचिरामुन्मुक्तकेशावलीम् ।
सृक्कासृक्प्रवहां श्मशाननिलयां श्रुत्योः शवालङ्कृतिं
श्यामाङ्गीं कृतमेखलां शवकरैर्देवीं भजे कालिकाम् ॥ ९॥
एवं ध्यात्वा जपेल्लक्षं जुहुयात्तद्दशांशतः ।
प्रसूनैः करवीरोत्थैः पूजायन्त्रमथोच्यते ॥ १० ॥
आदौ षट्कोणमारच्य त्रिकोणत्रितयं ततः ।
पद्ममष्टदलं बाह्ये भूपुरं तत्र पूजयेत् ॥ ११ ॥
जयाख्या विजया पश्चादजिता चापराजिता ।
नित्या विलासिनी चापि दोग्ध्र्यघोरा च मङ्गला ॥ १२ ॥
पीठशक्तय एता स्युः कालिका योगपीठतः ।
आत्मने हृदयान्तोऽयं मां यादिः पीठमन्त्रकः ॥ १३ ॥
अस्मिन् पीठे यजेद्देवीं शवरूपशिवस्थिताम् ।
महाकालरतासक्तां शिवाभिर्दिक्षु वेष्टिताम् ॥ १४ ॥
अङ्गानि पूर्वमाराध्य षट्पत्रेषु समर्चयेत् ।
काली कपालिनीं कुल्लां कुरुकुल्लां विरोधिनीम् ॥ १५ ॥
विप्रचित्ताद्य सम्पूज्य नवकोणेषु पूजयेत् ।
उग्रामुग्रप्रभां दीप्तां नीलां घनां बलाकिकाम् ॥ १६ ॥

---

यं मं एं स्रं नमो हृदि एं दक्षभुजे ङें वामभुजे षं दक्षपदे मं वामपदे इति ॥ ७ ॥ ८ ॥

ध्यानमाह सद्य इति । खड्गवरौ दक्षयोः सद्यश्छिन्नशिरोऽभये वामयोः सृक्किणीरोष्ठप्रान्तयोरसृजो रुधिरस्य प्रवाहो यस्यास्तां श्रुत्योः कर्णयोः शवालङ्कारयुता ॥ ९—१२ ॥

पीठमन्त्रमाह आत्मन इति । ह्रीं आत्मने नम इति । महदादावान्तां महा-

माद्यां मुद्रां तथा सिद्धां पूज्याः पत्रेषु मातरः ।
पद्मस्याष्टसु पत्रेषु ब्राह्मी नारायणीत्यपि ॥ १७ ॥
माहेश्वरी च चामुण्डा कौमारी चापराजिता ।
वाराही नारसिंही च पुनरेतास्तु भूपुरे ॥ १८ ॥
भैरवीं महदाद्यान्तां सिंहाद्यां धूम्रपूर्विकाम् ।
भीमोन्मत्तादिकाश्चापि वशीकरणभैरवीम् ॥ १९ ॥
मोहनाद्यां समाराध्य शक्रादीनायुधान्यपि ।
एवमाराधिता काली सिद्धा भवति मन्त्रिणाम् ॥ २० ॥
ततः प्रयोगान् कुर्वीत महाभैरवभाषितान् ।
आत्मनोऽर्थे परस्यार्थे क्षिप्रसिद्धिप्रदायकान् ॥ २१ ॥
स्त्रीणां निन्दां प्रहारञ्च कौटिल्यं वा प्रियं वचः ।
आत्मनो हितमन्विच्छन् कालीभक्तो विवर्जयेत् ॥ २२ ॥
सुदृशो मदनावासं पश्यन् यः प्रजपेन्मनुम् ।
अयुतं सोऽचिरादेव वाक्पतेः समतामियात् ॥ २३ ॥
दिगम्बरो मुक्तकेशः श्मशानस्थोऽधियामिनि ।
जपेद्योऽयुतमेतस्य भवेयुः सर्वकामनाः ॥ २४ ॥
शावं हृदयमारुह्य निर्वासाः प्रेतभूगतः ।
अर्कपुष्पसहस्रेणाभ्यक्तेन स्वीयरेतसा ॥ २५ ॥
देवीं यः पूजयेद्भक्त्या जपन्नेकैकशो मनुम् ।
सोऽचिरेणैव कालेन धरणीप्रभुतां व्रजेत् ॥ २६ ॥
रजःकीर्णभगं मायां ध्यायन् योऽयुतमाजपेत् ।

---

भैरवीं सिंहाद्यां सिंहभैरवीं धूम्रपूर्विकां धूम्रभैरवीं भीमोन्मत्तादिकां भीमभैरवीं उन्मत्तभैरवीञ्च ॥ १९—१९ ॥

मोहनाद्यां मोहनभैरवीम् ॥ २०—२२ ॥

मदनावासं भगम् ॥ २३ ॥

स कवित्वेन रम्येण जनान्मोहयति ध्रुवम् ॥ २७ ॥
त्रिपञ्चारे महापीठे शवस्य हृदि संस्थितम् ।
महाकालेन देवेन मारयुद्धं प्रकुर्वतीम् ॥ २८ ॥
तां ध्यायन् स्मेरवदनां विदधत्सुरतं स्वयम् ।
जपेत् सहस्रमपि यः स शङ्करसमो भवेत् ॥ २९ ॥
अस्थिलोमत्वचा युक्तं मांसं मार्जारमेषयोः ।
उष्ट्रस्य महिषस्यापि बलिं यस्तु समर्पयेत् ॥ ३० ॥
भूताष्टम्यां मध्यरात्रे वश्याः स्युस्तस्य जन्तवः ।
विद्यालक्ष्मीयशःपुत्रैः स चिरं सुखमेधते ॥ ३१ ॥
यो हविष्याशनरतो दिवा देवीं स्मरन् जपेत् ।
नक्तं निधुवनासक्तो लक्षं स स्याद्धरापतिः ॥ ३२ ॥
रक्ताम्भोजैर्हुतैर्मन्त्री धनैर्जयति वित्तपम् ।
बिल्वपत्रैर्भवेद्राज्यं रक्तपुष्पैर्वशीकृतिः ॥ ३३ ॥
असृजा महिषादीनां कालिकां यस्तु तर्पयेत् ।
तस्य स्युरचिरादेव करस्थाः सर्वसिद्धयः ॥ ३४ ॥
यो लक्षं प्रजपेन्मन्त्रं शवमारुह्य मन्त्रवित् ।
तस्य सिद्धो मनुः सद्यः सर्वेप्सितफलप्रदः ॥ ३५ ॥
तेनाश्वमेधप्रमुखैर्यागैरिष्टं सुजन्मना ।
दत्तं दानं तपस्तप्तमुपास्ते यस्तु कालिकाम् ॥ ३६ ॥
ब्रह्मा विष्णुः शिवो गौरी लक्ष्मीर्गणपती रविः ।
पूजिताः सकला देवा यः कालीं पूजयेत् सदा ॥ ३७ ॥

---

अधियामिनि रात्रौ ॥ २४—२७ ॥

त्रिगुणाः पञ्चाराः कोणा यस्मिन्दृशे पीठे महाकालेन सह मारयुद्धं कुर्वतीमित्यर्थः ॥ २८—३७ ॥

कालीमन्त्रभेदानाह मायेति । माया ह्रीं कूर्चं हूं वरस्वरूपं क्रान्तिरी निधु-

अथ कालीमन्त्रभेदा उच्यन्ते सिद्धिदायिनः ।
मायायुगं कूर्चयुग्मं करमान्ति विधुत्रयम् ॥ ३८ ॥
दक्षिणे कालिके पूर्वबीजानि स्युर्विलोमतः ।
एकविंशतिवर्णात्मा ताराद्यः पूर्ववद्यजिः ॥ ३९ ॥
बिल्वमूले शवारूढ़ो वटमूले तथैव च ।
लक्षं मनुमिमं जप्त्वा सर्वसिद्धीश्वरो भवेत् ॥ ४० ॥
कालीकूर्चञ्च हृल्लेखा दक्षिणे कालिके पठेत् ।
पुनर्बीजत्रयं वह्निवधूर्मन्वक्षरो मनुः ॥ ४१ ॥
यजनं पूर्ववत् प्रोक्तमस्य मन्त्रस्य मन्त्रिभिः ।
विशेषान्नृसुरादीनामयमाकर्षणे क्षमः ॥ ४२ ॥
कूर्चद्वयं त्रयं काल्या मायायुग्मं तु दक्षिणे ।
कालिके पूर्वबीजानि स्वाहामन्त्रो वशीकृतौ ॥ ४३ ॥
मन्त्रराजं पुनः प्रोक्तं बीजसप्तकमुत्सृजेत् ।
तिथिवर्णो भवेन्मन्त्र उपास्तिः पूर्ववन्मता ॥ ४४ ॥
ब्रह्मरेफौ वामनेत्रचन्द्रारूढ़ौ मनुर्मतः ।
एकाक्षरो महाकाल्याः सर्वसिद्धिप्रदायकः ॥ ४५ ॥

---

बिन्दुः क्रीं उक्तबीजानि व्युत्क्रमेण स्वरूपमन्यत् क्रीं क्रीं क्रीं हूं हूं ह्रीं ह्रीं दक्षिणे कालिके क्रीं क्रीं क्रीं हूं हूं ह्रीं ह्रीं इत्येकविंशत्यर्णः । ताराद्यः प्रणवाद्यः ॥ ३८—४० ॥

मन्त्रान्तरमाह कालीति । काली क्रीं कूर्चं हूं हृल्लेखा ह्रीं वह्निवधूः स्वाहा यथा क्रीं हूं ह्रीं दक्षिणे कालिके क्रीं हूं ह्रीं स्वाहेति चतुर्दशार्णः ॥ ४१—४२ ॥

मन्त्रान्तरमाह कूर्चेति । हूं हूं क्रीं क्रीं क्रीं ह्रीं ह्रीं दक्षिणे कालिके पुनर्बीजानि स्वाहेति विंशत्यर्णः वशीकृतौ क्षम इति शेषः ॥ ४३ ॥

मन्त्रान्तरमाह मन्त्रराजमिति । क्रीं क्रीं क्रीं हूं हूं ह्रीं ह्रीं दक्षिणे कालिके स्वाहेति पञ्चदशार्णः ॥ ४४ ॥

मन्त्रान्तरं ब्रह्मेति ब्रह्मा कः वामनेत्रे ई क्रीं ॥ ४५ ॥

वीजं दीर्घयुतश्चक्री पिनाकी नेत्रसंयुतः ।
क्रोधीशो भगवान् स्वाहा षड़र्णो मन्त्र ईरितः ॥ ४६ ॥
काली कूर्चन्तथा लज्जा त्रिवर्णो मनुरीरितः ।
हुं फड़न्तश्च पञ्चार्णः स्वाहान्तः सप्तवर्णकः ॥ ४७ ॥
एतेषां पूर्ववत् प्रोक्तं यजनं नारदादिभिः ।
निग्रहानुग्रहे शक्ताः कालीमन्त्राः स्मृता इमे ॥ ४८ ॥
अथ वक्ष्ये परां विद्यां सुमुखीमतिगोपिताम् ।
यां लब्ध्वा देशिको विद्वान्न शोचति क्षताक्षते ॥ ४९ ॥
कर्णो ध्युतिः सनयना श्वेतेशः स्याज्जरासनः ।
लक्ष्मीर्दीर्घेन्दुसंयुक्ता नदी दीर्घः सटक्क्रिया ॥ ५० ॥
मेषः समाधवः कर्णो भृगुस्तन्द्रीच सेन्धिका ।
खि देविमवियद्दीर्घं पिशाचिनि हिमाद्रिजा ॥ ५१ ॥
नन्दज़त्रितयं सर्गि द्वाविंशत्यक्षरो मनुः ।
स्मृता भैरवगायत्री सुसुखो सुनिपूर्विकाः ॥ ५२ ॥
सुनिराम द्विषट्चन्द्र वक्षार्णौ रङ्कं मनोः ।

---

षड़र्णमाह वीजमिति । वीजं क्रीं दीर्घयुतश्चक्री का नेत्रयुतः पिनाकी लि भङ्ग एकरस्तद्युतः क्रोधीशः कः क्रीं कालिके स्वाहेति ॥ ४६ ॥

मन्त्रान्तरं काखीति । क्रीं हूं क्रीं त्रिवर्णः क्रीं हूं क्रीं हूं फड़िति पञ्चार्णः क्रीं हूं क्रीं हूं फट् स्वाहेति सप्तार्णः ॥ ४७ ॥ ४८ ॥

सुमुखीं वक्तुं प्रतिजानीते अथेति ॥ ४९ ॥

मन्त्रमुद्धरति कर्ण इति । कर्णं उः सनयना ध्युति इयुतन्छः च्छि जरासनः श्वेतेशः टकारस्थः षः ट लक्ष्मीः दीर्घेन्दुसंयुक्ता श्रां विन्दुयुता चान्दीर्घो नन्दी-डासटक् क्रिया इयुतो च्च: खि समाधवो मेष इयुतो नः नि कर्णो भृगुः उयुतः सः सेन्धिका तन्द्री उयुतो मः सुखि देवि म स्वरूपं दीर्घं वियत् हा पिशाचिनि स्वरूपं हिमाद्रिजा क्रीं सर्गिनन्दजत्रितयं विसर्गयुक्तं ठकारत्रयं यथा उच्छिष्ट-चाण्डालिनि सुसुखि देवि महापिशाचिनि क्रीं ठः ठः ठः द्वाविंशत्यर्णः सुनि-पूर्विकाऋषिं छन्दो देवता ॥ ५०—५२ ॥

विन्यस्य सुमुखीं ध्यायेद्भक्तचिन्ताम्बुजस्थिताम् ॥ ५३ ॥
गुञ्जानिर्मितहारभूषितकुचां सद्योवनोल्लासिनीं
हस्ताभ्यां नृकपालखड्गलतिके रम्ये मुदा बिभ्रतीम् ।
रक्तालङ्कृतिवस्त्रलेपनलसद्देहप्रभां ध्यायतां
नृणां श्रीसुमुखीं शवासनगतां स्युः सर्वदा सम्पदः ॥ ५४ ॥
लक्षमेकं जपेन्मन्त्रं दशांशं किंशुकोद्भवैः ।
पुष्पैः समिद्भिर्वापि जुहुयान्मन्त्रसिद्धये ॥ ५५ ॥
कालीपीठे यजेद्देवीं पञ्चकोणाद्यकर्णिके ।
अष्टपत्रे षोड़शाब्जे वृत्ते भूपुरसंयुते ॥ ५६ ॥
मूलेन मूर्त्तिं संकल्प्य पाद्यादीनि प्रकल्पयेत् ।
चन्द्रां चन्द्राननाञ्चारुमुखीं चामीकरप्रभाम् ॥ ५७ ॥
चतुरां पञ्चकोणेषु केसरेष्वङ्गदेवताः ।
ब्रह्माद्या अष्टपत्रेषु षोड़शारे कलादिकाः ॥ ५८ ॥
कला कलानिधिः काली कमला च क्रिया कृपा ।
कुला कुलीना कल्याणी कुमारी कलभाषिणी ॥ ५९ ॥
करालास्या किशोरी च कोमला कुलभूषणा ।
कल्पदा भूपुरे पूज्या इन्द्राद्या हेतयोऽपि च ॥ ६० ॥
इत्थं जपादिभिः सिद्धे मन्त्रे काम्यानि साधयेत् ।
भुक्त्वौदनमनाचम्य जपेन्मन्त्रमनन्यधीः ॥ ६१ ॥
उच्छिष्टोऽयुतमेकं यः स भवेत् सम्पदां पदम् ।

---

षड़ङ्गमाह सुनीति ॥ ५३ ॥

ध्यानमाह गुञ्जेति । एवंविधा सुमुखीं ध्यायतां नृणां सर्वदा सम्पदः स्युरित्यन्वयः खड्गधते दक्षे कपालं वामे ॥ ५४ ॥ ५५ ॥

कर्णिकायां पञ्चकोणं तदुपर्यष्टपत्रं तदुपरि षोड़शदलं तदुपरि चतुःकोणमिति पूजायन्त्रम् ॥ ५६—६० ॥

उच्छिष्टेनैव भक्तेन बलिं दद्यान्निरन्तरम् ॥ ६२ ॥
दध्नाभ्यक्तैः प्रजुहुयाल्लक्षं सिद्धार्थतण्डुलैः।
राजानो मन्त्रिणस्तस्य भवन्ति वशगाः क्षणात् ॥ ६३ ॥
शस्त्राणि वशगानि स्युर्हुतान्मार्ज्जारमांसतः।
धनर्द्धिश्छागमांसेन विद्याप्राप्तिस्तु पायसैः ॥ ६४ ॥
मधुपायससंयुक्तस्त्रीरजोयुक्तवाससा।
होममाचरतः पुंसो जनता वशवर्त्तिनी ॥ ६५ ॥
मधुसर्पिर्युतैर्नागवल्लीपत्रैर्महाश्रियः।
सद्यो निहतमार्ज्जारमांसेन मधुसर्पिषा ॥ ६६ ॥
युक्तेनान्त्यजकेशाद्यैर्हुतैराकर्षति स्त्रियः।
मध्वक्तश्वशमांसेन तत्फलं विद्यया सह ॥ ६७ ॥
उन्मत्ततरुभिर्दीप्ते चिताग्नौ जुहुयाच्छदैः।
कोकिला काकयोर्मन्त्री मारयेदचिरादरीन् ॥ ६८ ॥
वायसोलूकयोः पत्रैर्होमाद्विद्वेषयेदरीन्।
गर्भपातः सगर्भाणामुलूकच्छदनैर्भवेत् ॥ ६९ ॥
आज्याक्तैर्विल्वपत्रैर्यो मासमेकं सहस्रकम्।
प्रत्यहं जुहुयात्तेन बन्ध्यापि लभते सुतम् ॥ ७० ॥
सौभाग्यार्थं दुर्भगाया बन्धूककुसुमैर्नवैः।
मधुनाक्तैः प्रजुहुयात् स्त्रीणामाकृष्टयेऽपि तैः ॥ ७१ ॥
निर्ज्जने सदनेऽरण्ये प्रेतावासे चतुष्पथे।
बलिं दत्त्वा प्रजपतं सहस्रं चाष्टसंयुतम् ॥ ७२ ॥
उच्छिष्टस्य च सा देवी प्रत्यक्षा जायतेऽचिरात्।
यत्र नोक्ता होमसंख्यायुतं तत्र विनिर्दिशेत् ॥ ७३ ॥

---

प्रयोगानाह भुक्तेति ॥ ६१—६७ ॥

वाममार्गेण सुमुखी शीघ्रं कामविधायिनी ।
भोजनान्ते तथोच्छिष्टैर्जप्या सा स्वेष्टसिद्धये ॥ ७४ ॥
न शीघ्रफलदा देवी सुमुखी सदृशी परा ।
यस्या मन्त्रजपादेव प्रसिध्यन्ति मनोरथाः ॥ ७५ ॥

इति श्रीमहीधरविरचिते मन्त्रमहोदधौ कालीसुमुखी-
मन्त्रकथनं नाम तृतीयस्तरङ्गः ।

---

## चतुर्थस्तरङ्गः ।

कीर्त्यन्ते सिद्धिदातारस्ताराया मनवोऽधुना ।
गुरूपदेशात् ज्ञातैर्यैः कृतार्थाः स्युर्नरा भुवि ॥ १ ॥
आप्यायिनी सरात्रीशा वियदग्नीन्दुशान्तियुक् ।
हरिः पावकगोविन्दचन्द्रसोभिरलङ्कृतः ॥ २ ॥
खमर्घीशशशाङ्काढ्यमस्त्रं पञ्चाक्षरो मनुः ।
आदिबीजवियुक्तैषा प्रोदितैकजटादिमैः ॥ ३ ॥

---

धन्मत्तो धर्त्तूरः छदैः पत्रैः ॥ ६८—७५ ॥

इति नौकासमाख्यायां मन्त्रमहोदधिटीकायां तृतीयस्तरङ्गः ॥ ३ ॥

---

तारां वक्तुमुपक्रमते कीर्त्यन्त इति मन्त्रमुद्धरति ॥ १ ॥

आप्यायनीति सरात्रीशा आप्यायनी सबिन्दुरोङ्कारः ओं अग्नीन्दुशान्तियुक् वियत् रेफबिन्दुयुतो हः ह्रीं पावकगोविन्दचन्द्रमोभिरलङ्कृतो हरिः रेफ ईबिन्दुयुतस्सकारः गोविन्द ईकारः ॥ २ ॥

अर्घीशशशाङ्काढ्यं खं ऊबिन्दुयुतो हः हूं अस्त्रं फट् । ओं ह्रीं स्त्रीं हूं

आद्यन्तबीजरहिता प्रोक्ता नीलसरस्वती।
तारा सर्वा मनोरस्य मुनिरक्षोभ्यसंज्ञकः॥ ४॥
छन्दस्तु बृहती तारा देवता परिकीर्त्तिता।
द्वितीयतुर्य्ये क्रमतो बीजं शक्तिश्च सिद्धिदे॥ ५॥
यद्वा क्रोधी बीजमुक्तमस्त्रं शक्तिरुदाहृता।
षट्दीर्घयुग्द्वितीयेन षड़ङ्गविधिरीरितः॥ ६॥
षोढ़ान्यासं ततः कुर्य्याद्देवताभावसिद्धये।
देयं भक्ताय शिष्याय न देयन्तु दुरात्मने॥ ७॥
श्रीकण्ठादीन्न्यसेद्रुद्रान्मातृकावर्णपूर्वकान्।
मातृकोक्तस्थले माया तृतीयक्रोधपूर्वकान्॥ ८॥
चतुर्थी नमसा युक्तान् प्रथमो न्यास ईरितः।
शवपीठसमासीनां नीलकान्तिं त्रिलोचनाम्॥ ९॥
अर्द्धेन्दुशेखरां नानाभूषणाढ्यां स्मरन्न्यसेत्।
द्वितीयन्तु ग्रहन्यासं कुर्य्यात्तां समनुस्मरन्॥ १०॥
त्रिबीजस्वरपूर्वन्तु रक्तं सूर्य्यं हृदि न्यसेत्।
तथा यवर्गपूर्वन्तु सोमं शुक्लं भ्रुवोर्द्वयोः॥ ११॥
कवर्गपूर्वं रक्ताभं मङ्गलं लोचनत्रये।
चवर्गाद्यं बुधं श्यामं न्यसेद्वक्षःस्थले बुधः॥ १२॥
टवर्गाद्यं पीतवर्णं कण्ठकूपे बृहस्पतिम्।
तवर्गाद्यं श्वेतवर्णं घण्टिकायान्तु भार्गवम्॥ १३॥

---

फड़िति पञ्चार्णः मन्त्रान्तरमाह आदीति। इयमेव विद्या आदिबीजेन ओंकारेण वियुक्ता रहिता सती आदिमैः पूर्व्वाचार्य्यैरेकजटाप्रोदिता स्त्रीं क्रीं हूं फड़िति॥ ३॥

आद्यन्तबीजाभ्यां ओं फट्भ्यां रहिता नीलसरस्वती सैव स्त्रीं क्रीं हूं इति सर्वास्तु तारा॥ ४॥

द्वितीयतुर्य्ये स्त्रीं हूमिति क्रमाद्बीजं शक्तिश्च॥ ५॥

नीलवर्णं पवर्गाद्यं नाभिदेशे शनैश्चरम् ।
शवर्गाद्यं धूम्रवर्णं ध्यात्वा राहुं मुखे न्यसेत् ॥ १४ ॥
लक्षाद्यं धूम्रवर्णाभं केतुं नाभौ पुनर्न्यसेत् ।
त्रिबीजीपूर्वकश्चैवं ग्रहन्यासः समीरितः ॥ १५ ॥
तृतीयं लोकपालानां न्यासं कुर्यात् प्रयत्नतः ।
मायादिबीजत्रितयपूर्वकं सर्वसिद्धये ॥ १६ ॥
स्वमस्तके ललाटादौ दशदिक्ष्वध ऊर्द्धतः ।
ह्रस्वदीर्घकादिकाष्टवर्गपूर्वान् दिशाधिपान् ॥ १७ ॥
शिवशक्त्यभिधं न्यासं चतुर्थन्तु समाचरेत् ।
त्रिबीजपूर्वकान्न्यस्येत् षट्शिवान् शक्तिसंयुतान् ॥ १८ ॥
आधारादिषु चक्रेषु चक्रस्थवर्णपूर्वकान् ।
ब्रह्माणं डाकिनीयुक्तं वादिसान्तार्णभूषितम् ॥ १९ ॥
मूलाधारे प्रविन्यस्येच्चतुर्दलसमन्वितम् ।
श्रीविष्णुं राकिनीयुक्तं बादिलान्तार्णपूर्वकम् ॥ २० ॥
स्वाधिष्ठानाभिधे चक्रे लिङ्गस्थे षट्दले न्यसेत् ।
रुद्रन्तु लाकिनीयुक्तं डादिफान्तार्णपूर्वकम् ॥ २१ ॥
चक्रे दशदले न्यस्येन्नाभिस्थे मणिपूरके ।
ईश्वरं कादिठान्तार्णपूर्वकं काकिनीयुतम् ॥ २२ ॥
विन्यसेत् द्वादशदले हृदयस्थे त्वनाहते ।
सदाशिवं शाकिनीञ्च षोड़शस्वरपूर्वकम् ॥ २३ ॥
कण्ठस्थे षोड़शदले विशुद्धाख्ये प्रविन्यसेत् ।
आज्ञाचक्रे परशिवं हाकिनीसंयुतं न्यसेत् ॥ २४ ॥
लक्षार्णपूर्वं भ्रूमध्ये संस्थितेऽतिमनोहरे ।
तारादिपञ्चमं न्यासं कुर्यात् सर्वेष्टसिद्धये ॥ २५ ॥
अष्टौ वर्गान् स्वरद्वन्द्वपूर्वकान् बीजसंयुतान् ।
पूर्वं प्रयोज्य ताराद्या न्यस्तव्या अष्टमूर्त्तयः ॥ २६ ॥

तारा उग्रा महोग्रापि वज्रा काली सरस्वती।
कामेश्वरी च चामुण्डा इत्यष्टौ तारिकाः स्मृताः॥ २७॥
ब्रह्मरन्ध्रे ललाटे च भ्रूमध्ये कण्ठदेशतः।
हृदि नाभौ लिङ्गमूले मूलाधारे क्रमान्न्यसेत्॥ २८॥
षष्ठं न्यासं ततः कुर्य्यात् पीठाख्यं सर्वसिद्धिदम्।
आधारे कामरूपाख्यं पीठं हस्वार्णपूर्वकम्॥ २९॥
हृदि जालन्धरं पीठं दीर्घपूर्वं प्रविन्यसेत्।
ललाटे पूर्णगिर्य्याख्यं कवर्गाद्यं न्यसेत् सुधीः॥ ३०॥
उड्डीयानं चवर्गाद्यं केशसन्धौ प्रविन्यसेत्।
भ्रूवोर्वाराणसीपीठं टवर्गाद्यं समाहितः॥ ३१॥
तवर्गं पूर्विकां न्यस्येदवन्तीं नयनद्वये।
पवर्गपूर्वञ्च मायापुरीपीठं मुखे न्यसेत्॥ ३२॥
कण्ठे तु मथुरापीठं यवर्गाद्यं प्रविन्यसेत्।
अयोध्यापीठकं नाभौ शवर्गादिकमुत्तमम्॥ ३३॥
कट्योः काञ्चिपुरीपीठं दशमन्तु प्रविन्यसेत्।
षोढ़ान्यासस्तु तारायाः प्रोक्तस्त्वेष्टप्रदायकः॥ ३४॥
हृदि श्रीमदेकजटान्तारिणीं शिरसि न्यसेत्।
वज्रादेकां शिखायान्तु उग्रतारान्तु वर्म्मणि॥ ३५॥
महापरिसरे नेत्रे पिङ्गोग्रैकजटेऽस्त्रके।
षट्दीर्घयुक्तमायाद्या एता न्यस्याः षड़ङ्गके॥ ३६॥
अङ्गुष्ठादिष्वङ्गुलेषु पूर्वं विन्यस्य यत्नतः।
तर्ज्जनीमध्यमाभ्यान्तु कृत्वा तालत्रयं ततः॥ ३७॥
छोटिकामुद्रया कुर्य्याद्दिग्बन्धं देवतां स्मरन्।
विद्यया तारपुटया व्यापकं सप्तधा चरेत्।
उग्रतारां ततो ध्यायेत् सद्योवाक्सिद्धिदायिनीम्॥ ३८॥

---

षड़ङ्गमाह षड़िति ह्रां ह्रीमित्यादि। ६—३८॥

विश्वव्यापकवारिमध्यविलसच्छ्वेताम्बुजन्मस्थितां
कर्त्रीखड्गकपालनीलनलिनैराजत्करां नीलभाम् ।
काञ्चीकुण्डलहारकङ्कणलसत्केयूरमंजीरता-
माप्तैर्नागवरैर्विभूषिततनूमारक्तनेत्रत्रयाम् ॥ ३९ ॥
पिङ्गोग्रैकजटां ललत्सुरसनां दंष्ट्राकरालाननां
चर्म्म द्वैपिवरं कटौ विदधतीं श्वेतास्थिपट्टालिकाम् ।
अक्षोभ्येण विराजमानशिरसं स्मेराननाम्भोरुहां
तारां शावहृदासनां दृढ़कुचामम्बां त्रिलोक्याः स्मरेत् ॥ ४० ॥
एवं ध्यायन् नदन् भक्ष्यमनेकं दधिमध्वपि ।
मधु मांसञ्च ताम्बूलं जपेल्लक्षचतुष्टयम् ॥ ४१ ॥
दशांशं जुहुयाद्रक्तपद्मैः क्षीराज्यलोलितैः ।
स्थापयित्वा महाशङ्खं जपस्थाने जपं चरेत् ॥ ४२ ॥
नारीं पश्यन् स्पृशन् गच्छन् महानिशि बलिं ददत् ।
न कार्य्यः सुभ्रुवां द्वेषो यत्नात्ताः पूजयेत् सदा ॥ ४३ ॥
जपेन कालनियमो न स्थितो सर्वदा जपेत् ।
श्मशाने शून्यसदने देवागारेऽथ निर्ज्जने ॥ ४४ ॥
पर्वते वनमध्ये वा शवमारुह्य मन्त्रवित् ।
समरे शत्रुनिहतं यद्वा षाण्मासिकं शिशुम् ॥ ४५ ॥
विद्यां संसाधयेच्छीघ्रं साधितैवं प्रसिध्यति ।
मेधा प्रज्ञा प्रभा विद्या धीर्धृतिस्मृतिबुद्धयः ॥ ४६ ॥
विद्येश्वरीति संप्रोक्ताः पीठस्य नवशक्तयः ।
भृगुमन्बिन्दुसंयुक्तमेघवर्त्म सरस्वती ॥ ४७ ॥

---

ध्यानमाह विश्वेति । खड्गनीलसरोजे दक्षयोः कर्त्रीकपाले वामयोः । श्वेतोऽस्थिपट्टोऽलिके ललाटे यस्यास्ताम् अक्षोभ्यो मन्त्रद्रष्टा मुनिः तेन शोभितमस्तकाम् ॥ ३९—४१ ॥

महाशङ्खं कपालम् ॥ ४२—४६ ॥

योगपीठात्मने ह्रार्हं पीठस्य मनुरीरितः ॥ ४८ ॥
दत्त्वानेनासनं मूर्त्तिं मूलमन्त्रेण कल्पयेत्।
पूजयेद्विधिवद्देवीं तद्विधानमथोच्यते ॥ ४९ ॥
तारो माया भगं ब्रह्मा जटे सूर्य्यः सदीर्घखम्।
यक्षाधिपतये तन्द्री मोपनीतं बलिं ततः ॥ ५० ॥
गृह्णयुग्मं शिवा स्वाहा बलिं मन्त्रोऽयमीरितः।
दद्यान्नित्यं बलिं तेन मध्यरात्रे चतुष्पथे ॥ ५१ ॥
जलादनादिकं मन्त्रैर्विदध्यादृग्भिस्ततः।
ध्रुवो वज्रोदके वर्म्मफट्सप्तार्णैर्जलग्रहः ॥ ५२ ॥
ताराद्या वह्निजायान्ता मायाङ्घ्रिक्षालने स्मृताः।
तारो माया भृगुः कर्णी विशुद्धधर्म्मवर्णतः ॥ ५३ ॥
सर्वपापानिशाम्याशि श्वेतो नेत्रयुतं जलम्।
कल्पानयनाय स्वाहा षड्विंशत्यक्षरो मनुः ॥ ५४ ॥
अनेनाचमनं कुर्य्यात् ध्रुवो मणिधरीति च।
वज्रिण्यच्चियुतो मृत्युः खरि नेत्रयुता रतिः ॥ ५५ ॥
सर्वान्ते च वकः सेन्दुः कारिण्यन्ते शिरार्घिखम्।
अस्त्रवह्निप्रियामन्त्रस्त्रयोविंशतिवर्णवान् ॥ ५६ ॥

---

पीठमन्त्रमुद्धरति ध्वन्विति। धनुमन्विन्दुसंयुक्तं सकारं चौं विन्दुयुतं मेघवर्त्म ह ह्रार्दें नमः स्वरूपमन्यत् ह्रौं सरस्वतीयोगपीठात्मने नम इति। ४७—४८ ॥

नित्यबलिदानमन्त्रमाह तार इति। तारः प्रणवः माया ह्रीं भगमीकारः ब्रह्मा कः जटे स्वरूपं सूर्य्यो मः सदीर्घं ख हा तन्द्री मः शिवा ह्रीं स्वरूपमन्यत् यथा ओं ह्रीं एकजटे महायक्षाधिपतये समोपनीतं बलिं गृह्ण ह्रीं स्वाहेति अनेन नित्यं निशीथे बलिं दद्यात्। जलग्रहणादिमन्त्रानुद्धरति ध्रुव इति। ओं वज्रोदके हुं फड़िति जलग्रहणमन्त्रः। तारेति ओं ह्रीं स्वाहेति पादक्षालन-मन्त्रः। तार इति। कर्णी भृगुः उयुतः सः श्वेतः ध नेत्रयुतमधं वि स्वरूपमन्यत्

शिखाबन्धं प्रकुर्वीत मन्त्रेणानेन मन्त्रवित् ।
प्रणवो रक्षयुगलं दीर्घवर्म्मास्त्रठद्वयम् ॥ ५७ ॥
नववर्णेन मन्त्रेण कुर्य्याद्भूमिविशोधनम् ।
तारान्ते सर्वविघ्नानुत्सारयेति पदं ततः ॥ ५८ ॥
हूं फट् स्वाहा गुणेन्द्वर्णो मनुर्विघ्ननिवारणे ।
अनेन विघ्नानुत्सार्य्य भूतशुद्धिमथाचरेत् ॥ ५९ ॥
मायाबीजं जवापुष्पनिभं नाभौ विचिन्तयेत् ।
तदुत्थेनाग्निना देहं दहेत् सार्द्धं स्वपाप्मना ॥ ६० ॥
ताराबीजं सुवर्णाभं चिन्तयेद्धृदि मन्त्रवित् ।
पवनेन तदुत्थेन पापभस्म क्षिपेद्भुवि ॥ ६१
तुरीयचन्द्रकुन्दाभं बीजं ध्यात्वा ललाटतः ।
तदुत्थसुधया देहं रचयेद्देवतानिभम् ॥ ६२ ॥
अनया भूतशुद्ध्या तु देवीसादृश्यमाप्नुयात् ।
तारः पवित्रवज्रेति भूमिर्घीशेन्दुयुग्वियत् ॥ ६३ ॥
वह्निप्रियामनुः प्रोक्तो रुद्रार्णो भूमिमन्त्रणे ।
तारोऽनन्तो भृगुः कर्णौ पद्मनाभयुतो बली ॥ ६४ ॥

---

ओं ह्रीं सुविशुद्धधर्म्मसर्वपापानि शाम्याशेषविकल्पानयानय स्वाहेत्याचमनमन्त्रः । ध्रुव इति । अच्चियुतः मृत्युः शि नेत्रयुता रतिः पिवकः शः शिरः कं घींश विन्दुयुतौ ङः हूं वह्निप्रिया स्वाहा स्वरूपमन्यत् यथा—ओं मणिधरि वज्रिणि शिखरिणि सर्ववशङ्करिणि हूं फट् स्वाहेति शिखाबन्धमन्त्रः । प्रणव इति । दीर्घे वर्म्मः हूं अस्त्रं फट् ठ द्वयं स्वाहा ओं रक्ष रक्ष हूं फट् स्वाहेति भूशोधनमन्त्रः । तारेति । ओं सर्वविघ्नानुत्सारय हूं फट् स्वाहेति विघ्नवारणमन्त्रः ॥ ५०—५९ ॥

भूतशुद्धिमाह मायेति । तुरीयमिति हूं ॥ ६०—६२ ॥

तार इति । घर्घीशेन्दुयुक् वियत् ऊ विन्दुयुतो हः हूं ओं पवित्रवज्रभूमे हूं स्वाहेति भूमिनिमन्त्रणमन्त्रः ॥ ६३ ॥

खे वज्ररेखे क्रोधाख्यं वीजं पावकवल्लभा।
द्वादशार्णेन मन्त्रेण रचयेन्मण्डलं शुभम्॥ ६५॥
तारो यथागता निद्रा सट्टक् षेकभृगुर्विषम्।
सदीर्घं स्मृतिरौ साचौ महाकालो भगान्वितः॥ ६६॥
क्रोधोऽस्त्रं मनुवर्णोऽयं मनुः पुष्पादिशोधने।
तारः पाशं परां स्वाहा पञ्चार्णश्चित्तशोधने॥ ६७॥
मनवो दश संप्रोक्ता अर्घ्यस्थापनमुच्यते।
सेन्दुभ्यां मांसतोयाभ्यां भुवं सम्मृज्य भूगृहम्॥ ६८॥
वृत्तत्रिकोणसंयुक्तं कुर्य्यान्मण्डलमन्त्रतः।
यजेत्तत्राधारशक्तिं कच्छपं नाम नायकम्॥ ६९॥
आधारं स्थापयेत्तत्र ताराद्यस्त्राङ्गमायया।
वह्निमण्डलमभ्यर्च्य महाशङ्खं निधापयेत्॥ ७०॥
वामकर्णेन्दुयुक्तेन फडन्तेन विहायसा।
प्रक्षालितं भृगुं दण्डित्रिमूर्त्तीन्दुयुतं पठन्॥ ७१॥
ततोऽर्चयेन्महाशङ्खं जपन्मन्त्रचतुष्टयम्।
दीर्घत्रयान्विता माया काली सृष्टिः सदीर्घपः॥ ७२॥

---

तार इति। पनन्त पा कर्णौ भृगुः स पद्मनाभयुतौ वबौ एयुतौ रः ऐ क्रोधवीजं हूं षौं षासुरेखे वज्ररेखे हूं स्वाहेति मण्डलमन्त्रः॥ ६४—६५॥

तार इति। सदृक् निद्रा ऋयुतो भः भि भृगुः सः विषं मः सदीर्घं मायुतं स्मृतिरौ गकाररेफौ साचौ द्रायुग्मौ म्रि भगान्वितौ महाकाल एयुतौ मः क्रोधो हुं अस्त्रं फट् षौं यथागताभिषेकसमाधिमे हुं फडिति पुष्पशोधनमन्त्रः। तार इति। पाश षां परा ह्रीं षौं षां ह्रीं स्वाहेति चित्तशोधनमन्त्रः॥ ६६—६७॥

अर्घ्यस्थापनमाह सेन्दुभ्यामिति। मांसं लः तोयं वः सविन्दुभ्यामाभ्यां भूमिं संशोध्य पूर्वोक्तेन मण्डलमन्त्रेण वृत्तत्रिकोणचतुष्कोणात्मकं मण्डलं कुर्य्यात् तत्राधारशक्तिकूर्मशेषान् संपूज्य षौं ह्रीं फडिति मन्त्रेणार्घ्याधारं स्थापयेत् मं वह्निमण्डलाय नम इति तत् संपूज्य वामकर्णेन्दुयुक्तेन कविन्दुयुतेन फडन्तेन विहायसा हकारेण हूं फडिति मन्त्रेण प्रक्षालितं महाशङ्खं नरकपालं दण्डि-

प्रतिष्ठासंयुतं मांसं पवनो हृदयं ततः।
एकादशार्णः प्रथमो महाशङ्खार्चने मनुः॥ ७३॥
हंसो हरिभुजङ्गेशयुतो दीर्घत्रयेन्दुयुक्।
तारिण्यन्ते कपालाय नमोऽन्तो द्वादशाक्षरः॥ ७४॥
खं दीर्घत्रयबिन्द्वाढ्यं मेषो वामदृगन्वितः।
लोकपालाय हृदयं तृतीयोऽयं शिवाक्षरः॥ ७५॥
मायास्त्रीबीजमर्घेन्दुयुतङ्खं स्वर्गखादिमः।
पालाय सर्वाधाराय सर्वः सर्वोद्भवस्तथा॥ ७६॥
सर्वसिद्धिमयश्चेति ङेन्ताः सर्वासुरान्ततः।
रुधिरारुणतिर्दीर्घा वायुः शुभ्रानिलः सुरा॥ ७७॥
भाजनाय भगी सत्यो वीकपालाय हृन्मनुः।
तूर्यो रसेषु वर्णोऽयं महाशङ्खप्रपूजने॥ ७८॥
तत्रार्कमण्डलं चेष्ट्वा सलिलं मूलमन्त्रतः।

---

त्रिमूर्तीन्दुयुतं च ईबिन्दुयुक्तं भृगुं सकारं स्त्रीमिति बीजं पठन् स्थापयेदित्यन्वयः ततो मन्त्रचतुष्टयेन महाशङ्खपूजामन्त्रचतुष्टयमाह दीर्घेति। दीर्घत्रयं आ ई ऊ तद्युता माया सृष्टिः कः सदीर्घं पः पा प्रतिष्ठा आकारस्तद्युतं मांसं लः ला पवनो वः हृदयं नमः क्रां क्रीं क्रूं कालीकपालाय नमः इत्येको मन्त्रः॥६८—७३॥

हंस इति। हंसः सः हरिभुजङ्गेशौ तरौ ताभ्यां युतः तथा दीर्घत्रयबिन्दुयुतश्च स्वरूपमन्यत् स्त्रां स्त्रीं स्त्रूं तारिणीकपालाय नम इति द्वितीयः॥ ७४॥

खमिति। खं हः दीर्घत्रयबिन्दुयुतः वामदृगन्वितो मेषः ईयुतो नः नी स्वरूपमये ह्रां ह्रीं ह्रूं नीलाकपालाय नम इति तृतीयः॥ ७५॥

चतुर्थमाह मायेति। माया ह्रीं स्त्रीं बीजं स्त्री अर्घेन्दुयुतं खं हं स्वर्गस्वरूपं खादिमः कः पालायेत्यादि स्वरूपं सर्वः सर्वोद्भवः सर्वसिद्धिमय इति पदत्रयं चतुर्थ्यन्तं स्वरूपमयं दीर्घा रतिः रा वायुः यः शुभ्रा स्वरूपम् अनिलो यकारः सुराभाजनाय स्वरूपं भगी सत्यः एयुतो दः देवीत्यादि स्वरूपं हृन्नमः यथा ह्रीं स्त्रीं हं स्वर्गकपालाय सर्वाधाराय सर्वाय सर्वोद्भवाय सर्वसिद्धिमयाय सर्वासुररुधिरारुणाय शुभ्राय सुराभाजनाय देवीकपालाय नम इति चतुर्थो

प्रपूरयेत् सुधाबुद्ध्या गन्धपुष्पाक्षतान् क्षिपेत् ॥ ७९ ॥
मुद्रां त्रिखण्डां संदर्श्य पूजयेच्चन्द्रमण्डलम्।
वाक्शक्तिपद्मागगनं रेफानुग्रहबिन्दुयुक् ॥ ८० ॥
मूलमन्त्रो वियद्धंसमनुसर्गसमन्वितम्।
वराहो दीपिकेन्द्वाढ्यो मनुरेकादशाक्षरः ॥ ८१ ॥
अष्टकृत्वोऽसुना मन्त्री मन्त्रयेत् प्रयतो जलम्।
मायया मदिराङ्किशा शङ्खं योनिञ्च दर्शयेत् ॥ ८२ ॥

---

मन्त्री रवेषु वर्णः षट्पञ्चाशदक्षरः एभिर्नदाशङ्खं सम्पूज्य भं सूर्यमण्डलाय नम इत्यर्कमण्डलं सम्पूज्य मूलमन्त्रं पठन् सुधाबुद्ध्या तोयं संपूज्य तत्र गन्धपुष्पाक्षतान् क्षिपेत् सुधा सुरा चेति रहस्यम् ॥ ७६—७९ ॥

त्रिखण्डां मुद्रां बध्वा सं सोममण्डलाय नम इति तोयं चन्द्रमण्डलं सम्पूज्यैकादशार्णेन मन्त्रेणाष्टवारं जलं मन्त्रयेत्। त्रिखण्डालक्षणं यथा—परिवर्त्य करौ स्पष्टावङ्गुष्ठौ कारयेत् समौ। अनामिकान्तर्गते कृत्वा तर्जन्यौ कुटिलाकृतौ।

कनिष्ठिके नियुञ्जीत निजस्थाने महेश्वरी।
त्रिखण्डेयं समाख्याता त्रिपुराह्वानकर्मणि ॥

इति। एकादशार्णमाह वागिति। वाक् ऐं शक्तिः ह्रीं पद्मा श्रीं रेफानुग्रहबिन्दुयुक् गगनं रेफ औ बिन्दुयुतो हः ह्रौं मूलमन्त्रः पूर्वोक्तः पञ्चार्णः हंसमनुसमन्वितं वियत् स औ विसर्गयुतोहः हसौः दीपिकेन्द्वाढ्यो वराहः ऊबिन्दुयुतोहः हूं यथा ऐं ह्रीं श्रीं ह्रौं ऐं क्लीं ह्रीं हूं फट् हसौः हूमिति ततो ह्रीं बीजेन तोये सुरां प्रक्षिप्य शङ्खयोनिमुद्रे दर्शयेत्। तयोर्लक्षणं यथा—

वामाङ्गुष्ठन्तु संगृह्य दक्षहस्तस्य मुष्टिना।
कृत्वोत्तानं तथा मुष्टिमङ्गुष्ठन्तु प्रसारयेत्।
वामाङ्गुल्यस्तथा श्लिष्टाः संयुताः सुप्रसारिताः।
दक्षिणाङ्गुष्ठके लग्ना मुद्रा शङ्खस्य भूतिदा ॥

इति शङ्खमुद्रालक्षणम्। मिथः कनिष्ठिके बध्वा तर्ज्जनीभ्यामनामिके।

अनामिकोर्द्ध्वे संश्लिष्टदीर्घमध्यमयोरधः।
अङ्गुष्ठाग्रद्वयं न्यसेद्योनिमुद्रेयमीरिता ॥

इति योनिमुद्रालक्षणम् ॥ ८०—८२ ॥

तत्र वृत्ताष्टषट्कोणं ध्यात्वा देवीं विचिन्तयेत् ।
पूर्वोक्तां पूजयित्वैनां मूलेनाथ प्रतर्पयेत् ॥ ८३ ॥
तर्जनीमध्यमानामाकनिष्ठाभिर्महेश्वरीम् ।
साङ्गुष्ठाभिश्चतुर्वारं महाशङ्खस्थिते जले ॥ ८४ ॥
खं रेफमनुबिन्द्वाढ्यं भृगुमन्विन्दुयुक् तथा ।
ध्रुवाद्येन नमोऽन्तेन तर्प्यादानन्दभैरवम् ॥ ८५ ॥
ततस्तेनार्घ्यतोयेन प्रोक्षेत् पूजनसाधनम् ।
योनिमुद्रां प्रदर्श्याथ प्रणमेद्भवतारिणीम् ॥ ८६ ॥
विधानमर्घ्ये सम्प्रोक्तं सर्वसिद्धिप्रदायकम् ।
पूर्वोक्ते पूजयेत् पीठे पद्मे षट्कोणकर्णिके ॥ ८७ ॥
धराग्टहावृते रम्ये देवीं रम्योपचारकैः ।
महीग्टहचतुर्दिक्षु गणेशादीन् प्रपूजयेत् ॥ ८८ ॥
पाशाङ्कुशौ कपालञ्च त्रिशूलं दधतं करैः ।
अलङ्कारचयोपेतं गणेशं प्राक् समर्चयेत् ॥ ८९ ॥
कपालशूले हस्ताभ्यां दधतं सर्पभूषणम् ।
श्वयूथवेष्टितं रम्यं वटुकं दक्षिणेऽर्चयेत् ॥ ९० ॥
असिशूलकपलानि डमरुं दधतं करैः ।
कृष्णं दिगम्बरं क्रूरं क्षेत्रपं पश्चिमे यजेत् ॥ ९१ ॥
कपालं डमरुं पाशं लिङ्गं सम्बिभ्रतीः करैः ।
अन्याकल्पारक्तवस्त्रा योगिनीरुत्तरे यजेत् ॥ ९२ ॥

---

तत्रार्घ्यजले [illegible] षट्कोणरूपं यन्त्रं विचिन्त्य ध्यानोक्तां देवीञ्च स्मृत्वा मूलेनार्चयेत् [illegible]भिस्तर्जन्याद्यङ्गुलीभिरर्घ्यजले मूलेन तां तर्पयेदिति । [illegible] सः तथा हकार एव भृग्वादियुतः ध्रुव [illegible] [illegible] आनन्दभैरवं तर्पयेत् इत्यर्घविधिं कृत्वा पूर्वोक्तपीठादिन [illegible] पूजयेत् ॥ ८३—८८ ॥

[illegible] पाशेति । [illegible] दधती: अलङ्काराणां [illegible]

अक्षोभ्यं प्रयजेन्मूर्ध्नि देव्या मन्त्र ऋषिं शुभम्।
अक्षोभ्यं वज्रपुष्पञ्च प्रतीच्छानलवल्लभा ॥ ९३ ॥
अक्षोभ्यपूजने मन्त्रः षट्कोणेषु षड़ङ्गकम्।
वैरोचनं चामिताभं पद्मनामाभिधं तथा ॥ ९४ ॥
शङ्खं पाण्डरसंज्ञञ्च दिग्दलेषु प्रपूजयेत्।
लामकां मामकाञ्चैव पाण्डरां तारकां तथा ॥ ९५ ॥
विदिग्गताब्जपत्रेषु पूजयेदिष्टसिद्धये।
सविन्दुनामाद्यवर्णाद्याः सम्बुध्यन्तास्तथाभिधाः ॥ ९६ ॥
वज्रपुष्पं प्रतीच्छाग्निप्रियान्ताः प्रणवादिकाः।
वैरोचनादिपूजायां मनवः परिकीर्त्तिताः ॥ ९७ ॥
भूगृहस्य चतुर्द्वारि पद्मान्तकयमान्तकौ।
विघ्नान्तकाभिधं पश्चान्नरान्तकाभिधं यजेत् ॥ ९८ ॥
शक्रादींश्चापि वज्रादीन् पूजयेत्तदनन्तरम्।
एवं सम्पूजयेद्देवीं पाण्डित्यं धनमद्भुतम् ॥ ९९ ॥
पुत्रान् पौत्रान् सुखं कीर्त्तिं लभते जनवश्यताम्।
तारो माया श्रीमदेकजटे नीलसरस्वति ॥ १०० ॥
महोग्रतारे देवान्तः सनेत्रो गदियुग्मकम्।
सर्वभूतपिशा कुर्मो दीर्घोऽग्निर्मेदसान् ग्रसः ॥ १०१ ॥

---

समुद्रस्तद्युतं वटुकस्य दद्यात् शूलं चैत्रपालस्यान्तिशूले दद्यात्: योगिनीनां पात्र-लिङ्गे दद्यात्: ॥ ८९—९२ ॥

अक्षोभ्यं वज्रपुष्पं प्रतीच्छ स्वाहेति मुनिमन्त्रः ॥ ९३—९५ ॥

चेति सरति सविन्दुनामादिवर्णं आद्यो यासां ईदृश्यः सम्बोधनान्ताः प्रण-वाद्या वह्न्याद्यन्ता अभिधानामान्येव वैरोचनादिमन्त्राः यथा ओं वैं वैरोचनवज्र-पुष्पं प्रतीच्छ स्वाहा ओं अं अमिताभवज्र ओं पं पद्मनाभ ओं शं शङ्खपाण्डर ओं लां लामके ओं मां मामके ॥ ९६ ॥

वज्र इत्यादि पद्मान्तकादिपूजायामप्येवं मन्त्राः। नित्यपूजान्ते बलिदान-

अश्वगुर्मम जाड्यं छेदय द्वितयं रमा ।
मायास्त्राग्निप्रियान्तोऽयं द्विपञ्चाशल्लिपिर्मनुः ॥ १०२ ॥
अनेन नित्यपूजान्तेऽन्वहं देव्यै बलिं हरेत् ।
एवं सिद्धे मनौ मन्त्री प्रयोगान् विदधीत च ॥ १०३ ॥
जातमात्रस्य बालस्य दिवसत्रितयादधः ।
जिह्वायां विलिखेन्मन्त्रं मध्वाज्याभ्यां शलाकया ॥१०४॥
सुवर्णकृतया यद्वा मन्त्री धवलदूर्वया ।
गतेऽष्टमेऽब्दे बालोऽसौ जायते कविराट् ध्रुवम् ॥ १०५ ॥
तथा परैरजेयोऽपि भूपसङ्घैर्धनार्चितः ।
उपरागे दत्त्वानीय तरद्दारु सरोजले ॥ १०६ ॥
निर्माय कीलकं तेन तैलमध्वक्तैर्लिखेत् ।
सरोजिनीदले मन्त्रं वेष्टयेन्मातृकाक्षरैः ॥ १०७ ॥
निखाय तद्दलं कुण्डे चतुरस्रे समेखले ।
संस्थाप्य पावकं तत्र जुहुयान्मनुना सुना ॥ १०८ ॥
सहस्रं रक्तपद्मानां धेनुदुग्धजलाप्लुतम् ।
होमान्ते विविधै रक्तपलैरपि बलिं हरेत् ॥ १०९ ॥

---

मन्त्रमाह तार इति । तार ओं माया ह्रीं वाली वः स नेत्रयुतः वि गदीशः कूर्मश्चकारः दीर्घोऽग्निः रा मेरुः षः भृगुः सः रमा श्रीं माया ह्रीं अस्त्रं फट् अग्निप्रिया स्वाहा स्वरूपमन्यत् यथा ओं ह्रीं श्रीमदेकजटे नीलसरस्वति महोग्र तारे देवि ख ख सर्वभूतपिशाचराक्षसान् ग्रस ग्रस मम जाड्यं छेदय छेदय श्रीं ह्रीं फट् स्वाहेति द्विपञ्चाशदर्णः ॥ ९७—१०५ ॥

प्रयोगान्तरमाह उपराग इति । ग्रहणे तडागे तरत् काष्ठं दत्त्वा दन्तेनानीय तेन लेखनीं कृत्वा तैलमधुयुताभिः पद्मिनीपत्रे तया मनुमालिख्य वर्णैः संवेष्ट्य कुण्डे निखाय तदुपर्यग्निं प्रतिष्ठाप्य गोदुग्धाक्तेन रक्तपद्मसहस्रेण तत्र हुत्वा पीडशार्णेन मांसैर्होमान्ते बलिं दत्त्वा मध्यरात्रे पूर्वोक्तमन्त्रेण बलिं दद्यात् एवं कृते फलसिद्धिः ॥ १०६—१०९ ॥

बलिमन्त्रेण विधिवद्बलिमन्त्रः प्रकाश्यते ।
तार पद्मे युगं तन्द्री वियद्दीर्घं च लोहितः ॥ ११० ॥
अत्रिर्विषभगारूढ़ो वदेत् पद्मावतीपदम् ।
किटीशाद्योऽनिलः स्वाहा षोड़शार्णो बलेर्मनुः ॥ १११ ॥
ततो निशीथेऽपि बलिं पूर्वोक्तमनुना हरेत् ।
एवं कृते पण्डितानामजेयः कविराड् भवेत् ॥ ११२ ॥
निवासो भारतीलक्ष्म्योर्जनतारञ्जनक्षमः ।
शताभिजप्तां यो मन्त्री रोचनामलिके धरेत् ॥ ११३ ॥
स यं पश्यति तस्यासौ दासवज्जायते क्षणात् ।
श्मशानाङ्गारमाहृत्य शर्वर्यां कुजवासरे ॥ ११४ ॥
कृष्णाम्बरेण संवेष्ट्य निबद्धं रक्ततन्तुभिः ।
शताभिजप्तमूलेन निक्षिपेद्वैरिवेश्मनि ॥ ११५ ॥
उच्चाटयति सप्ताहात् सकुटुम्बान् विरोधिनः ।
चाराख्यया निशा मन्त्रं लिखित्वा पौरुषेऽस्थिनि ॥११६ ॥
रविवारे निशीथिन्यां सहस्रमभिमन्त्रयेत् ।
तत्क्षिप्तं शत्रुसदने मण्डलादभ्रंशकं भवेत् ॥ ११७ ॥
चैत्रे क्षिप्तं शस्यहान्यै जवहृत्तुरगालये ।
षट्कोणमध्ये प्रविलिख्य मूलं साध्यान्वितं केसरगस्वराढ्यम् ।
काद्यष्टवर्गान्वितपत्रमब्जं लिखेद्वहिर्भूमिपुरेण वीतम् ॥११८॥

---

षोड़शार्णमाह तार इति । तन्द्री मः दीर्घं वियत् हा लोहितः पः विषभगारूढ़ोऽत्रिः नए युतौ दः शे अनिलो किटीशाद्यो य एयुतः ये यथा ओं पद्मे पद्मे महापद्मे पद्मावतीये स्वाहेति अलिके ललाटे धरेत् तिलकं कुर्यादित्यर्थः ॥ ११०—११५ ॥

विरोधिनः शत्रूनुच्चाटयति निष्कामयति चाराख्यया निशा सैन्धवयुक्तया हरिद्रया ॥ ११६—११७ ॥

यन्त्रमेतल्लिखेद्भूर्ज्जे रसेन जतुजन्मना ।
पीताम्बरेण संवेष्ट्य वध्नीयात् पीतसूत्रतः ॥ ११९ ॥
शिशूनां कण्ठतो बद्धं रक्षकं भूतभीतितः ।
वामबाहौ तु नारीणां पुत्रदं सुभगत्वकृत् ॥ १२० ॥
दक्षबाहौ नृणां बद्धं निर्धनानां धनप्रदम् ।
ज्ञानदं ज्ञानमिच्छूनां राज्ञान्तु विजयप्रदम् ॥ १२१ ॥
एतद्यन्त्रं पुरा धृत्वा गौतमाद्या महर्षयः ।
लेभिरे मोक्षसंसिद्धिं साम्राज्यं भूमिनायकाः ।
किं भूरिणा नृणामेतद्वाञ्छितां यच्छति श्रियम् ।
कवित्वं राजमानञ्च कीर्त्तिमायुररोगताम् ॥ १२२ ॥
नैव तारासमा काचिद्देवता सर्वसिद्धिदा ।
कलौ युगे ततो गोप्या वाञ्छितां सिद्धिमीप्सुना ॥ १२३ ॥

इति श्रीमन्त्रमहोदधौ तारामन्त्रकथनं नाम
चतुर्थस्तरङ्गः ॥ ४ ॥

---

यन्त्रमाह षड़िति । षट्कोणे साध्यान्वितं मूलम् अमुकं रक्ष रक्षेति युक्तं मूलमन्त्र विलिख्याष्टदलकेशरेषु अं आमित्यादिस्वराणां युग्मपत्रेषु कचतपयशवेति-वर्गान् विलिख्य वहिश्चतुष्कोणेन वेष्टयेत् । जतुजन्मना लाक्षोत्थेन रसेन ॥ ११८—१२१ ॥

तारा गोप्या अहं तदुपासक इति कस्याप्यग्रे न प्रकाशयेत् ॥ १२२ ॥

इति नौकासमाख्यायां श्रीमन्त्रमहोदधिटीकायां तारामन्त्र-
निरूपणं नाम चतुर्थस्तरङ्गः ॥ ४ ॥

## पञ्चमस्तरङ्गः ।

ताराभेदा यथोच्यन्ते शीघ्रसिद्धिप्रदायिनः ।
वह्निवामाक्षिविन्द्वाढ्या कामिका भुवनेश्वरी ॥ १ ॥
भुवनेशी वर्म्मवधू फडन्ता प्रणवादिका ।
सप्ताक्षरी महाविद्या विरिञ्चिसमुपासिता ॥ २ ॥
वाक् शक्तिः कमला कामो हंसोऽनुग्रहसर्गवान् ।
वर्म्मोग्रतारे वर्म्मास्त्र वैष्णवी द्वादशाक्षरी ॥ ३ ॥
तार वर्म्म शिवा कामो मनुसर्गयुतो भृगुः ।
वर्म्मास्त्रमेषा सप्तार्णा सिद्धिदा विष्णुसेविता ॥ ४ ॥
एतयोः पञ्चमे वीजे सकारो हादिरान्तिमः ।
तदा विद्याद्वयं प्रोक्तं चतुर्मुखसमर्च्चितम् ॥ ५ ॥
तारो माया वर्म्म माया वर्म्मास्त्रञ्च रसाक्षरी ।

---

ताराभेदानाह ब्रह्मोपासितां तावदाह वह्निरिति । रेफविन्दुयुता कामिका तकारः त्रीं वर्म्मवधूभुवनेशी वर्म्मद्वयमध्यगतेत्यर्थः यथा ओं त्रीं ह्रीं हुं ह्रीं हुं फडिति ॥ १ ॥ २ ॥

विष्णूपासितामाह वागिति । कामः क्लीं अनुग्रहसर्गवान् हंसः औविसर्गयुतः सः सौः यथा ऐं ह्रीं श्रीं क्लीं सौः हुं उग्रतारे हुं फडिति ॥ ३ ॥

द्वितीयां विष्णूपासितामाह तारेति । शिवा ह्रीं भृगुः सः यथा ओं हुं ह्रीं क्लीं सौः हुं फडिति ॥ ४ ॥

चतुर्मुखोपासितं मन्त्रद्वयमाह एतयोरिति । एतयोरनन्तरोक्तयोर्विष्णूपासितयोर्द्वादशाक्षरीसप्ताक्षरयोर्विद्ययोः पञ्चमे वीजे सौरूपे यदि आदौ हकारः अन्ते रेफः तदा तदेव विद्याद्वयं चतुर्मुखसेव्यं हः आदौ यस्य रः अन्तिमो यस्य स हादिरान्तिमः यथा ऐं ह्रीं श्रीं क्लीं हसौः हुं उग्रतारे हुं फडित्याद्या ओं हुं ह्रीं क्लीं हसौः हुं फडिति द्वितीया ॥ ५ ॥

हरिरग्निविमूर्त्तीन्दुयुग्वर्म्म पुटिताद्रिजा ॥ ६ ॥
अस्त्रान्ता पञ्चवर्णेयं प्रोक्तमेकजटाद्वयम् ।
रेफशान्तीन्दुयुक्णान्तो वर्म्मास्त्रकामवाग्भवम् ॥ ७ ॥
नारायणोपासितेयं पञ्चार्णा सर्वसिद्धिदा ।
अमूषामष्टविद्यानामृषिः शक्तिर्वसिष्ठजः ॥ ८ ॥
गायत्रीतारके छन्दोदेवते परिकीर्त्तिते ।
न्यासन्तु पूर्ववत् कृत्वा ध्यायेत्तारां हृदम्बुजे ॥ ९ ॥
श्वेताम्बरां शारदचन्द्रकान्तिं सद्भूषणां चन्द्रकलावतंसाम् ।
कर्त्रीकपालान्वितपाणिपद्मां तारां त्रिनेत्रां प्रभजेऽखिलर्द्ध्यै ॥१०॥
जपपूजादिकं सर्वमासां पूर्ववदाचरेत् ।
मधुयुक्परमान्नेन होमाद्विद्यानिधिर्भवेत् ॥ ११ ॥
रक्ताम्वश्ये स्वर्णवर्णां स्तम्भने मारणे सिताम् ।
उच्चाटने धूम्रवर्णां शान्तौ श्वेतां स्मरेदिमाम् ॥ १२ ॥
भूरिणा किमिहोक्तेन विद्या एताः प्रसाधिताः ।
पूरयन्त्यखिलं नृणां मनोरथमिह ध्रुवम् ॥ १३ ॥
मायाह्रुङ्गवत्येकजटे मम जलं स्थिरा ।
वज्रासनगता पुष्पं प्रतीच्छानलवल्लभा ॥ १४ ॥
द्वाविंशत्यक्षरो मन्त्रस्तारादिः सर्वसिद्धिदः ।

---

एकजटाद्वयमाह तार इति । अग्निविमूर्त्तीन्दुयुक् हरिः र ईविन्दुयुक् तकारस्त्रीं स्पष्टमन्यत् यथा ओं ह्रीं हुं स्त्रीं हुं फट् इति प्रथमा वीं हुं स्त्रीं हुं फडिति द्वितीया । नारायणीयामाह रेफेति । रेफ ईकारः अनुस्वारयुक्तः यथा वीं हुं फट् स्त्रीं रैंनिति ॥ ६ ॥ ७ ॥

उक्तानामष्टविद्यानामृष्यादीनाह अमूषामिति ॥ ८ ॥

गायत्री छन्दः तारा देवता पूर्ववत् षड्दीर्घाढ्यमायाबीजेन ह्रां ह्रीमित्यादि ॥९

ध्यानमाह श्वेताम्बरामिति । कर्त्री दचे ॥ १० ॥

प्रयोगानाह मध्विति ॥ ११—१३ ॥

ऋषिः पतञ्जलिश्छन्दो गायत्र्येकजटा पुनः ॥ १५ ॥
देवता दीर्घषट्काद्यमायया स्यात् षड़ङ्गकम् ।
ध्यानार्चनप्रयोगांस्तु कुर्य्यात् पूर्वोक्तमन्त्रवत् ॥ १६ ॥
रमां माया हसौ व्यापिन्यारूढ़ौ सर्गसंयुतौ ।
वर्म्मास्त्रं नीलभृगु रस्वत्यै ठद्वयमीरितम् ॥ १७ ॥
प्रणवाद्यो मनुः सर्वसिद्धिदो मनुवर्णकः ।
ऋष्याद्या ब्रह्मगायत्री तथा नीलसरस्वती ॥ १८ ॥
नेत्रचन्द्रेन्दुनेत्राङ्गनेत्रार्णैरङ्गकल्पना ।
मन्त्रोत्थितैरथो ध्यायेद्देवीं सर्वेष्टसिद्धिदाम् ॥ १९ ॥
घण्टां शिरः शूलमसिञ्चराग्रैः संबिभ्रतीं चन्द्रकलावतंसाम् ।
प्रमथ्नतीं पादतले पशुं तां भजे मुदा नीलसरस्वतीशाम् ॥ २०॥
जपपूजादिकं सर्वमस्याः पूर्ववदीरितम् ।
विशेषाज्जयदा वादे विद्येयं साधिता नृणाम् ॥ २१ ॥
माया सानन्तसंयुक्ता वर्म्मद्वत् ङेयुता पुनः ।
तारा महापदाद्या सा भृगुर्ब्रह्मानलान्तिमः ॥ २२ ॥
दुस्तरांस्तारयद्वन्द्वं तरयुग्मञ्च ठद्वयम् ।
द्वात्रिंशद्वर्णा ताराद्या पूजास्याः पूर्ववन्मता ॥ २३ ॥

---

एकजटामाह मायेति । नत्वं वः वङ्कासनगता स्थिरा रेफयुतो नः च यथा ओं ह्रीं नमो भगवत्येकजटे मम वज्रपुष्पं प्रतीच्छ स्वाहेति ॥ १४—१६ ॥

नीलसरस्वतीमाह रमेति । व्यापिन्यारूढ़ौ नौ युतौ नीलश्चेरूपं भृगुः सः रस्वत्यै स्वरूपं ठद्वयं स्वाहा । यथा ओं श्रीं ह्रीं हसौः हुं फट् नीलसरस्वत्यै स्वाहा मनुवर्णश्चतुर्दशार्णः ॥ १७ ॥ १८ ॥

षड़ङ्गमाह नेत्रेति । नेत्रशब्देनार्णद्वयं चन्द्र एकः षड़ानि षट् ॥ १९ ॥

ध्यानमाह घण्टामिति । शूलासी दक्षयोः ॥ २० ॥ २१ ॥

मन्त्रान्तरमाह मायेति । सा माया आनन्तसंयुता आकारसंयुता हा ङेयुता तारा तारायै सा महा यदाद्या महातारायै भृगुः सः ब्रह्मा कः अनला-

विद्याराज्ञीमथो वक्ष्ये सुरेन्द्रस्यापि दुर्लभाम् ।
लब्ध्वा यां मानवाः स्वेष्टं साधयन्त्यर्चने रताः ॥ २४ ॥
वाग्माया श्रीर्मनोजन्मा हंसोऽनुग्रहविन्दुयुक् ।
कामः शक्तिश्च वाक्वीजं फान्तो लार्घीशविन्दुयुक् ॥ २५ ॥
स्त्रीवीजं नीलतारे स्यात् सम्बुध्यन्ता सरस्वती ।
अतौ सरेफौ क्रमतः शेषवामाचिसंयुतौ ॥ २६ ॥
सानुस्वारौ कामवीजं फान्तो मांसार्घिविन्दुगः ।
सर्गी भृगुर्वाक् हृल्लेखा रमा कामोऽथ सौहयम् ॥ २७ ॥
सर्गान्तं भुवनेशानी स्वाहा द्वात्रिंशदक्षरा ।
महाविद्या समाख्याता सेविता भोगमोक्षदा ॥ २८ ॥
ब्रह्मानुष्टुप्सरस्वत्यो मुन्याद्या अङ्गकल्पना ।
पञ्चपञ्चाष्टपञ्चेषु युगार्णैर्मन्त्रसम्भवैः ॥ २९ ॥
शवासनां सर्पविभूषणाढ्यां कर्त्रीकपालक्षषकं त्रिशूलम् ।
करैर्दधानां नरमुण्डमालां भजे नीलसरस्वतीं ताम् ॥३०॥
चतुर्लक्षं जपेद्विद्यां किंशुकैर्मधुरान्वितैः ।
दशांशं जुहुयाद्वह्नौ श्रद्धापूर्वमतन्द्रितः ॥ ३१ ॥

---

न्तिमो वः स्पष्टमन्यत् तथा ताराद्या वीजाद्या यथा ओं ह्रीं त्रां हुं नमस्तारायै महातारायै सकलदुस्तरांस्तारय तारय तर तर स्वाहेति ॥ २२—२४ ॥

द्वात्रिंशद्वर्णां विद्याराज्ञीमाह वागिति । मनोजन्मा क्लीं अनुग्रहविन्दुयुक् हंसः सः सौ वार्घीशविन्दुयुक् फान्तः ल जविन्दुयुतो वः व्लूं । स्त्रीवीजं स्त्रीं सरेफौ रेफयुक्तौ शववामाक्षिसंयुतौ क्रमत आईसंयुतौ अत्रौ दकारौ सानुस्वारौ द्रान्द्रीमिति । कामवीजं क्लीं मांसार्घीविन्दुयुक् स जविन्दुयुक्तः फान्तो वः व्लूं सर्गी भृगुः स ह्रल्लेखा ह्रीं यथा ऐं ह्रीं श्रीं क्लीं सौं क्लीं ह्रीं ऐं व्लूं स्त्रीं नील-तारे सरस्वति द्रां द्रीं क्लीं व्लूं सः ऐं ह्रीं श्रीं क्लीं सौः सौः ह्रीं स्वाहेति ॥ २५—२८ ॥

षडङ्गमाह पञ्चेति ॥ २९ ॥

ध्यानमाह शवेति । कर्त्री त्रिशूली दक्षयोः ॥ ३० ॥

पूर्वोक्ते पूजयेत् पीठे वक्ष्यमाणेन वर्त्मना।
आदौ त्रिकोणं षट्कोणमष्टषोड़शपत्रके ॥ ३२ ॥
द्वात्रिंशत्पत्रमब्जं स्याच्चतुःषष्टिदलं ततः।
त्रिरेखाढ्यं धरागेहं चतुरस्रमतःपरम् ॥ ३३ ॥
एवं यन्त्रं समालिख्य वाह्यतः पूजनं चरेत्।
चतुरस्रस्याग्निकोणे विघ्नेशं परिपूजयेत् ॥ ३४ ॥
वायुकोणे क्षेत्रपालमैशान्ये भैरवं तथा।
नैर्ऋते योगिनीः सर्वा वामभागे गुरुं यजेत् ॥ ३५ ॥
भूगृहस्याद्यरेखायामणिमा लघिमा तथा।
महिमा चेशिता पूज्या वशिता कामपूरणी ॥ ३६ ॥
गरिमा प्राप्तिरित्येताः पूज्याः पूर्वादिदिक्क्रमात्।
धरागृहस्य रेखायां द्वितीयायान्तु भैरवाः ॥ ३७ ॥
असिताङ्गो रुरुश्चण्डः क्रोधोन्मत्तकपालिनः।
भीषणश्चाथ संहार एतेऽष्टौ भैरवाः स्मृताः ॥ ३८ ॥
भूमिगेहे तृतीयायां रेखायां मातरः पुनः।
ब्राह्मी माहेश्वरी चैव कौमारी वैष्णवी तथा ॥ ३९ ॥
वाराहीन्द्राणिका चैव चामुण्डा सप्तमी स्मृता।
महालक्ष्मीस्तथेज्यास्ता पूर्वादिषु यथाक्रमम् ॥ ४० ॥
इत्यमाद्यावृतिं चेष्ट्वा योनिमुद्रां प्रदर्शयेत्।
चतुःषष्टिदले पद्मे शक्तीरर्च्चेच्च तावतीः ॥ ४१ ॥
कुलेशी कुलनन्दा च वागीशी भैरवी तथा।
उमा श्रीः शान्तया चण्डा धूम्रा काली करालिनी ॥४२॥

---

किंशुकैः पलाशपुष्पैः ॥ ३१—४० ॥

योनिमुद्रैका। चतुःषष्टिदले तावतीः शक्तीरभ्यर्च्य खेचरीमुद्रां दर्शयेत्। तल्लक्षणं यथा—

महालक्ष्मीश्च कङ्काली रुद्रकाली सरस्वती ।
वाग्वादिनी च नकुली भद्रकाली शशिप्रभा ॥ ४३ ॥
प्रत्यङ्गिरा सिद्धलक्ष्मीरमृतेशी च चण्डिका ।
खेचरी भूचरी सिद्धा कामाक्षा हिङ्गुला बला ॥ ४४ ॥
जया च विजया चाप्यजिता नित्यापराजिता ।
विलासिनी तथा घोरा चित्रा मुग्धा धनेश्वरी ॥ ४५ ॥
सोमेश्वरी महाचण्डा विद्या हंसी विनायिका ।
वेदगर्भा तथा भीमा उग्रा वैद्या च सद्गतिः ॥ ४६ ॥
उग्रेश्वरी चन्द्रगर्भा ज्योत्स्ना सत्या यशोवती ।
कुलिका कामिनी काम्या ज्ञानवत्यथ डाकिनी ॥ ४७ ॥
राकिनी लाकिनी चाथ काकिनी शाकिनीत्यपि ।
हाकिनीति चतुःषष्टिशक्तयः सिद्धिदायिकाः ॥ ४८ ॥
दर्शयेत् खेचरीमुद्रां द्वितीयावरणेऽर्चिते ।
द्वात्रिंशत्पत्रमध्ये तु पूज्या एतास्तु शक्तयः ॥ ४९ ॥
किराता योगिनी वीरा वेताला यक्षिणी हरा ।
ऊर्द्ध्वकेशी च मातङ्गी मोहिनी वंशवर्द्धिनी ॥ ५० ॥
मालिनी ललिता दूती मनोजा पद्मिनी धरा ।
वर्वरी छत्रहस्ता च रक्ता नेत्रा विचर्चिका ॥ ५१ ॥

---

सव्यं दक्षिणहस्ते तु सव्यहस्ते तु दक्षिणम् ।
बाहू कृत्वा महादेवि ! हस्तैः संपरिवर्त्य च ॥
कनिष्ठानामिके देवि ! युक्ता तेन क्रमेण तु ।
तर्जनीभ्यां समाक्रान्ते सर्वोर्द्ध्वमपि मध्यमे ॥
अङ्गुष्ठौ तु महादेवि ! सरलावपि कारयेत् ।
इयं सा खेचरी नाम मुद्रा सर्वत्तमोत्तमा इति ॥ ४१—४९ ॥
तृतीयावरणं सम्पूज्य बीजमुद्रां दर्शयेत् । तल्लक्षणं यथा—
परिवर्त्य करौ स्पष्टावर्द्धचन्द्राकृती प्रिये ! ।

मातृका दूरदर्शी च चैत्रेशी रङ्गिनी नटी ।
शान्तिर्दीप्ता वज्रहस्ता धूम्रा श्वेता सुमङ्गला ॥ ५२ ॥
इष्ट्वा तृतीयावरणं वीजमुद्रां प्रदर्शयेत् ।
ततः षोड़शपत्रेषु पूज्याः षोड़शशक्तयः ॥ ५३ ॥
मुग्धा श्रीः कुरुकुल्ला च त्रिपुरा तोतला क्रिया ।
रतिः प्रीतिस्तथा बाला सुमुखी श्यामला विला ॥ ५४ ॥
पिशाची च विदारी च शीतला वज्रयोगिनी ।
सर्वेश्वरीति सम्पूज्य सृणिमुद्रां प्रदर्शयेत् ॥ ५५ ॥
अष्टपत्रे स्वस्वमन्त्रैर्यजेदष्टसरस्वतीः ।
तारो ह्लोहितः सत्यो वैकुण्ठानन्तसंयुतः ॥ ५६ ॥
भृगुर्नेशब्दरूपे वाक् माया कामो वदद्वयम् ।
वाग्वादिन्यग्निकान्तान्तो मन्त्रो वेदाक्षिवर्णवान् ॥ ५७ ॥
अनेन मनुना पूर्वपत्रे वगीश्वरीं यजेत् ।
वराहहंसचक्रीन्द्रसंयुता भुवनेश्वरी ॥ ५८ ॥
वदयुग्मञ्च चित्रेश्वरि वाग्बीजानलप्रिया ।
द्वादशार्णेन मनुना वह्नौ चित्रेश्वरीं यजेत् ॥ ५९ ॥

---

तर्जन्याङ्गुष्ठयुगलं युगपत् कारयेत्ततः ।
अधः कनिष्ठावष्टभ्य मध्यमे विनियोजयेत् ।
तथैव कुटिले योज्ये सर्वाधस्तादनामिके ।
बीजमुद्रेयमुदिता सर्वसिद्धिप्रदायिनी ।

इति षोड़शपत्रं सम्पूज्य सृणिमुद्रामङ्कुशमुद्रां दर्शयेत् । सा पूर्वमुक्ता ॥५०-५५॥

अष्टपत्रे सरस्वत्यष्टकं स्वमन्त्रैर्यजेदित्युक्तं तासां मन्त्रान् क्रमेण वदन्नादौ वागीश्वरीमन्त्रमाह तार इति । लोहितः पः वैकुण्ठानन्तसंयुतः सत्यः स आन्तयुतो दः पश्चा भृगुः सः स्वष्टमन्वत् यथा ओं नमः पद्मासने शब्दरूपे ऐं ह्रीं क्लीं पद वद वाग्वादिनी स्वाहेति वेदाक्षिवर्णवान् चतुर्विंशत्यर्णः ॥ ५६ ॥ ५७ ॥

चित्रेश्वरीमन्त्रमाह वराहेति । वराहहंसचक्रीन्द्रसंयुता भुवनेश्वरी ह्सक्लह्रीं

वाक्बीजं कुलजे वाक् च सरस्वत्यनलाङ्गना।
एकादशार्णमनुना कुलजां दक्षिणेऽर्चयेत्॥ ६०॥
वाङ्मायाश्रीं वदद्वन्द्वं कीर्त्तीश्वरि वसुप्रिया।
त्रयोदशार्णेन यजेन्नैर्ऋत्ये कीर्त्तिनायिकाम्॥ ६१॥
वाङ्माया चान्तरिक्षान्ते सरस्वति च ठद्वयम्।
रव्यर्णेन यजेत् प्रत्यगन्तरिक्षसरस्वतीम्॥ ६२॥
वराहहंसचण्डीशजनार्दनक्षमानुयुक्।
सेन्दुर्योनिश्चलकुलिभृगुवह्नीन्दुयुग्मनुः॥ ६३॥
अरुणाभृगुशिख्यग्निसंयुता शान्तिरिन्दुयुक्।
वाङ्मायाश्रीषु बीजानि ग्रीं घटान्ते सरस्वतीम्॥ ६४॥
घटे वदतरं द्वन्द्वं रुद्राज्ञा टायुता मम।
अभिलाषं कुरुद्वन्द्वं प्रेयसी कृष्णवर्त्मनः॥ ६५॥
गुणवेदार्णेन यजेद्वायौ घटसरस्वतीम्।
भूधरेन्द्रयुतोर्घीशो विन्द्वाढ्यो वें वदद्वयम्॥ ६६॥

---

वद वद चित्रेश्वरि ऐं स्वाहेति प्रथमं षट्कूटं यथा ह्सकलह्रीं वद वद चित्रेश्वरि ऐं स्वाहा। वह्नौ अग्निकोणे॥ ५८॥ ५९॥

कुलजामन्त्रमाह वागिति। ऐं कुलजे ऐं सरस्वति स्वाहेति॥ ६०॥

कीर्त्तीश्वरीमन्त्रमाह वागिति। ऐं ह्रीं श्रीं वद वद कीर्त्तीश्वरि स्वाहेति। वसुरश्रिः॥ ६१॥

अन्तरिक्षसरस्वतीमन्त्रमाह वागिति। ऐं ह्रीं अन्तरीक्षसरस्वति स्वाहेति॥६२॥

घटसरस्वतीमन्त्रमाह एवंविधा योनिरेकारः कीदृशी वाराहहंसचण्डीश-जनार्दनक्षमानुयुक् सेन्दुः सविन्दुश्च कूटमिदमनुरीकारः कीदृशो लकुलीभृगुवह्नीन्दु-युक् ह्सरविन्दुयुतः। शान्ति ई अरुणादियुता अरुणा ह: भृगुः स: शिखी फः अग्नीरः एतैर्युता सविन्दुश्च वाक् ऐं माया ह्रीं श्रीं श्रीः इषुबीजानि बाणबीजानि द्रां द्रीं क्लीं ब्लूं स इति ग्रीमितिस्वरूपं टायुता तृतीयान्ता रुद्राज्ञा कृष्ण-वर्त्मनोऽग्नेः प्रेयसी स्वाहा यथा ह्स फ्रें स्त्रीः स्फ्रीं ऐं ह्रीं श्रीं द्रां द्रीं क्लीं ब्लूं सः ग्रीं घटसरस्वती घटे वद वद तर तर रुद्राज्ञया ममाभिलाषं कुरु स्वाहेति॥ ६३—६५॥

व्लीं हुं फट् नववर्णेन नीलामर्चेदुदक्दिशि ।
वाक्वीजमधराक्रान्तो नकुली विन्दुमान् पुनः ॥ ६७ ॥
शान्तिचन्द्राढ्यमाकाशं क्षितिद्वन्द्वं सटक् जलम् ।
कूर्मद्वन्द्वं भगाक्रान्तं नवार्णेनामुना यजेत् ॥ ६८ ॥
मन्त्रे ऐशानदिग्भागे क्षितिसंज्ञा सरस्वतीम् ।
पञ्चमावृतिमाराध्य क्षोभमुद्रां प्रदर्शयेत् ॥ ६९ ॥
डाकिन्याद्याः पूर्वमुक्ताः षट्कोणे षट् प्रपूजयेत् ।
दर्शयेद्द्राविणीं मुद्रां षष्ठावरणपूजने ॥ ७० ॥
परा वाला भैरवीति पूजनीयास्त्रिकोणके ।
सप्तमावृतिपूजायां मुद्रां कुर्य्याच्चाकर्षिणीम् ॥ ७१ ॥
इत्थं संपूज्य तारेशीं मनोऽभीष्टमवाप्नुयात् ।
गणेशक्षेत्रपालाभ्यां योगिन्यै भैरवाय च ॥ ७२ ॥

---

गुणवेदार्णस्त्रिचत्वारिंशदक्षरः । नीलामन्त्रमाह भूधरेति । षर्णोश ऊ ऊ भूधरो वः इन्द्रो लः ताभ्यां युतः विन्दुयुतश्च व्लूं वेन्नद वद व्लीं हुं फड़िति । क्षितिमन्त्रमाह वाग्वीजमिति अधराक्रान्तो नकुली ऐ युतोहः । शान्तिचन्द्राढ्यं आकाशं ईविन्दुयुतो हः सटक् जलं वि भगाक्रान्तं कूर्मद्वन्द्वं ऐयुतं चन्द्रद्वन्द्वञ्च यथा ऐं ह्रैं ह्रीं क्षिति क्षिति विचे इति । एवं सरस्वत्यष्टकं संपूज्य क्षोभमुद्रादर्शनं तल्लक्षणं यथा—

मध्यमामध्यगे कृत्वा कनिष्ठाङ्गुष्ठरोधिते ।
तर्जन्यौ दण्डवत् कृत्वा मध्यमे पर्वनामिके ।
क्षोभाभिधाना मुद्रेयं सर्वसंक्षोभकारिणीति ॥ ६६—६९ ॥

डाकिन्याद्याः पूर्वोक्ताः डाकिनी राकिनी लाकिनीकाकिनीशाकिनीहाकिन्यः । द्राविणीमुद्रालक्षणम् यथा—क्षोभमुद्रालक्षणमुक्तं,

एतस्या एव मुद्राया मध्यमे सरले यदा ।
क्रियते परमेशानि तदा विद्राविणी मता ॥ ७० ॥

पराबालाभैरवीति स्वस्वमन्त्रैः ह्रीं परायै नमः ऐं क्लीं सौः बालायै नमः ह्सैं हसकलह्रीं ह्सौः भैरव्यै नम इति । आकर्षिणीमुद्रालक्षणं यथा—

तारायै चापि वितरेद्बलिं नित्यं चतुष्पथे ।
मांसमाषान्नशाकाज्यपायसा पूपकादिकम् ॥ ७३ ॥
बलिद्रव्यं समाख्यातं तेनेष्टं सा प्रयच्छति ।
तस्य ध्यानं त्रिधा वच्मि सत्त्वादिगुणभेदतः ॥ ७४ ॥
श्वेताम्बराढ्यां हंसस्थां मुक्ताभरणभूषिताम् ।
चतुर्वक्त्रामष्टभुजैर्दधानां कुण्डिकाम्बुजे ॥ ७५ ॥
वराभये पाशशक्ती अक्षस्रक्पुष्पमालिके ।
शङ्खपात्रो निधी ध्यायेत् सृष्टिध्यानमुदीरितम् ॥ ७६ ॥
रक्ताम्बरां रक्तसिंहासनस्थां हेमभूषिताम् ।
एकवक्त्रां वेदसंख्यैर्भुजैः संबिभ्रतीं क्रमात् ॥ ७७ ॥
अक्षमालां पानपात्रमभयं वरमुत्तमम् ।
श्वेतद्वीपस्थितां ध्यायेत् स्थितिध्यानमिदं स्मृतम् ॥ ७८ ॥
कृष्णाम्बराढ्यां नीलाभामस्थ्याभरणभूषिताम् ।
नववक्त्रां भुजैरष्टादशभिर्दधतीं वरम् ॥ ७९ ॥
अभयं परशुं दर्वीं खड्गं पाशुपतं हलम् ।
भिण्डिं शूलञ्च मूषलं कर्त्रीं शक्तिं त्रिशीर्षकम् ॥ ८० ॥
संहारास्त्रं वज्रपाशौ खट्वाङ्गं गदया सह ।
रक्ताम्भोधौ स्थितां ध्यायेत् संहारध्यानमीदृशम् ॥ ८१ ॥
कर्मसु क्रूरसौम्येषु ध्यायेन्मन्त्री तथा तथा ।
एवं सिद्धे मनौ मन्त्री गिरा वाचस्पतिर्भवेत् ॥ ८२ ॥

---

मध्यमातर्जनीभ्यां तु कनिष्ठानामिके समे ।
अङ्कुशाकाररूपाभ्यां मध्यमे परमेश्वरि ! ।
इयमाकर्षिणी मुद्रा त्रैलोक्याकर्षणक्षमा ॥ इति ॥ ७१—७४ ॥

सात्त्विकध्यानमाह श्वेतेति । कमण्डलुवराक्षस्रक्पुष्पमाला दक्षेषु इतराणि वामेषु ॥ ७५ ॥ ७६ ॥

राजसध्यानमाह रक्तेति । अक्षमालावरौ दक्षयोः अन्ययोरन्ये ॥ ७७ ॥ ७८ ॥

दूर्वोत्थया तु लेखन्या रोचना रसयुक्तया।
बालस्याच्छिन्ननालस्य जिह्वायां विलिखेन्मनुम् ॥ ८३ ॥
संप्राप्ते चाष्टमे वर्षे सर्वशास्त्रज्ञतामियात्।
अयुतमन्त्रं संजप्त्वा वचां बालस्य कण्ठतः ॥ ८४ ॥
बध्नीयात् पूर्वसंप्रोक्तं बलिं दत्त्वा विधानतः।
द्वादशे वत्सरे प्राप्ते भचिता सा कवित्वकृत् ॥ ८५ ॥
ज्योतिष्मतीभवं तैलं कर्षमात्रं सुमन्त्रितम्।
उपरागे जलस्थो योऽश्नीयाद्वाचस्पतिर्भवेत् ॥ ८६ ॥
चतुष्पथे श्मशाने वा हित्वा लज्जाभयं तथा।
जपेत् शवं समारुह्य विद्यातत्परमानसः ॥ ८७ ॥
शृणोत्यसावसुं शब्दं निशीथे जपतत्परः।
पारगो भवविद्यानां सर्वां सिद्धिमवाप्नुहि ॥ ८८ ॥
विद्वत्कुलसमुद्भूतमष्टवर्षं शिशुद्वयम्।
उपवेश्य तयोर्मूर्ध्नि करौ दत्त्वा जपेन्मनुम् ॥ ८९ ॥
वेदान्तन्यायसंयुक्त्या विवदेते उभावपि।
यः कौतुकी स आश्चर्य्यं विद्यायाः पश्यतु ध्रुवम् ॥ ९० ॥
विधाय वेदिकां रम्यां विजने कदलीवने।
तत्रासीनो जपेद्विद्यामर्कलक्षं विधानतः ॥ ९१ ॥
दासीचालितदोलायामारूढां सुस्मिताननाम्।
पुन्नागचम्पकाशोकरम्भाविपिनसंस्थिताम् ॥ ९२ ॥
एवं ध्यायन् भगवतीं बलिं दद्यात् जपान्ततः।
एवं कुर्वन्नरः सर्वमभीष्टं लभतेऽचिरात् ॥ ९३ ॥

---

तामसध्यानमाह क्रूरेति। परशुदर्वी खड्गसुपत्रकर्त्री शूलवज्रपाशगदा दर्पेषु शेषाणि वामेषु। क्रूरेषु मारणे तामसध्यानम् उच्चाटनवश्यादौ रक्तं शान्तौ पुष्टौ श्वेतम् ॥ ७९—८९ ॥

उभावपि शिशू नैयायिकवेदान्तिनौ भूत्वा विवादं कुर्वैते ॥ ९०—९३ ॥

निर्वासा विशिखः प्रेतभूमिस्थो यो जपेन्मनुम् ।
अयुतं कृष्णभूताहे स वाक्सिद्धिमवाप्नुयात् ॥ ८४ ॥
विद्यां सौख्यं धनं पुष्टिमायुः कीर्त्तिं बलं श्रियः ।
रूपं कामयमानेन तारा सेव्या निरन्तरम् ॥ ८५ ॥

इति श्रीमन्त्रमहोदधौ तारामन्त्रभेदकथनं
नाम पञ्चमस्तरङ्गः ॥

---

## षष्ठस्तरङ्गः ।

छिन्नमस्ता मनुं वक्ष्ये शीघ्रसिद्धिविधायिनम् ।
पद्मासना शिवायुक्सं भौतिकः शशिशेखरः ॥ १ ॥
वज्रवैरोचनीपद्मनाभयुक्तः सदागतिः ।
मायायुगास्त्रदहनप्रियान्तः प्रणवादिकः ॥ २ ॥
मन्त्रः सप्तदशार्णोऽयं भैरवोऽस्य मुनिर्मतः ।
सम्राट्छन्दश्छिन्नमस्ता देवता भुवनेश्वरी ॥ ३ ॥

---

निर्वासा नग्नः विशिखो मुक्तकेशः कृष्णभूताहे कृष्णपक्षचतुर्दश्याम् ॥८४॥८५॥
इति नौकासमाख्यायां श्रीमन्त्रमहोदधिटीकायां ताराभेदो
नाम पञ्चमस्तरङ्गः ॥ ५ ॥

---

छिन्नमस्तामन्त्रमाह । पद्मासना श्रीं शिवा क्लीं भौतिक ऐं सबिन्दुः ॥ १ ॥ पद्मनाभयुतः सदागतिः एयुतो यथा ओं श्रीं क्लीं ह्रीं ऐं वज्रवैरोचनीये क्लीं क्लीं फट् स्वाहेति ॥ २ ॥

आं खड्गाय हृदा ख्यातमीं खड्गाय शिरः स्मृतम्।
ऊं वज्राय शिखा प्रोक्ता ऐं पाशाय तनुच्छदम्॥ ४॥
औमङ्कुशाय नेत्रं स्याद्विसर्गो वसुरक्षयुक्।
मायायुग्मं चास्त्रमङ्गमनवः प्रणवादिकाः॥ ५॥
स्वाहान्ताः प्रोदिता एवमङ्गे विन्यस्य तां स्मरेत्।
भास्वन्मण्डलमध्यगां निजशिरश्छिन्नैर्विकीर्णालकं
स्फारास्यं प्रपिबद्गलात् स्वरुधिरं वामे करे बिभ्रतीम्।
याभासक्तरतिस्मरोपरिगतां सख्यौ निजे डाकिनी
वर्णिन्यौ परिदृश्यमोदकलितां श्रीछिन्नमस्तां भजे॥ ६॥
ध्यात्वैवं प्रजपेल्लक्षचतुष्कं तद्दशांशतः।
पालाशैर्बिल्वजैर्वापि जुहुयात् कुसुमैः फलैः॥ ७॥
आधारशक्तिमारभ्य परतत्त्वान्तपूजिते।
पीठे जयाख्या विजया जिता चाप्यपराजिता॥ ८॥
नित्या विलासिनी षष्ठी दोग्ध्र्यघोरा च मङ्गला।
दिक्षु मध्ये च सम्पूज्या नवपीठस्य शक्तयः॥ ९॥
सर्वबुद्धिप्रदे वर्णनीये सर्वभृगुः सटक्।
द्धिप्रदे डाकिनीये च तारो वज्रः सभौतिकः॥ १०॥
खड्गीशो रोचनीये च भगं ह्येहि नमोऽन्तकः।
तारादिः पीठमन्त्रोऽयं वेदरामाक्षरो मतः॥ ११॥
समर्प्यासनमेतेन तत्र सम्पूजयेच्छिवाम्।
त्रिकोणमध्यषट्कोणपद्मभूपुरमध्यतः॥ १२॥

---

अस्त्रमन्त्रमाह विसर्ग इति। फः वसु रक्ष रक्ष क्रीं क्रीं अस्त्राय फडिति। सर्वे स्वाहान्ताः। ध्यानमाह भास्वदिति। याभौ मैथुनं तदासक्तरतिकामोपरिस्थिताम्॥ ४—८॥

पीठमन्त्रमाह सर्वेति। सटक् भृगुः ह्रि ष भौतिकः॥ १०॥

वाह्यावरणमारभ्य पूजयेत् प्रतिलोमतः ।
भूपुराद्वाह्यभागेषु वज्रादीनि प्रपूजयेत् ॥ १३ ॥
तदन्तः सुरराजादीन् पूजयेद्धरितां पतीन् ।
भूपुरस्य चतुर्द्वार्षु द्वारपालान् यजेदथ ॥ १४ ॥
करालविकरालाख्यावतिकालस्तृतीयकः ।
महाकालश्चतुर्थ स्यादथः पद्मे ष्टशक्तयः ॥ १५ ॥
एकलिङ्गा योगिनी च डाकिनी भैरवी तथा ।
महाभैरविकेन्द्राक्षी त्वसिताङ्गी तु सप्तमी ॥ १६ ॥
संहारिण्यष्टमी चेति षट्कोणेष्वङ्गमूर्त्तयः ।
त्रिकोणगच्छिन्नमस्ता पार्श्वयोस्तु सखीद्वयम् ॥ १७ ॥
डाकिनीवर्णिनीसंज्ञं तारवाग्भ्यां प्रपूजयेत् ।
एवं पूजादिभिः सिद्धे मन्त्रे मन्त्री मनोरथान् ॥ १८ ॥
प्राप्नुयान्निखिलान् सद्यो दुर्लभांस्तत्प्रसादतः ।
श्रीपुष्पैर्लभते लक्ष्मीं तत्फलैः स्वसमीहितम् ॥ १९ ॥
वाक्सिद्धिं मालतीपुष्पैश्चम्पकैर्हवनात् सुखम् ।
घृताक्तं छागमांसं यो जुहुयात् प्रत्यहं शतम् ॥ २० ॥
मासमेकन्तु वशगास्तस्य स्युः सर्वपार्थिवाः ।
करवीरस्य कुसुमैः श्वेतैर्लक्षं जुहोति यः ॥ २१ ॥
रोगजालं पराभूय सुखी जीवेच्छतं समाः ।
रक्तैस्तत्संख्यया हुत्वा वशयेन्मन्त्रिणो नृपान् ॥ २२ ॥

---

खड्गीशः ऐयुती वः वै भगं ए यथा षौं सर्वबुद्धिप्रदे वर्णनीये सर्वसिद्धिप्रदे डाकिनीये षौं वज्रवैरोचनीये एह्येहि नमः वेदरामाचरचतुस्त्रिंशदर्णः ॥११—१३॥
सुरराजादीन् इन्द्रादीन् हरितां दिशास्पतीन् ॥ १४—१७ ॥
तारवाग्भ्यां षौं ऐं डाकिन्यै नमः ॥ १८—२० ॥
करवीरस्य कुसुमैः पुष्पैः प्रसूनं कुसुमं सुमं सुमन इत्यमरोक्तेः ॥ २१ ॥
रक्तैः करवीरैरिति पूर्वेण सम्बन्धः तत्संख्यया लक्षम् ॥ २२ ॥

फलैर्हुत्वाप्नुयाल्लक्ष्मीमुडुम्बरपलाशजैः।
गोमायुमांसैस्तामेव कवित्वं पायसान्धसा ॥ २३ ॥
बन्धूककुसुमैर्भाग्यं कर्णिकारैः समीहितम्।
तिलतण्डुलहोमेन वशयेन्निखिलान् जनान् ॥ २४ ॥
नारीरजोभिराकृष्टिर्मृगमांसैः समीहितम्।
स्तम्भनं माहिषैर्मांसैः पङ्कजैः सघृतैरपि ॥ २५ ॥
चितान्गौ परभृत्पक्षैर्जुहुयादरिमृत्यवे।
उन्मत्तकाष्ठदीप्तेऽग्नौ तत्फलं वायसच्छदैः ॥ २६ ॥
द्यूते वने नृपद्वारे समरे वैरिसङ्कटे।
विजयं लभते मन्त्री ध्यायन् देवीं जपन्मनुम् ॥ २७ ॥
भुक्तौ मुक्तौ सितां ध्यायेदुच्चाटे नीलरोचिषम्।
रक्तां वश्ये मृतौ धूम्रां स्तम्भने कनकप्रभाम् ॥ २८ ॥
निशि दद्याद्बलिं तस्यै सिद्धये मदिरादिना।
गोपनीयः प्रयोगोऽथ प्रोच्यते सर्वसिद्धिदः ॥ २९ ॥
भूताहे कृष्णपक्षस्य मध्यरात्रे तमोघने।
स्नात्वा रक्ताम्बरधरो रक्तमाल्यानुलेपनः ॥ ३० ॥
आनीय पूजयेन्नारीं छिन्नमस्तास्वरूपिणीम्।
सुन्दरीं यौवनाक्रान्तां नरपञ्चकगामिनीम् ॥ ३१ ॥
सस्मितां मुक्तकबरीं भूषादानप्रतोषिताम्।
विवस्त्रां पूजयित्वैनामयुतं प्रजपेन्मनुम् ॥ ३२ ॥
बलिं दत्त्वा निशां नीत्वा संप्रेष्य धनतोषिताम्।
भोजयेद्विविधैरन्नैर्ब्राह्मणान् देवताधिया ॥ ३३ ॥

---

गोमायुः शृगालः तामेव लक्ष्मीमेव पायसान्धसा पायसान्नेन ॥ २३ ॥ २४ ॥
नार्य्यारजोऽभिर्ऋतुकालनिर्गतरुधिरैराकर्षणम्। सघृतैः पङ्कजैरपि स्तम्भनमेव ॥ २५ ॥

अनेन विधिना लक्ष्मीं पुत्त्रान् पौत्त्रान् यशः सुखम्।
नारोमायुश्चिरं धर्ममिष्टमन्यदवाप्नुयात्॥ ३४॥
तस्यां रात्रौ व्रतं कार्य्यं विद्याकामेन मन्त्रिणा।
मनोरथेषु चान्येषु गच्छेत्तां प्रजपन्मनुम्॥ ३५॥
किं बहूक्तेन विद्याया अस्या विज्ञानमात्रतः।
शास्त्रज्ञानं पापनाशः सर्वसौख्यं भवेद्ध्रुवम्॥ ३६॥
उषस्युत्थाय शय्यायामुपविष्टो जपेच्छतम्।
षण्मासाभ्यन्तरे मन्त्री कवित्वेन जपेत् कविम्॥ ३७॥
शिवेन कीलिता विद्या तदुत्कीलनमुच्यते।
मायां तारपुटां मन्त्री जप्यादष्टोत्तरं शतम्॥ ३८॥
मन्त्रस्यादौ तथैवान्ते भवेत् सिद्धिप्रदा तु सा।
एष नूनं विधिर्गोप्यः सिद्धिकामेन मन्त्रिणा॥ ३९॥
उदिता छिन्नमस्तेयं कलौ शीघ्रमभीष्टदा।
रेणुका शवरी विद्या तादृश्येवोच्यतेऽधुना॥ ४०॥
प्रणवः कमला माया स्थिरिन्दुयुतोऽधरः।
पञ्चाक्षरी महाविद्या भैरवोऽस्य मुनिर्मतः॥ ४१॥
पङ्क्तिश्छन्दो रेणुकाख्या शवरी देवतोदिता।
पञ्चवर्णैः समस्तेन कुर्वीत मनुनाङ्गकम्॥ ४२॥
हेमाद्रिसानावुद्याने नानाद्रुममनोहरे।

---

परभृत् कोकिलः उन्मत्तो धत्तूरः तत्काष्ठज्वलितेऽग्नौ काकपक्षैर्होमात् फलं षरिन्त्युरेव स्यात्॥ २५—२६॥

प्रयोगान्तरमाह उषसीति। कविं शुक्राचार्य्यम्॥ ३७॥

तारपुटां मायां ओं ह्रीं ओमिति॥ ३८—३९॥

रेणुकाशवरीमाह प्रणव इति। कमला श्रीं माया ह्रीं स्थिरः क्लीं इन्दुयुतोऽधरः ऐं। षडङ्गमाह पञ्चेति॥ ४०—४२॥

रत्नमण्डपमध्यस्थवेदिकायां स्थितां स्मरेत् ॥ ४३ ॥

गुञ्जाफलाकल्पितहाररम्यां
श्रुत्योः शिखण्डं शिखिनो वहन्तीम् ।
कोदण्डवाणौ दधतीं कराभ्यां
कटिस्थवल्कां शवरीं स्मरेयम् ॥ ४४ ॥

ध्यात्वैवं प्रजपेल्लक्षपञ्चकं तद्दशांशतः ।
फलैर्विल्वैः प्रजुहुयात् तत्काष्ठैरेधितेऽनले ॥ ४५ ॥
पूर्वोदितेऽर्चयेत् पीठे षड़ङ्गा हृत्तिरादिमा ।
द्वितीयावरणे पूज्याः शवर्य्या अष्टशक्तयः ॥ ४६ ॥
हुङ्कारी खेचरी चापि चण्डा स्याच्छेदनी तथा ।
क्षेपणी स्त्री च हुङ्कारी क्षेमकारी तथाष्टमी ॥ ४७ ॥
तृतीये दशदिक्पाला वज्राद्यानि चतुर्थके ।
एवं सिद्धं मनुं सम्यक् कार्य्ये कर्मणि योजयेत् ॥ ४८ ॥
मल्लीपुष्पैर्जना वश्या इक्षुदण्डैर्धनाप्तयः ।
पञ्चगव्यैर्धनवः स्युरशोककुसुमैः सुताः ॥ ४९ ॥
इन्दीवरैः क्षते होमे नृपपत्नी वशंवदा ।
अन्नाम्सिरन्नैः सकलं मधूकैर्वाञ्छितं भवेत् ॥ ५० ॥
प्रोदिता शवरी विद्या कलौ त्वरितसिद्धिदा ।
अथोच्यते विवाहार्थे स्वयंवरकला शिवा ॥ ५१ ॥
तारो माया योगिनीति द्वयं योगेश्वरिद्वयम् ।
योगनिद्रा यंकरि स्यात् सकलस्थावरेति च ॥ ५२ ॥

---

ध्यानमाह हेमाद्रीति । मेरुशिखरे ॥ ४३ ॥

शिखिनो मयूरस्य पिच्छं कर्णयोर्दधतीं कोदण्डं धनुर्वाणं बाणौ दधे ॥ ४४ ॥ ४५ ॥

पूर्वोदिते जयादिके ॥ ४६—५१ ॥

जङ्गमस्य मुखं प्रोच्य हृदयं मम सम्पठेत् ।
वशमाकर्षयाकर्ष पवनो वह्निसुन्दरी ॥ ५३ ॥
पञ्चाशद्वर्णविद्याया मुनिरस्याः पितामहः ।
छन्दोऽतिजगती देवी गिरिपुत्री स्वयंवरा ॥ ५४ ॥
जगत्त्रयेति हृदयं त्रैलोक्येति शिरो मतम् ।
उरगेति शिखा सर्वराजेति कवचं तथा ॥ ५५ ॥
सर्वस्त्रीपुरुषेत्यक्षि सर्वेत्यस्त्रं समीरितम् ।
तारमायादिका वश्यमोहिन्यै पदपश्चिमा ॥ ५६ ॥
षडङ्गमन्त्रा उद्दिष्टा मूलेन व्यापकं चरेत् ।
ध्यायेद्देवीं महादेवं वरीतुं समुपागताम् ॥ ५७ ॥

> शम्भुं जगन्मोहनरूपपूर्णं
> विलोक्य लज्जाकुलितां स्मिताढ्याम् ।
> मधूकमालां स्वसखीकराभ्यां
> संबिभ्रतीमद्रिसुतां भजेयम् ॥ ५८ ॥

एवं ध्यात्वा जपेल्लक्षचतुष्कं तद्दशांशत ।
पायसान्नेन जुहुयात् पीठे पूर्वोदिते यजेत् ॥ ५९ ॥
त्रिकोणचतुरस्राङ्गकोणाष्टदलदिग्दलम् ।
दिक्कलादन्तयन्त्राणि चतुःषष्टिदलं पुनः ॥ ६० ॥
वृत्तत्रयं चतुर्द्वारयुक्तं धरणिकेतनम् ।
पूजायन्त्रं प्रकुर्वीत तत्र संपूजयेदिमाम् ॥ ६१ ॥

---

स्वयंवरकलामाह तारेति । निद्रा भकारः पवनो यः वह्निसुन्दरी स्वाहा स्वरूपमन्यत् यथा श्रीं ह्रीं योगिनि योगिनि योगेश्वरि योगेश्वरि योगभयङ्करि सकलस्थावरजङ्गमस्य मुखं हृदयं मम वशमाकर्षयाकर्षय स्वाहेति ॥ ५२—५४ ॥

षडङ्गमाह जगत्त्रयेति । तारमायादिकाः वश्यमोहिन्यैपदं पश्चिमंमन्तवर्तिता इदमाः षडङ्गमन्त्युक्तत्वात् श्रीं ह्रीं जगत्त्रयवश्यमोहिन्यै हृदयाय नमः श्रीं ह्रीं

त्रिकोणे पार्वतीमिष्ट्वा चतुरस्रेऽर्चयेदिमाम्।
मेधां विद्यां पुनर्लक्ष्मीं महालक्ष्मीं चतुर्थिकाम्॥ ६२॥
षट्कोणेषु षडङ्गानि स्वरानष्टदलेऽर्चयेत्।
दिग्दलद्वितये देवानिन्द्रादीनायुधानि च॥ ६३॥
ताराद्येन नमोऽन्तेन श्रीबीजेन रमां यजेत्।
कलापत्रे द्विरामारे पाशमायाङ्कुशैः शिवा॥ ६४॥
वेदाङ्गपत्रे त्रिपुटां श्रीमायामदनैर्यजेत्।
वृत्तत्रये महालक्ष्मीं भवानीं पुष्पसायकाम्॥ ६५॥
चतुरस्रं चतुर्द्वार्षु विघ्नचेत्रेशभैरवान्।
योगिनीः पूजयेदित्थं नवावरणमर्चनम्॥ ६६॥
एवं यो भजते देवीं वश्यास्तस्याखिला जनाः।
लाजैस्त्रिमधुरोपेतैर्जुहुयादयुतन्तु यः॥ ६७॥
लभते वाञ्छितां कन्यां धनमानसमन्विताम्।
एवं स्वयंवरा प्रोक्ता प्रोच्यते मधुमत्यथ॥ ६८॥
नारायणो विन्दुयुतो हृल्लेखां कुशमन्मथाः।
दीर्घवर्मध्रुवो वह्निप्रेयसी वसुवर्णवान्॥ ६९॥
मनोरस्य मधुच्छन्दो त्रिष्टुप् मधुमतीति च।
सुन्याद्याः पञ्चभिर्बीजैः पञ्चाङ्गानि प्रकल्पयेत्॥ ७०॥

---

त्रैलोक्यवश्यमोहिन्यै शिर षों ह्रूं उरगवश्यमोहिन्यै शिखेत्यादि बोध्यम् मायाच दीर्घषट्कयुता कार्या॥ ५५—६३॥

कलापत्रे षोड़शदले ताराद्येन रमान्तेन श्रीबीजेन षों श्रीमिति मनुना श्रियं यजेत्। षों श्रीं श्रियै रमायै नम इति प्रयोगः। वेदाङ्गपत्रे चतुःषष्टिदले श्रीमायामदनैः श्रीं ह्रीं क्लीं त्रिपुटायै नम इति तारां यजेत्॥ ६४—६८॥

मधुमतीमाह नारायणेति। विन्दुयुतो नारायणः षां हृल्लेखा ह्रीं षड़ुशः क्लीं दीर्घं वर्म हूं ध्रुवः षों वह्निप्रेयसी स्वाहा॥ ६९॥ ७०॥

अस्त्रं स्वाहान्ततारेण हत्वा देवीं स्मरेद्बुधः ।
नानाद्रुमलताकीर्णे कैलासगतकानने ॥ ७१ ॥
अहिलतादलसरोजपुष्करयुगां मणिकाञ्चनपीठगाम् ।
अमरनागवधूगणसेवितां मधुमतीमखिलार्थकरीम्भजे ॥७२॥
प्रजप्य वसुलक्षं तद्दशांशं जुहुयाद्दलैः ।
बिल्वोत्थैः पूजयेत् पीठे जयादिनवशक्तिके ॥ ७३ ॥
कर्णिकायां षड़ङ्गानि शक्तयो वसुपत्रके ।
निद्राच्छाया क्षमा तृष्णा कान्तिरार्य्या श्रुतिः स्मृतिः ॥७४॥
शक्रादयस्तदस्त्राणि पूज्यान्यन्ते सुखाप्तये ।
य इत्थं सेवते देवीं स समृद्धपदो भवेत् ॥ ७५ ॥
रक्ताम्भोजैर्हुतैर्मन्त्री भूपतीन् वशतां नयेत् ।
नानाभोगान् पायसेन ताम्बूलैर्वामलोचनाम् ॥ ७६ ॥
दामोदरो विन्दुयुक्तो मधुमत्याः परो मनुः ।
पूर्ववद् यजनञ्चास्य ध्यायेद्देवीं कुमारिकाम् ॥ ७७ ॥
कोटिरुद्रं जपं कुर्वन् विद्यापारङ्गमो भवेत् ।
मधुमत्या समानान्या नानाभोगसुखप्रदा ॥ ७८ ॥
माया वक्रासनः शूरो मदे पावकसुन्दरी ।
षड़र्णो मनुराख्यातो मुनिः शक्तिः समीरितः ॥ ७९ ॥
गायत्रीच्छन्द आख्यातं देवता प्रमदाभिधा ।
षड़ङ्गानि प्रकुर्वीत दीर्घषट्काढ्यमायया ॥ ८० ॥

---

स्वाहान्तप्रणवेनास्त्रम् ॥ ७१ ॥
ध्यानमाह अहीति । नागवल्लीदलं दघे । नीलपद्मं वामे ॥ ७२—७६ ॥
मन्त्रान्तरमाह दामेति । दामोदर एकारः ॥ ७७ ॥ ७८ ॥
प्रमदामन्त्रमाह मायेति । वक्रासनः शूरः रेफयुतः पः प्रमदे स्वरूपं पावकसुन्दरी स्वाहा ॥ ७९ ॥ ८० ॥

केयूरमुख्याभरणाभिरामां वराभये सन्दधतीं कराभ्याम् ।
संक्रन्दनाद्यामरसेव्यपादां सत्काञ्चनाभ्यां प्रमदां भजामि ॥८१॥

रसलक्षं जपेन्मन्त्रं दशांशं जुहुयाद्घृतैः ।
पूर्वोक्ते पूजयेत् पीठे षडङ्गाशाधवायुधैः ॥ ८२ ॥
निर्जने कानने रात्रावयुतं नियतं जपेत् ।
सहस्रं पायसान्नेन हुत्वा शयनमाचरेत् ॥ ८३ ॥
त्रिसप्तदिवसं यावदेवमाचरतो निशि ।
देवी दृग्गोचरीभूय दद्यादिष्टानि मन्त्रिणे ॥ ८४ ॥
मायाप्रमोदे ठद्वन्द्वं षड़र्णो मनुरुत्तमः ।
ऋष्याद्यर्चनपर्य्यन्तं प्रमदावदुदीरितम् ॥ ८५ ॥
सरितो निर्जने तीरे मण्डले चन्दनैः कृते ।
जपहोमौ विधायोक्तौ प्रमोदां पश्यति ध्रुवम् ॥ ८६ ॥
तारो ह्लिलियुगं वन्दी देवी ङेन्ता नमोऽन्तकः ।
एकादशाक्षरो मन्त्रो भैरवस्त्रिष्टुभौ पुनः ॥ ८७ ॥
वन्दी मुन्यादयः प्रोक्ता एकेन द्वन्द्वशोऽङ्गकम् ।
विधाय संस्मरेद्वन्दीं रत्नसिंहासनस्थिताम् ॥ ८८ ॥
सतोयपाथोदसमानकान्तिमम्भोजपीयूषकरोरुहस्ताम् ।
सुराङ्गनासेवितपादपद्मां भजामि वन्दीं भवबन्धमुक्त्यै ॥८९॥
लक्षयुग्मं जपेन्मन्त्री पायसान्नैर्दशांशतः ।
हुत्वा पूर्वोदिते पीठे पूजयेद्बन्धमुक्तये ॥ ९० ॥

---

ध्यानमाह केयूरेति । केयूरमङ्गदौ वरौ दधे संक्रन्दनः इन्द्रः तदाद्यैर्देवैः सेव्यौ पादौ यस्याः ॥ ८१ ॥

आशाधवा दिक्पालाः ॥ ८२—८४ ॥

प्रमोदामाह मायेति । ठद्वयं स्वाहा ॥ ८५—८६ ॥

वन्दीमन्त्रमाह तार इति । ॐ ह्लिलि ह्लिलि वन्दीदेव्यै नम इति ॥८७।८८॥

अङ्गपूजा केशरेषु शक्तयः पत्रमध्यगाः ।
काली तारा भगवती कुब्जाह्वा शीतलापि च ॥ ९१ ॥
त्रिपुरा मातृका लक्ष्मीर्दिगीशा आयुधान्यपि ।
एवमाराधिता वन्दी प्रयच्छेदीप्सितं नृणाम् ॥ ९२ ॥
एकविंशतिघस्रान्तमयुतं प्रत्यहं जपेत् ।
ब्रह्मचर्य्यरतो मन्त्री गणेशार्चनपूर्वकम् ॥ ९३ ॥
कारागृहनिबद्धस्य मोक्ष एवं कृते भवेत् ।
चतुरस्रे ठकारान्तरपूपोपरि संलिखेत् ॥ ९४ ॥
साध्यनाम घृतेनैव मायाबीजं च दिक्ष्वपि ।
मनुनाष्टादशार्णेन चतुरस्रं प्रवेष्टयेत् ॥ ९५ ॥
वाग्बीजं भुवनेशानी रमा वन्दि च केशवः ।
मुष्यं बन्धात्ततो मोक्षं कुरुयुग्मञ्च ठद्वयम् ॥ ९६ ॥
वसुचन्द्रार्णमन्त्रोऽयं क्षिप्रं बन्धविमोक्षदः ।
तस्मिन्नपूपे सम्पूज्य वन्दीमावरणान्विताम् ॥ ९७ ॥
कारानिकेतनस्थाय मित्राय प्रददाति तम् ।
स शुद्धो वाग्यतो भूत्वा भक्षयेत्तमपूपकम् ॥ ९८ ॥
तस्मिन् संभक्षिते बद्धो मुच्यते बन्धनाद्द्रुतम् ।

---

ध्यानमाह सतोयेति । सजलमेघश्यामां पीयूषकरीरोऽमृतकुम्भः स दक्षे ॥ ८९—९१ ॥

घस्रो दिनम् ॥ ९३ ॥

प्रयोगान्तरमाह चतुरस्र इति । अपूपोपरि घृतेन चतुरस्रान्तर्वर्त्ति ठकारं विलिख्य तत्रामुकं मोचयेति लिखेत् दिक्षु मायाबीजञ्च अष्टादशार्णमन्त्रेणैतं वेष्टयित्वा तत्र देवीमावाह्याभ्यर्च्य कारागृहस्थायापूपं दद्यात् स च तद्भक्ष्या बन्धनान्मुच्यते ॥ ९४ ॥ ९५ ॥

अष्टादशार्णमाह वागिति । केशवः अकारः ठद्वयं स्वाहा स्वरूपमन्यत् स्पष्टं यथा ऐं ह्रीं श्रीं वन्दि अमुष्यं बन्धमोक्षं कुरु कुरु स्वाहेति ॥ ९६ ॥

एवं सम्प्रोदिता वन्दी स्मरणाद्बन्धमुक्तिदा ॥ ९९ ॥

इति श्रीमन्महीधरविरचिते मन्त्रमहोदधौ छिन्न-
मस्तादिमन्त्रकथनं नाम षष्ठस्तरङ्गः ॥ ६ ॥

---

## सप्तमस्तरङ्गः ।

अथ सर्वेष्टसंसिद्ध्यै प्रवक्ष्ये वटयक्षिणीं ।
पद्मनाभो वियद्वायू भिण्टाग्रस्थौ सद्दक् वियत् ॥ १ ॥
यक्षि यक्षि महायक्षि वटतोयं सनासिकम् ।
क्षनिवासिनि शीघ्रं मे सर्वसौख्यं कुरुद्वयम् ॥ २ ॥
स्वाहा द्वात्रिंशदर्णोऽयं मन्त्रोऽखिलसमृद्धिदः ।
ऋषिः स्याद्विश्रवाः छन्दोऽनुष्टुप् देवी तु यक्षिणी ॥ ३ ॥
वह्निभिः श्रुतिभिर्वेदैर्वसुभिः सप्तभीरसैः ।
प्रकुर्वीत षड़ङ्गानि मन्त्रवर्णान् न्यसेत्तनौ ॥ ४ ॥
मस्तके नेत्रयोर्वक्त्रे नासाकर्णौ सयुग्मतः ।
स्तनयोः पार्श्वयोर्द्वन्द्वे हृदि नाभौ शिवोदरे ॥ ५ ॥

---

वसुचन्द्रार्णोऽष्टादशार्णः ॥ ९७—९९ ॥

इति नौकासमाख्यायां मन्त्रमहोदधिटीकायां छिन्नमस्तादि-
मन्त्रकथनं नाम षष्ठस्तरङ्गः ॥ ६ ॥

---

वटयक्षिणीमाह पद्मनाभ इति । पद्मनाभ ए भिण्टाग्रस्थौ वियद्वायू एस्थितौ हकारयकारौ द्वौ सद्दक् वियत् हि ॥ १ ॥

यक्षीत्यादि स्वरूपं सनासिकं तोयं क्षयुतो वः छर्व्येत्यादि स्वरूपम् ॥ २—४ ॥

कण्ठुरुनाभिजङ्घासु जानुनोर्मणिबन्धयोः ।
हस्तयोर्मूर्ध्नि विन्यस्य ध्यायेद्देवीञ्च ठस्थिताम् ॥ ६ ॥
अरुणचन्दनवस्त्रविभूषितां सजलतोयदतुल्यतनूरुचाम् ।
स्मरकुरङ्गदृशं वटयक्षिणीं क्रमुकनागलतादलयुक्कराम् ॥७॥
लक्षद्वयं जपेन्मन्त्रं बन्धूकैस्तद्दशांशतः ।
हुत्वा पीठे यजेद्देवीमुच्यन्ते पीठशक्तयः ॥ ८ ॥
कामदा मानदा नक्ता मधुरा मधुरानना ।
नर्मदा भोगदा नन्दा प्राणदा पीठशक्तयः ॥ ९ ॥
मनोहराय यक्षिण्यो योगपीठाय हृन्मनुः ।
पीठस्योक्तास्तत्र देवीं पूजयेद्वटयक्षिणीम् ॥ १० ॥
कर्णिकायां षडङ्गानि पत्रेष्वेता यजेत् पुनः ।
सुनन्दा चन्द्रिका हासा सुलापा मदविह्वला ॥ ११ ॥
आमोदा च प्रमोदापि वसुदेत्यष्टशक्तयः ।
इन्द्रादीनथ वज्रादीन् सम्पूज्य लभते सुखम् ॥ १२ ॥
एवमाराधितो मन्त्रः प्रयोगेषु क्षमो भवेत् ।
निर्मनुष्ये वने गत्वा न्यग्रोधाधस्तले जपेत् ॥ १३ ॥
प्रतिपक्षन्तमश्निन्या सहस्रं नियतेन्द्रियः ।
सप्तमे दिवसे प्राप्ते कृत्वा चन्दनमण्डलम् ॥ १४ ॥
तत्राज्यदीपं कृत्वास्मिन् पूजयेद्वटयक्षिणीम् ।
तदग्रे प्रजपेन्मन्त्रमानिशीथं समाहितः ॥ १५ ॥
शृणोति न पुरारावं मन्त्री गीतध्वनिं ततः ।
श्रुत्वैव प्रजपेन्मन्त्री वीतत्रासश्च तां स्मरेत् ॥ १६ ॥
ततः प्रत्यक्षतो देवीमीक्षते सुरतार्थिनीम् ।

---

वर्णन्यासमाह मस्तक इति । नेत्रयोऽर्द्धौं नासाकर्णांसस्तनपार्श्वककृद्गना-जानुमणिबन्धहस्तेषु ह्री ह्री अन्यत्रैकं ह्रिं विन्यस्य ॥ ५ ॥ ६ ॥

तत्कामपूरणात् सा तु ददातीष्टानि मन्त्रिणे ॥ १७ ॥
किं बहुतोन सर्वेष्टपूरणी वटयक्षिणी ।
पद्माद्द्वयं यक्षिणीति सचन्द्रं गगनद्वयम् ॥ १८ ॥
वैश्वानरप्रियां तोयं दशवर्णो मनुर्मतः ।
ऋषिः पूर्वोदितश्छन्दः पंक्तिर्देवी तु यक्षिणी ॥ १९ ॥
चन्द्रैकत्रित्रियुग्मेन सर्वेणाङ्गक्रिया मता ।
स्मरेच्चम्पककान्तारे रत्नसिंहासनस्थिताम् ॥ २० ॥

सुवर्णप्रभां रत्नभूषाभिरामां
जवापुष्पसच्छायवासोयुगाढ्याम् ।
चतुर्दिक्षु दासीगणैः सेविताङ्घ्रिं
भजे सर्वसौख्यप्रदां यक्षिणीन्ताम् ॥ २१ ॥

एवं ध्यात्वा जपेल्लक्षं जवापुष्पैर्दशांशतः ।
जुहुयात् पूर्ववत् पीठे पूर्वोक्ते प्रयजेदिमाम् ॥ २२ ॥
क्रोधीशवह्नीमन्विन्दुयुक्तौ मदनमेखले ।
हृदयाग्निप्रियां तोयं ताराद्यो द्वादशाक्षरः ॥ २३ ॥
अस्येज्या पूर्ववत् सर्वा मेखला यक्षिणी त्वियम् ।
चतुर्दशाहपर्य्यन्तं मधूकावनिरुट्तले ॥ २४ ॥
प्रजपेदयुतं नित्यं सहस्रं हवनं चरेत् ।
मधूकपुष्पैर्मध्वक्तैस्तत्काष्ठैश्च हुताशने ॥ २५ ॥

---

ध्यानमाह अरुणेति । क्रमुकं पुगीफलं दधे ॥ ७—१७ ॥

मन्त्रान्तरमाह पद्मेति । पद्मद्वयं श्रीं श्रीं यक्षिणी स्वरूपं सचन्द्रं गगनद्वयं हं ॥ १८ ॥

वैश्वानरप्रिया स्वाहा ॥ १९ ॥

चम्पकानां कान्तारे वने ॥ २०—२१ ॥

मन्त्रान्तरमाह क्रोधीशेति । मन्विन्दुयुक्तौ औविन्दुयुक्तौ औविन्दुयुक्तौ क्रोधीशवह्नी करेफौ तेन क्रौं मदनमेखले स्वरूपं हृदयं नमः अग्निप्रिया स्वाहा ॥ २१ ॥

सन्तुष्टैवं कृते देवी प्रयच्छेदञ्जनं शुभम् ।
येनाक्तनयनो मन्त्री निधिं पश्येद्धरागतम् ॥ २६ ॥
प्रणवो वाग्विशाले च माया पद्मा मनोभवः ।
ठद्वयान्तो दशार्णोऽयं विशाला यक्षिणीमनुः ॥ २७ ॥
मुन्यादिपूजापर्यन्तं पूर्ववत् समुदीरितम् ।
चिञ्चातरोरधः स्थित्वा शुचिर्लक्षं जपेन्मनुम् ॥ २८ ॥
शतपत्रैर्दशांशेन जुहुयात्तोषिता ततः ।
रसं ददाति येनासौ नीरोगायुरवाप्नुयात् ॥ २९ ॥
वाक्चन्द्रशेखरौ शार्ङ्गी पिनाकीशौ मनुस्थितौ ।
लाङ्गलित्रितयं सेन्दु वर्मदीर्घं शुचिप्रिया ॥ ३० ॥
वस्वच्चरमनोः शत्रुघातिनः कपिलो मुनिः ।
छन्दोऽनुष्टुप् च वाराही वार्त्ताली देवतोदिता ॥ ३१ ॥
द्विचन्द्रभूमिचन्द्रैकयुग्मार्णैरङ्गकल्पना ।
वाराहीं चेतसि ध्यायेच्छत्रुनिग्रहकारिणीम् ॥ ३२ ॥
विद्युद्रोचिर्हस्तपद्मैर्दधाना पाशं शक्तिं मुद्गरं चाङ्कुशञ्च ।
नेत्रोद्भूतैर्वीतिहोत्रैस्त्रिनेत्रा वाराही नः शत्रुवर्गं छिणोतु ॥३३॥
वसुलक्षं जपित्वान्ते विल्वपत्रैर्हयारिजैः ।
धात्रीफलैर्भृङ्गराजैः कुर्य्याद्धुत्यादशांशतः ॥ ३४ ॥

---

मधूकावनिरुट्तले मधूकवृक्षाधस्तात् ॥ २४—२६ ॥

मन्त्रान्तरमाह प्रणव इति । वाक् ऐं विशाले स्वरूपं माया ह्रीं पद्मा श्रीं मनोभवः क्लीं ठद्वयं स्वाहा ॥ २७—२९ ॥

वाराहीमाह वागिति । मनुस्थितौ चन्द्रशेखरौ शार्ङ्गी पिनाकीशौ चौविन्दुयुतौ गलौ ग्लौं सेन्दु लाङ्गलित्रयं ठं त्रयं ठ ठ ठ दीर्घं वर्म हूं शुचिप्रिया स्वाहा ॥ ३०—३२ ॥

ध्यानमाह विद्युदिति । पाशमुद्गरौ दक्षयोः अङ्कुशशक्ती वामयोर्दधानेत्यर्थः

पूर्वोदिते यजेत् पीठे षडङ्गैर्दिग्गिनायुधैः ।
एवं सिद्धं मनुं मन्त्री यो जपेत् शत्रुनिग्रहे ॥ ३५ ॥
स्वर्णिना शत्रुमानीय बद्धा पाशेन तं दृढम् ।
मुद्गरेण घ्नती मूर्ध्नि तां स्मरन्नयुतं जपेत् ॥ ३६ ॥
जुहुयादयुतं शुद्धैर्वनशुष्कैस्तु गोमयैः ।
प्रक्षिपेद्धोमजं भस्म वापीकूपादिपाथसि ॥ ३७ ॥
तत्पानीयस्य पातारो म्रियन्ते रिपवो ध्रुवम् ।
निर्यान्ति हित्वा स्थानं वा विद्विषन्तः परस्परम् ॥ ३८ ॥
शत्रुनिग्रहणे दक्षा स्मरणादपि मन्त्रिणाम् ।
प्रकीर्त्तितेयं वाराही धूमावत्यधुनोच्यते ॥ ३९ ॥
सात्वतत्रितयं सार्घि तत्राद्यौ चन्द्रशेखरौ ।
वैकुण्ठोऽनन्तसंयुक्तो जलं नेत्रयुतो हरिः ॥ ४० ॥
अष्टार्णो वह्निजायान्तो मन्त्रः शत्रुविनाशनः ।
पिप्पलादो निवृत् ज्येष्ठा मुनिश्छन्दोऽस्य देवता ॥ ४१ ॥
आद्यबीजद्वयान्तस्थैः षड्वर्णैरङ्गमीरितम् ।
श्मशाने संस्थितां ध्यायेत् ज्येष्ठां वायससंस्थिताम् ॥ ४२ ॥
अत्युच्चा मलिनाम्बराखिलजनोद्वेगावहा दुर्मना ।
रुक्षाक्षित्रितया विशालदशना सूर्य्योदरी चञ्चला ॥ ४३ ॥

---

नेत्रजैर्वीतिहोत्रैरग्निभिरथाकमरिष्मूरं नाशयतु वसुरथं चाटवचं ह्यारिजैः करवीरैः जुहुयादित्याशीर्लिङ् ॥ २३ ॥ २४ ॥

दिग्गिना दिक्पाशाः ॥ २५ ॥

स्वर्णिनाङ्कुशेन ॥ ३६ ॥

पाथसि जले ॥ ३७—३९ ॥

ज्येष्ठामन्त्रमाह सात्वतेति । सार्घिं ऊयुतं सात्वतत्रितयं धत्रयमेषु द्वौ सविन्दू धूं धूं धू अनन्तसंयुतो वैकुण्ठः आयुतो मः मा जलं वः नेत्रयुतो हरिः ऊयुतः ॥ ४० ॥

प्रस्वेदाम्बुचिता क्षुधाकुलतनुः कृष्णातिरुक्षा प्रभा ।
ध्येया मुक्तकचा सदा प्रियकलिर्धूमावती मन्त्रिणा ॥ ४३ ॥
एवं ध्यात्वा जपेल्लक्षं श्मशाने विगताम्बरः ।
निशाभोजी दशांशेन तिलैर्हवनमाचरेत् ॥ ४४ ॥
पूर्वोक्ते पूजयेत् पीठे ज्येष्ठां शत्रुविनष्टये ।
केशरेषु षडङ्गानि यत्रस्था अष्टशक्तयः ॥ ४५ ॥
क्षुधा तृष्णा रतिर्निद्रा निर्ऋतिर्दुर्गतीरुषा ।
अक्षमेति ततो देवा इन्द्राद्या आयुधानि च ॥ ४६ ॥
एवं ज्येष्ठां समाराध्य सिद्धो मन्त्रः प्रजायते ।
उपोष्य कृष्णभूताहे नग्नो मुक्तशिरोरुहः ॥ ४७ ॥
शून्यागारे श्मशाने वा कान्तारे भूधरेऽथवा ।
प्रत्यहं प्रजपेन्निर्भीर्ध्यायन् देवीं चपाशनः ॥ ४८ ॥
एवं लक्षं जपन्मन्त्री नाशयेदचिरादरिम् ।
जुह्वता लवणोपेतां राजिकां निशि तत्फलम् ॥ ४९ ॥
तारो माया कर्णपिशा सहृशौ कूर्मधान्तिमौ ।
कर्णे मे विधिदष्डौरा ठद्वयं षोड़शार्णकम् ॥ ५० ॥
मनुर्ऋष्यादिपूर्वोक्तं देवता तु पिशाचिनी ।
एकैकाङ्गाग्निरामाब्धिवर्णै रङ्गं मनोमतम् ॥ ५१ ॥
चितासनस्थां नरमुण्डमालां विभूषितामस्थिमणीन् कराब्जैः ।
प्रोतां न रान्ध्रैर्दधतीं कुवस्त्रां भजामहे कर्णपिशाचिनीन्ताम् ॥५२
श्मशानस्थः शवस्थो वा जपेल्लक्षं समाहितः ।

---

वह्निजाया स्वाहा ॥ ४१—४५ ॥
रथा प्रथमा ॥ ४६ ॥ ४७ ॥
चपाशनी रात्रिभोजी ॥ ४८ ॥ ४९ ॥
कर्णपिशाचीमाह तार इति । तार ॐ माया ह्रीं कर्णपिशा स्वरूपं कूर्म

दशांशं जुहुयादङ्गौ विभीतकसमिद्वरैः ॥ ५३ ॥
यजेत् पूर्वोदिते पीठे षड़ङ्गामरहेतिभिः ।
सिद्धिमन्त्रे जपं कुर्य्यादधस्तादृदरीतरोः ॥ ५४ ॥
अशुचिर्लक्षसंख्यातं तेन तुष्टा पिशाचिनी ।
परचित्तस्थितां वार्त्तां भाविनीञ्च वदेत् श्रुतौ ॥ ५५ ॥
ध्रुवः शिवा रमा शीतलायै हार्दं नवाचरः ।
उपमन्युश्च वृहतीं शीतलासुनिपूर्विका ॥ ५६ ॥
षड़् दीर्घयुक् शिवा लक्ष्मीवीजाभ्यां स्यात् षड़ङ्गकम् ।
दिक्वाससंमार्जनिकां च सूर्पं करद्वये सन्दधतीं घनाभाम् ।
श्रीशीतलां सर्वरुजार्त्तिनाशां रक्ताङ्गरागस्रजमर्चयामि ॥ ५७ ॥
अयुतं प्रजपेन्मन्त्रं पायसेन सहस्रकम् ।
जुहुयात् पूर्ववत् पीठे स्फोटानां नाशिनी त्वियम् ॥ ५८ ॥
नाभिमात्रे जले स्थित्वा यः सहस्रं जपेन्मनुम् ।
तेन संमार्जितास्तीव्राः स्फोटा नश्यन्ति तत्क्षणात् ॥५९॥
प्रणवः कमला स्वप्नेश्वरि कार्य्यञ्च मे वद ।
स्वाहा त्रयोदशार्णोऽयं मन्त्रो मुन्यादिः पूर्ववत् ॥ ६० ॥
अक्षिवेदाक्षिभूयुग्मनेत्रार्णैरङ्गकं मनोः ।
विन्यस्य देवतां ध्यायेत् स्वप्ने शीमिष्टसिद्धये ॥ ६१ ॥

---

थान्तिमौ पनी सहशी द्युती पिचि कर्णे मे स्वरूपं विधिः कः दण्डी घः इरी यः ठद्वयं स्वाहा । षड़ङ्गमाह एकेति । षङ्गानि षट् षष्ठयस्त्रयोरामाय ॥ ५०—५५ ॥

शीतलामाह ध्रुव इति । ध्रुव ओं शिवा ह्रीं रमा श्रीं शीतलायै स्वरूपं हार्दं नमः ॥ ५६ ॥

षड़ङ्गमाह षड़िति । ह्रां ह्रम् श्रीं शिर इति । ध्यानमाह दिगिति । मार्जनी दक्षे सूर्पं वामे ॥ ५७—५९ ॥

स्वप्नेश्वरीमाह प्रणव इति । प्रणव ओं कमला श्रीं स्वरूपमन्यत् । ओं श्रीं स्वप्नेश्वरि कार्य्यं मे वद स्वाहा ॥ ६० ॥ ६१ ॥

वराभये पद्मयुग्मं दधानां करैश्चतुर्भिः कनकासनस्थाम् ।
सिताम्बरां शारदचन्द्रकान्तिं स्वप्नेश्वरीं नौमि विभूषणाढ्याम् ॥६२

लक्षं जपेद्बिल्वपत्रैर्जुहुयात्तद्दशांशतः ।
पूर्वोदिते यजेत् पीठे षडङ्गैर्दिशायुधैः ॥ ६३ ॥
रात्रौ सम्पूज्य देवेशीमयुतं पुरतो जपेत् ।
शयीत ब्रह्मचर्य्येण भूमौ दर्भास्थिताजिनैः ॥ ६४ ॥
देव्यै निवेद्य स्वं हार्दं सा स्वप्ने वदति ध्रुवम् ।
यच्चिन्त्याद्या इति प्रोच्य मातङ्गी गद्यतेऽधुना ॥ ६५ ॥
तारो माया च वाक् लक्ष्मी हन्निद्रास्मृतिकान्तिमाः ।
सनेत्रो हरिरुच्छिष्टचाण्डा नेत्रयुता क्रिया ॥ ६६ ॥
श्रीमातङ्गेश्वरिपदं सर्व-शूली-न-लान्त शम् ।
करि वह्निप्रिया मन्त्रो द्वात्रिंशद्वर्णवानयम् ॥ ६७ ॥
मतङ्गो मुनिरस्योक्तोऽनुष्टुप् छन्दस्तु देवता ।
मातङ्गी सर्वजनतावशीकरणतत्परा ॥ ६८ ॥
चतुर्भिः षड्भिरङ्गैश्च षड्‌ष्टनयनैरपि ।
मन्त्रोऽस्य वर्णैरङ्गानि न्यस्य देवीं विचिन्तयेत् ॥ ६९ ॥

घनश्यामलाङ्गीं स्थितां रत्नपीठे
शुकस्योदितं शृण्वतीं रक्तवस्त्राम् ।
सुरापानमत्तां सरोजस्थिताङ्घ्रिं
भजे वल्लकीं वादयन्तीं मतङ्गीम् ॥ ७० ॥

---

ध्यानमाह वरेति । वरौ दक्षे ॥ ६२ ॥

विदिशा इन्द्रादयः ॥ ६३—६५ ॥

मातङ्गीमाह तार इति । तार ॐ माया ह्रीं वाक् ऐं लक्ष्मी श्रीं हृत् नमः निद्रा भः स्मृतिर्गः कान्तिमो वः सनेत्रो हरिः ति उच्छिष्टचाण्डा स्वरूपं नेत्रयुता क्रिया क्रिया लि श्रीमातङ्गेश्वरि सर्वेति स्वरूपं शूली जः न स्वरूपं

जपोयुतं सहस्रन्तु होमः पुष्पैर्मधूकजैः ।
मध्वक्तैः पूजयेत् पीठे वक्ष्यमाणविधानतः ॥ ७१ ॥
त्रिकोणाष्टदलद्वन्द्वं कलास्रचतुरस्रकम् ।
पीठं कृत्वा यजेत्तस्मिन् पीठशक्तीर्त्तवेष्टदाः ॥ ७२ ॥
विभूतिरुन्नतिः कान्तिः सृष्टिं कीर्त्तिश्च सन्नतिः ।
व्युष्टिरुत्कृष्टि ऋद्धी च मातङ्ग्यन्ताः समीरिताः ॥ ७३ ॥
सर्वशक्तिकमान्ते च लासनाय हृदन्तिकः ।
तारमायास्वाग्रमाद्यः पीठमन्त्रः कलार्णकः ॥ ७४ ॥
विश्वाख्यासनमेतेन पाद्यादीनि प्रकल्पयेत् ।
मूलेन पुष्पपूजान्ते कुर्य्यादावरणार्चनम् ॥ ७५ ॥
त्रिकोणेष्वर्चयेत्तिस्रो रतिप्रीतिमनोभवाः ।
षोड़शाख्ये तु वामाख्या ज्येष्ठा रौद्री प्रशान्तिका ॥ ७६ ॥
केशरेषु षड़ङ्गानि मातृश्च दलमध्यगाः ।
द्वितीयेऽष्टदले पूज्या असिताङ्गादिभैरवाः ॥ ७७ ॥
श्रद्धा माहेश्वरी चापि क्रियाशक्तिश्च सप्तमी ।
सुलक्ष्मीः सृष्टिमोहिन्यौ प्रमथा श्वासिनी तथा ॥ ७८ ॥
विद्युल्लता च चित् शक्तिः सुन्दरी नन्दया सह ।
नन्दबुद्धिः षोड़शी तु पूजनीयाः प्रयत्नतः ॥ ७९ ॥
चतुरस्रचतुर्दिक्षु मातङ्गी सा महादिका ।
महालक्ष्मीस्तथा सिद्ध पुनर्वज्रादिकोणतः ॥ ८० ॥
विघ्नेश-दुर्गा-वटुक-क्षेत्रेश-दिग्धवास्ततः ।

---

स्वामी षः शं स्वरूपं करि स्वरूपं वह्निप्रिया स्वाहा । मातङ्ग्यन्ता इमाः विभूत्यै मातङ्ग्यै नम इत्यादि ॥ ६६—७३ ॥

पीठमन्त्रमाह सर्वेति । श्रौं ह्रीं ऐं श्रीं सर्वशक्तिकमलासनाय नम इति॥७४॥ विश्वाख्य दत्त्वा ॥ ७५—७८ ॥

वश्याद्याः पूजनीयाः स्युरित्थं सिद्धमनुर्भवेत् ॥ ८१ ॥
ध्रुवं भवानी वाग्बीजं रमामादौ प्रयोजयेत् ।
सर्वावरणदेवानां मातङ्गीपदमन्ततः ॥ ८२ ॥
मल्लिकाकुसुमैर्होमात् भोगो राज्यञ्च बिल्वजैः ।
पत्रैः फलैर्वा वश्याः स्याज्जनता ब्रह्मवृक्षजैः ॥ ८३ ॥
रोगनाशोऽमृताखण्डैर्निम्बैश्चौरैस्तण्डुलैरपि ।
आकृष्टिर्लवणैर्विद्यात्तगरैर्वेतसैर्जलम् ॥ ८४ ॥
लवणैर्निम्बतैलाक्तैः शत्रुनाशोऽन्धसाधनम् ।
निशाचूर्णयुतैर्लोणैर्होमात् स्यात् स्तम्भनं नृणाम् ॥ ८५ ॥
रक्तचन्दनकर्पूरमांसीकुङ्कुमरोचनाः ।
चन्दनागुरुकर्पूरगन्धाष्टकमुदीरितम् ॥ ८६ ॥
एतद्धोमाज्जगद्वश्यं जायते मन्त्रिणो ध्रुवम् ।
एतत् पिष्ट्वा शतं जप्त्वा तिलकेन जगत्प्रियाः ॥ ८७ ॥
कदलीफलहोमेन सर्वेष्टं समवाप्नुयात् ।
किं बहूक्तेन मातङ्गी पूजिता कामदा नृणाम् ॥ ८८ ॥
मध्वक्तलोणरचितां पुत्तलीं दक्षिणाङ्घ्रितः ।
हुयादष्टोत्तरशतं स्वातिरात्रैर्वशं निशि ॥ ८९ ॥
शालिपिष्टमयीन्तान्तु भक्षयेत् स्त्रीवशोन्नतौ ।
कृष्णभूतनिशिध्वांक्षोदरे क्षिप्त्वा समुद्रजम् ॥ ९० ॥
नीलसूत्रेण संवेष्ट्य चिताग्नौ प्रदहेदमुम् ।
सहस्रजप्तमन्त्रस्य यस्मै दद्यात् स दासवत् ॥ ९१ ॥

---

सा महादिका महामातङ्गी ॥ ८० ॥ ८१ ॥

ध्रुव इति । आवरणदेवतानामादौ ध्रुवादीन् अन्ते मातङ्गीपदञ्च योजयेत् । ओं ह्रीं ऐं श्रीं रत्यै मातङ्ग्यै नम इत्यादि ॥ ८२ ॥ ८३ ॥

अमृताखण्डैर्गुडूचीशकलैः । अन्धत्वमनेन कृतेनाशनमन्नं प्राप्यते ॥८४—९१॥

सत्योऽग्नियुक्तोऽनन्तेन्दुसंयुक्तवीजमादिमम्।
एतस्यानन्तसंस्थाने शान्तियुक्तो द्वितीयकम्॥ ८२॥
ब्रह्मेन्द्रशान्तिविन्द्वाढ्यस्तृतीयं वीजमीरितम्।
भूधरो वसुधाधीशचन्द्राढ्यस्तत्तुरीयकम्॥ ८३॥
सर्गी हंसः पञ्चमः स्यात् पञ्चवीजात्मको मनुः।
ऋषिः सम्मोहनः छन्दो गायत्री देवता पुनः॥ ८४॥
वाणेशी व्यस्तवर्णेन मन्त्रेणोक्तं षडङ्गकम्।
मूर्ध्नि पादे मुखे गुह्ये हृदये पञ्चदेवताः॥ ८५॥
न्यस्तव्याः पञ्चवीजाद्या द्राविणी क्षोभिणी पुनः।
वशीकरण्याकर्षण्यौ संमोहिन्यपि पञ्चमी॥ ८६॥
उद्यद्भास्वत्सन्निभा रक्तवस्त्रा नानारत्नालङ्कृताङ्गी वहन्ती।
हस्तैः पाशञ्चाङ्कुशञ्चापवाणौ वाणेशी नः कामपूर्त्तिं विधत्ताम्॥८७
एवं ध्यात्वा जपेल्लक्षपञ्चकं तद्दशांशतः।
हुत्वा वाणेश्वरीं देवीं पूजयेद्विधिपूर्वकम्॥ ८८॥
मोहिनी क्षोभिणी त्रासी स्तम्भिन्याकर्षिणी तथा।
द्राविण्याह्लादिनी क्लिन्ना क्लेदिनी पीठशक्तयः॥ ८९॥
वाणेशी योगपीठाय नमो मूलादिको मनुः।
दत्त्वा तेनासनं मन्त्री तस्मिन् देवीं प्रपूजयेत्॥ १००॥
आदौ षड़ङ्गान्याराध्य दिक्ष्वग्रे द्राविणीमुखाः।

---

वाणेशीमाह सत्य इति। सत्यो दः अग्नियुक्तो रेफयुतः अनन्तेन संयुत आ विन्दुयुतश्च तेन द्रामित्यादि वीजं स एव रेफयुतोदः अस्थाने शान्तिरी तेन युतः द्रीं इन्द्रशान्तिविन्द्वाढ्यो ब्रह्मा च ईं विन्दुयुतः कं क्लीं वसुधाधीशचन्द्राढ्यो स ऊ विन्दुयुतो भूधरो वः व्लूं सर्गी हंसः सः। व्यस्तवर्णैः पञ्चवीजैः पञ्चाङ्गानि तैरेवाख्यम्॥ ८२—८५॥

पञ्चवीजाद्या द्राविण्याद्या देवता मूर्द्धादौ न्यस्याः द्रां द्राविण्यै नमो मूर्द्धीत्यादि॥ ८६॥

जलेष्वनङ्गरूपा स्यादनङ्गे मदना तथा ॥ १०१ ॥
अनङ्गमन्मथानङ्गकुसुमा मदनातुरा।
अनङ्गाद्या तथानङ्गशिशिरानङ्गमेखला ॥ १०२ ॥
अनङ्गदीप्तिकेत्यष्टौ शक्त्याद्या आयुधान्यपि।
एवं सिद्धं मनुं मन्त्री काम्येषु विनियोजयेत् ॥ १०३ ॥
दधियुक्तैरशोकस्य पुष्पैर्यो दिवसत्रयम्।
सहस्रं जुहुयात्तस्य वश्याः स्युः प्राणिनोऽखिलाः ॥ १०४ ॥
लाजैर्दधियुतैर्होमात् मन्त्री कन्यामवाप्नुयात्।
कन्यापि वरमाप्नोति मासद्वितयमध्यतः ॥ १०५ ॥
गव्याज्येन ससम्पातं हुत्वा साष्टशतं नरः।
आज्यं सम्पातितं दद्यात् स्त्रियै विश्राणितश्रियै ॥ १०६ ॥
सा तदाज्यं निजं कान्तं भोजयित्वा वशं नयेत्।
सुगन्धकुसुमैर्हुत्वा धनमाप्नोति वाञ्छितम् ॥ १०७ ॥
माया मन्मथवाग्बीजे व्लुं स्त्रीं पश्चाच्चरो मनुः।
ऋषिश्छन्दस्तु पूर्वोक्तं कामेशी देवता स्मृता ॥ १०८ ॥
पाशाङ्कुशाविक्षुशरासनी च करैर्वहन्तीमरुणांशुकाढ्याम्।
उद्यत्पतङ्गाभिरुचिं मनोज्ञां कामेश्वरीं स्वचितां प्रणौमि॥१०९॥

---

ध्यानमाह उद्यदिति। पाशाङ्कुशौ दक्षयोः ॥ ९७—१०१ ॥

अनङ्गाद्या कुसुमातुरा अनङ्गकुसुमेत्यर्थः ॥ १०२—१०५ ॥

ससम्पातं आहुतिशेषस्य पात्रान्तरे प्रक्षेपः सम्पातः तद्युतं हुत्वा सम्पाताज्यं स्त्रियै दद्यात् किम्भूतायै विश्राणितश्रियै दत्तदक्षिणायै दक्षिणामादायादाय पश्चादाज्यं दद्यादित्यर्थः। अन्यथा फलाभावात् ॥ १०६—१०७ ॥

कामेशीमाह मायेति। माया ह्रीं मन्मथः क्लीं वाग्बीजं ऐं व्लूं स्त्रीं स्वरूपम् ॥ १०८ ॥

ध्यानमाह पाशेक्षुचापे वामयोः उद्यन् यः पतङ्गः सूर्यस्तद्वत् कान्तिं वहन्तीं स्वचितां व्याप्तां प्रणौमि प्रकर्षेण स्तौमि ॥ १०९ ॥

भूतलचं नपित्वेनामर्दलचं पलाशजैः।
कुसुमैर्जुहुयात् पीठे पूर्वोक्ते पूजयेदिमाम् ॥ ११० ॥
आदावङ्गानि सम्पूज्य दिक्षु मध्ये मनोभवम्।
मकरध्वजकन्दर्पौ मन्मथं कामदेवकम् ॥ १११ ॥
ततो ह्यनङ्गरूपाद्या इन्द्राद्यस्त्राणि तद्बहिः।
एवं सिद्धमनुर्मन्त्री पूर्वोक्तं योगमाचरेत् ॥ ११२ ॥

इति मन्त्रमहोदधौ यक्षिण्यादिमन्त्रकथनं नाम सप्तमस्तरङ्गः।

---

## अष्टमस्तरङ्गः।

अथ बालां प्रवक्ष्यामि मन्त्री संसेव्य यां द्रुतम्।
बृहस्पतिः कुबेरश्च जायते विद्यया धनैः ॥ १ ॥
दामोदरश्चन्द्रयुत आद्यं वाग्बीजमीरितम्।
विधिर्वासवशान्तीन्दुयुक्तं कामाभिधं परम् ॥ २ ॥
सङ्कर्षणविसर्गाढ्यो भृगुस्तार्त्तीयमीरितम्।

---

भूतलचं पद्मलचम् ॥ ११० ॥
कामदेवं मध्ये। योगं प्रयोगम् ॥ १११—११२ ॥

इति नौकासनाख्यायां मन्त्रमहोदधिटीकायां यक्षिण्यादि-मन्त्रकथनं नाम सप्तमस्तरङ्गः।

---

बालामन्त्रमाह दामोदर इति। दामोदर ऐ चन्द्रयुतो बिन्दुयुतः ऐं

त्रिवीजी गदिता बाला जगत्त्रितयमोहिनी ॥ ३ ॥
दक्षिणामूर्त्तिपंक्ती च मुनिश्छन्दः क्रमात् स्मृतम्।
देवता त्रिपुरा बाला मध्यान्ते शक्तिवीजके ॥ ४ ॥
नाभेरापादमाद्यन्तु नाभ्यन्तं हृदयात् परम्।
मूर्ध्नि हृदन्तन्तार्त्तीयं क्रमाद्देहे प्रविन्यसेत् ॥ ५ ॥
आद्यं वामकरे दक्षकरेऽन्यदुभयोः परम्।
पुनर्वीजत्रयं न्यस्येन्मूर्ध्नि गुह्ये च वक्षसि ॥ ६ ॥
नवयोन्यभिधे न्यासे नवकृत्वो मनुं न्यसेत्।
कर्णयोश्चिवुके न्यस्येत् शङ्खयोर्मुखपङ्कजे ॥ ७ ॥
नेत्रयोर्नासिकायाञ्च स्कन्धयोरुदरे तथा।
न्यसेत् कुर्परयोर्नाभौ जानुनोर्लिङ्गमस्तके ॥ ८ ॥
पादयोरपि गुह्ये च पार्श्वयोर्हृदये पुनः।
स्तनयोः कण्ठदेशे च वामाङ्गादि प्रविन्यसेत् ॥ ९ ॥
वाक्भवाद्या रतिं गुह्ये प्रीतिमन्त्यादिका हृदि।
कामवीजादिकां न्यस्येत् भ्रूमध्ये तु मनोभवा ॥ १० ॥
पुनर्वागन्त्यकामाद्यास्तिस्र एवं व विन्यसेत्।
अमृतेशीं च योगेशीं विश्वयोनिं तृतीयिकाम् ॥ ११ ॥

---

वागिति संज्ञास्य विधिः कः वासवशान्तीन्दुयुतः च .ईविन्दुयुतः क्लीं भृगुः सः षष्ठस्वरेण औ तेन विसर्गेण च युतः सौः ॥ ३ ॥

मध्यान्ते मध्यं शक्तिः अन्तं वीजम् ॥ ४ ॥

नाभिः पादान्तमाद्यं वीजं न्यसेत् एवमन्येऽपि ॥ ५ ॥

दक्षकरेऽन्यत् द्वितीयं परं तृतीयमुभयोः करयोर्न्यसेत् कर्णौ चिवुकमित्याद्य-वयवानां त्रिकोणाकारत्वाद्योनिन्यासोऽयम् ॥ ६—९ ॥

वागिति। ऐं रत्यै नमो गुह्ये अन्त्यादिका सौः प्रीत्यै नमो हृदि क्लीं मनोभवायै नमो भ्रूमध्ये ॥ १० ॥

पुनर्वाक् अन्त्यकामाद्या अमृतेशी योगेशीविश्वयोनीः एवंन ब्रह्मगुह्यभ्रूमध्येषु न्यसेत् ऐं अमृतेश्यै नम इत्यादि ॥ ११ ॥

मूर्ध्नि वक्त्रे हृदि न्यसेत् गुह्ये चरणयोरपि ।
कामेशीपञ्चबीजाद्यान् स्मरान्मनोभवादिकान् ॥ १२ ॥
शिरःपन्मुखगुह्येषु हृदये पञ्चदेवताः ।
द्राविण्याद्याः क्रमान्न्यस्येद्बाणेशीवीजपूर्विकाः ॥ १३ ॥
तार्त्तीयवाक्मध्यमेन कामेन स्यात् षडङ्गकम् ।
षट्दीर्घस्वरयुक्तेन ततो देवीं विचिन्तयेत् ॥ १४ ॥
रक्ताम्बरां चन्द्रकलावतंसां समुद्यदादित्यनिभां त्रिनेत्राम् ।
विद्याक्षमालाभयदानहस्तां ध्यायामि बालामरुणाम्बुजस्थाम्१५
लक्षत्रयं जपेन्मन्त्रं दशांशं किंशुकोद्भवैः ।
पुष्पैर्हयारिजैर्वापि जुहुयान्मधुरान्वितैः ॥ १६ ॥
नवयोन्यात्मकं यन्त्रं वह्निरष्टदलावृतम् ।
भूगृहेन पुनर्वीतं पूजनाय लिखेत् सुधीः ॥ १७ ॥
मध्ययोनौ तु तार्त्तीयमष्टयोनिषु मन्मथम् ।
केशरेषु स्वरान् न्यस्येद्वर्गानष्टौ दलेष्वपि ॥ १८ ॥
दलाग्रेषु त्रिशूलानि पद्मं मातृकयावृतम् ।
एवं विलिखिते यन्त्रे पीठशक्तीः प्रपूजयेत् ॥ १९ ॥
इच्छा ज्ञाना क्रिया चैव कामिनी कामदायिनी ।

---

मूर्द्धीति । कामेशीपञ्चबीजानि क्लीं क्लीं ऐं व्लूं स्त्रीमित्युक्तानि तदाद्यान् मनोभवादिकान् मनोभवमकरध्वजकन्दर्पमन्मथकामदेवाख्यान् स्मरान् शिरोमुखहृद्गुह्यपत्सु न्यसेत् क्लीं मनोभवाय नम इत्यादि ॥ १२ ॥

शिर इति । बाणेशीवीजानि द्रां द्रीं क्लीं व्लूं स इति । तत्पूर्वा द्राविण्याद्या द्राविणीक्षोभणीवशीकरण्याकर्षणीसम्मोहनीसंज्ञाः बाणदेवताः शिरःपादमुखगुह्यहृत्सु न्यसेत् द्रां द्राविण्यै नमः शिरसीत्यादि ॥ १३ ॥

षडङ्गमाह तार्त्तीयेति । तार्त्तीयं सौः वाक् ऐं तन्मध्यगतेन दीर्घान्वितेन कामेन षडङ्गं सौः क्लीं ऐं हृत् सौः क्लीं ऐं शिरः सौः क्लूं ऐं शिखेत्यादि ॥१४॥

ध्यानमाह रक्तेति । विद्याभयौ वामयोः अन्ययोरन्ये ॥ १५ ॥ १६ ॥

रती रतिप्रिया नन्दा मनोऽन्यपि चान्तिमा ॥ २० ॥
पीठशक्तीरिमा इष्ट्वा पीठन्तं मनुना दिशेत् ।
व्योमपूर्वं तु तार्त्तीयं सदाशिवमहापदम् ॥ २१ ॥
प्रेतपद्मासनं ङेन्तं नमोऽन्तः पीठमन्त्रकः ।
षोड़शार्णस्ततो मूर्त्तौं क्लृप्तायां मूलमन्त्रतः ॥ २२ ॥
आवाह्य पूजयेद्देवीमुपचारैः पृथग्विधैः ।
देवीमिष्ट्वा मध्ययोनौ त्रिकोणे रतिपूर्विकाः ॥ २३ ॥
वामकोणे रतिं दक्षे प्रीतिमग्रे मनोभवाम् ।
योन्यन्तर्वह्निकोणादावङ्गानि परिपूजयेत् ॥ २४ ॥
मध्ययोनेर्बहिः पूर्वां दिक्षु चाग्रे स्मरानपि ।
वाणदेवीस्तद्वदेव शक्तीरष्टसु योनिषु ॥ २५ ॥
सुभगाख्या भगा पश्चात् तृतीया भगसर्पिणी ।
भगमाली तथानङ्गानङ्गाद्या कुसुमापरा ॥ २६ ॥
अनङ्गमेखलानङ्गमदनेत्यष्टशक्तयः ।
पद्मकेसरगा ब्राह्मीमुखाः पत्रेषु भैरवाः ॥ २७ ॥
दीर्घाद्या मातरः पूज्या क्ष्लाद्याश्चाष्टभैरवाः ।
दलाग्रेष्वष्टपीठानि काररूपाख्यमादिमम् ॥ २८ ॥
मलयं कोल्लगिर्य्याख्यं चौहाराख्यं कुलान्तकम् ।

---

पूजायन्त्रमाह नवेति स्पष्टम् ॥ १७—२० ॥

पीठमन्त्रमाह व्योम हः तत्पूर्वं तृतीयं ह्सौः सदाशिव महाप्रेत पद्मासनाय नमः इति ॥ २१—२३ ॥

अङ्गपूजामाह योनीति । मध्ये योनिमध्ये एवाग्निनिर्ऋतिवाय्वीशानेषु हृच्छिरःशिखावर्माणि संपूज्याग्रे नेत्रं दिक्ष्वस्त्रं यजेत् ॥ २४ ॥

मध्ययोनेर्बहिर्भागे दिक्षु चतुरः पश्चमनग्रे एवं कामान् यजेत् वाणदेवी द्राविण्याद्यास्तद्वत् कामवत् दिक्ष्वग्रे च शक्तीः सुभगाद्याः ॥ २५—२७ ॥

जालन्धरं तथोड्यानं कोट्टपीठमथाष्टमम् ॥ २९ ॥
भूगृहे दशदिक्ष्वर्चेद्धेतुकं त्रिपुरान्तकम्।
वेतालमग्निजिह्वञ्च कालान्तककपालिनौ ॥ ३० ॥
एकपादं भीमरूपं मलयं हाटकेश्वरम्।
शक्राद्यानायुधैः सार्द्धं स्वस्वदिक्षु समर्चयेत् ॥ ३१ ॥
तद्बहिर्दिक्षु वटुकं योगिनीक्षेत्रपालकम्।
गणेशं विदिशास्वर्चेद्वसून् सूर्य्यान् शिवांस्ततः ॥ ३२ ॥
भूतांश्चेत्थं भजेद्धोमान्नीशः स्याद्धनविद्ययोः।
रक्ताम्भोजैर्हुतैर्नार्य्यो वश्याः स्युः सर्षपैर्नृपाः ॥ ३३ ॥
नन्दावर्त्तैराजवृक्षैः कुन्दैः पाटलचम्पकैः।
पुष्पैर्विल्वफलैर्वापि होमाल्लक्ष्मी स्थिरा भवेत् ॥ ३४ ॥
अपमृत्युं जयेन्मन्त्री गुडुच्या दुग्धयुक्तया।
पयोक्तदूर्वाहोमात्तु नीरोगायुः समश्नुते ॥ ३५ ॥
ज्ञानं कवित्वं लभते चन्द्रागुरुपुरैर्हुतैः।
द्विजेन्द्रा वश्यतां यान्ति कुसुमैरपराजितैः ॥ ३६ ॥
कह्लारैः क्षत्रियाः कर्णिकारजैः क्षितिपाङ्गनाः।
कोरण्डकुसुमैर्वैश्या पादजाः पाटलैर्हुतैः ॥ ३७ ॥
पालाशपुष्पैर्वाक्सिद्धिरन्नात्तिरन्नहोमतः।

---

दीर्घाद्या मातरः आं आद्याय नमः इत्यादि ह्रस्वाद्या भैरवाः अं असिताङ्गाय नमः इत्यादि ॥ २८ ॥ २९ ॥

दशदिक्षु हेतुकादयो गणाः ॥ ३० ॥

शक्राद्यान् स्वस्व दिक्ष्वित्युक्तेः पूर्वावरणानि कल्पितदिक्ष्वेव एवं सर्वत्र ॥३१॥

विदिशासु अग्न्यादिषु वस्वादयः वसुभ्यो नमः इत्यादि ॥ ३२ ॥ ३३ ॥

नन्दावर्त्तस्तगरः ॥ ३४ ॥ ३५ ॥

चन्द्रः कर्पूरः पुरं गुग्गुलु अपराजिता योन्याकारपुष्पावल्ली तदीयान्यपराजितानि तैः ॥ ३६ ॥ ३७ ॥

सारघक्षीरदध्याक्तान् लाजान् हुत्वा रुजो जयेत् ॥ ३८ ॥
रक्तचन्दनकर्पूरकर्चूरागुरुरोचनाः ।
चन्दनं केसरं मांसी क्रमाद्भागैर्नियोजयेत् ॥ ३९ ॥
भूमिचन्द्रैकनन्दाब्धिदिक्सप्तनिगमोन्मितैः ।
श्मशाने कृष्णभूतस्य निशि नीहारपाथसा ॥ ४० ॥
कुमार्या पेषयेत्तानि मन्त्रेणाप्यभिमन्त्रयेत् ।
विदधत्तिलकं तेन दर्शनाद्वशयेज्जनान् ॥ ४१ ॥
गजसिंहादिभूतानि राक्षसान् शाकिनीरपि ।
प्रयोगेष्वेषु कथ्यन्ते क्रमाद्ध्यानानि सिद्धये ॥ ४२ ॥
मातुलिङ्गपयोजन्महस्तां कनकसन्निभाम् ।
पद्मासनगतां बालां लक्ष्मीप्राप्त्यै विचिन्तयेत् ॥ ४३ ॥
वरपीयूषकलशपुस्तकाभीतिधारिणीम् ।
सुधां स्रवन्तीं ध्यानोत्थैर्ब्रह्मरन्ध्रे विचिन्तयेत् ॥ ४४ ॥
शुक्लाम्बरां शशाङ्काभां रोगनाशे स्मरेच्छिवाम् ।
अकारादिक्षकारान्तवर्णावयवरूपिणीम् ॥ ४५ ॥
सृणिपाशधरां देवीं रत्नालङ्कारभूषिताम् ।
प्रसन्नामरुणां ध्यायेत् वशीकरणसिद्धये ॥ ४६ ॥

---

सारघं मधु ॥ ३८ ॥

तिलकमाह रक्तेति । मांसी जटामांसी ॥ ३९ ॥

भागानाह भूमिरेकः नन्दा नव अब्धयश्चत्वारः दिशो दश निगमाश्चत्वारः रक्तचन्दनस्यैकभागमित्यादि एतान्येकीकृत्य कृष्णचतुर्दशीरात्रौ ॥ ४० ॥

कुमार्या सम्पेष्य मूलेनाभिमन्त्र्य तिलकं कुर्यात् वशयेदिति शाकिनीयुः तानित्यर्थः ॥ ४१ ॥ ४२ ॥

मातुलिङ्गेति । मातुलिङ्गं बीजपूरं तद्दक्षे ॥ ४३ ॥

रोगनाशध्याने वरामृतकुम्भौ दक्षयोः ॥ ४४ ॥ ४५ ॥

वशीकरणध्यानेऽङ्कुशो दक्षे ॥ ४६ ॥

अथ प्रत्येकमन्त्रस्य जपध्यानविधिं ब्रुवे ।
शापोद्धारप्रकारश्च वीजानां दीपिनीरपि ॥ ४७ ॥

विद्याक्षमालासुकपालमुद्राराजत्करां कुन्दसमानकान्तिम् ।
मुक्ताफलालङ्कृतिशोभिताङ्गीं बालां स्मरेद्वाङ्मयसिद्धिहेतोः ॥४८॥

ध्यात्वैवं वाक्भवं लक्षत्रयं शुक्लाम्बरावृतः ।
शुक्लचन्दनलिप्ताङ्गो मौक्तिकाभरणान्वितः ॥ ४९ ॥

जपित्वा तद्दशांशेन पालाशकुसुमैर्नवैः ।
जुहुयान्मधुराक्तैर्यः स कविर्युवतिप्रियः ॥ ५० ॥

भजेत् कल्पवृक्षाध उद्दीप्तरत्ना-
सने सन्निषण्णां सदा पूर्णिताक्षीम् ।
करैर्वीजपूरं कपालेषु चापं
सपाशाङ्कुशं रक्तवर्णां दधानाम् ॥ ५१ ॥

ध्यात्वा देवीं जपेल्लक्षत्रयं यो मध्यवीजकम् ।
रक्तवस्त्रावृतो रक्तभूषणो रक्तलेपनः ॥ ५२ ॥

दशांशं मालतीपुष्पैश्चन्द्रचन्दनलोलितैः ।
जुहुयात्तस्य वश्याः स्युस्त्रिलोकीजनताः क्षणात् ॥ ५३ ॥

व्याख्यानमुद्रामृतकुम्भविद्यामक्षस्रजं सन्दधतीं कराग्रैः ।
चिद्रूपिणीं शारदचन्द्रकान्तिं बालां स्मरेन्मौक्तिकभूषिताङ्गीम्५४

ध्यात्वैवञ्चरमं वीजं लपेल्लक्षत्रयं सुधीः ।
सितवस्त्रानुलेपाढ्यमात्मानं देवतां स्मरेत् ॥ ५५ ॥

मालतीकुसुमैर्हुत्वा चन्दनाक्तैर्दशांशतः ।

---

वीजानामिति त्रयाणामित्यर्थः ॥ ४७ ॥

वाग्बीजध्यानमाह विद्येति। अक्षमाला ज्ञानमुद्रा दक्षयोः ॥ ४८—५० ॥

कामबीजध्यानमाह कल्पेति। बीजपूरबाणाङ्कुशा दक्षेषु कपालचापपाशा वामेषु निषण्णां स्थिताम् ॥ ५१—५२ ॥

लक्ष्मीविद्यासुकीर्त्तीनामाधारो जायतेऽचिरात् ॥ ५६ ॥
देव्या शप्ता कीलिता च विद्येयं तन्न सिद्धिदा ।
शापोद्धारमथोत्कीलं विधाया जपमाचरेत् ॥ ५७ ॥
यो जपेदादिमे बीजे वराहभृगुपावकान् ।
मध्यमादौ नभो हंसौ मध्यमान्तेन पावकम् ॥ ५८ ॥
आद्यावन्ते च तार्त्तीये क्रमात् खं धूमकेतनम् ।
एवं जप्ता शतं विद्या शापहीना फलप्रदा ॥ ५९ ॥
यद्वाद्ये चरमे बीजे नैव रेफं नियोजयेत् ।
शापोद्धारे प्रकारोऽन्यो यद्वायं कीर्त्तितो बुधैः ॥ ६० ॥
आद्यमाद्यञ्च तार्त्तीयं कामः कामोऽथ वाग्भवम् ।
अन्त्यमन्त्यमनङ्गञ्च नवार्णः कीर्त्तितो मनुः ॥ ६१ ॥
जप्तोऽयं शतधा शापं बालाया विनिवर्त्तयेत् ।
चैतन्या ह्लादिनीमन्त्रौ जप्तौ निष्कीलताकरौ ॥ ६२ ॥
त्रिस्वराश्चेतनीमन्त्रोऽधरः शान्तिरनुग्रहः ।
तारादिहृदयान्तः स्यात् काम आह्लादिनीमनुः ॥ ६३ ॥
तथा त्रयाणां बीजानां दीपनैर्मनुभिस्त्रिभिः ।
सुदीप्तानि विधायादौ जपेत्तानिष्टसिद्धये ॥ ६४ ॥

---

तृतीयबीजध्यानमाह व्याख्यानेति । व्याख्यानमुद्राक्षस्रजौ दधयोः ॥५४—५७॥

शापोद्धारप्रकारमाह यो जपेदिति । आद्ये एतान् यो जपेत् वराहो हः भृगुः सः पावको रः तेन ह्स्रैं द्वितीयस्यादौ नभो हंसौ हसौ अन्ते रेफः तेन हसकलरीमिति कूटं तृतीयस्यादौ खं हः अन्ते धूमकेतनो रेफः तेन ह्स्रौः एवं भैरवी जाता अस्यां शतं जप्तायां बाला शापहीना स्यात् यद्वा त्वेवाद्येऽन्त्ये च बीजे रेफयोगाभावः तेन ह्सौः मध्यमन्ते देवः ॥ ५८—६० ॥

शापोद्धारे प्रकारान्तरं नवार्णजपमाह आद्यमिति । ऐं ऐं सौः क्लीं क्लीं ऐं सौः सौः क्लीं एवं नवार्णः शतजप्तः शापनिवर्त्तकः । चैतनीमन्त्रमाह त्रीति । अधर ऐ शान्तिरी अनुग्रह औ एते त्रयः स्वराः केवलाश्चैतनीमन्त्रः शतं जप्तो

वद युग्मं सदीर्घाम्बुस्मृतिबालावनन्तगाम्।
सत्यः सनेत्रो नस्ताद्दक् वाग् नवार्णाद्यदीपिनी ॥ ६५ ॥
क्लिन्ने क्लो दिनि वैकुण्ठो दीर्घं खं सद्यगोऽन्तिमः।
निद्रा सचन्द्रा कुर्वन्ती शिवार्णा मध्यदीपिनी ॥ ६६ ॥
तारो मोचञ्च कुर्वन्ती पञ्चार्णान्त्यस्य दीपिनी।
दीपिनीमन्तरा बालाराधितापि न सिध्यति ॥ ६७ ॥
इदं रहस्यं नाख्येयं कृतघ्ने कितवे शठे।
परीक्षिताय दातव्यमन्यथा दातृदोषदम् ॥ ६८ ॥
वागन्त्यकामान् प्रजपेदरीणां क्षोभहेतवे।
कामवागन्त्यबीजानि त्रैलोक्यस्य वशीकृतौ ॥ ६९ ॥
कामान्त्यवाणीबीजानि भुक्तये नियतो जपेत्।
पूजाविधौ तु बालायास्त्रिविधानर्चयेद् गुरून् ॥ ७० ॥
दिव्यौघश्चेति सिद्धौघो मानवौघ इति त्रिधा।
परप्रकाशः परमेशानः परशिवस्तथा ॥ ७१ ॥

---

चाबां निःकीलां करोति। आह्लादिनीमन्त्रमाह तारादिरिति। ओं क्लीं नम इति अयमप्युत्कीलनकरः ॥ ६१—६४ ॥

वाग्बीजस्य दीपनीविद्यामाह वदेति। सदीर्घाम्बु वा अनन्त गौ स्मृतिबालौ आस्थितौ गवौ तेन ग्वा सनेत्रः सत्यो हि ताद्दक् नः निः वाक् ऐं इयमाद्यस्य बीजस्य दीपनी प्रकाशकर्त्री ॥ ६४ ॥ ६५ ॥

कामबीजस्य दीपनीमाह क्लिन्ने इति स्वरूपं वैकुण्ठो मः दीर्घं खं हा अन्तिमः चः सद्यगः ओगतः चो सचन्द्रा निद्रा भं कुरु स्वरूपं शिवार्णा एकादश-वर्णा मध्यबीजस्य दीपनी ॥ ६६ ॥

तार इति। तारः प्रणवः मोचं कुर्विति स्वरूपं अन्त्यस्य बीजस्य दीपनी उक्तां दीपनीं अन्तरा विना आराधितापि बाला न सिध्यति ॥ ६७ ॥ ६८ ॥

जपभेदात् कामभेदेनाह वागिति। ऐं सौं क्लीं इत्यरिनाशाय क्लीं ऐं सौं इति वशीकरणे ॥ ६९ ॥

क्लीं सौः ऐंमिति भुक्त्यर्थम् ॥ ७० ॥

दिव्यौघानाह परप्रकाश इति ॥ ७१ ॥

कामेश्वरस्ततो मोक्षः षष्ठः कामो मृतोऽन्तिमः ।
एते सप्तैव दिव्यौघा आनन्दपदपश्चिमाः ॥ २७ ॥
ईशानाख्यस्तत्पुरुषो घोराख्यो वामदेवकः ।
सद्योजात इमे पञ्च सिद्धौघाख्याः स्मृता बुधैः ॥ ७३ ॥
मानवौघः प्रविज्ञेयः स्वगुरोः सम्प्रदायतः ।
नवयोन्यात्मके यन्त्रे विलिखेन्मध्ये योनितः ॥ ७४ ॥
प्रादक्षिण्येन बीजानि त्रिवारं साधकोत्तमः ।
त्रींस्त्रीन् वर्णांस्तु गायत्र्याः अष्टपत्रेषु संलिखेत् ॥ ७५ ॥
बहिर्मातृकया वेष्ट्य तद्बहिर्भूपुरद्वयम् ।
कामबीजलसत्कोणं व्यतिभिन्नपरस्परम् ॥ ७६ ॥
यन्त्रं त्रैपुरमाख्यातं जप्तं सम्पातसाधितम् ।
वाहना विधृतं दद्याद्धनं कीर्त्तिं सुखं सुतान् ॥ ७७ ॥
कामान्ते त्रिपुरा देवि ! विद्महे का विषम्भगि ।
वकः खड्गीशमारूढ़ः सनेत्रोऽग्निश्च धीमहि ॥ ७८ ॥
तन्नः क्लिन्ने प्रचोदान्ते यादन्ता कीर्त्तिता बुधैः ।
गायत्री त्रैपुरी सर्वसिद्धिदा सुरसेविता ॥ ७९ ॥

---

आनन्दपदपश्चिमा इति वक्ष्यमाणत्वात् परप्रकाशानन्दाय नम इत्यादि प्रयोगः ॥ ७२ ॥

सिद्धौघानाह ईशानाख्य इति ॥ ७३ ॥

यन्त्रमाह नवेति । गायत्र्याः त्रिपुरागायत्र्याः वक्ष्यमाणाया वर्णत्रयं प्रतियन्त्रं लिखेत् ॥ ७४ ॥ ७५ ॥

भूपुरद्वयं चतुःकोणद्वयं कीदृशं परस्परं व्यतिभिन्नम् एकं विदिगात्मकोणम् अपरं दिगात्मकोणमित्यर्थः ॥ ७६ ॥

सम्पातसाधितं आहुतिशेषघृतेन संयोजितम् ॥ ७७ ॥

गायत्रीमुद्धरति कामेति । कामः क्लीं भगि एयुतं विषं मः मे वकः ख: खड्गीशं वकारमारूढ़ः त्वं सनेत्रः अग्निः रि स्वरूपमन्यत् ॥ ७८ ॥ ७९ ॥

अथ वक्ष्यामि बालाया भेदानागमगोपितान्।
मायाकामोऽम्बरारूढं तार्त्तीयं त्र्यक्षरो मनुः ॥ ८० ॥
अनुलोमविलोमाभ्यां बालामन्त्राः षड़क्षरः।
बाला श्रीकामहृल्लेखा सम्पुटोऽयं नवाक्षरः ॥ ८१ ॥
बालान्ते बालत्रिपुरे स्वाहान्तो दशवर्णवान्।
वाक्कामो व्योमभृग्विन्दुयुग् मनु दीर्घभूधरः ॥ ८२ ॥
पिनाकी त्रिपुरे सिद्धिं देहि हृन्मनुवर्णवान्।
मायालक्ष्मीर्मनोजन्मा त्रिपुरान्ते तु भारती ॥ ८३ ॥
कवित्वं देहि ठद्वन्द्वं षोड़शार्णो मनुः स्मृतः।
कमला पार्वती कामस्त्रिपुरान्ते च मालती ॥ ८४ ॥
मह्यं सुखं ततो देहि स्वाहा सप्तदशाक्षरः।
भृगुब्रह्मक्रियावह्नियुक्ता शान्तिः सरात्रिपा ॥ ८५ ॥
दहनान्त्यमहाकालभुजङ्गपुरुषोत्तमाः।
मन्वर्घीशेन्दुसंयुक्ता द्वितीयं बीजमीरितम् ॥ ८६ ॥
वाग्बीजं त्रिपुरे सर्ववाञ्छितं देहि हृत्ततः।
वह्निप्रिया सप्तदशवर्णोऽयं कीर्त्तितो मनुः ॥ ८७ ॥

---

बालाभेदे प्रथमं मन्त्रान्तरमाह मायेति। माया ह्रीं कामः क्लीं तार्त्तीयं सौः अम्बरारूढं हयुतं हसौः प्रथमः ॥ ८० ॥

मन्त्रान्तरमाह अनुलोमेति। ऐं क्लीं सौः क्लीं ऐं द्वितीयः। मन्त्रान्तरमाह बालेति। श्रीं क्लीं ह्रीं ऐं क्लीं सौः ह्रीं क्लीं श्रीमिति तृतीयः ॥ ८१ ॥

मन्त्रान्तरमाह बालेति। ऐं क्लीं सौ बालात्रिपुरे स्वाहेति चतुर्थः। पञ्चममाह वागिति वाक् ऐं कामः क्लीं व्योमभृग्विन्दुयुक् मनुहसबिन्दुयुत श्रीं हसौं दीर्घभूधरः वा पिनाकी वा स्वरूपमन्यत्। षष्ठमाह मायेति। माया ह्रीं लक्ष्मीः श्रीं मनोजन्मा क्लीं ठद्वयं स्वाहा स्वरूपमन्यत्। सप्तममाह कमलेति। कमला श्रीं पार्वती ह्रीं कामः क्लीं स्वरूपमन्यत्। अष्टममाह भृग्विति। भृगुः सः ब्रह्मा कः क्रिया लः वह्निः रः एतैर्युक्ता शान्तिरीकारः सरात्रिपा सबिन्दुः ह्स क ल ह्रीं दहनो रः अन्त्यः क्षः महाकालो मः भुजगो रः पुरुषोत्तमो यः एते

हृल्लेखा त्रितयं प्रौढ़त्रिपुरेऽनन्तरोग्यमे ।
स्वर्यं देहि प्रिया वह्नेर्मनुरष्टादशाक्षरः ॥ ८८ ॥
माया रमा मन्मथान्ते त्रिपुरा मदने पदम् ।
सर्वशुभं साधयाग्नेः प्रियान्त्वाष्टादशाक्षरः ॥ ८९ ॥
हृल्लेखा कमलानङ्गो बालान्ते त्रिपुरे पदम् ।
मदायतान्ततो विद्यां कुरु हृद्वह्निवल्लभाम् ॥ ९० ॥
मन्त्रो विंशतिवर्णोऽयं मायापद्मा मनोभवः ।
परापरेऽन्ते त्रिपुरे सर्वमीप्सितमुच्यताम् ॥ ९१ ॥
साधयानलकान्ताय मनुर्विंशतिवर्णकः ।
कामद्वन्द्वं रमायुग्मं मायायुक् त्रिपुरा पदम् ॥ ९२ ॥
ललितान्ते मदीप्सीतिमन्ते च योषितां पदम् ।
देहि वाञ्छितमित्युक्त्वा कुरु ज्वलनकामिनी ॥ ९३ ॥
अष्टाविंशतिवर्णोऽयं मनुरिष्टप्रियाप्रदः ।
कामपद्माद्रिपुत्रीणां प्रत्येकं त्रितयं वदेत् ॥ ९४ ॥
त्रिपुरान्ते सुन्दरीति सर्वं जगदिनद्वयम् ।

---

मन्त्रवर्णाशेन्दुसंयुक्ता भौ उबिन्दुयुताः तेन भ्रां वाग्बीजं ऐं हृत् नमः स्वरूपं शेषं वह्निप्रिया स्वाहा ॥ ८२—८७ ॥

नवममाह हृल्लेखेति । हृल्लेखा त्रितयं ह्रीं ह्रीं ह्रीं अनन्त आ स्वरूपमपरम् ॥ ८८ ॥

दशममाह मायेति । माया ह्रीं रमा श्रीं मन्मथः क्लीं स्वरूपं शेषम् ॥ ८९ ॥

एकादशमाह हृल्लेखेति । हृल्लेखा ह्रीं कमला श्रीं अनङ्गः क्लीं हृत् नमः वह्निवल्लभा स्वाहा शेषं स्वरूपम् ॥ ९० ॥

द्वादशमाह मायेति । माया ह्रीं पद्मा श्रीं मनोभवः क्लीं अनलकान्ता स्वाहा अन्यत् स्वरूपम् ॥ ९१ ॥

त्रयोदशमाह कामेति । कामद्वन्द्वं क्लीं क्लीं रमायुग्मं श्रीं श्रीं मायायुक् ह्रीं ह्रीं त्रिपुरा ललिते मदीप्सितां योषितां देहि वाञ्छितं कुरुस्वरूपं ज्वलनकामिनी स्वाहा ॥ ९२ ॥ ९३ ॥

वश्यं कुरुद्वयं मह्यं वलन्देह्यनलाङ्गना ॥ ९५ ॥
सर्वाभीष्टप्रदो मन्त्र उक्तो बाणगुणाक्षरः।
चतुर्दशानामितेषां मनूनामृषिरीरितः ॥ ९६ ॥
दक्षिणामूर्त्तिसंज्ञस्तु छन्दो गायत्रमुच्यते।
त्रिपुरा देवता वाला षड़ङ्गं मातृकासमम् ॥ ९७ ॥
पाशाङ्कुशौ पुस्तकमक्षसूत्रं करैर्दधाना सकलामरार्च्या।
रक्ता त्रिनेत्रा शशिशेखरेयं ध्येया खिलर्द्ध्यै त्रिपुरात्र वाला॥९८॥
जपेल्लक्षं दशांशेन होमः पुष्पैर्हयारिजैः।
पूजा पूर्वोदिते पीठेऽङ्गैरत्याद्यैश्च सायकैः ॥ ९९ ॥
मातृभिर्दिगधीशास्त्रैः प्रयोगाः पूर्ववन्मताः।
लघुश्यामामथो वक्ष्ये स्मरणादिष्टदायिनी ॥ १०० ॥
वाग्बीजं हृदयं कर्ण एकनेत्रः सनेत्रकः।
वृषो मुकुन्दमारूढ़ो कूर्मो दीर्घेन्दुसंयुतः ॥ १०१ ॥
नन्दी दीर्घोलि मातङ्गि सर्वान्ते स्याद्वशङ्करि।
वैश्वानरप्रियान्तोऽयं मन्त्रो विंशतिवर्णवान् ॥ १०२ ॥
मदनोऽस्य मुनिः प्रोक्तो गायत्रीनिवृदादिका।
छन्दो देवी लघुश्यामा वीजं वाग्वह्निवल्लभा ॥ १०३ ॥

---

चतुर्दशमाह कामेति। कामपञ्चाद्रिपुत्त्रीणां प्रत्येकं त्रयं क्लीं क्लूं क्लौं श्रीं श्रीं श्रीं क्रीं क्रीं क्रीं द्रुनद्वयं मद्वयं मम धनलाङ्गना स्वाहा स्वरूपनपरं एते चतुर्दशबालाभेदाः तेषामृष्यादीनाह दक्षिणेति ॥ ९४—९७ ॥

ध्यानमाह पाशेति। अङ्कुशाक्षसूत्रे दक्षयोः ॥ ९८ ॥

हयारिः करवीरः सायकैः पञ्चवाणदेवताभिः दिगधीशास्त्रैरिति दिशामीशैस्तदस्त्रैश्चेत्यर्थः ॥ ९९ ॥ १०० ॥

बालामुक्त्वा लघुश्यामामाह वाग्बीजमिति। वाग्बीजं ऐं हृदयं नमः कर्णं उ सनेत्र एकनेत्रः द्रयुतम्ब छि मुकुन्दमारूढ़ो वृषः टस्थितः षः ट दीर्घेन्दुसंयुतः कूर्मः चः चां दीर्घो नन्दी डा लि मातङ्गि सर्ववशङ्करि स्वरूपं वैश्वानरप्रिया स्वाहा। ऐं बीजं स्वाहा शक्तिः ॥ १०१—१०२ ॥

शक्तिरक्षाखिलाभीष्टसाधने विनियोजनम्।
वाक्पूर्विकां रतिं मूर्ध्नि प्रीतिं मायादिकां हृदि॥ १०४॥
पादयोर्विन्यसेन्मन्त्री कामपूर्वां मनोभवाम्।
इच्छाशक्तिं ज्ञानशक्तिं क्रियाशक्तिं क्रमान्न्यसेत्॥ १०५॥
वाङ्मायाकामबीजाद्या मुखे कण्ठे शिश्ने तथा।
द्रावणं शोषणं बाणं तोषणं मोहनाभिधम्॥ १०६॥
उन्मादनं क्रमात् पञ्च वाणीशीबीजपूर्वकान्।
कास्यहृद्गुह्यपादेषु न्यस्य कुर्यात् षडङ्गकम्॥ १०७॥
रामाग्निगुणरामाङ्गनेत्रवर्णैर्मनुस्थितैः।
ङेनमोऽन्ताः कन्यकान्ता ब्राह्म्याद्या अष्टमातरः॥ १०८॥
दीर्घस्वराद्यदीर्घञ्चाद्यष्टकाद्या विलोमतः।
विन्यस्य मूर्ध्नि वामांसे वामपार्श्वेषु नाभितः॥ १०९॥
दक्षपार्श्वे दक्षिणांसे ककुत्हृदययोरपि।
तारवागादिका अष्टौ सिद्धयः कन्यकान्तिमाः॥ ११०॥

---

न्यासानाह वागिति। ऐं रत्यै नमः मूर्ध्नि ह्रीं प्रीत्यै नमो हृदि क्लीं मनोभवायै नमः पादयोः। इच्छेति ऐं इच्छाशक्त्यै नमो मुखे ह्रीं ज्ञानशक्त्यै नमः, क्लीं क्रियाशक्त्यै नमो लिङ्गे॥ १०५॥

वाणेशीबीजानि द्रां द्रीं क्लीं ब्लूं सः इति तत्पूर्वकान् द्रावणाद्यान् बाणान् कास्यहृद्गुह्यपादे न्यसेत् द्रां द्रावणबाणाय नम इत्यादिकं शिरः आस्यं मुखम्॥ १०६। १०७॥

षडङ्गमाह रामेति। मातृकान्यासमाह ङे इति। दीर्घस्वरा आद्या यस्येदृशं विलोमतो दीर्घं आदीनामष्टकमाद्यं यासान्ता मातरो मूर्द्धादिषु न्यस्याः तथा कीदृश्यो मातरः ङेनमोऽन्तकन्यकान्ताः चतुर्थीनमोऽन्तं कन्यका अन्ते यासान्ताः यथा आं कां ब्राह्मीकन्यकायै नमो मूर्ध्नि ईं खां माहेश्वरीकन्यकायै नमो वामांसे ऊं गां कौमारीकन्यकायै नमो वामपार्श्वे ॠं घां वैष्णवीकन्यकायै नमो नाभौ ॡं ङां वाराहीकन्यकायै नमो दक्षपार्श्वे ऐं चां इन्द्राणीकन्यकायै नमो दक्षांसे औं छां चामुण्डाकन्यकायै नमः ककुदि अः जां महालक्ष्मीकन्यकायै नमो हृदि।

चतुर्थी नमसा युक्ता न्यस्याः कालिकचिल्लिषु ।
कण्ठे च हृदये नाभावाधारे लिङ्गमूर्द्धनि ॥ १११ ॥
अणिमा महिमा चापि लघिमा गरिमेशिता ।
वशिता चाथ प्राकाम्यं प्राप्तिरित्यष्टसिद्धयः ॥ ११२ ॥
कामाद्याः कन्यका प्रीता अष्टावप्सरसो न्यसेत् ।
के भाले नेत्रयोर्वक्त्रे कर्णयोः ककुदेऽपि च ॥ ११३ ॥
उर्वशी मेनका रम्भा घृताची पूजिका तथा ।
सुकेशी मञ्जुघोषा च महारागवतीति ताः ॥ ११४ ॥
यक्षगन्धर्वसिद्धानां कन्यका नरनागयोः ।
विद्याधरकिम्पुरुषपिशाचानामपीह ताः ॥ ११५ ॥
अंसयोर्हृदये न्यस्येत् स्तनयोर्जठरे क्रमात् ।
गुह्येऽप्याधारदेशे च नमोऽन्ता मदनादिकाः ॥ ११६ ॥
ताराद्यान् नमसा युक्तान्मूलवर्णान् सविन्दुकान् ।
न्यसेत् सन्धिषु साग्रेषु करयोः पादयोरपि ॥ ११७ ॥

---

सिद्धिन्यासमाह तारेति । ओं ऐं अणिमासिद्धिकन्यकायै नमो मूर्ध्नि इत्यादिसिद्धय इति अनुपदं वक्ष्यमाणाः अलिकं ललाटं चिल्लिर्भ्रूः ॥ १०८—१११ ॥

अष्टसिद्धीराह अणिमेत्यादि ॥ ११२ ॥

अप्सरो न्यासमाह कामाद्या इति । क्लीं उर्वशीकन्यकायै नमो मूर्ध्नि इत्यादि. नेत्रयोर्द्वे कर्णयोर्द्वे ॥ ११३ ॥

अप्सरस आह उर्वशीति ॥ ११४ ॥

कन्यान्यासमाह यक्षेति ॥ ११५ ॥

नमोऽन्ता मदनादिकाः कामबीजाद्या यक्षादीनां कन्यका अंसादिषु न्यसेत् अंसयोर्द्वे स्तनयोर्द्वे एकैकान्यत्र क्लीं यक्षकन्यकायै नमो दक्षांसे क्लीं गन्धर्वकन्यकायै नमो वामांसे इत्यादिप्रयोगः ॥ ११६ ॥

वर्णन्यासमाह तारेति । प्रणवाद्यान् नमोऽन्तान् सविन्दुकान् मन्त्रवर्णान् करपादसन्धिषु साग्रेषु न्यसेत् । ओं क्लीं नमो दक्षेऽंसे ओं ओं नमो दक्षकूर्परे इत्यादि ॥ ११७ ॥

न्यासानेवंविधान् कृत्वा मातङ्गीं मनसा स्मरेत् ।
सुरार्णवान्तदीपस्थरत्नमन्दिरमध्यगे ॥ ११८ ॥
माणिक्याभरणान्वितां स्मितमुखीं नीलोत्पलाभां वरां
रम्यालक्तकलिप्तपादकमलां नेत्रत्रयोल्लासिनीम् ।
वीणावादनतत्परां सुरनतां कीरच्छदश्यामलां
मातङ्गीं शशिशेखरामनुभजे ताम्बूलपूर्णाननाम् ॥ ११९ ॥
लक्षं जपेन्मधुकोत्थैर्जुहुयादयुतं शुभैः ।
मातङ्गीप्रोदिते पीठे लघुश्यामां प्रपूजयेत् ॥ १२० ॥
त्रिकोणपञ्चकोणाष्टदलषोडशपत्रके ।
वेदद्वारधरागेहावृते यन्त्रे विधानतः ॥ १२१ ॥
देव्या अग्रे पार्श्वयोश्च तिस्रोऽर्च्येद्रतिपूर्विकाः ।
इच्छाज्ञानक्रियाशक्तीः कोणेष्वग्रादिषु त्रिषु ॥ १२२ ॥
बाणान् पञ्चसु कोणेषु केशरेष्वङ्गदेवताः ।
ब्राह्म्याद्या अष्टपत्रेषु पत्राग्रेष्वणिमादिकाः ॥ १२३ ॥
यजेत् षोड़शपत्रेषूर्वश्याद्याः कन्यका अपि ।
प्रयोगान् न्यासवत् कुर्याद्रत्यादीनां प्रपूजने ॥ १२४ ॥
भूगृहस्य चतुर्दिक्षु योगिनीः परिपूजयेत् ।
गजानना सिंहमुखी गृध्रास्या काकतुण्डिका ॥ १२५ ॥
उष्ट्रग्रीवा हयग्रीवा वाराही शरभानना ।
उलूकिका शिवारावा मयूरी विकटानना ॥ १२६ ॥

---

सुरार्णवस्यान्तरीयं द्वीपं तत्र यद्रत्नमन्दिरं तन्मध्यगे सिंहासने स्थितां ध्यायेत् माणिक्येति । कीरच्छदश्यामलां शुकपिच्छनीलाम् ॥ ११८—१२१ ॥

रतिपूर्विका रतिप्रीतिमनोभवाः ॥ १२२ ॥

उर्वश्याद्या षष्टी कन्या षष्टी यक्षादीनां न्यासवत् प्रयोगान् न्यासे यथा प्रयोगास्तथा पूजायामपि ॥ १२३ ॥ १२४ ॥

अष्टवक्त्रा कोटराक्षी कुब्जा विकटलोचना।
समर्चयेद्दिशि प्राच्यामेताः षोड़शयोगिनी ॥ १२७॥
शुष्कोदरी ललज्जिह्वा श्वदंष्ट्रा वानरानना।
ऋक्षाक्षी केकराक्षी च वृहत्तुण्डा सुराप्रिया ॥ १२८॥
कपालहस्ता रक्ताक्षीशुकश्येनी कपोतिका।
पाशहस्ता दण्डहस्ता प्रचण्डेत्यपि षोड़श ॥ १२९॥
पूज्या कीनाशदिग्भागे प्रतीच्यां चण्डविक्रमाः।
शिशुघ्नी पापहन्त्री च काली रुधिरपायिनी ॥ १३०॥
वसाधरा गर्भभक्ष्या शवहस्तान्त्रमालिनी।
स्थूलकेशी वृहत्कुक्षिः सर्पास्या प्रेतवाहनी ॥ १३१॥
दन्दशूककरा क्रौञ्ची मृगशीर्षेति षोड़शी।
सम्पूज्या उत्तरस्यान्तु षोड़शैव वृषानना ॥ १३२॥
व्यात्तास्या धूमनिःश्वासा व्योमैकचरणोर्द्ध्वदृक्।
तापनी शोषणी चैव कोटरी स्थूलनासिका ॥ १३३॥
विद्युत्प्रभा बलाकास्या मार्जारी कटपूतना।
अट्टाट्टहासा कामाक्षेत्यर्चनीया त्वभीष्टदाः ॥ १३४॥
नश्यन्ति भूतशाकिन्य आसां नामस्मृतेरपि।
भूमन्दिरस्य कोणेषु वज्रादिषु यजेत् क्रमात् ॥ १३५॥
स्वस्वमन्त्रेण वटुकं गणेशं क्षेत्रपालकम्।
दुर्गां तद्बहिरिन्द्रादीन् वज्रादीनपि पूजयेत् ॥ १३६॥
भूगृहस्य चतुर्दिक्षु चतुर्वाद्यानि पूजयेत्।
ततसंज्ञञ्च विततं धनञ्च सुषिराभिधम् ॥ १३७॥

---

योगिनीरत्र गजाननेत्यादि ॥ १२५—१२९॥
कीनाशदिग्भागे दक्षिणस्याम् ॥ १३०—१३५॥

द्वादशावरणैरेवं लघुश्यामां यजेत्तु यः।
सर्वासां सम्पदां पात्रमचिराज्जायते स ना ॥ १३८ ॥
वाणी शुकप्रिया ङेन्ता विद्महे मीनकेतनः।
कामेश्वरी धीमहीति तन्नः श्यामा प्रचोदयात् ॥ १३९ ॥
एषोदिता तु मातङ्गी गायत्री सर्वसिद्धिदा।
अनया यागवस्तूनि प्रोक्षेत्तस्याः समर्चने ॥ १४० ॥
मातङ्गीमन्त्रसम्प्रोक्ताः प्रयोगा अत्र कीर्त्तिताः।
राजानो राजपुत्राश्च सुदृशो मदमन्थराः ॥ १४१ ॥
दासा मनोवचःकायैर्भवन्त्यस्या उपासितुः।
शाकिनी प्रेतभूताश्च धर्षितुं तन्न शक्नुयुः ॥ १४२ ॥
भूरिणा किमिहोक्तेन देवीयमखिलेष्टदा।
यन्मनुस्मरणादेव नरो देवोपमो भवेत् ॥ १४३ ॥
देव्या उपासकैः पुम्भिः स्त्रियो निन्द्या न जातुचित्।
देवीवन्मानानीयास्ता मनोऽभीष्टमभीप्सुभिः ॥ १४४ ॥

इति श्रीमहीधरविरचिते मन्त्रमहोदधौ बालालघुश्यामा-
निरूपणं नाम अष्टमस्तरङ्गः।

---

स्वस्वमन्त्रैरेवेति ॥ १२६—१३८ ॥

वटुकादीनां मन्त्रा उक्ताः तद्गायत्रीमाह वाणीति। ऐं शुकप्रिया ङेन्ता शुकप्रियायै मीनकेतनः क्लीं स्वरूपं शेषम् ॥ १३९—१४४ ॥

इति नौकासमाख्यायां मन्त्रमहोदधिटीकायां बालाश्यामा-
निरूपणं नाम अष्टमस्तरङ्गः।

# नवमस्तरङ्गः ।

अन्नपूर्णेश्वरीमन्त्रं वक्ष्येऽभीष्टप्रदायकम् ।
कुवेरो यामुपास्याशु लब्धवान्निधिनाथताम् ॥ १ ॥
शम्भोः सख्यं दिगीशत्वं कैलाशाधीशतामपि ।
वेदादिर्गिरिजा पद्मा मन्मथो हृदयम्भग ॥ २ ॥
वति माहेश्वरिप्रान्तेऽन्नपूर्णे दहनाङ्गना ।
प्रोक्ता विंशतिवर्णोऽयं विद्या स्यात् द्रुहिणो मुनिः ॥ ३ ॥
कृतिः छन्दोऽन्नपूर्णेशी देवता परिकीर्त्तिता ।
षट्दीर्घाढ्येन हृल्लेखावीजेन स्यात् षड़ङ्गकम् ॥ ४ ॥
मुखनासाक्षिकर्णाब्धुगुदेषु नवसु न्यसेत् ।
पदानि नव तद्वर्णसंख्येदानीमुदीर्य्यते ॥ ५ ॥
भूमिचन्द्रधरैकाक्षिवेदाब्धियुगबाहुभिः ।
पदसंख्यामितैर्वर्णैस्ततो ध्यायेत् सुरेश्वरीम् ॥ ६ ॥
तप्तस्वर्णनिभा शशाङ्कमुकुटा रत्नप्रभा भासुरा ।
नानावस्त्रविराजिता त्रिनयना भूमीरमाभ्यां युता ।
दर्वीहाटकभाजनञ्च दधती चात्युच्चपीनस्तनी
नृत्यन्तं शिवमाकलय्य मुदिता ध्येयान्नपूर्णेश्वरी ॥ ७ ॥
लक्षं जपोऽयुतं होमश्चरुणा घृतसंयुता ।

---

अन्नपूर्णेश्वरीमन्त्रं वक्तुं प्रतिजानीते फलं कथयन् मन्त्रमुद्धरति । वेदादिः प्रणवः गिरिजा ह्रीं पद्मा श्रीं मन्मथः क्लीं हृदयं नमः भगवति माहेश्वरि अन्नपूर्णे स्वरूपं दहनाङ्गना स्वाहा ॥ १—२ ॥

भूमीत्यादि पदवर्ण संख्या ॥ ४—६ ॥

जयादिनवशक्त्याढ्ये पीठे पूजा समीरिता ॥ ८ ॥
त्रिकोणवेदपत्राष्टपत्रषोड़शपत्रके ।
भूपुरेण युते यन्त्रे प्रदद्यान्मायया़सनम् ॥ ९ ॥
अग्न्यादिकोणत्रितये शिववाराहमाधवान् ।
अर्चयेत् स्वस्वमन्त्रैस्तु प्रोच्यते मनवस्तु ते ॥ १० ॥
प्रणवो मनुचन्द्राढ्यं गगनं हृदयं शिवा ।
मारुतः शिवमन्त्रोऽयं सप्तार्णः शिवपूजने ॥ ११ ॥
तारो नमो भगवते वराहार्घीशयुग्वसुः ।
पाय भूर्भुर्जलं सर्गि स्वः शूरः कामिकाचये ॥ १२ ॥
भूपतित्वञ्च मे देहि ददापय शुचिप्रिया ।
त्रयस्त्रिंशद्वर्णमन्त्रः प्रोक्तो वाराहपूजने ॥ १३ ॥
प्रणवो हृदयं नारायणाय वसुवर्णकः ।
नारायणार्चने मन्त्रः षड़ङ्गानि ततोऽर्चयेत् ॥ १४ ॥
धरां वामे स्वमनुना दक्षभागे श्रियं तथा ।
अन्नं मह्यन्नमित्युक्त्वा मे देह्यन्नाधिपार्णका ॥ १५ ॥
तये ममान्नं प्राणान्ते दापयानलसुन्दरी ।

---

ध्यानमाह । दर्वीं दक्षे स्वर्णपात्रं वामे ॥ ७—१० ॥

शिवमन्त्रमाह प्रणव इति । गगनं हकारः मनुचन्द्राढ्यं औविन्दुयुतं ह्रौं हृदयं नमः शिवा स्वरूपं मारुतो य ॥ ११ ॥

वराहमन्त्रमाह तार इति । तारः ॐ नमो भगवते वराह स्वरूपं अर्घीश-युग्वसुः ऊयुतो रः रूपाय भूर्भुवः स्वरूपं सर्गि नयनः स्वः स्वरूपं, शूरः पः कामिका त ये ॥ १२ ॥

भूपतित्वं मे देहि ददापय स्वरूपं शुचिप्रिया स्वाहा ॥ १३ ॥

नारायणमन्त्रमाह प्रणव इति । हृदयं नमः नारायणाय स्वरूपं वसुवर्णो-ऽष्टार्णः ॥ १४ ॥

धराश्रियोर्मन्त्रमाह अन्नमिति । अन्नं मह्यन्नं मे देह्यन्नाधिपतये ममान्नं

द्वाविंशत्यक्षरो मन्त्रो भूमौष्टौ भूमिसंपुटः ॥ १६ ॥
लक्ष्मीपुटस्तत्पूजायां स्मृतिर्लमनुचन्द्रयुक् ।
भुवो बीजं वह्निशान्तिबिन्दुयुक्तो वकः श्रियः ॥ १७ ॥
मन्त्रादिस्थचतुर्बीजपूर्विकाः परिपूजयेत् ।
शक्तीश्चतस्रो वेदास्रे परा च भुवनेश्वरी ॥ १८ ॥
कमला सुभगा चेति ब्राह्मराद्या अष्टपत्रगाः ।
षोड़शारेऽमृता चैव मानदा तुष्टिपुष्टयः ॥ १९ ॥
प्रीतीरति ह्रीं श्रींश्चापि स्वधा स्वाहा दशम्यथ ।
ज्योत्स्ना हैमवती छाया पूर्णिमा सह नित्यया ॥ २० ॥
अमावास्येति संपूज्या मन्त्रशेषार्णपूर्विकाः ।
भूपुरे लोकपालाः स्युस्तदस्त्राणि तदग्रतः ॥ २१ ॥
इत्थं जपादिभिः सिद्धे मन्त्रेऽस्मिन् धनसञ्चयैः ।
कुबेरसदृशो मन्त्री जायते जनवन्दितः ॥ २२ ॥
अयं रमा कामबीजरहितोऽष्टादशाक्षरः ।
द्विनेत्रवेदवेदाब्धिनेत्रार्णैरङ्गमीरितम् ॥२७ ॥

---

प्रदापय स्वरूपं धनदसुन्दरी स्वाहा । अयं मन्त्रो भूमौष्टौ भूमिपूजने भूमिबीजेन संपुटः श्रीपूजायां श्रीबीजेन संपुटितः ॥ १५ ॥ १६ ॥

भूबीजमाह स्मृतिरिति । स्मृतिर्गः लमनुचन्द्रयुक् ल औबिन्दुयुतः ग्लौं एतद्भुवो बीजम् । श्रीबीजमाह वह्नीरिति । रेफ ईबिन्दुयुतो वकः शः श्रीं इति श्रियो बीजम् ॥ १७ ॥

वेदास्रे चतुरस्रे मन्त्राद्यचतुर्बीजाद्याश्चतस्रः शक्तीः पूजयेत् ता एवाह परेति । ऐं परायै नमः ह्रीं भुवनेश्वर्यै ॥ १८ ॥

श्रीं कमलायै क्लीं सुभगायै मन्त्रस्य शेषाश्च वर्णाः चतुर्बीजव्यतिरिक्ताः तत्पूर्विका अमृताद्याः षोड़शदले पूज्याः नं अमृतायै नमः मां मानदायै इत्यादि ॥ १९—२२ ॥

मन्त्रान्तरमाह अयमिति । अयं विंशत्यर्णः श्रीकामहीनः । षड़ङ्गमाह द्वीति ॥ २३ ॥

पूर्वोक्तमन्त्रे मन्वर्णान्ममाभिमतमुच्चरेत् ।
अन्नं देहि युगश्चापि भवेदेकगुणार्णवान् ॥ २४ ॥
युगाङ्गवेदसप्ताब्धिषड्वर्णैरङ्गकल्पनम् ।
प्रणवः कमला शक्तिर्नमो भगवतीति च ॥ २५ ॥
प्रसन्नपारिजातेश्वर्य्यन्नपूर्णेनलाङ्गना ।
चतुर्विंशतिवर्णात्मा मन्त्रः सर्वेष्टसाधकः ॥ २६ ॥
रामाच्छि वेदनिधिभिर्भेदवर्णैः षड़ङ्गकम् ।
तारः श्रीशक्तिहृदयभ्रमाभ्रः कामिका सहक् ॥ २७ ॥
माहेश्वरि प्रसन्ने च वरदे पदमुच्चरेत् ।
अन्नपूर्णेऽग्निपत्नीति पञ्चविंशतिवर्णवान् ॥ २८ ॥
रामषट्युगषट्वेदनेत्रार्णैः स्यात् षड़ङ्गकम् ।
एषां चतुर्णां मन्त्राणामन्यत् सर्वन्तु पूर्ववत् ॥ २९ ॥
त्रैलोक्यमोहनो गौरीमन्त्रः संकीर्त्यतेऽधुना ।
माया नमोऽन्ते ब्रह्म श्रीराजिते राजपूजिते ॥ ३० ॥
जयेति विजये गौरि गान्धारीति वदेत् पदम् ।
त्रिभु तोयं मेष वशंकरि सर्व ससहलः ॥ ३१ ॥

---

मन्त्रान्तरमाह पूर्वोक्तेति । विंशत्यर्णे मन्वर्णाञ्चतुर्दशाचरात् माहेश्वरीत्यन्ते ममाभिमतमन्नं देहि देहीति वर्णानुच्चारयेत् । अन्नपूर्णे स्वाहेत्यन्तेऽप्येव तत एकगुणार्णवान् एकविंशदर्णः ॥ २४ ॥

षड़ङ्गमाह युगेति । मन्त्रान्तरमाह प्रणव इति । कमला श्रीं शक्तिः ह्रीं अनलाङ्गना स्वाहा ॥ २५ ॥ २६ ॥

षड़ङ्गमाह रामेति । नवमन्त्रान्तरमाह तारेति । तारः ॐ श्रीः श्रीं शक्तिः ह्रीं हृदयं नमः भग स्वरूपं भ्रमी वः सहकामिका ति ॥ २७ ॥

अग्निपत्नी स्वाहा स्वरूपमन्यत् ॥ २८ ॥

षड़ङ्गमाह रामेति । अन्यत्तु ध्यानपूजाप्रयोगः पूर्ववत् ॥ २९ ॥

गौरीमन्त्रमाह मायेति । माया ह्रीं तोयं वः मेषी नः ससह जः जो ॥ ३० ॥ ३१ ॥

कवशङ्करि सर्वस्त्रीपुरुषान्ते वशङ्करि ।
सुद्वयं दुद्वयं द्वे युग्वायुग्मं हरवल्लभा ॥ ३२ ॥
स्वाहान्त एकषष्ट्यर्णो मन्त्रराजः समीरितः ।
अजो मुनिर्निवृत् छन्दो गौरी त्रैलोक्यमोहिनी ॥ ३३ ॥
देवताबीजशक्ती तु मायास्वाहापदे क्रमात् ।
चतुर्दशदशाष्टाष्टदशैकादशवर्णकैः ॥ ३४ ॥
दीर्घाव्यमायया युक्तैः षड़ङ्गानि समाचरेत् ।
मूलेन व्यापकं कृत्वा ध्यायेत्त्रैलोक्यमोहिनीम् ॥ ३५ ॥
गीर्वाणसङ्घार्चितपादपङ्कजारुणप्रभा बालशशाङ्कशेखरा ।
रक्ताम्बरालेपनपुष्पयुग्मुदे सृणिं सपाशं दधती शिवास्तु वः ॥३६॥
अयुतं प्रजपेन्मन्त्रं सहस्रं घृतसंयुतैः ।
पायसैर्जुहुयात् पीठे प्रागुक्ते गिरिजां यजेत् ॥ ३७ ॥
केसरेष्वङ्गमाराध्य ब्राह्मग्राद्या पत्रमध्यगाः ।
लोकेश्वरास्तदस्त्राणि तद्बहिः परिपूजयेत् ॥ ३८ ॥
इत्थमाराधिता देवी प्रयच्छेत् सुखसम्पदः ।
तन्दुलैस्तिलसंमिश्रैर्लवणैर्मधुरान्वितैः ॥ ३९ ॥
फलैरम्यैरक्तपद्मैर्जुहुयाद्द यो दिनत्रयम् ।
तस्य विप्रादयो वर्णा वश्याः स्युर्मासमध्यतः ॥ ४० ॥
रविमण्डलमध्यस्थां देवीं ध्यायन् जपेन्मनुम् ।
अष्टोत्तरशतं तावत् हुत्वाग्नौ वशयेज्जगत् ॥ ४१ ॥

---

सुदुघे वा एषां युग्मस्य युग्मस्तु दु दु घे घे वा वा हरवल्लभा क्लीं स्वरूपं शेपम् ॥ ३२ ॥

अजो ब्रह्मा ॥ ३३ ॥

षड़ङ्गमाह चतुर्दशेति । दीर्घषट्कयुक्तैश्चतुर्दशाद्यक्षरैः षड़ङ्गम् ॥ ३४ ॥३५॥

ध्यानमाह गीर्वाणेति । गीर्वाणा देवास्तत्समूहैः पूजितं पादपद्मं यस्याः अङ्कुशं दधे ॥ ३६—४१ ॥

नभो हंसानलयुतमैकारस्थं शशाङ्कयुक् ।
तोयं वायूग्निकर्णेन्दुयुतं राजमुखीति च ॥ ४२ ॥
राजाधिमुखि वश्यान्ते मुखि मायारमात्मभूः ।
देवि देवि महादेवि देवाधिदेवि सर्व च ॥ ४३ ॥
जनस्य च मुखं पश्चान्मम वशङ्कुरु द्वयम् ।
वह्निप्रियान्तो मन्त्रोऽष्टचत्वारिंशल्लिपिर्मतः ॥ ४४ ॥
ऋषिश्छन्दो देवतास्तु पूर्ववत् परिकीर्त्तिताः ।
हृदेकादशभिः प्रोक्तं शिरः स्यात् सर्ववर्णकैः ॥ ४५ ॥
शिखावर्मापिवेदार्णैः पञ्चभिर्नेत्रमीरितम् ।
अस्त्रं सप्तदशार्णैः स्यात् ध्यानजप्यादि पूर्ववत् ॥ ४६ ॥
अङ्गमन्त्रास्तु दीर्घाढ्यभुवनेशीपरा मता ।
एवं सिद्धमनुर्मन्त्री प्रयोगान् कर्त्तुमर्हति ॥ ४७ ॥
कुर्य्यात् सर्वजनस्थाने मनोः साध्याभिधानकम् ।
जपे होमे तर्पणे च वशीकरणकर्मणि ॥ ४८ ॥
ससम्पातं घृतं हुत्वा सहस्रं सप्तवासरम् ।
सम्पाताज्यन्तु साध्यस्य प्राशितं वश्यकारकम् ॥ ४९ ॥
साध्यनक्षत्रवृक्षेण कुर्य्यात् साध्याकृतिं शुभाम् ।
तस्यामसून् प्रतिष्ठाप्य प्राङ्गणे निखनेच्च ताम् ॥ ५० ॥

---

गौर्य्यां मन्त्रान्तरमाह नभ इति। नभो हकारः कीदृक् नभः हंसानलयुतं हंसः सः अनलो रः ताभ्यां युतं ऐस्थं विन्दुयुतं तेन ह्सैं तोयं वः कीदृक् वायुर्यः अग्नी रः कर्णं ऊः इन्दुर्विन्दुः तैर्युतं व्र्यूं स्वरूपमन्यत्। माया ह्रीं रमा श्रीं आत्मभूः क्लीं अन्यत् स्वरूपम्। वह्निप्रिया स्वाहा ॥ ४२—४६ ॥

अङ्गमन्त्रं षट्दीर्घयुक् मायाबीजं परं येषां ईदृशाः ॥ ४७ ॥

मनोर्मन्त्रस्य सर्वजनस्थाने सर्वजनस्थानेति पदस्थाने साध्याभिधानकं साध्यनामोच्चरेत् देवदत्तस्य मुखमित्यादि ॥ ४८ ॥ ४९ ॥

प्रयोगान्तरमाह साध्यनक्षत्रेति। साध्यस्य यन्नक्षत्रं जन्मनक्षत्रं तत्सम्बन्धी

तत्रानलं समाधाय रक्तचन्दनसंयुतैः ।
जवापुष्पैर्निशीथिन्यां जुहुयात् सप्तवासरम् ॥ ५१ ॥
सहस्रं प्रत्यहं पश्चात् तां निष्काश्य सरित्तटे ।
निखनेत् साधकस्तस्य साध्यो दासो भवेद्ध्रुवम् ॥
ज्येष्ठलक्ष्मीमहामन्त्रः प्रोच्यते धनवृद्धिदः ।
वाग्बीजं भुवनेशानी श्रीरनन्तोऽद्य लक्ष्मि च ॥ ५३ ॥
स्वयम्भुवे शम्भुजाया ज्येष्ठायै हृदयान्तिमः ।
मनुः सप्तदशार्णोऽयं मुनिर्ब्रह्मास्य कीर्त्तितः ॥ ५४ ॥
छन्दोष्णिक् ज्येष्ठलक्ष्मीस्तु देवता शक्तिबीजके ।
श्रीमाये मूलतो हस्तौ प्रमृज्याङ्गं समाचरेत् ॥ ५५ ॥
रामवेदयुगैकत्रिनेत्रार्णैर्मनुसम्भवैः ।
पदानामष्टकं न्यस्येच्छिरोभ्रूमध्यवक्त्रके ॥ ५६ ॥
हृन्नाभ्याधारके जानुपादयोस्तत् पदोन्मितिः ।
भूचन्द्रैकचतुर्वेदभूमिरामाक्षिवर्णकैः ॥ ५७ ॥

---

हचस्तेन साध्याकृतिं साध्यप्रतिमां कुर्य्यात् तत्र प्राणान् प्रतिष्ठाप्य तामङ्गने खनित्वा तदुपर्य्यग्निं निधाय रक्तचन्दनाक्तैर्जवापुष्पैः सहस्रं हुत्वा तां निष्काश्य नदीतटे निखनेत् स दासः स्यात् नचवृचा यथा

कारस्करोऽथ धात्री स्यादुडुम्बरतरुः पुनः ।
जम्बुखादिरकृष्णाख्यौ वंशपिप्पलसंज्ञकौ ।
नागरोहिणनामानौ पलाशप्लचसंज्ञकौ ।
अम्बष्ठबिल्वार्जुनाख्यविकङ्कतमहीरुहाः ।
वकुलः सरलः सर्जो वञ्जुलः पनसार्कजौ ।
शमीकदम्बनिम्बाम्रमधूका ऋचशाखिनः इति ॥ ५०—५२ ॥

शारदोक्ता ज्येष्ठलक्ष्मीमन्त्रमाह वागिति । वाग्बीजं ऐं भुवनेशानीं ह्रीं श्रीः श्रीं अनन्त आद्यलक्ष्मी ॥ ५३ ॥

स्वयम्भुवे स्वरूपं शम्भुजाया ह्रीं ज्येष्ठायै स्वरूपं हृदयं नमः ॥ ५४ ॥

श्रीं शक्तिः ह्रीं बीजं पदोन्मितिः पदवर्णसंख्या भूरित्यादिवर्णैर्ज्ञेया ॥५५—५७

उद्यद्भास्करसन्निभा स्मितमुखी रक्ताम्बरालेपना
सत्कुम्भं धनभाजनं सृणिमथो पाशङ्करैर्बिभ्रती ।
पद्मस्था कमलेक्षणा दृढ़कुचा सौन्दर्य्यवारां निधिः
ध्यातव्या सकलाभिलाषफलदा श्रीज्येष्ठलक्ष्मीरियम् ॥५८॥
लक्षं जपेत् पायसेन जुहुयात्तद्दशांशतः ।
आज्याक्तेन जपेत् पीठे वक्ष्यमाणे महाश्रियम् ॥ ५९ ॥
लोहिताक्षी विरूपा च कराली नीललोहिता ।
समदा वारुणी पुष्टिरमोघा विश्वमोहिनी ॥ ६० ॥
तत्पीठशक्तयः प्रोक्ता दिक्षुमध्ये च ता यजेत् ।
प्रयच्छेदासनं तस्यै गायत्र्या वक्ष्यमाणया ॥ ६१ ॥
प्रणवो रक्तज्येष्ठायै विद्महे पदमन्ततः ।
नीलज्येष्ठापदं पश्चात् यै धीमहि ततः पदम् ॥ ६२ ॥
तन्नो लक्ष्मीः पदं प्रोच्य चोदयादिति चोच्चरेत् ।
गायत्र्येषा समाख्याता केशरेष्वङ्गपूजनम् ॥ ६३ ॥
मातरः पत्रमध्येषु वाह्ये लोकेशहेतयः ।
इत्थं जपादिभिः सिद्धो मनुर्दद्यादभीप्सितम् ॥ ६४ ॥
अथान्नदामनोर्वक्ष्ये साधनं यः पुरोहितः ।
अन्नपूर्णावृतौ भूमिश्रीयागे द्विषमाक्षरः ॥ ६५ ॥
तारभूश्रीपुटो जप्यो मुनिरस्य चतुर्मुखः ।
छन्दोऽनिवृतिराख्यातं देवते वसुधाश्रियौ ॥ ६६ ॥

---

ध्यानमाह उद्यदिति । धनपात्राङ्कुशौ दक्षिणे कुम्भपाशौ वामयोः ॥५८—५९॥
पीठशक्तीराह लोहिताक्षेति ॥ ६०—६१ ॥

गायत्रीमाह प्रणव इति स्पष्टम् लोकेशा इन्द्रादयः हेतयो वज्राद्याः ॥ ६२—६४ ॥

अन्नदामन्त्रमाह अथेति । यो मन्त्रः अन्नपूर्णावरणपूजने भूमिश्रियोः पूजने क्रियमाणयोः द्वात्रिंशदक्षरः पुरा कथितः सोऽन्नदो मनुः अन्नं मह्यं मे देह्यन्नाधि-

भूवीजं वीजमस्योक्तं श्रीवीजं शक्तिरीरिता ।
अन्नं मह्यीति हृदयमन्नं मे देहि मस्तकम् ॥ ६७ ॥
शिखाल्वन्नाधिपतये ममान्नञ्च प्रदापय ।
वर्मोक्तं स्वाहया चास्त्रमङ्गमन्त्रा भुवादिकाः ॥ ६८ ॥
षट्दीर्घोरूढ़भूमिश्रीवीजान्ताः परिकीर्त्तिताः ।
विनेत्रा अथ दुग्धाब्धौ वर्णद्वीपे तु ते स्मरेत् ॥ ६९ ॥
कल्पद्रुमाधो मणिवेदिकायां समास्थिते वस्त्रविभूषणाढ्ये ।
भूमिश्रियौ वाञ्छितवामदच्चे सञ्चिन्तयेद्देवमुनीन्द्रवन्द्ये ॥७०॥
लक्षमेकं जपेन्मन्त्रं तद्दशांशं घृतप्लुतैः ।
अन्नैर्हुत्वा यजेत् पीठे वैष्णवे वसुधाश्रियौ ॥ ७१ ॥
विमलोत्कर्षिणी ज्ञाना क्रियायोगाभिधा तथा ।
प्रह्वी सत्या तथेशानानुग्रहा पीठशक्तयः ॥ ७२ ॥
तारं नमो भगवते विष्णवे सर्ववर्णकाः ।
भूतात्मसंयोगपदं योगपद्मपदं ततः ॥ ७३ ॥
पीठात्मने नमोऽन्तोऽयं पीठस्य मनुरीरितः ।
दद्यादासनमेतेन मूलेनावाहनादिकम् ॥ ७४ ॥
अङ्गानीष्ट्वार्चयेद्दिक्षु भूवह्निजलमारुतान् ।
निवृत्तिञ्च प्रतिष्ठाञ्च विद्यां शान्तिं विदिक्षु च ॥ ७५ ॥
अष्टशक्तीर्वलाका च विमला कमला तथा ।

---

पतये ममान्नं प्रदापय स्वाहेति च .प्रणवभूवीजश्रीवीजसंपुटोऽष्टाविंशतिवर्णः ॥ ६५—६६ ॥

षडङ्गमाह अन्नं मह्यीति । षडङ्गमन्त्रा भुवादिकाः प्रणवाद्याः दीर्घयुक्ते भूश्रीवीजे अन्ते येषां ते विनेत्रा नेत्रहीनाः पञ्चैव पञ्चाङ्गानि मनोर्यत्र तत्र नैव-मनुन्त्यर्णादित्युक्तेः पीं अन्नं मह्यि ग्लां श्रीं हृत् भीं अन्नं देहि ग्लीं श्रीं शिर इत्यादि ॥ ६७—७१ ॥

वैष्णवीपीठशक्तिराह विमलेति ॥ ७२ ॥

वनमाला विभीषा च मालिका शङ्करी पुनः ॥ ७६ ॥
पूर्वादिदिक्षु प्रयजेदष्टमीं वसुमालिकाम् ।
शक्त्याद्यानायुधैर्युक्तान् स्वस्वदिक्षु समर्चयेत् ॥ ७७ ॥
इत्थं सपरिवारो यो धरालक्ष्म्योर्जपादिभिः ।
आराधयेत् स लभते महतीमन्नसम्पदम् ॥ ७८ ॥
आज्याक्तैश्च तिलैर्विल्वसमिद्भिर्जुहुयाच्छ्रिये ।
साज्येन पायसेनापि फलैः पत्रैश्च विल्वजैः ॥ ७९ ॥
जपित्वामुं महामन्त्रं होमः कार्य्यो दिने दिने ।
दशसंख्यैः कुवेरस्य मनुनैधैर्वटोद्भवैः ॥ ८० ॥
तारो वैश्रवणायाग्निप्रियान्तोऽष्टाक्षरो मनुः ।
होमकाले कुवेरन्तु चिन्तयेदग्निमध्यगम् ॥ ८१ ॥
धनपूर्णं स्वर्णकुम्भं तथा रत्नकरण्डकम् ॥ ८२ ॥
हस्ताभ्यां विभ्रतं खर्वकरपादञ्च तुन्दिलम् ।
वटाधस्ताद्रत्नपीठोपविष्टं सुस्मिताननम् ॥ ८३ ॥
एवं ह्यतहुतो मन्त्री लक्ष्म्या जपति वित्तपम् ।
अथ प्रत्यङ्गिरां वक्ष्ये परकृत्याविमर्दिनीम् ॥ ८४ ॥
दीर्घेन्दुयुक् मरुत् ब्रह्मा मांसं लोहितसंस्थितम् ।
यन्तिनोरय उच्चार्य क्रूरां कृत्यां समुच्चरेत् ॥ ८५ ॥
वधूमिव पदं पश्चात्तां ब्रह्मान्ते सदीर्घणः।

---

पीठमन्त्रमाह तारमिति । ॐ नमो भगवते विष्णवे सर्वभूतात्मसंयोगी पद्मपीठात्मने नमः ॥ ७३—७४ ॥

इध्मैः समिद्भिः ॥ ७५—८० ॥

कुवेरमन्त्रमाह तार इति । तार ॐ अग्निप्रिया स्वाहा ॥ ८१ ॥

कुवेरध्यानमाह धनेति । रत्नकरण्डी दधे ॥ ८२—८४ ॥

प्रत्यङ्गिरामाह दीर्घेति । मरुत् यकारः दीर्घेन्दुयुक् आविन्दुयुतः यां ब्रह्मा

अपनिर्णुद्भ इत्यन्ते प्रत्यक्कर्त्तारमृच्छतु ॥ ८६ ॥
तार मायापुटो मन्त्रः स्यात् सप्तत्रिंशदक्षरः ।
ब्रह्मानुष्टुप् मुनिः छन्दो देवो प्रत्यङ्गिरेरिता ॥ ८७ ॥
वीजशक्ती तारमाये कृत्यानाशे नियोजनम् ।
अष्टभिस्तोयनिधिभिः युगैर्वेदैश्च पञ्चभिः ॥ ८८ ॥
वसुभिर्मन्त्रजैर्वर्णैर्दीर्घयुक्पार्वतीपरैः ।
प्रणवाद्यैः षड़ङ्गानि कल्पयेज्जातिसंयुतैः ॥ ८९ ॥
शिरोभ्रूमध्यवक्त्रेषु कण्ठे बांहुहृये हृदि ।
नाभावूर्वोर्जानुनोश्च पदानि पदयोर्न्यसेत् ॥ ९० ॥
चतुर्दशक्रमान्मन्त्रो तारमायापुटान्यपि ।

आशाम्बरा मुक्तकचा घनच्छवि-
र्ध्येया सचर्मासिकराहिभूषणा ।
दंष्ट्रोग्रवक्त्राग्रसिताहितान्वया
प्रत्यङ्गिरा शङ्करतेजसेरिता ॥ ९१ ॥

ध्यायन्नेवं जपेन्मन्त्रमयुतं तद्दशांशतः ।
अपामार्गैश्च राज्याज्यहविर्भिर्जुहुयात्ततः ॥ ९२ ॥
अन्नपूर्णासने चार्चेदङ्गलोकेश्वरायुधः ।

---

क्षः लोहितः पः तत्संस्थं मांसं चः लयन्ति नीरयः कूरां कृत्यां वधूमिव तां ब्रह्म-स्वरूपम् सदीर्घो णः या श्रीकण्ठः अपनिर्णुशेति स्वरूपम् मन्त्रेणाकारेण सन्धिः प्रत्यक्कर्त्तारमृच्छतु स्वरूपम् प्रणव मायावीजसंपुटः ॥ ८५—८७ ॥

षड़ङ्गमाह अष्टभिरिति । तोयनिधिभिश्चतुर्भिः दीर्घयुक् पार्वती माया-वीजं परं येषां प्रणव आद्यो येषां जातयो हृदयाय नम इत्यादयस्तत् संयुतै-रष्टादिवर्णैः षड़ङ्गम् ॥ ८८ ॥ ८९ ॥

पदन्यासमाह शिर इति । प्रणवमायासंपुटानि चतुर्दशपदानि शिर आदिषु न्यसेत् तेषां वर्णसंख्या क्रमात् एकचतुरेकत्रि द्वि द्वि द्विर्येकत्रिपञ्चद्विचिवर्णैर्वोध्या ओं क्रीं यां क्रीं शिरसीत्यादि ॥ ९० ॥

एवं सिद्धं मनुर्मन्त्री प्रयोगेषु शतं जपेत् ॥ ९३ ॥
जुहुयाच्च शतं दिक्षु दशमन्त्रैर्हरेद्बलिम् ।
यो मे पूर्वगतः पाप्मा पापकेनेह कर्मणा ॥ ९४ ॥
इन्द्रस्त्वं देव उच्चार्य्य राजान्ते भञ्जयत्विति ।
भञ्जयत्विति चोच्चार्य्य मोहयत्विति चोच्चरेत् ॥ ९५ ॥
नाशयतु पदं पश्चान्मारयत्वित्यतो बलिम् ।
तस्मै प्रयच्छतु कृतं ममान्ते च शिवं मम ॥ ९६ ॥
शान्तिः स्वस्त्ययनञ्चास्तु बलिमन्त्र उदाहृतः ।
प्रणवाद्यष्टषष्ठ्यर्णस्तेनैव वितरेद्बलिम् ॥ ९७ ॥
अस्मिन् मन्त्रे पूर्वपदस्थानेऽग्न्यादिपदं वदेत् ।
अग्निरित्यादि च पठेदिन्द्र इत्यादिके स्थले ॥ ९८ ॥
एवं तु दशमन्त्राः स्युस्तैस्तत्तद्दिग्बलिं हरेत् ।
इत्थं कृते शत्रुकृता कृत्या क्षिप्रं विनश्यति ॥ ९९ ॥
अथ प्रत्यङ्गिरामालामन्त्रसिद्धः प्रकीर्त्त्यते ।
तारो माया नमः कृष्णवाससे शतवर्णकाः ॥ १०० ॥
सहस्रहिंसिनि पदं सहस्रवदने पुनः ।

---

ध्यानमाह आशेति । आशाम्बरा नग्ना घनच्छविर्मेघश्यामा यस्तिती अहितानां रिपूणामन्वयो वंशो यया असि दक्षिणे ॥ ९०—९३ ॥

बलिमन्त्रमाह यो इति । ओं यो मे पूर्वगतः पाप्मा पापकेनेह कर्मणा इन्द्रस्त्वं देवराजो भञ्जयतु भञ्जयतु मोहयतु नाशयतु मारयतु बलिं तस्मै प्रयच्छतु कृतं मम शिवं मम शान्तिः स्वस्त्ययनञ्चास्तु इति बलिमन्त्रः अनेन प्राच्यां बलिं दद्यात् ॥ ९४—९७ ॥

अस्मिन् मन्त्रे पूर्वेत्यस्य स्थाने अग्न्यादिपदम् इन्द्र इत्यस्य स्थाने अग्निरित्यादि देवराज इत्यत्र तेजोराज इत्यादि जहान् कृत्वा दशमन्त्रविधियाक्तैस्तस्यां तस्यां दिशि बलिं दद्यात् यथा यो मेऽग्निगतः पाप्मा पापकेनेह कर्मणा अग्निस्त्वं तेजोराजो भञ्जयत्वित्यादि यो मे दक्षिणगतः यमस्त्वं प्रेतराजः इत्यादि ॥ ९८ ॥ ९९ ॥

महाबले पदं पश्चादुच्चरेदपराजिते ॥ १०१ ॥
प्रत्यङ्गिरे परसैन्यपरकर्मसटङ्क् जलम्।
ध्वंसिनि परमन्त्रोत्सादिनि सर्वपदं ततः ॥ १०२ ॥
भूतान्ते दमनिप्रान्ते सर्वदेवान् समुच्चरेत्।
बन्धयुग्मं सर्वविद्याश्छिन्धियुक् चोभय द्वयम् ॥ १०३ ॥
परयन्त्राणि सञ्चोर्च्य स्फोटय द्वितयं पठेत्।
सर्वान्ते शृङ्खला उक्ता त्रोटय द्वितयं ज्वलत् ॥ १०४ ॥
ज्वालाजिह्वे करालान्ते वदने प्रत्यमुच्चरेत्।
गिरे माया नमोऽन्तोऽयं शरसूर्य्याचरो मनुः ॥ १०५ ॥
ऋष्यादिकं पूर्वमुक्तं मायया स्यात् षड़ङ्गकम्।
ध्यायेत् प्रत्यङ्गिरां देवीं सर्वशत्रुविनाशिनीम् ॥ १०६ ॥
सिंहारूढ़ातिकृष्णा त्रिभुवनभयकृद्रूपमुग्रं वहन्ती
ज्वालावक्त्रा वसाना नववसनयुगं नीलमण्यासकान्तिः।
शूलं खड्गं वहन्ती निजकरयुगले भक्तरक्षैकदक्षा
सेयं प्रत्यङ्गिरा सङ्क्षयतु रिपुभिर्निर्मितं वोऽभिचारम् ॥१०७॥
अयुतं प्रजपेन्मन्त्रं सहस्रं तिलराजिका।
हुत्वा सिद्धमनुं मन्त्रं प्रयोगेषु शतं जपेत् ॥ १०८ ॥
ग्रहभूतादिकाविष्टं सिञ्चेन्मन्त्रं जपन् जलैः।
विनाशयेत् परकृतं यन्त्रमन्त्रादिकर्मणाम् ॥ १०९ ॥

---

प्रत्यङ्गिरामालामन्त्रमाह तार इति। तारः प्रणवः माया ह्रीं खेटक् जलं द्युतो वः वि शरसूर्य्याचरः पञ्चविंशत्यधिकशतार्णः ओं ह्रीं नमः कृष्णवाससे शतसहस्रहिंसिनि सहस्रवदने महाबले अपराजिते प्रत्यङ्गिरे परसैन्यपरकर्मविध्वंसिनि परमन्त्रोत्सादिनि सर्वभूतदमनि सर्वदेवान् बन्ध बन्ध सर्वविद्याः छिन्धि छिन्धि चोभय चोभय परयन्त्राणि स्फोटय स्फोटय सर्वशृङ्खलास्त्रोटय त्रोटय ज्वलज्ज्वालाजिह्वे करालवदने प्रत्यङ्गिरे ह्रीं नम इति ॥ १००—१०६ ॥

ध्यानमाह सिंहेति। खड्गी दक्षिणे ॥ १०७—१०९ ॥

मन्त्रं विरोधिशमकं प्रवक्ष्ये षोड़शाक्षरम्।
प्रणवः केशवः सेन्दुर्वर्गाद्याः पञ्च सेन्दवः॥ ११०॥
वियच्चन्द्रान्वितं रान्त सद्योजातः शशाङ्कयुक्।
माया त्रिकर्णचन्द्राढ्यो भृगुः सर्गी सवर्म फट्॥ १११॥
स्वाहान्तः षोड़शार्णोऽयं मन्त्रः शत्रुविनाशनः।
विधातोष्णिक् ऋषिश्छन्दः पर्वताब्ध्यग्निवायवः॥११२॥
धराकाशौ महापूर्वा देवताः परिकीर्त्तिताः।
दुं वीजं पार्वती शक्तिर्माययया तु षड़ङ्गकम्॥ ११३॥
नानारत्नार्चिषाक्रान्तं वृक्षाम्भःस्रवणैर्युतम्।
व्याघ्रादिपशुभिर्व्याप्तं सानुयुक्तं गिरिं स्मरेत्॥ ११४॥
मत्स्यकूर्मादिवीजाढ्यं नवरत्नसमन्वितम्।
घनच्छायं सकल्लोलमकूपारं विचिन्तयेत्॥ ११५॥
ज्वालावतीसमाक्रान्तजगत्त्रितयसङ्कुलम्।
पीतवर्णमहावह्निं संस्मरेच्छत्रुशान्तये॥ ११६॥
धरासमुद्भरे चैवामलिनं रुद्रभूदिवम्।
पवनं संस्मरेद्विश्वजीवनं प्राणरूपतः॥ ११७॥
नदीपर्वतवृक्षादिकलिता ग्रामसङ्कुला।
आधारभूता जगतो ध्येया पृथ्वीह मन्त्रिणा॥ ११८॥
सूर्यादिग्रहनक्षत्रकालचक्रसमन्वितम्।

---

शत्रुनाशकमन्त्रमाह प्रणव इति। प्रणवः ओं सेन्दुः केशव षं सेन्दवः पञ्चवर्गाद्याः कं चं टं तं पं चन्द्रान्वितं वियत् हं रान्तं लः सद्योजातः ओं शशाङ्को विन्दुस्ताभ्यां युक्तः लो माया ह्रीं कर्णचन्द्राढ्यः उविन्दुयुतोऽग्निर्दुं: दु सर्गी भृगुः सः वर्म हुं फट् स्वाहा स्वरूपम् विधाता ब्रह्मा महापूर्वाः पर्वतादयः महापर्वतमहासमुद्रमहाग्निमहावायुमहापृथ्वीमहाकाशाः षट्देवताः पार्वतीं ह्रीं मायादीर्घान्वया षड़ङ्गं क्रमेण॥ ११०—११३॥

ध्यानान्याह नानेति। अकूपारं समुद्रम्॥ ११४—११६॥

निर्मलं गगनं ध्यायेत् प्राणिनामाश्रयप्रदम् ॥ ११९ ॥
एवं षट्देवतां ध्यात्वा सहस्राणि तु षोड़श ।
जपेन्मन्त्रं दशांशेन षट्द्रव्यैर्होममाचरेत् ॥ १२० ॥
व्रीहयस्तण्डुला आज्यं सर्षपाश्च यवास्तिलाः ।
एतैर्हुत्वा यथाभागं पीठे पूर्वोदिते यजेत् ॥ १२१ ॥
अङ्गदिक्पालवज्राद्यैरेवं सिद्धो भवेन्मनुः ।
शत्रूपद्रवमापन्नो युञ्ज्यात्तन्नष्टयेमनुम् ॥ १२२ ॥
अकारं पर्वताकारं धावन्तं शत्रुसम्मुखम् ।
पतनोन्मुखमत्युग्रं प्राच्यां दिशि विचिन्तयेत् ॥ १२३ ॥
ककारं क्षुब्धकल्लोलं प्लाविताखिलभूतलम् ।
समुद्ररूपिणं भीमं प्रतीच्यां दिशि संस्मरेत् ॥ १२४ ॥
वर्णं तदग्रिमं ज्वालासङ्घव्याप्तनभस्तलम् ।
याम्ये क्षतजगद्दाहं स्मरेत् प्रलयपावकम् ॥ १२५ ॥
तृतीयवर्गप्रथमं प्रकम्पितजगत्त्रयम् ।
युगान्तपवनाकारमुत्तरस्यां दिशि स्मरेत् ॥ १२६ ॥
तुरीयपञ्चमाद्यार्णौ पृथ्वीगगनरूपिणौ ।
शत्रुवर्गं बाधमानौ चिन्तयेन्नियतात्मवान् ॥ १२७ ॥
तदग्रिमं वर्णयुगं शत्रोर्निःश्वासपद्धतिम् ।
निरुन्धानं स्मरेन्मन्त्री विदधद्रिपुमाकुलम् ॥ १२८ ॥

---

१ प्राणरूपेण विश्वं जीवयतीति विश्वजीवनम् ॥ ११७—१२० ॥
यथाभागं सप्तषष्ट्यधिकं शतद्वयं प्रत्येकम् ॥ १२१ ॥ १२२ ॥
प्रयोगमाह भकारमिति ॥ १२३ ॥ १२४ ॥
क्षत आरब्धो जगद्दाहो येन संक्षतेति वा पाठः ॥ १२५ ॥
तृतीयेति । टं ॥ १२६ ॥
तुरीयेति चतुर्थपञ्चमवर्गयोरादिमार्णौ तपम् ॥ १२७ ॥
तदग्रिमम् वर्णयुगं दयम् ढं णमिति ॥ १२८ ॥

मायादिवर्णत्रितयं शत्रोर्नेत्रश्रुतीसुखम् ।
प्रत्येकन्तु निरुन्धानं चिन्तयेत् साधकोत्तमः ॥ १२९ ॥
वर्मसंक्षोभितन्त्वस्त्रं रिपोराधारदेशतः ।
उत्थाप्य वह्निं तद्देहं प्रदहन् समनुस्मरेत् ॥ १३० ॥
एवं वर्णान् स्मरन्मन्त्रं जपेन्मन्त्री सहस्रकम् ।
मण्डलत्रितयादर्वाक् मारयत्येव विद्विषम् ॥ १३१ ॥
एवं यः कुरुते कर्म प्राणायामजपादिभिः ।
संशोधयित्वा स्वात्मानं स्वरक्षायै हरिं स्मरेत् ॥ १३२ ॥

इति श्रीमन्त्रमहोदधौ अन्नपूर्णादिमन्त्रप्रकाशनं
नाम नवमस्तरङ्गः ।

---

## दशमस्तरङ्गः ।

अथ प्रवक्ष्ये शत्रूणां स्तम्भिनी वगलामुखी ।
प्रणवो गगनं पृथ्वी शान्तिविन्दुयुतं वगम् ॥ १ ॥

---

मायादिवर्णत्रितयं ह्रीं क्लूं स इति ॥ १२९ ॥

वर्मणा हुङ्कारेण क्षोभितमस्त्रं फट्कारं रिपोराधारादग्निमुत्थाप्य रिपुदेहं दहन्तं स्मरेत् ॥ १३० ॥

मण्डलमेकोनपञ्चाशद्दिनानि ॥ १३१ ॥

मारणं कुर्वतः प्रायश्चित्तमाह एवमिति ॥ १३२ ॥

इति नौकासमाख्यायां मन्त्रमहोदधिटीकायामन्नपूर्णादिनिरूपणं
नाम नवमस्तरङ्गः ।

---

वगलामुखीमाह प्रणव इति । गगनं हः पृथ्वी लः शान्तिः ईविन्दुश्च तैर्युतं

लामु साचो गदी सर्वदुष्टानां वा ह्लीन्दुयुक्।
मुखं पदं स्तम्भयान्ते जिह्वां,कीलयवर्णकाः ॥ २ ॥
वुद्धिं विनाशयान्ते तु वीजं तारोऽग्निसुन्दरी।
षट्त्रिंशदक्षरो मन्त्रो नारदो मुनिरस्य तु ॥ ३ ॥
छन्दोऽपि वृहतीशेषं देवता वगलामुखी।
नेत्राक्षसायकनवपक्षकाष्टाभिरङ्गके ॥ ४ ॥
सौवर्णासनसंस्थितां त्रिनयनां पीतांशुकोल्लासिनीम्।
हेमाभाङ्गरुचिं शशाङ्कमुकुटां सच्चम्पकस्रग्युताम्।
हस्तैर्मुद्गरपाशवज्ररसनाः संबिभ्रतीं भूषण-
व्याप्ताङ्गीं वगलामुखीं त्रिजगतां संस्तम्भिनीं चिन्तयेत् ॥५॥
एवं ध्यात्वा जपेल्लक्षमयुतं चम्पकोद्भवैः।
कुसुमैर्जुहुयात् पीठे पूर्वोक्ते पूजयेदिमाम् ॥ ६ ॥
चन्दनागुरुचन्द्राद्यैः पूजार्थं यन्त्रमालिखेत्।
त्रिकोणषड्दलाष्टास्रषोड़शारधरापुरम् ॥ ७ ॥
मध्ये सम्पूजयेद्देवीं कोणे सत्तादिकान् गुणान्।
षट्कोणेषु षड़ङ्गानि मातृभैरवसंयुताः ॥ ८ ॥
सम्पूज्याष्टदले पद्मे षोड़शारे यजेदिमाः।
मङ्गला स्तम्भिनी चैव जम्भिनी मोहिनी तथा ॥ ९ ॥
वश्या वला च लाका च भूधरा कल्मषाभिधा।
धात्री च कलना कालकर्षिणी भ्रामिकापि च ॥ १० ॥
मन्दगमना भोगस्था भाविका षोड़शी स्मृता।

---

ह्लीं वगालु स्वरूपं गदी खः साच ध्युतः खि सर्वदुष्टानां वा स्वरूपं इन्दुयुक् ह्लीं
पं मुखं पदमित्यादिस्वरूपं वीजं ह्लीं तार ओं अग्निसुन्दरी स्वाहा ॥ १—३ ॥
षड़ङ्गमाह नेत्रेति। षचाचि ॥ ४ ॥
पद्मध्यानमाह सौवर्णेति। मुद्गरवज्रौ दक्षयोः पाशरिपुजिह्वे वामयोः ॥५—७॥

भूगृहस्य चतुर्दिक्षु पूर्वादिषु यजेत् क्रमात् ॥ ११ ॥
गणेशं वटुकञ्चापि योगिनीं क्षेत्रपालकम् ।
इन्द्रादींश्च ततो बाह्ये निजायुधसमन्वितान् ॥ १२ ॥
इत्थं सिद्धमनुर्मन्त्री स्तम्भयेद्देवतादिकान् ।
पीतवस्त्रस्तदासीनं पीतमाल्यानुलेपनः ॥ १३ ॥
पीतपुष्पैर्यजेद्देवीं हरिद्रोत्थस्रजा जपन् ।
पीतां ध्यायन् भगवतीं प्रयोगेष्वयुतं जपेत् ॥ १४ ॥
त्रिमध्वक्तैस्तिलैर्होमो नृणां वश्यकरो मतः ।
मधुरत्रितयाक्तैः स्यादाकर्षो लवणैर्ध्रुवम् ॥ १५ ॥
तैलाभ्यक्तैर्निम्बपत्रैर्होमो विद्वेषकारकः ।
ताललोणहरिद्राभिर्द्विषां संस्तम्भनं भवेत् ॥ १६ ॥
अङ्गारधूमं राजीश्च माहिषं गुग्गुलं निशि ।
श्मशानपावके हुत्वा नाशयेदचिरादरीन् ॥ १७ ॥
गतो गृध्रकाकानां कटुतैलं विभीतकम् ।
गृहधूमं चितावह्नौ हुत्वा प्रोच्चाटयेद्रिपून् ॥ १८ ॥
दूर्वागुडूचीलाजांश्च मधुरत्रितयान्वितान् ।
जुहोति सोऽखिलान् रोगान् शमयेद्दर्शनादपि ॥ १९ ॥
पर्वताग्रे महारण्ये नदीसङ्गे शिवालये ।
ब्रह्मचर्यरतो लक्षं जपेदखिलसिद्धये ॥ २० ॥
एकवर्णगवीदुग्धं शर्करामधुसंयुतम् ।
त्रिशतं मन्त्रितं पीतं हन्याद्विषपराभवम् ॥ २१ ॥
क्षेत्रपालाशकाष्ठेन रचिते रम्यपादुके ।
अलक्तरञ्जिते लक्षं मन्त्रयेत् मनुना मुना ॥ २२ ॥
तदारूढः पुमान् गच्छेत् क्षणेन शतयोजनम् ।

---

भैरवसंयुता मातृरष्टदले संपूज्य षोडशदले इमा मङ्गलाद्या यजेत् ॥८–१०॥

पारदञ्च शिलां तालं पिष्टं मधुसमन्वितम् ॥ २३ ॥
मनुना मन्त्रयेत्तच्च लिपेत्तेनाऽखिलां तनुम्।
अदृश्यः स्यात् नृणामेष आश्चर्यं दृश्यतामिदम् ॥ २४ ॥
षट्कोणे विलिखेद्बीजं साध्यनामान्वितं मनोः।
हरितालनिशाचूर्णैरुन्मत्तरससंयुतैः ॥ २५ ॥
शेषाक्षरैः समा वीजं धरागृहविराजितम्।
तद्यन्त्रं स्थापितप्राणं पीतसूत्रेण वेष्टयेत् ॥ २६ ॥
भ्राम्यत्कुलालचक्रस्थां गृहीत्वा मृत्तिकान्तया।
रचयेत् वृषभं रम्यं यन्त्रं तन्मध्यतः क्षिपेत् ॥ २७ ॥
हरितालेन संलिप्य वृषं प्रत्यहमर्चयेत्।
स्तम्भयेद्विद्विषां वाचं गतिं कार्य्यपरम्पराम् ॥ २८ ॥
आदाय वामहस्तेन प्रेतभूमिस्थखर्परम्।
अङ्गारेण चितास्थेन तत्र यन्त्रं समालिखेत् ॥ २९ ॥
मन्त्रितं निहितं भूमौ रिपूणां स्तम्भयेद्गतिम्।
प्रेतवस्त्रे लिखेद्यन्त्रमङ्गारेण च तत् पुनः ॥ ३० ॥
मण्डूकवदने न्यस्येत् पीतवस्त्रेण वेष्टितम्।
पूजितं पीतपुष्पैस्तद्वाचं संस्तम्भयेद्द्विषाम् ॥ ३१ ॥
यद्भूमौ भविता दिव्यं तत्र यन्त्रं समालिखेत्।
मार्जितं तत् वृषापत्रैर्दिव्यस्तम्भनकृद्भवेत् ॥ ३२ ॥

---

गलत् पद्मम् ॥ १८—२४ ॥

यन्त्रमाह षट्कोण इति। धत्तूररसाक्तहरिद्राचूर्णेन षट्कोणेऽमुकं स्तम्भयेति वर्णयुतं ह्लीमिति बीजं विलिख्य मन्त्रशेषार्णैः संवेष्ट्योपरि चतुरस्रेण वेष्टितं पीतसूत्र-वीतं कृत्वा ॥ २५ ॥ २६ ॥

भ्रमत्कुम्भकारचक्रस्थमृदा रचितवृषोदरे प्रक्षिप्य ॥ २७ ॥

हरितालेन संलिप्य वृषं प्रत्यहं पूजयेत् स्तम्भनफलम् ॥ २८—३१ ॥

इन्द्रवारुणिकामूलं सप्तशो मनुमन्त्रितम् ।
क्षिप्तं जले दिव्यक्ताां जलस्तम्भनकारकम् ॥ ३३ ॥
किं भूरिणा साधकेन मन्त्रः सम्यगुपासितः ।
शत्रूणां गतिवुद्धयादेः स्तम्भनो नात्र संशयः ॥ ३४ ॥
उच्यते स्वप्नवाराही जनतावशकारिणी ।
वेदादिवीजं माया च हृद्दीर्घौ जलपावकौ ॥ ३५ ॥
खसट्टक् सद्ययुग्मेधा रे स्वप्नं सर्गिणौ चटौ ।
कृशानुवल्लभां तोयं मन्त्रः पञ्चदशाक्षरः ॥ ३६ ॥
ईश्वरो जगती स्वप्नवाराही मुनिपूर्वकाः ।
तारो वीजञ्च हृल्लेखा शक्तिः ठौ कीलकं मतम् ॥ ३७ ॥
द्विपञ्चनेत्रहस्ताक्षियुग्मार्णैरङ्गकं मनोः ।
पादलिङ्गकटीकण्ठगण्डाक्षिश्रुतिनासिके ॥ ३८ ॥
विन्यस्य मन्त्रजान् वर्णान् चिन्तयेत् परदेवताम् ।
मेघश्यामरुचिं मनोहरकुचां नेत्रत्रयोद्भासितां
कोलास्यां शशिशेखरा मचलया दंष्ट्रातले शोभिनीम् ।
बिभ्राणां स्वकराम्बुजैरसिलतां चर्मासिपाशं सृणिं
वाराहीमनुचिन्तये सुवाहनारूढ़ां शुभालङ्कृतिम् ॥ ३९ ॥
लक्षं जपेद्दशांशेन नीलपद्मैस्तिलैः शुभैः ।
जुहुयात् पूर्वसम्प्रोक्ते पीठे सम्पूजयेदिमाम् ॥ ४० ॥
त्रिकोणे तां समाराध्य षट्कोणेष्वङ्गदेवताः ।

---

रूपा षट्पदः ॥ ३२—३४ ॥

स्वप्नवाराहीमाह वेदादीति । वेदादि ओं माया ह्रीं हृत् नमः नमं वः पावकौ रः तौ दीर्घौ वारा सट्टक् खं हः हि मेधाः घः सद्ययुक् औयुतः घो रे स्वप्नं स्वप्नं सर्गिणौ ठौ ठः ठः कृशानुवल्लभा स्वाहा ॥ ३५—३७ ॥

वर्णन्यासमाह पादेति । लिङ्गे कण्ठे मूर्ध्नि एकैकः अन्यत्र द्वौ द्वौ ॥३८॥

षोड़शारे यजेत् शक्तीर्वक्ष्यमाणास्तु षोड़श ॥ ४१ ॥
उच्चाटनी तदीशी च शोषणी शोषणीश्वरी ।
मारणी मारणीशी च भीषणी भीषणीश्वरी ॥ ४२ ॥
त्रासनी त्रासनीशी च कम्पनी कम्पनीश्वरी ।
आज्ञाविवर्त्तिनी पश्चादाज्ञाविवर्त्तिनीश्वरी ॥ ४३ ॥
वस्तुजातेश्वरी वाथ सर्वसम्पादनीश्वरी ।
एताः पूज्याश्चतुर्थ्यन्ताः प्रणवाद्या नमोऽन्तिकाः ॥ ४४ ॥
यजेदष्टदले पद्मे मातृभैरवसंयुताः ।
लोकपालान् दशदले द्वितीये हेतिसंयुतान् ॥ ४५ ॥
एवं सिद्धमनुर्मन्त्री काम्यकर्मणि योजयेत् ।
तर्पयेन्नारिकेलोत्थैर्जलैस्तीर्थोद्भवैरपि ॥ ४६ ॥
आनयेत्तरुणीवर्गान् सर्वकामार्थसिद्धये ।
कृष्णपक्षेऽष्टमीघस्रभूताहे वा कृतव्रतः ॥ ४७ ॥
चतुष्पथान्नदीकूलद्वयात् कौलालवेश्मनः ।
मृदमानीय धर्त्तूररससंयुक्तया तया ॥ ४८ ॥
रचयेत् पुत्तलीं रम्यां साध्यासु स्थापनान्विताम् ।
ततः प्रेताम्बरं यन्त्रं नृकाकाजासृजा लिखेत् ॥ ४९ ॥
चिताङ्गारयुजा योनिं षट्कोणं भूपुरान्वितम् ।
तदन्तर्मन्त्रमालिख्य वेष्टयेन्मनुना सुना ॥ ५० ॥
साध्यमुच्चाटय युगं शोषय द्वितयं ततः ।
मारय द्वितयञ्चाथ भीषय द्वितयं ततः ॥ ५१ ॥

---

ध्यानमाह मेघेति । कोलास्या वराहवदना दंष्ट्रातले वर्त्तमानया सुधया शोभिता चसितताकुशी दधयोः ॥ ३९—४६ ॥

कृष्णपक्ष इत्यारभ्य वशगा भुवमित्यन्त एको वश्यार्थे प्रयोगः ॥ ४७ ॥ ४८ ॥

नृकाकाजानां नरवायसमेषाणामसृजा रुधिरेण ॥ ४९ ॥ ५० ॥

नाशय द्वितयं पश्चात् शिरः कम्पय युग्मकम् ।
ममाज्ञावर्त्तिनं पश्चात् कुरु सर्वाभिजार्णकाः ॥ ५२ ॥
तं वस्तुजातं शब्दान्ते सम्पादय युगन्ततः ।
सर्वं कुरुयुगं स्वाहा मुनिसप्ताचरो मनुः ॥ ५३ ॥
अनेन वेष्टितं यन्त्रं कृतं देवीप्रतिष्ठितम् ।
पुत्तल्या हृदि विन्यस्य यजेत्तामुक्तमार्गतः ॥ ५४ ॥
तदग्रे प्रजपेन्मन्त्रं रात्रावेकान्तमाश्रितः ।
सहस्रं साष्टकं भूयः पूजयेत्तां समाहितः ॥ ५५ ॥
एवं कृते नरा नार्य्यो राजानो राजवल्लभाः ।
सिंहा गजा मृगाः क्रूरा भवेयुर्वशगा ध्रुवम् ॥ ५६ ॥
चित्ते ध्यात्वा निजं कार्य्यं शयीत विजने व्रती ।
यथाभावि तथा देवी स्वप्ने वदति मन्त्रिणे ॥ ५७ ॥
अथैतस्या महायन्त्रं प्रवक्ष्ये सिद्धिदं नृणाम् ।
कृत्वा त्रिकोणं षट्कोणं षोड़शारवसुच्छदम् ॥ ५८ ॥
दशारद्वितयं पञ्चदशास्त्रं भूपूरद्वयम् ।
त्रिकोणे कामवीजस्थं वाग्भवं विलिखेत् पुनः ॥ ५९ ॥
षट्सु कोणेषु वाग्बीजं पाशं मायां सृणिं श्रियम् ।
दीर्घं च कवचं पश्चाद्विलिखेत् षोड़शच्छदे ॥ ६० ॥
शक्तीः षोड़श पूर्वोक्ता ब्राह्मयाद्या अष्टपत्रके ।
भैरवैः संयुताश्चाथ दशारे दिक्पतीन् क्रमात् ॥ ॥ ६१ ॥

---

वेष्टनमन्त्रमाह साध्यमिति। शिरः स्वाहा स्पष्टमन्यत्। मुनिसप्ताचरः सप्तसप्तत्यर्णः ॥ ५१—५३ ॥

उक्तमार्गतः पूर्वोक्तविधिना ॥ ५४—५७ ॥

यन्त्रमाह कृत्वेति। कामः क्लीं वाक्भवं ऐं पाशं आं माया ह्रीं सृणिं क्रों श्रियं श्रीं दीर्घं कवचं हूं ॥ ५८—६० ॥

पूर्वोक्ता उच्चाटनाद्याः ॥ ६१ ॥

स्वखबीजादिकान् बीजसमूहः कथ्यतेऽधुना ।
मांसं रक्तं विषं मेरुर्जलं वायुर्भृगुर्वियत् ॥ ६२ ॥
एतानि शशियुक्तानि पाशो मायान्तिमो मतः ।
वज्राद्यान् विलिखेत् सम्यक् पङ्क्तिपत्रे द्वितीयके ॥ ६३ ॥
तिथिपत्रे मूलवर्णान् गायत्र्यर्णैः प्रवेष्टयेत् ।
वाय्वग्नी विलिखेत् भूमिं मन्दिरद्वितयाश्रिषु ॥ ६४ ॥
भूर्जादौ यन्त्रमालिख्य जपं सम्पातसाधितम् ।
बाह्वादौ विधृतं दद्यात् नृणां कीर्त्तिं धनं सुखम् ॥ ६५ ॥
बहुना किमिहोक्तेन वाराहीष्टं प्रयच्छति ।
वाग्बीजपुटिता भूमिर्नमोऽन्ते भगवत्यथ ।
वार्त्तालिवाराहमनं सटक् वाराहि चापदम् ॥ ६६ ॥
राहमुख्यं ततो बीजत्रयं पूर्वोदितं वदेत् ।
अन्धे अन्धिनि हृदयं रुन्धे रुन्धिनि हृत्तथा ॥ ६७ ॥
जम्भे जम्भिनि हृत् पश्चात् मोहे मोहिनि हृत् पुनः ।
स्तम्भे स्तम्भिनि हार्दान्ते पुनर्बीजत्रयं वदेत् ॥ ६८ ॥
सर्वदुष्टप्रदुष्टानां सर्वेषां सर्ववाक्पदम् ।
चित्तचक्षुर्मुखगतिं जिह्वास्तम्भं कुरुद्वयम् ॥ ६९ ॥
शीघ्रं वश्यं कुरुद्वन्द्वं त्रिबीजोठचतुष्टयम् ।
सर्गाढ्यं वर्म फट् स्वाहा वेदरुद्राक्षरो मनुः ॥ ७० ॥
प्रणवादिमुनिश्छन्दः शिवोऽतिजगती तथा ।

---

दिक्पालबीजान्याह मांसमिति । मांसं ल: रक्तं र: विषं म: मेरु: ध: जलं व: वायुर्य: भृगु: स: वियत् ह: एतानि शशियुक्तानि बिन्दुयुतानि पाशं आ अन्तिमा चरमा माया ह्रीं ॥ ६२—६३ ॥

तिथिपत्रे पञ्चदशदले गायत्र्यर्णैर्वैदिकगायत्रीवर्णैः भूमीति चतुरस्रद्वयकोणेषु वायुवह्नी यरेफौ लिखेत् ॥ ६४ ॥ ६५ ॥

वार्त्ताली देवता प्रोक्ता वार्त्तालिहृदयं स्मृतम् ॥ ७१ ॥
वाराहीति शिरः प्रोक्तं शिखा वाराहमुख्यपि ।
अन्धे अन्धिनि वर्मोक्तं रुन्धे रुन्धिनि नेत्रकम् ॥ ७२ ॥
जम्भे जम्भिनि चास्त्रं स्यात् ततो ध्यायेत्तु देवताम् ।
रत्नाम्भोरुहकर्णिकोपरिगते शावासने संस्थितां
मुण्डस्रक्परिराजमानहृदयां नीलाश्मसद्रोचिषम् ।
हस्ताब्जैर्मुषलं हलाभयवरान् संबिभ्रतीं सत्कुचां
वार्त्तालीमरुणाम्बरां त्रिनयनां वन्दे वराहाननाम् ॥७३॥
सप्तदशसहस्राणि प्रजपेत्तद्दशांशतः ।
तिलैर्बन्धूककुसुमैर्जुहुयान्मधुरान्वितैः ॥ ७४ ॥
पूजायन्त्रमथो वक्ष्ये जयादिनवशक्तिकम् ।
स्वर्णे रूप्ये तथा ताम्रे भूर्जपत्रेऽथ दारुणि ॥ ७५ ॥
लिखेत् गोरोचनारात्रिचन्दनागुरुकुङ्कुमैः ।
योनिपञ्चास्त्रषट्कोणाष्टपत्रशतपत्रकम् ॥ ७६ ॥
सहस्रदलभूबिम्बसंवीतद्वारसंयुतम् ।
कैलासाचलमध्यस्थं पीठमेतद्विचिन्तयेत् ॥ ७७ ॥
तत्रावाह्य यजेद्देवीमुपचारैर्मनोहरैः ।
त्रिकोणमध्ये देवेशीं तदग्न्यादिषु चाङ्गकम् ॥ ७८ ॥
वार्त्ताली चापि वाराही पूज्या वाराहमुख्यपि ।
त्रिकोणेष्वथ पञ्चास्रेष्वन्धिनी रुन्धिनी तथा ॥ ७९ ॥
जम्भिनी मोहिनी चापि स्तम्भिनीज्या तु पञ्चमी ।

---

वार्त्तालीमाह वागिति । भूमिः ग्लौं सा वाग्बीजेन पुटिता तन्मध्यस्थ ऐं ग्लौं ऐमिति । त्रिबीजी ऐं ग्लौं ऐमिति सर्गाढ्यो ठः ठः ठः ठः वेदाब्द्वाचरः चतुर्दशाक्षरशतार्णः ॥ ६६—७२ ॥

ध्यानमाह रत्नेति । मूषलवरी दधयीः ॥ ७३—७५ ॥

षट्कोणेषु पुनः पूज्या डाकिनी राकिणी तथा ॥ ८० ॥
लाकिनी काकिनी चापि शाकिनी हाकिनी पुनः ।
षट्कोणपार्श्वयोः पूज्या स्तम्भिनी क्रोधिनी द्वयम् ॥ ८१ ॥
मुषलेष्टकरा त्वाद्या कपालहलभृत् परा ।
षट्कोणाग्रे यजेच्चण्डोच्चण्डं तस्याः सुतोत्तमम् ॥ ८२ ॥
शूलं नागञ्च डमरुं कपालं दधतं करैः ।
इन्द्रनीलनिभं नग्नं जटाभारविराजितम् ॥ ८३ ॥
अष्टपत्रेषु वार्त्तालीमुखं देव्यष्टकं यजेत् ।
शतपत्रेषु सम्पूज्या रुद्रार्कौ वसवोऽश्विनौ ॥ ८४ ॥
त्रिरेकैकोऽन्त्यपत्रे तु जम्भिनी स्तम्भिनीयुता ।
शतकोणाग्रतः पूज्यः सिंहो महिषसंयुतः ॥ ८५ ॥
सहस्रपत्रे वाराहीं पूजयेत्तु सहस्रशः ।
अङ्कुशो ङेन्त वाराही नमोऽन्तां तन्मनुः स्मृतः ॥ ८६ ॥
भूपुरद्वारदेशेषु वटुकं क्षेत्रपालकम् ।
योगिनीगणनाथञ्च तत्तन्मन्त्रैः प्रपूजयेत् ॥ ८७ ॥

---

हरिद्रापूजायन्त्रमाह योनीति । योनिस्त्रिकोणं भूबिम्बं चतुरस्रं तदग्न्यादिषु तस्या देव्या अग्न्यादिषु अग्निनिर्ऋतिवायवीशानाग्निदिशासु षट्कं षडङ्गानि यजेदिति पूर्वेणान्वयः ॥ ७६—८१ ॥

स्तम्भिनीध्याने द्वौ करौ दक्षे मुषलं वामे परा क्रोधिनी कपालहलभृत् कपालं दक्षे देवीसुताय चण्डोच्चण्डाय नम इति सुतपूजा ॥ ८२ ॥

सुतध्यानमाह शूलमिति । डमरुकपाले दक्षयोः ॥ ८३ ॥

वार्त्तालीमुखं वार्त्ताल्यादिदेव्यष्टकमनन्तरोक्तं वार्त्तालीवाराही-वाराहमुख्यन्धिनी-रुन्धिनी-जम्भिनीमोहिनी-स्तम्भिनीसंज्ञकं रुद्रा एकादशवीरभद्रादयः अर्का द्वादशधात्रादयः वसवोऽष्टौ धरादयः अश्विनौ नासत्यदस्रौ ॥ ८४ ॥

एकैकः पत्रत्रिके पूज्यः एवं नवनवतिः चरमपत्रे तु जम्भिनीस्तम्भिनीभ्यां सह इति ॥ ८६ ॥

वाराहीमन्त्रमाह अङ्कुश इति । क्रौं वाराह्यै नमः इति मन्त्रेण सहस्रवारं वाराहीमेव पूजयेत् ॥ ८६ ॥ ८७ ॥

फान्तः सविन्दुर्वटुको ङेन्तो हृत्सप्तवर्णकः ।
मेरुः शशियुतः क्षेत्रपालाय नमसान्वितः ॥ ८८ ॥
अष्टार्णः शेषयुग्वायुः सचन्द्रो योगिनीपदम् ।
भ्यो नमोऽन्तः सप्तवर्णः खातश्चन्द्रान्वितो गणः ॥ ८९ ॥
पतये हृच्चाष्टवर्णा प्रोक्तास्तन्मनवः क्रमात् ।
दिक्पालानायुधैर्युक्तान् दिक्षु सम्पूजयेत्ततः ॥ ९० ॥
पूजान्ते वटुकादिभ्यो बलिमन्त्रैर्बलिं हरेत् ।
बलिदानोचिता मन्त्राः कीर्त्यन्तेऽखिलसिद्धिदा ॥ ९१ ॥
एह्येहीति पदं प्रोच्य देवी पुत्रेति कीर्त्तयेत् ।
वटुकान्ते नाथ कपिलजटाभारभासुर ! ॥ ९२ ॥
त्रिनेत्रज्वालाशब्दान्ते मुखसर्वं जलं सट्टक् ।
घ्नान्नाशय युगं सर्वोपचारसहितं बलिम् ॥ ९३ ॥
गृह्ण युग्मं वह्निपत्नी शरपञ्चाक्षरो मनुः ।
वटुकस्य बलिं दद्यादनेन श्रद्धयान्वितः ॥ ९४ ॥
मेरुः षट्दीर्घयुक् वर्म स्थानक्षेत्रपदं वदेत् ।
पालेश सर्वकामञ्च पूरयानलवल्लभा ॥ ९५ ॥
त्रयोविंशतिवर्णाढ्यो क्षेत्रपालमनुर्मतः ।

---

वटुकमन्त्रमाह फान्त इति । फान्तो वः वं वटुकाय नम इति । क्षेत्रपाल-मन्त्रमाह मेरुरिति । मेरुः क्षः क्षं क्षेत्रपालाय नमः ॥ ८८ ॥

योगिनीमन्त्रमाह शेषेति । वायुर्यः शेषयुक् आयुतः सचन्द्रो विन्दुयुतश्च यां योगिनीभ्यो नम इति । गणेशमन्त्रमाह खात इति । खान्तो गः गं गणपतये नम इति ॥ ८९—९१ ॥

वटुकस्य बलिमन्त्रमाह एहीति । सट्टक् जलं झयुतो वः वि वह्निपत्नी स्वाहा स्वरूपमपरं शरपञ्चाक्षरः पञ्चपञ्चाशदर्णाः यथा ऐह्येहि देवीपुत्र वटुकनाथ कपिलजटाभारभासुरत्रिनेत्र ! ज्वालामुख ! सर्वविघ्नान्नाशय नाशय सर्वोपचार-सहितं बलिं गृह्ण गृह्ण स्वाहेति ॥ ९२—९४ ॥

योगिनीनामथो मन्त्रः पद्यरूपः प्रपठ्यते ॥ ९६ ॥
ऊर्द्धं ब्रह्माण्डतो वा दिवि गगनतले भूतले निष्कले वा
पाताले वानले वा सलिलपवनयोर्यत्र कुत्र स्थिता वा ।
क्षेत्रे पीठोपपीठादिषु च क्रतपदा धूपदीपादिकेन
प्रीता देव्यः सदा नः शुभवलिविधिना पान्तु वीरेन्द्रवन्द्या ॥९७॥
यां योगिनीभ्यः स्वाहान्तो भूमिनन्दाचरो मनुः ।
योगिनीनां वलिं दद्यादनेन विधिपूर्वकम् ॥ ९८ ॥
दीर्घत्रयेन्दुयुक् सेन्दुः शार्ङ्गी गणपतीर्णकाः ।
मारुती भगवांस्तोयं रवरान्ते दसर्वं च ॥ ९९ ॥
जनं मे वशमानान्ते य सर्वो लोहितो हली ।
दीर्घो रसहितं प्रान्ते वलिं गृह्ण युगं शिरः ॥ १०० ॥
गणेशवलिमन्त्रोऽयं गगनश्रुतिवर्णवान् ।
एवं तेभ्यो वलिं दत्त्वा स्वस्वमुद्रां प्रदर्शयेत् ॥ १०१ ॥
अङ्गुष्ठं तर्जनीयुक्तं दर्शयेद्वटुके वलौ ।
अङ्गुष्ठानामिके वामे क्षेत्रपालवलौ मता ॥ १०२ ॥
किञ्चिद्वक्रीकृता मध्या गणनाथवलौ स्मृता ।
अनामामध्यमाङ्गुष्ठा योगिनीनां वलौ पुनः ॥ १०३ ॥
एवं सम्पूज्य संस्तुत्य नत्वालन्युपसंहरेत् ।

---

क्षेत्रपालवलिमन्त्रमाह मेरुरिति । मेरुः क्षः षट्दीर्घयुक् क्षां क्षीं क्षूं क्षैं क्षः हुं स्थाने क्षेत्रपालेश सर्वकामं पूरय स्वाहेति ॥ ९५ ॥ ९६ ॥

योगिनीवलिमन्त्रमाह ऊर्द्धमित्यादि ॥ ९७ ॥

स्वाहान्तः स्वरूपमेव भूमिनन्दाचर एकनवतिवर्णः ॥ ९८ ॥

गणेशवलिमन्त्रमाह दीर्घेति । शार्ङ्गी गः दीर्घत्रयेन्दुयुक् गां गीं गूं सेन्दु गं मारुती यः भगवान् एयुतः ये तोयं वः ॥ ९९ ॥

लोहितः पः दीर्घो हली पा शिरः स्वाहा ॥ १०० ॥

सिद्धमन्त्रः प्रकुर्वीत प्रयोगान् शिवभाषितान् ॥ १०४ ॥
हरिद्रया चन्दनेन लाक्षयागरुणापि च ।
पूरेण विविधैर्मांसैर्जुहुयादिष्टसिद्धये ॥ १०५ ॥
हरिद्रामालया कुर्य्याज्जपं स्तम्भनकर्मणि ।
स्फाटिकैः पद्मबीजैश्च रुद्राक्षैः शुभकर्मणि ॥ १०६ ॥
स्वर्णादिपात्रे सुरया बन्धूककुसुमैस्तिलैः ।
वाराहीं तर्पयेत् सम्यक् कामसम्पूर्त्तये नरः ॥ १०७ ॥
चतुःशतन्तु तापिञ्छैर्जुहुयात् स्तम्भनेच्छया ।
लाजचूर्णतिलैः कुर्य्यात् खरमेषास्रजान्वितैः ॥ १०८ ॥
पिण्डं मनोहरन्तन्तु पूजयेत्तर्पयेदपि ।
सपत्नसदनं साङ्गमेतस्मै विनिवेदयेत् ॥ १०९ ॥
कुण्डे पिण्डं निधायास्मुं जुहुयात्तत्र चायुतम् ।
एकविंशतिरात्रीषु लाजैरक्तसमन्वितैः ॥ ११० ॥
एवं कृते वैरिवृन्दं भक्ष्यते योगिनीगणैः ।
अथ यन्त्रं महादेव्याः प्रोच्यते शकटाभिधम् ॥ १११ ॥
विलिख्य तारे साध्याख्यं भूबीजेन प्रवेष्टयेत् ।
उकारेण च संवेष्ट्य भूपुरं परितो लिखेत् ॥ ११२ ॥
अष्टवज्रान्वितं वज्रप्रान्ते प्रणवमालिखेत् ।
वज्रमध्ये साध्यनाम लिखेत् कर्मसमन्वितम् ॥ ११३ ॥

---

गगनश्रुतिवर्णवान् चत्वारिंशद्वर्णः यथा गां गीं गूं गं गणपतये वर वरद सर्वजनं मे वशमानय सर्वोपचारसहितं बलिं गृह्ण गृह्ण स्वाहेति ॥१०१—१०७॥
तापिच्छं नाम तमालपुष्पं लाजानां चूर्णयुतैस्तिलैः खरमेषरुधिरयुतैः ॥१०८॥
सपत्नसदनं शत्रुगृहं एतस्मै पिण्डाय ॥ १०९—१११ ॥
यन्त्रनाह विलिख्येति । तारे प्रणवे साध्याख्यं साध्यनाम भूबीजेन ॥ ११२ ॥
कर्मसमन्वितं शत्रुमुच्चाटयेति क्रियायुतम् ॥ ११३ ॥

धरावीजेन संवेष्ट्य भूपुरं मूलविद्यया ।
वहिरङ्कुशसंवीतं भिण्टीशेन् प्रवेष्टयेत् ॥ ११४ ॥
एतद्यन्त्रं समालिख्य नूत्ने कौलालखर्परे ।
कृष्णपुष्पैः समभ्यर्च्य निक्षिपेदधिवेश्मनः ॥ ११५ ॥
रिपुमुच्चाटयेच्छीघ्रं स्थितं वर्षशतान्यपि ।
वादित्रे यन्त्रमालिख्य वादयेत् समयान्तरे ॥ ११६ ॥
श्रुत्वा तद्रवमुच्चैस्तु पलायन्ते विरोधिनः ।
पाषाणे लिखितं रात्रौ पीतपुष्पेषु निक्षिपेत् ॥ ११७ ॥
सम्पूजितमधोवक्त्रां वाचं संस्तम्भयेद्द्विषाम् ।
तापकार्य्यग्निनिक्षिप्तं जले दोषप्रदं भवेत् ॥ ११८ ॥
साध्यर्क्षतरुगर्भस्थं शत्रूणां दुःखदायकम् ।
किं बहुक्तेन सर्वेष्टं साधयेत् साधितं नृणाम् ॥ ११९ ॥

इति श्रीमहीधरविरचिते मन्त्रमहोदधौ वगलादिमन्त्र-
कथनं नाम दशमस्तरङ्गः ॥

---

धरावीजं तदेव षड्ङ्कुशः क्रौं भिण्टीशः एकारः ॥ ११४ ॥

नूत्ने नवीने ॥ ११५ ॥ ११६ ॥

रात्रौ हरिद्रया पाषाणे लिखित्वाग्नौ निक्षिप्तं तापकारि साध्यर्क्षतरवः साध्यस्य यज्जन्मनक्षत्रं तस्य वृक्षमध्ये क्षिप्तं तेषां दुःखदं ते च पूर्वमुक्ताः साधितं सम्पातादिना प्रतिष्ठितमेतद्यन्त्रं सर्वेष्टं साधयेत् ॥ ११७—११९ ॥

इति श्रीनौकासमाख्यायां मन्त्रमहोदधिटीकायां वगलादि-
निरूपणं नाम दशमस्तरङ्गः ।

# एकादशस्तरङ्गः ।

त्रिनेत्रं कमलाकान्तं नृसिंहं चन्द्रशेखरम् ।
नत्वा संक्षेपतो वक्ष्ये श्रीविद्यामन्त्रनायिकाम् ॥ १ ॥
अपरीक्षितशिष्याय तां न दद्यात् कदाचन ।
यदुच्चारणमात्रेण पापसङ्घः प्रलीयते ॥ २ ॥
तारं मायाञ्च कमलामादौ वीजत्रयं पठेत् ।
ब्रह्मझिण्टीशगोविन्द धरा मायेति चादिमम् ॥ ३ ॥
आकाशभृगुचक्र्यभ्रमांसं माया द्वितीयकम् ।
हंस धातृ क्षमा माया तृतीयं वीजमीरितम् ॥ ४ ॥
वाक्कामशक्तिसंज्ञन्तु क्रमाद्वीजत्रयं भवेत् ।
इयं षड़र्णा श्रीमाया कामवाक्शक्तिसंपुटा ॥ ५ ॥

---

श्रीविद्यां वक्तुं मङ्गलमाचरति त्रिनेत्रमिति। मन्त्रनायिकां त्रिलोकीवर्त्तिनां सर्वमन्त्राणां स्वामिनीमुत्पादिकामित्यर्थः ॥ १ ॥

अपरीक्षिताय शिष्याय तां विद्यां न दद्यात् आत्मा देयः शिरो देयं न देया षोड़शाक्षरीति वचनात् मन्त्रमुद्धरति तारमिति ॥ २ ॥

तार ओँ माया ह्रीँ कमला श्रीँ एतद्वीजत्रयं कूटत्रयादौ पठेत्। आद्यकूटमाह ब्रह्मेति। ब्रह्मा कः झिण्टीश ए गोविन्द ई धरा लः मायेति प्रथमं कूटं क ए ई ल ह्रीमिति ॥ ३

द्वितीयमाह आकाशेति। आकाशो हः भृगुः सः चक्री कः अभ्रं ह मांसं लः मायेति द्वितीयं कूटं हसकहलह्रीमिति। तृतीयमाह हंसेति। हंसः सः धाता कः क्षमा लः माया चेति तृतीयं कूटं सकलह्रीमिति ॥ ४ ॥

कूटत्रयस्य संज्ञामाह वागिति। प्रथमं वाग्वीजं द्वितीयं कामवीजं तृतीयं शक्तिवीजं श्रीः श्रीवीजं माया ह्रीँ कामः क्लीँ वाक् ऐँ शक्तिः सौः एतैः पञ्चवीजैः क्रमोत्क्रमाभ्यां संपुटा ॥ ५ ॥

अनेकपुण्यसम्प्राप्या श्रीविद्या षोड़शाक्षरी ।
मुनिः स्याद्दक्षिणामूर्त्तिः पङ्क्तिश्छन्दः समीरितम् ॥ ६ ॥
देवता जगतामादिश्रीमत्त्रिपुरसुन्दरी ।
बीजमै भृगुरौ शक्तिः कामबीजन्तु कीलकम् ॥ ७ ॥
मूर्द्धास्यहृद्गुह्यपादे नाभौ मुन्यादिकान् न्यसेत् ।
न्यासजालं प्रकुर्वीत माया श्रीबीजपूर्वकम् ॥ ८ ॥
मध्यानामाकनिष्ठासु ज्येष्ठयोस्तर्जनीद्वयोः ।
तले पृष्ठे च करयोर्विन्यसेद्दिः क्रमादिमान् ॥ ९ ॥
श्रीकण्ठानन्तसौवर्णान् बिन्दुसर्गसमन्वितान् ।
नमोऽन्तान् करशुद्धाख्यौ न्यासोऽयं परिकीर्त्तितः ॥ १० ॥
दिव्यासनञ्च प्रथमं तथा चक्रासनं क्रमात् ।
सर्वमन्त्रासनं साध्यसिद्धासनमिति न्यसेत् ॥ ११ ॥
श्रीं नमोऽन्तञ्च बीजाद्यं पञ्चाङ्गाजानुलिङ्गके ।
मायां कामं शक्तिबीजं प्रथमासनपूर्वकम् ॥ १२ ॥

---

पूर्वोक्तषड्वर्णा षोड़शाक्षरी श्रीविद्याभिधा महाविद्या ॥ ६ ॥

भृगुः सः श्रीः स्वरूपं तेन सौः शक्तिः कामबीजं क्लीं ॥ ७ ॥

न्यासानाह मूर्द्धेति । दक्षिणामूर्त्तये नमो मूर्ध्नि पङ्क्तये नमो मुखे त्रिपुरसुन्दर्यै नमो हृदि ऐं बीजाय नमो गुह्ये सौः शक्तये नमः पदयोः क्लीं कीलकाय नमो नाभौ इति मुन्यादिन्यासः ॥ ८ ॥

अन्यन्यासानाह मध्येति । इमान् श्रीकण्ठादीन् नमोऽन्तान् द्विवारद्वयं मध्यानामिका कनिष्ठाङ्गुष्ठतर्जनीतलपृष्ठेषु न्यसेत् ॥ ९ ॥

इमान् कानित्यत आह श्रीति । श्रीकण्ठोऽकारः अनन्त आकारः सौ स्वरूपं क्रमाद्विन्दादि युतान् अ आ एतौ सबिन्दू सौ सर्गौ यथा मायाश्रीबीजपूर्वकमिति सर्वन्यासेषु सम्बध्यते ह्रीं श्रीं अं मध्यमाभ्यां नमः ह्रीं श्रीं आं अनामिकाभ्यां नमः ह्रीं श्रीं आं तर्जनीभ्यां नमः ह्रीं श्रीं सौः करतलपृष्ठाभ्यां नमः अयं करशुद्धिन्यासः ॥ १० ॥

आसनन्यासमाह दिव्येति । दिव्यासनाद्यासनचतुष्कम् ॥ ११ ॥

श्रीं नमोऽन्तं चतुर्थी नमोऽन्तं बीजाद्यं मायामित्यादिमन्त्रनाथप्रासिद्धिकबीज-

वियदारूढवाक्कामशक्तिबीजानि पूर्वतः ।
द्वितीये सम्प्रयोज्यानि सह पूर्वाणि तत्परे ॥ १३ ॥
माया कामं फान्तमांसे भगेन्द्वाढ्ये प्रयोजयेत् ।
तुरीयासनपूर्वाणीत्यासन न्यास ईरितः ॥ १४ ॥
ततः षडङ्गं कुर्वीत पञ्चभिस्त्रिभिरेकतः ।
एकैकेन पञ्चार्णैर्मन्त्रस्य क्रमतः सुधीः ॥ १५ ॥
मूलविद्यां समुच्चार्य प्रणवादिनमोऽन्तिकाम् ।
मध्यमानामिकाभ्यान्तु ब्रह्मरन्ध्रे प्रविन्यसेत् ॥ १६ ॥
सुधां स्रवन्तीं वर्णेभ्यः प्लावयन्तीं निजां तनुम् ।
प्रदीपकलिकाकारां महासौभाग्यदां स्मरेत् ॥ १७ ॥
मुद्रां कृत्वा वामकर्णे परसौभाग्यदण्डिनीम् ।
वाममूर्द्धादिपादान्तं तथा मूलं प्रविन्यसेत् ॥ १८ ॥

---

पूर्वं पञ्चह्रानानुलिङ्गेषु न्यसेत् प्रथमासनबीजान्याह मायामिति शक्तिः सौः ॥१२॥

चक्रासनबीजान्याह वियदिति। वियत् हः तद्युतानि वागादीनि तत्-पूर्वे तृतीयासने सह पूर्वाणि वागादीनि ॥ १३ ॥

चतुर्थासनबीजान्याह मायामिति। फान्तमांसे वलौ भगेन्द्वाढ्ये एबिन्दुयुते तेन व्ँ यथा ह्रीं श्रीं क्लीं क्लौं सौः दिव्यासनाय नमः पदोः ह्रीं श्रीं हैं ह् क्लीं है सौः चक्रासनाय नमः जङ्घयोः ह्रीं श्रीं ह्सैं ह्स्क्लीं है सौः सर्वमन्त्रासनाय नमः जानुनोः ह्रीं श्रीं क्लीं क्लौं व्ँ साध्यसिद्धासनाय नमो लिङ्गे इत्यासन-न्यासः ॥ १४ ॥

षडङ्गमाह तत इति। श्रीं ह्रीं क्लीं ऐं सौः हृदये षों ह्रीं श्रीं शिरः आद्यकूटेन शिखा मध्यकूटेन कवचं तृतीयकूटेन नेत्रं सौः ऐं क्लीं ह्रीं श्रीं अस्त्रं इति षडङ्गन्यासः ॥ १५ ॥ १६ ॥

मन्त्रवर्णेभ्योऽमृतं चरन्तीं तेन निजं शरीरमाप्लावयन्तीं दीपाकारां ब्रह्मरन्ध्रस्थां सौभाग्यदां देवीं ध्यायन् तारादिनमोऽन्तं मूलमध्यमानामिकाभ्यां शिरसि न्यसेत् ॥ १७ ॥

पुनर्वामकर्णे परसौभाग्यदण्डिनीमुद्रां कृत्वा वामपार्श्वे मूर्द्धादिपादान्तं

त्रिखण्डया मुद्रया तु भाले मूलं न्यसेत्तथा।
त्रैलोक्यस्याखिलस्याहं कर्त्तेति स्वं विचिन्तयेत् ॥ १९ ॥
रिपुजिह्वाग्रहां मुद्रां दर्शयन् सर्वविद्विषः।
निग्रह्णामीति सञ्चिन्त्य पादमूले तथा न्यसेत् ॥ २१ ॥
मुखे संवेष्टयन् न्यस्येत् पुनर्दक्षिणकर्णतः।
विन्यस्य वामकर्णान्तं कण्ठादक्नं ततो न्यसेत् ॥ २२ ॥
तारसम्पुटितां विद्यां सर्वाङ्गे विन्यसेत् पुनः।
योनिमुद्रां मुखे बद्ध्वा न्यसेत्त्रिपुरसुन्दरीम् ॥ २३ ॥
ब्रह्मरन्ध्रे हस्तमूले भाले विद्यां प्रविन्यसेत्।
अङ्गुष्ठानामिकाभ्यान्तु न्यासः सम्मोहनाभिधः ॥ २४ ॥
जगद्वश्यकराख्योऽयं न्यासः सङ्कीर्त्तितो मया।
संस्मरन् तरुणीमूलं सुन्दरीप्रभया जगत् ॥ २५ ॥

---

तारादिनमोऽन्तं मूलं न्यसेत् रिपुजिह्वाग्रहां मुद्रां दर्शयन् सर्वशत्रून्निग्रह्णामीति सञ्चिन्त्य पादमूले तारादिनमोऽन्तं मूलं न्यसेत् ॥ १८ ॥

सकललोककर्त्ताहमिति बीजं विचिन्त्य त्रिखण्डया मुद्रया ललाटे तारादिनमोऽन्तं मूलं न्यसेत् मुखे वेष्टयन् तारादिनमोऽन्तं मूलं न्यसेत् दक्षकर्णतो वामान्तं कण्ठाम्मुखान्तम् एवमेव न्यसेत् पुनः प्रणवपुटां विद्यां सर्वाङ्गे न्यसेत् मुखे योनिमुद्रां बद्ध्वा देवीं न्यसेत्। अयं जगद्वशीकरणन्यासः। देवीकान्त्यां विश्वं रक्तं ध्यायन्नङ्गुष्ठानामिकाभ्यां ब्रह्मरन्ध्रे मणिबन्धे ललाटे विद्यां न्यसेदिति सम्मोहनो न्यासः। परसौभाग्यदण्डिनी मुद्रोक्ता तल्लक्षणं यथा—

"वामे मुष्टिं दृढं बद्ध्वा तर्जनीं प्रविसारयेत्।
भ्रामयेद्वामकर्णान्तं मुद्रा सौभाग्यदण्डिनी ॥" इति।

रिपुजिह्वाग्रहमुद्रालक्षणन्तु "अङ्गुष्ठगर्भितं मुष्टिं बध्नीयाद्दक्षपाणिना।
रिपुजिह्वाग्रहाख्येयं मुद्रोक्ता शत्रुनाशिनी।" इति।

मुद्रा वामपा तर्जनीति त्रिखण्डालक्षणं तारामन्त्रे उक्तम् ॥ १८—२५ ॥

पादयोर्जङ्घयोर्न्यस्येत् जानुनोः कटिभागयोः ।
लिङ्गे पृष्ठे नाभिदेशे पार्श्वयोस्तनयोरपि ॥ २६ ॥
अंसयोः कर्णयोर्ब्रह्मरन्ध्रे वक्त्रे च नेत्रयोः ।
कर्णयोः कर्णवेष्टेऽपि मूलस्यैकैकमक्षरम् ॥ २७ ॥
संहारन्यास उक्तोऽयं ततो वाग्देवतां न्यसेत् ।
तासां बीजानि नामानि न्यासस्थानानि च ब्रुवे ॥ २८ ॥
अग्निभूधरमांसाब्योऽर्घीशो बीजं शशाङ्कयुक् ।
षोड़शस्वरबीजाव्यां वशिनीं शिरसि न्यसेत् ॥ २९ ॥
क्रोधीशमांसयुक् माया द्वितीयं बीजमीरितम् ।
कवर्गपूर्वबीजाव्यां भाले कामेश्वरीं न्यसेत् ॥ ३० ॥
दीर्घो खड्गाशरान्ताद्यशान्तिबिन्दुसमन्विता ।
चवर्गं तद्बीजयुतां भ्रूमध्ये मोहिनीं न्यसेत् ॥ ३१ ॥

---

अक्षरन्यासं संहाराख्यमाह पादयोरिति ॥ २६ ॥

पादादिष्वेकैकमक्षरं न्यसेत् कर्णवेटः कर्णशष्कुली श्रीं नमः पादयोः क्रों नमो जङ्घयोरित्यादिप्रयोगः ॥ २७ ॥

अयं संहारन्यासः ॥ २८ ॥

वाग्देवतान्यासमाह अग्नीति । अग्नीरेफः भूधरो वः मांसं लः एतैर्युतोऽर्घीश ऊकारः शशाङ्कयुक् बिन्दुयुतः तेन व्‌लूं षोड़शस्वरपूर्वकं तद्बीजपूर्वां वशिनीं शिरसि न्यसेत् यथा अं आं इं ईं उं ऊं ऋं ॠं ऌं ॡं एं ऐं ओं औं अं अः व्‌लूं वशिनीवाग्देवतायै नमः शिरसि ॥ २९ ॥

क्रोधीशेति । क्रोधीशः कः मांसं लः एताभ्यां युता माया क्लीं कवर्गपूर्वं बीजमाद्यं यस्यास्तां कामेश्वरीं भाले न्यसेत् यथा कं खं गं घं ङं क्ल्‌ह्रीं कामेश्वरीवाग्देवतायै नमो ललाटे ॥ ३० ॥

दीर्घेति । दीर्घो नकारः खड्गीशो वः रान्तो लः एतैर्युता शान्ति ईकारः बिन्दुयुता च न्ब्लीं चवर्गेण तद्बीजेन च युतां मोहिनीं भ्रूमध्ये न्यसेत् । यथा चं छं जं झं ञं न्ब्लीं मोहिनीवाग्देवतायै नमो भ्रूमध्ये ॥ ३१ ॥

षर्घीशो वायुमांसस्थो विन्द्वाढ्यस्तत्तुरीयकम् ।
टवर्गवीजपूर्वां तु विमलां विन्यसेद्गले ॥ ३२ ॥
शूलीवैकुण्ठरेफस्थं वामनेत्रं सविन्दुयुक् ।
तवर्गवीजसंयुक्तां विन्यसेदरुणां हृदि ॥ ३३ ॥
वामकर्णो वियद्धंसमांसवालानिलेन्दुयुक् ।
पवर्ग तद्बीजपूर्वां जयिनीं नाभितो न्यसेत् ॥ ३४ ॥
तन्द्रा हुताशनवायुसंयुता दीपिकेन्दुयुक् ।
यवर्गवीजाद्यां मूलाधारे सर्वेश्वरीं न्यसेत् ॥ ३५ ॥
संवर्त्तकमहाकालरेफस्था शान्तिरिन्दुयुक् ।
कौलिनीं शादिवीजाद्यां न्यसेत् पादान्तमूलतः ॥ ३६ ॥

---

षर्घीश इति । षर्घीश ऊ कीदृशः वायुमांसस्थः यलौ स्थितौ यस्मिन् विन्दुयुतस्तत्तुरीयं चतुर्थवाग्देवतावीजम् ॥ ३२ ॥

तेन य्लूं टवर्गस्तद्बीजस्य पूर्वं यस्यास्तां विमलां कण्ठे न्यसेत् यथा टं ठं डं ढं णं य्लूं विमलावाग्देवतायै नमः कण्ठे ॥ ३२ ॥

शूलीति । वामनेत्रं ई कीदृशं शूली जः वैकुण्ठो मः रेफस्ते स्थिता यत्र तत् सविन्दु च ईदृशं तद्बीजं तेन ज्म्रीं तवर्गवीजाभ्यां युतामरुणां हृदि न्यसेत् यथा तं थं दं धं नं ज्म्रीं अरुणावाग्देवतायै नमो हृदि ॥ ३३ ॥

वामेति । वियत् हः हंस सः मांसं लः वालो वः अनिलो यः इन्दुर्विन्दुः एतैर्युक्तो वामकर्णं ऊकारः तेन ह्स्ल्व्यूं पवर्गं एतद्बीजस्य पूर्वं यस्यास्तां जयिनीं नाभौ न्यसेत् यथा पं फं वं भं मं ह्स्ल्व्यूं जयिनीवाग्देवतायै नमो नाभौ ॥ ३४ ॥

तन्द्रीति दीपिका ऊकारः कीदृशो ऊः तन्द्री मः वायुर्यः हुताशनो रः तैः संयुता इन्दुयुक् तेन म्र्यूं यवर्गो वीजं चाद्यं यस्यास्तां सर्वेश्वरीं मूलाधारे न्यसेत् यथा यं रं लं वं म्र्यूं सर्वेश्वरीवाग्देवतायै नमो मूलाधारे ॥ ३५ ॥

संवर्त्तकेति । संवर्त्तकः क्षः महाकालो मः रेफः एतैर्युता विन्दुयुता च शान्तिः ई तेन क्ष्म्रीं शादयो वीजमाद्यं यस्यास्तां कौलिनीमूर्वादिपादान्तं न्यसेत् शं षं सं हं लं क्षं क्ष्म्रीं कौलिनीवाग्देवतायै नम ऊर्वादिपादान्तम् ॥ ३६ ॥

वाग्देवतायै हार्दान्तं नामान्ते प्रोच्चरेत् पदम् ।
उक्तो वाग्देवतान्यासः सृष्टिन्यासमथाचरेत् ॥ ३७ ॥
ब्रह्मरन्ध्रे ललाटे च नेत्रयोः कर्णयोर्नसोः ।
गण्डदन्तोष्ठजिह्वासु मुखकूपेषु पृष्ठतः ॥ ३८ ॥
सर्वाङ्गे हृदये न्यस्येत् स्तनकुक्षिध्वजेषु च ।
एकैकार्णमथो मूर्ध्नि सर्वेण व्यापकञ्चरेत् ।
सृष्टिन्यासं विधायैवं स्थितिन्यासमथाचरेत् ॥ ३९ ॥
कराङ्गुष्ठाद्यङ्गुलीषु ब्रह्मरन्ध्रे मुखे हृदि ।
नाभ्यादिपादपर्यन्तं नाभ्यन्तं कण्ठदेशतः ॥ ४० ॥
ब्रह्मरन्ध्राच्च कण्ठान्तं पादाङ्गुलीषु पञ्च च ।
अथ पञ्चविधं न्यासं वक्ष्ये सर्वेष्टसिद्धिदम् ॥ ४१ ॥
मन्त्रपञ्चावृतिरूपं येन तद्रूपतां व्रजेत् ।
मूर्ध्नि वक्त्रे दृशोः श्रुत्योर्नसोर्गण्डोष्ठयोरपि ॥ ४२ ॥
वक्त्रमध्ये दन्तपङ्क्त्योर्वदने विन्यसेत् क्रमात् ।

---

वागिति । हार्दं नमः वाग्देवतायै नम इति पदं नामान्ते वश्विन्यादि नामान्ते प्रोच्चरेत् तत्प्रयोगेषु लिखितम् ॥ ३७ ॥

सृष्टिन्यासमाह ब्रह्मरन्ध्र इति । ब्रह्मरन्ध्रादिष्वेकैकं वर्णं न्यसेत् । आद्यं ब्रह्मरन्ध्रे द्वितीयं ललाटे तृतीयं दृशोः चतुर्थं कर्णयोः पञ्चमं नसोः षष्ठं गण्डयोः सप्तमं दन्तेषु अष्टममोष्ठयोः नवमं जिह्वायां दशमं मुखमध्ये एकादशं पृष्ठे ॥३८॥

द्वादशं सर्वाङ्गे त्रयोदशं हृदि चतुर्दशं स्तनयोः पञ्चदशं कुक्षौ षोडशं लिङ्गे ॥ ३९ ॥

स्थितिन्यासमाह करेति । पञ्चकराङ्गुलीषु षष्ठं ब्रह्मरन्ध्रे सप्तमं मुखे अष्टमं हृदि नवमं नाभ्यादिपादान्तं दशमं कण्ठादिनाभ्यन्तम् ॥ ४० ॥

एकादशं ब्रह्मरन्ध्रात् कण्ठान्तं पञ्चपादाङ्गुलीषु ॥ ४१ ॥

पञ्चावृतिन्यासमाह मूर्ध्नीति । दृशोर्द्वे श्रुत्योर्द्वे नसोर्द्वे गण्डयोर्द्वे ओष्ठयोर्द्वे ॥ ४२ ॥

एकैकवर्णं विद्याया इत्येको न्यास ईरितः॥ ४३॥
शिखाशिरोललाटभ्रूघ्राणवक्त्रे षड़र्णकान्।
करसन्धिषु साग्रेषु दशेति स्यात् द्वितीयकः॥ ४४॥
शिरोललाटनेत्रास्ये जिह्वायां षट् न्यसेत् पुनः।
पादसन्धिषु साग्रेषु दशेति स्यात् तृतीयकः॥ ४५॥
स्वरस्थाने चतुर्थस्तु ललाटे च गले हृदि।
नाभौ च मूलाधारेऽपि ब्रह्मरन्ध्रे मुखे गुदे॥ ४६॥
आधारे हृद्ब्रह्मरन्ध्रे करयोः पादयोर्हृदि।
एवं पञ्चविधं कृत्वा विद्यां प्रणवसंपुटाम्॥ ४७॥
सर्वस्मिन् व्यापयेदङ्गे नमोऽन्तान्ता हृदि न्यसेत्।
षोढ़ान्यासादयो न्यासाः कार्य्याः सौभाग्यवाञ्छया॥४८॥

---

दन्तपंक्त्योर्द्वे शेषेष्वेकैकम्॥ ४३॥

द्वितीयमाह शिखेति। शिखाशिरोभालभ्रूनासामुखेषु षट् दक्षकरसन्ध्यग्रेषु पञ्च एवं वामे पञ्च॥ ४४॥

तृतीयमाह शिर इति। शिरोभालनेत्रास्यजिह्वासु षट् दक्षपादसन्ध्यग्रेषु पञ्च वामपादे पञ्च॥ ४५॥

चतुर्थमाह स्वरेति। मातृकान्यासे स्वरस्थानान्युक्तानि तेन षोड़शयोजानि न्यसेत् पञ्चममाह ललाट इति॥ ४६॥

करयोर्द्वे पादयोर्द्वे अन्यत्रैकैकं प्रणवपुटितां विद्यां सर्वाङ्गे न्यसेत्॥ ४७॥

नमोऽन्तां हृदि च षोढ़ान्यासादयो विस्तरभयान्नोक्तास्ते उच्यन्ते गणेशग्रहनक्षत्रयोगिनीराशिपीठलक्षणाः षोढ़ान्यासः गणेशमातृकामन्त्रस्य दक्षिणामूर्त्तिर्ऋषिः गायत्रीछन्दः श्रीमातृकासुन्दरीदेवता ममोपास्यश्रीविद्याङ्गत्वेन षोढ़ान्यासे विनियोगः। ऋं कं खं गं घं ङं षां ऐं हृदि। ॠं चं छं जं झं ञं ईं क्लीं शिरः। ऌं टं ठं डं ढं णं ॡं सौः शिखा। एं तं थं दं धं नं ऐं सौः कवचम्। ओं ऐं पं फं बं भं मं औं क्लीं नेत्रम्। अं यं रं लं वं शं षं सं हं ळं क्षं अः ऐं अस्त्रम्॥ ध्यानं यथा—

उद्यत्सूर्य्यसहस्राभां पीनोन्नतपयोधराम्।

रक्तमालाम्बरालेपरक्तभूषणभूषिताम् ॥
पाशाङ्कुशधनुर्बाणभास्वत्पाणिचतुष्टयाम् ।
रक्तनेत्रत्रयां स्वर्णमुकुटीद्भासिचन्द्रिकाम् ॥

एवं ध्यात्वा न्यसेद्बीजं पूर्वं गं अं विघ्नेशह्रीभ्यां नमः गं आं विघ्नराजश्रीभ्यां नमः इत्यादि मातृकास्थले न्यसेत् गणेशाः शक्तियुक्ता एकविंशे तरङ्गे मूले ग्रन्थकारेणैवोक्ताः इति गणेशमातृकान्यासः । अथ ग्रहमातृकामन्त्रस्य दक्षिणामूर्त्तिर्ऋषिरित्यादि पूर्ववत् षडङ्गं ग्रहरूपिणीसुन्दरीदेवता ध्यानं यथा—

रक्तं श्वेतं तथा रक्तं श्यामं पीतञ्च पाण्डुरम् ।
धूम्रं कृष्णञ्च धूम्रञ्च धूम्रधूम्रं विचिन्तयेत् ॥
रविमुख्यान् कामरूपान् सर्वाभरणभूषितान् ।
वामोरुन्यस्तहस्तांश्च दक्षिणेन वरप्रदान् ॥

एवं ध्यात्वा मातृकापूर्वान् ग्रहान् न्यसेत् अं आं इं ईं उं ऊं ऋं ॠं ऌं ॡं एं ऐं ओं औं अं अः सूर्याय रेणुकाम्बायै नमः हृदयादधः । यं रं लं वं चन्द्रायामृताम्बायै नमः भ्रूमध्ये । कं खं गं घं ङं मङ्गलाय वामाम्बायै नमो नेत्रयोः । चं छं जं झं ञं बुधाय ज्ञानरूपाम्बायै नमो हृदि । टं ठं डं ढं णं बृहस्पतये यशस्विन्यम्बायै नमो हृदयोपरिभागे । तं थं दं धं नं शुक्राय शाङ्कर्यम्बायै नमः कण्ठे । पं फं बं भं मं शनैश्चराय शक्त्यम्बायै नमो नाभौ । शं षं सं हं राहवे कृष्णाम्बायै नमो मुखे । लं क्षं केतवे धूम्राम्बायै नमो गुदे । इति ग्रहमातृकान्यासः ॥ नक्षत्रमातृकामन्त्रस्य दक्षिणामूर्त्तिर्ऋषिर्गायत्रीच्छन्दो नक्षत्ररूपिणीसुन्दरी देवता श्रीविद्याङ्गत्वेन न्यासे विनियोगः । ध्यानं यथा—

ज्वलत्कालाग्निसङ्काशाः सर्वाभरणभूषिताः ।
पूजिताश्चाश्विनीमुख्या वरदाभयपाणयः ॥

एवं ध्यात्वा मातृकापूर्वं नक्षत्राणि न्यसेत् यथा—अं आं अश्विन्यै नमो ललाटे १ इं ईं भरण्यै नमो दक्षनेत्रे २ उं ऊं कृत्तिकायै नमो वामनेत्रे ३ ऋं ॠं ऌं ॡं एं रोहिण्यै नमो दक्षकर्णे ४ एं मृगशिरसे नमो वामकर्णे ५ ऐं आर्द्रायै नमो दक्षनसि ६ ओं औं पुनर्वसवे नमो वामनसि ७ कं पुष्याय नमः कण्ठे ८ खं गं अश्लेषायै नमो दक्षस्कन्धे ९ घं ङं मघायै नमो वामस्कन्धे १० चं पूर्वफल्गुन्यै नमो दक्षकूर्परे ११ छं जं उत्तराफल्गुन्यै नमो वामकूर्परे १२ झं ञं हस्ताय नमः दक्षमणिबन्धे १३ टं ठं चित्रायै नमो वाममणिबन्धे १४ डं स्वात्यै नमो दक्षहस्ते १५ ढं णं विशाखायै नमो वामहस्ते १६ तं थं दं अनुराधायै नमो नाभौ १७ धं ज्येष्ठायै नमो दक्षकटौ १८ नं पं फं मूलायै नमो वामकटौ १९ बं पूर्वाषाढायै नमो दक्षोरौ २० भं उत्तराषाढायै नमो वामोरौ २१ मं

श्रवणायै नमो दक्षजानुनि २२ यं रं धनिष्ठायै नमो वामजानुनि २३ लं शतभिषायै नमो दक्षजङ्घायां २४ वं शं पूर्वाभाद्रपदायै नमो वामजङ्घायां २५ षं सं हं उत्तरभाद्रपदायै नमो दक्षपादे २६ क्षं अं अः रेवत्यै नमो वामपादे २७। इति नक्षत्रमातृकान्यासः। सर्वेषु न्यासेष्वादौ मायाश्रीबीजे योज्य न्यासान् सर्वान् प्रकुर्वीत मायाश्रीबीजपूर्वकानित्युक्तत्वात्। योगिनीन्यासस्य मुनिच्छन्दसी पूर्वोक्ते योगिनीरूपा सुन्दरीदेवता श्रीविद्याङ्गत्वेन विनियोगः। ध्यानं यथा—

सितासितारुणाबभ्रूचित्रापीताश्च चिन्तयेत्।
चतुर्भुजाः समैर्वक्त्रैः सर्वाभरणभूषिताः॥

एवं ध्यात्वा न्यसेत् ह्रीं श्रीं डां डीं डं म्ल्व्र्यूं डाकिन्यै नमः अं आं इं ईं उं ऊं ऋं ॠं ऌं ॡं एं ऐं ओं औं अं अः मम त्वचं रक्ष रक्ष त्वगात्मने नमः कण्ठदेशे विशुद्धौ। ह्रीं श्रीं रां रीं रं म्ल्व्र्यूं राकिन्यै नमः कं खं गं घं ङं चं छं जं झं ञं टं ठं मम रक्तं रक्ष रक्ष असृगात्मने नमः हृदयानाहते। लां लीं लं म्ल्व्र्यूं लाकिन्यै नमः डं ढं णं तं थं दं धं नं पं फं मम मांसं रक्ष रक्ष मांसात्मने नमः नाभौ मणिपुरे। कां कीं कं म्ल्व्र्यूं काकिन्यै नमः बं भं मं यं रं लं मम मेदो रक्ष रक्ष मेदात्मने नमः लिङ्गमूले स्वाधिष्ठाने। शां शीं शं म्ल्व्र्यूं शाकिन्यै नमः वं शं षं सं ममास्थि रक्ष रक्ष अस्थ्यात्मने नमः गुदे मूलाधारे। हां हीं हं म्ल्व्र्यूं हाकिन्यै नमः हं लं क्षं मम मज्जां रक्ष रक्ष मज्जात्मने नमो भ्रूमध्ये आज्ञाचक्रे। यां यीं यं म्ल्व्र्यूं याकिन्यै नम अं मम शुक्रं रक्ष रक्ष शुक्रात्मने नमः ब्रह्मरन्ध्रे। इति योगिनीमातृकान्यासः। राशिमातृकामन्त्रस्य मुनिच्छन्दसी पूर्वोक्ते राशिरूपा सुन्दरीदेवता श्रीविद्याङ्गत्वेन विनियोगः। ध्यानं यथा—

रक्तश्वेतहरिद्वर्णपाण्डुचित्रासितान् स्मरेत्।
पिशङ्गपिङ्गलौ बभ्रुकर्बुरासितधूम्रभान्॥

एवं ध्यात्वा न्यसेत् अं आं इं ईं मेषाय नमः दक्षपादगुल्फे। उं ऊं ऋं वृषाय नमः दक्षजानुनि। ॠं ऌं ॡं मिथुनाय नमः दक्षवृषणे। एं ऐं कर्काय नमः दक्षकुक्षौ। ओं औं सिंहाय नमः दक्षस्कन्धे। अं अः शं षं सं हं कन्यायै नमः दक्षशिरोभागे। कं खं गं घं ङं तुलायै नमः वामशिरोभागे। चं छं जं झं ञं वृश्चिकाय नमः वामस्कन्धे। टं ठं डं ढं णं धन्विने नमः वामकुक्षौ। तं थं दं धं नं मकराय नमः वामवृषणे। पं फं बं भं मं कुम्भाय नमः वामजानुनि। यं रं लं वं क्षं मीनाय नमो वामगुल्फे। इति राशिमातृकान्यासः। पीठमातृकामन्त्रस्य मुनिच्छन्दोऽङ्गानि पूर्ववत् पीठरूपिणी सुन्दरीदेवता श्रीविद्याङ्गत्वेन विनियोगः। ध्यानं यथा—

नोच्यन्ते विस्तरभयान्नैव चावश्यकाश्च ते ।
मुद्राः प्रदर्शयेत् कृत्वा षडङ्गं प्राणसंयमम् ॥ ४९ ॥
संक्षोभद्रावणाकर्षवश्योन्मादमहाङ्कुशाः ।
खेचरी बीजयोन्याख्या मुद्रा देवीप्रिया नव ॥ ५० ॥

---

सितासितारुणा श्यामा हरित्पीतान्यनुक्रमात् ।
पुनरेतत् क्रमाद्देवि ! पञ्चाशत्स्थानसङ्ख्यये ।
पीठानीह न्यसेद्विद्वान् सर्वकामार्थसिद्धये ॥

एवं ध्यात्वा मातृकास्थानेषु मातृकावर्णपूर्वाणि पीठानि न्यसेत् तानि यथा ह्रीं श्रीं अं कामरूपपीठाय नमः। आं वाराणसीपीठाय नमः। इं नेपालपीठाय नमः। ईं पौण्ड्रवर्धनपीठाय नमः। उं काश्मीरपीठाय नमः। ऊं कान्यकुब्जपीठाय नमः। ऋं पूर्णगिरिपीठाय नमः। ॠं अर्बुदाचलपीठाय नमः। ऌं आम्रातकेश्वरपीठाय नमः। ॡं एकाम्रपीठाय नमः। एं त्रिस्रोतःपीठाय नमः। ऐं कामकोटपीठाय नमः। ओं कैलासपीठाय नमः। औं भृगुपीठाय नमः। अं केदारपीठाय नमः। अः चन्द्रपुरपीठाय नमः। कं श्रीपीठाय नमः। खं ओङ्कारपीठाय नमः। गं जालन्धरपीठाय नमः। घं मालवपीठाय नमः। ङं कुलान्तपीठाय नमः। चं देवीकोट्टकपीठाय नमः। छं गोकर्णपीठाय नमः। जं मारुतेश्वरपीठाय नमः। झं अट्टहासपीठाय नमः। ञं विरजःपीठाय नमः। टं राजगृहपीठाय नमः। ठं महापथपीठाय नमः। डं कोल्लगिरिपीठाय नमः। ढं एलापुरपीठाय नमः। णं कालेश्वरपीठाय नमः। तं जयन्तीपीठाय नमः। थं उज्जयिनीपीठाय नमः। दं चरित्रपीठाय नमः। धं क्षीरिकापीठाय नमः। नं हस्तिनापुरपीठाय नमः। पं उड्डीशपीठाय नमः। फं प्रयागपीठाय नमः। बं षष्ठीशपीठाय नमः। भं मायापुरपीठाय नमः। मं मलयपीठाय नमः। यं श्रीशैलपीठाय नमः। रं मेरुपीठाय नमः। लं गिरिपीठाय नमः। वं माहेन्द्रपीठाय नमः। शं वामनपीठाय नमः। षं हिरण्यपुरपीठाय नमः। सं महालक्ष्मीपीठाय नमः। हं उड़ियाणपीठाय नमः। ळं छायापीठाय नमः। क्षं क्षत्रपुरपीठाय नमः। इति पीठमातृकान्यासः। इति पीठान्यासः। आदिशब्दात् काममातृकादयो ज्ञेयाः ॥ ४८ ॥

एवं न्यासान् कृत्वा मुद्राः प्रदर्शयेदित्याह मुद्रा इति ॥ ४९ ॥

नवानां मुद्राणां मध्ये संक्षोभद्रावणाकर्षखेचरीबीजाख्यानां पञ्चानां लक्षणमुक्तं वक्ष्यमाणमुच्यते तत्र वश्यमुद्रालक्षणं यथा—

तती ध्यायेद्भगवतीं श्रीमत्त्रिपुरसुन्दरीम् ।
बालार्कायुततेजसां त्रिनयनां रक्ताम्बरोल्लासिनीं
नानालङ्कृतिराजमानवपुषम्बालोडुराट्शेखराम् ।
हस्तैरिक्षुधनुः सृणिं कुसुमशरपाशं मुदा बिभ्रतीं
श्रीचक्रस्थितसुन्दरीं त्रिजगतामाधारभूतां स्मरेत् ॥ ५१ ॥

---

पुटाकारौ कृत्वा तर्जन्यावङ्कुशाकृती ।
परिवर्त्तक्रमेणैव मध्यमे तदधोगते ॥
क्रमेण देवि ! तेनैव कनिष्ठानामिकादयः ।
संयोज्य निबिड़ाः सर्वा अङ्गुष्ठावयवैश्च ताः ।
मुद्रेयं परमेशानि सर्ववश्यकरी मता ॥ इति ।

उन्मादमुद्रालक्षणं यथा—

सम्मुखौ तु करौ कृत्वा मध्यमा मध्यमेऽनुगे ।
अनामिके तु सरले तदधस्तर्जनीद्वयम् ॥
दण्डाकारौ ततोऽङ्गुष्ठौ मध्यमानखदेशगौ ।
मुद्रैषोन्मादिनी नाम क्लेदिनी सर्वयोषिताम् ॥ इति ।

महाङ्कुशमुद्रालक्षणं यथा—

अस्यास्त्वनामिकायुग्ममधःकृत्वाङ्कुशाकृती ।
तर्जन्यावपि तेनैव क्रमेण विनियोजयेत् ।
इयं महाङ्कुशमुद्रा महायोन्यभिधा मता ॥ इति ।

योनिशब्देनात्र महायोनिमुद्रा तल्लक्षणं यथा—

मध्यमे कुटिले कृत्वा तर्जन्युपरिसंस्थिते ।
अनामिकामध्यगते तथैव हि कनिष्ठके ॥
सर्वा एकत्र संयोज्या अङ्गुष्ठपरिपीड़िताः ।
एषा तु प्रथमा मुद्रा महायोन्यभिधा मता ॥ इति मुद्राः ।

एवं प्रदर्श्य ध्यायेत् । ध्यानमाह बालेति । नानालङ्कृतयो विविधाभरणानि तै राजमानं शोभमानं वपुर्यस्यास्तां बाल उडुराट् चन्द्रः शेखरे यस्यास्तां सृणिमङ्कुशं कुसुमशरं पुष्पबाणाङ्कुशौ दक्षयोः इक्षुधनुःपाशौ वामयोः श्रीचक्रं वक्ष्यमाणं तत्र स्थितां सुन्दरीं त्रिपुरसुन्दरीं ध्यायेत् ॥ ५०—५१ ॥

लक्षमेकं जपेन्मन्त्रं दशांशं हयमारजैः ।
पुष्पैस्त्रिमधुरोपेतैर्जुहुयात् पूजितेऽनले ॥ ५२ ॥
श्रीचक्रस्योद्धृतिं वक्ष्ये तत्र पूजाप्रसिद्धये ।
बिन्दुगर्भं त्रिकोणन्तु कृत्वा चाष्टारमुद्धरेत ॥ ५३ ॥
दशारद्वयमन्वस्राष्टारषोड़शकोणकम् ।
त्रिरेकात्मकभूगेहवेष्टितं यन्त्रमालिखेत् ॥ ५४ ॥
तत्र पूजां प्रवक्ष्यामि पात्रस्थापनपूर्वकम् ।
वहन्नाड़ीस्थहस्तेन स्वाग्रतो यन्त्रमालिखेत् ॥ ५५ ॥
त्रिकोणमध्यषट्कोणवृत्तभूमण्डलात्मकम् ।
बालया पूजयेन्मध्यं तद्बीजैः कोणकत्रयम् ॥ ५६ ॥
अनुलोमविलोमैस्तैः षट्कोणान् पूजयेत्ततः ।
अस्त्रप्रक्षालितं मध्ये पात्राधारं निधापयेत् ॥ ५७ ॥
एकत्रिंशार्णमनुना तमाधारं समर्चयेत् ।
वह्निर्दीर्घत्रयेन्द्वाढ्यौ रमान्ते लवरादिलाः ॥ ५८ ॥
वामकर्णेन्दुसंयुक्ता रः सेन्दुरग्निमण्डला ।
वायुधर्मप्रददशकालात्मा ङेसमन्वितः ॥ ५९ ॥
वाग्बीजं कलशाधारा पवनो नमसान्वितः ।
तारादिरीरितो मन्त्रो भाजनाधारपूजने ॥ ६० ॥

---

हयमारः करवीरः ॥ ५२ ॥

श्रीचक्रमाह श्रीचक्रस्येति ॥ ५३ ॥

मन्वस्रं चतुर्दशारम् ॥ ५४ ॥

पात्रस्थापनमाह । वहदिति । वहन्ती या नाड़ी दक्षा वामा वा तद्धस्तेन स्वाग्रे त्रिकोणादियन्त्रमालिख्य ॥ ५५—५६ ॥

तत्रास्त्रक्षालितं पात्राधारं स्थापयेत् ॥ ५७ ॥

एकत्रिंशदक्षरमन्त्रेणाधारं पूजयेत् तमाह । वह्नीरेफः दीर्घत्रययुक्तः रां रीं रूं रमावरस्वरूपं अनिलो यः एते वामकर्णेन्दुयुताः ऊबिन्दुसंयुताः वायुयं: कला-

प्रादक्षिण्यादृशाग्नेयीस्तदुपर्य्यर्चयेत् कलाः ।
धूम्रार्चिरुष्मा ज्वलिनी ज्वालिनी विस्फुलिङ्गिनी ॥ ६१ ॥
सुश्रीः सुरूपा कपिला हव्यकव्यादिका वहा ।
सविन्दुयादिवर्णाद्या दशाग्नेरीरिताः कलाः ॥ ६२ ॥
कलाश्रीपादुकां पूजयामीति पदमुच्चरेत् ।
नाम्नामन्ते ततस्तासां प्राणस्थापनमाचरेत् ॥ ६३ ॥
स्वर्णादिपात्रमस्त्रेण क्षालितं तत्र विन्यसेत् ।
वियद्दीर्घत्रयेन्द्राढ्यं हमसांसवरानिलाः ॥ ६४ ॥
अर्घीशविन्दुसंयुक्ताः सेन्दुखं सूर्य्यमण्डला ।
वायुर्वसुप्रदान्ते स्यात् द्वादशान्ते कलात्मने ॥ ६५ ॥
मन्मथः कलशायेति नमोऽन्तः प्रणवादिकः ।
त्रिंशद्वर्णात्मको मन्त्रः कलशस्यार्चने मतः ॥ ६६ ॥

---

त्माङ् समन्वितश्चतुर्थ्यन्तः । वाग्वीजं ऐं पवनो यः स्वरूपमन्यत् यथा श्रीं रां रीं रुं रमलवयूं रं अग्निमण्डलाय धर्मप्रद दशकलात्मने ऐं कलशाधाराय नमः ॥ ॥ ५८—६०

प्रादक्षिण्यादिति । तदुपरि पात्राधारोपरि आग्नेयी दशकला अर्चयेत्ता एवाह धूम्रार्चिरिति ॥ ६१ ॥

हव्यकव्यादिका वहा हव्यवहा कव्यवहा च कीदृश्यस्ताः सविन्दवो यादिवर्णा आद्या यासाम् ॥ ६२ ॥

कलेति । नाम्ना धूम्रार्चिरित्यादिनामान्ते कलेत्यादिपदमुच्चरेत् यं धूम्रार्चिकलाश्रीपादुकां पूजयामि । रं उष्माकलाश्रीपादुकां पूजयामीत्यादि प्रयोगः ॥६३॥

स्वर्णादिनिर्मितं कलशं अस्त्राय फडिति प्रक्षाल्य तदाधारे न्यसेत् तं त्रिंशद्वर्णमन्त्रेणार्चयेत् । तमुद्धरति वियदिति । वियत् हकारः दीर्घत्रयाढ्यं हां हीं हूं हमस्वरूपं मांसं लः वरस्वरूपं अनिलो यः अर्घीश ऊ सेन्दु खं सविन्दु डः वायुः यः मन्मथः क्लीं स्पष्टमन्यत् यथा श्रीं हां हीं हूं हमलवयूं खं सूर्य्यमण्डलाय वसुप्रदद्वादशकलात्मने क्लीं कलशाय नम इति ॥ ६४—६६ ॥

कला द्वादशसूर्य्यस्य कलशोपरि पूजयेत्।
तपिनी तापिनी धूम्रा मरीचिर्ज्वालिनी रुचिः ॥ ६७ ॥
सषुम्ना भोगदा विश्वा बोधिनी धारिणी क्षमा।
अनुलोमविलोमाभ्यां कादिभाद्यर्णसंयुताः ॥ ६८ ॥
पूर्ववत्ताः समापूज्याः कलशे पूरयेज्जलम्।
उच्चरन् मातृकावर्णान् मूलविद्याञ्च मन्त्रवित् ॥ ६९ ॥
दन्ताक्षरेण मनुना तज्जलं पूजयेत् पुनः।
भृगुर्दीर्घत्रयेन्द्राढ्यः समलाम्बुग्निवायवः ॥ ७० ॥
अर्घीशेन्दुयुताः सेन्दुर्हंसान्ते सोममण्डला।
य कामप्रदषोड़ान्ते शकलात्मा तु ङेयुतः ॥ ७१ ॥
भृगुर्मनुर्विसर्गाढ्यो ङेयुतं कलशामृतम्।
तारादिर्हृदयान्तोऽयं मनुः पानीयपूजने ॥ ७२ ॥
चान्द्रीः कलाः स्वराद्यास्तु यजेत् षोड़श तज्जले।
अमृता मानदा पूषा तुष्टिः पुष्टीरतिर्धृतिः ॥ ७३ ॥
शशिनी चान्द्रिका कान्तिर्ज्योत्स्ना श्री प्रीतिरङ्गदा।
पूर्णापूर्णामृता चेति पूजनं पूर्ववन्मतम् ॥ ७४ ॥

---

सूर्य्यकला आह तपिनीति ॥ ६७ ॥

कीदृश्यस्ताः अनुलोमेति क्रमोत्क्रमाभ्यां ये कादयो भादयश्च वर्णाः तेषां युग्मो युग्मानि तैर्युताः कं भं तपिन्यै नमः खं बं तापिन्यै नमः गं फं धूम्रायै नमः इत्यादि ॥ ६८ ॥

पूर्ववत् तपिनीकलाश्रीपादुकां पूजयामीति प्रयोगः ॥ ६९ ॥

दन्ताक्षरेण द्वात्रिंशदक्षरेण। तमेवोद्धरति भृगुरिति। भृगुः सः दीर्घत्रययुतः सां सीं सूं अम्बु वः अग्नीरः वायुर्यः एते अर्घीशेन्दुयुताः ऊविन्दुयुताः ङेयुतमनुर्प्यन्तः। भृगुः सः मनुरौ ङेयुतं कलशामृतं कलशामृताय तारादिहृदयान्तः प्रणवादिनमोऽन्तः ॐ सां सीं सूं समलवयूं सं सोममण्डलाय कामप्रदषोड़शकलात्मने सौः कलशामृताय नमः। मन्त्रोऽयं जलार्चने ॥ ७०—७२ ॥

षोड़शस्वराद्याश्चान्द्रीः कलास्तज्जलेऽर्चयेत् ता आह अमृतेति ॥ ७३ ॥ ७४ ॥

भैरवञ्च सुधादेवीं स्वमन्त्राभ्यां यजेज्जले ।
हसक्षमलपानीय वक्षीरार्घीशविन्दुमत् ॥ ७५ ॥
वीजमानन्दभैरवान्ते वायुर्वौषट्मनुर्मतः ।
हसयोर्वैपरीत्येन वीजं पूर्वोदितं सुधा ॥ ७६ ॥
देव्यै वौषट् तयोर्मन्त्रौ दशमुन्यक्षरौ क्रमात् ।
ततो मत्स्यास्त्रकवचधेनुमुद्राः प्रदर्शयेत् ॥ ७७ ॥
संरोधिन्या संनिरुध्य मुशलं चक्रसंज्ञकम् ।
महामुद्रां योनिमुद्रां कुर्य्यात् कुम्भामृते पुनः ॥ ७८ ॥
एवं कलशमास्थाप्य तस्य दक्षिणदेशतः ।
शङ्खञ्चापि विशेषार्घ्यं स्थापयेत् पूर्ववत् क्रमात् ॥ ७९ ॥
अर्घ्ये त्रिकोणं सञ्चिन्त्य कथादिषोड़शाक्षरैः ।

---

भैरवमन्त्रमाह हसेति । हसक्षमलेति स्वरूपं पानीयं वः वक्षीरः ईरीयः अर्घीश ऊविन्दुश्च एतैर्युतं वीजं स्वरूपमन्यत् यथा हसक्षमलवयूं आनन्दभैरवाय वौषट् इत्यर्थः । सुधादेवीमन्त्रमाह हसयोरिति । पूर्वोक्तवीजे हसयोर्वैपरीत्यं सहक्षमलवयूं सुधादेव्यै वौषट् मन्त्रवरः इत्यर्थः । मत्स्येति । मत्स्यमुद्रालक्षणं यथा—

वामोपरिष्टात् संस्थाप्य दक्षहस्तं प्रसारयेत् ।
अङ्गुष्ठौ युतयोः पार्श्वे मत्स्यमुद्रेयमीरिता ॥ इति ।

अस्त्रकवचमुद्रे वक्ष्येते धेनुमुद्रोक्ता ॥ ७५—७७ ॥

संरोधिनी वक्ष्यते । मुशलमुद्रा यथा—

मुष्टीकृत्वा तु हस्ताभ्यां वामस्योपरिदक्षिणम् ।
कुर्य्यान्मुशलमुद्रेयं सर्वविघ्ननिवारिणी ॥ इति ।

चक्रमुद्रा यथा—

हस्तौ तु सम्मुखौ कृत्वा संलग्नौ सुप्रसारितौ ।
कनिष्ठाङ्गुष्ठकौ लग्नौ मुद्रैषा चक्रसंज्ञिता ॥ इति ।

महामुद्रा वक्ष्यते योनिमुद्रोक्ता ॥ ७८ ॥ ७९ ॥

अर्घ्यं इति । आदयः षोड़शस्वराः कादयो तान्ताः थादयो सान्ताः

इच्छाभ्यां शोभितं मध्ये तत्र बालां प्रपूजयेत् ॥ ८० ॥
अष्टवर्णेन मन्त्रेण देवीं ज्योतिर्मयीं यजेत् ।
तारो मायेन्दुयुक् व्योमभृगुसर्गी ससद्य सः ॥ ८१ ॥
वराही विन्दुयुक् स्वाहा वसुवर्णः स्मृतो मनुः ।
मूलं त्रिरभिजप्याथ कुर्य्यान्मुद्राः समीरिताः ॥ ८२ ॥
शङ्खार्घ्यस्थापने कार्य्ये जपः कलशनामनि ।
एवं पात्राणि संस्थाप्य गृहीत्वार्घ्योदकं ततः ॥ ८३ ॥
पूजावस्तूनि चात्मानं प्रोक्षेन्मूलमनुं स्मरन् ।
विधाय मानसीं पूजां पीठपूजामथाचरेत् ॥ ८४ ॥
मण्डूकं कालवह्नीशं तन्मूलप्रकृतिं यजेत् ।
आधारशक्तिं कूर्मञ्च शेषवाराहमेदिनीः ॥ ८५ ॥
सुधाब्धिं रत्नद्वीपञ्च स्वर्णाद्रिं नन्दनं वनम् ।
दृष्ट्वा कल्पतरून् मध्ये विचित्रानन्दभूमिकाम् ॥ ८६ ॥
श्रीरत्नमन्दिरं रत्नवेदिकां घर्मवारणम् ।
रत्नसिंहासनं तस्य पादान् धर्मादिकान् यजेत् ॥ ८७ ॥

---

तैरर्घ्यं विकीर्णं सञ्चिन्त्य कीदृशं इच्छाभ्यां मध्ये शोभितं तत्र ऐं क्लीं सौरिति बालां संपूजयेत् ॥ ८० ॥

अष्टवर्णमाह तार इति । तार ॐ माया ह्रीं इन्दुयुक् व्योम हं सर्गी भृगुः सः सद्यः ओयुतः सः सौ ॥ ८१ ॥

विन्दुयुक् वराही ऊः ऊं स्वाहा स्वरूपं समीरिता मुद्रा मत्स्याद्या नवमुद्राः कुर्यात् ॥ ८२ ॥

शङ्खस्थापनेऽर्घ्यपात्रस्थापने च कलशनाम्नि जपः शङ्खपदमर्घ्यपदञ्च प्रयोज्यम् ॥ ८३ ॥ ८४ ॥

पीठपूजामाह मण्डूकमिति । कालवह्नीशं कालाग्निरुद्रम् ॥ ८५ ॥

स्वर्णाद्रिर्मेरुः ॥ ८६ ॥

घर्मवारणं छत्रं धर्मादिकान् धर्मज्ञानवैराग्यैश्वर्य्याणि ॥ ८७ ॥

गात्राणिताश्च नञ्पूर्वान् पद्मं चानन्दकन्दकम्।
ज्ञाननालं कर्णिकाञ्च सूर्य्यसोमाग्निमण्डलम्॥ ८८॥
तारमात्रात्रयाद्यन्तत् स्ववर्णाद्यान् गुणान् यजेत्।
मात्रात्रयाद्यमात्मानमन्तरात्मानमायजेत्॥ ९०॥
तृतीयं परमात्मानं ज्ञानात्मानं परादिकम्।
मायातत्त्वकलातत्त्वविद्यातत्त्वञ्च पूजयेत्॥ ९०॥
परतत्त्वं स्ववर्णाद्यं ब्रह्मविष्णुशिवांस्ततः।
प्रेतान्तानीश्वरञ्चापि पञ्चमञ्च सदाशिवम्॥ ९१॥
सुधार्णवासनं पश्चात् यजेत् प्रेताम्बुजासनम्।
दिव्यासनं चक्रासनं सर्वमन्त्रासनं ततः॥ ९२॥
साध्यसिद्धासनं प्रार्च्य चक्रराजं प्रपूजयेत्।
पीठशक्तीस्ततः काष्ठास्विच्छाज्ञानक्रिया तथा॥ ९३॥
कामनी कामदायिन्यौ रती रतिप्रिया पुनः।
नन्दा मनोन्मनी चेति वराभयकरास्तु ताः॥ ९४॥
तत आसनमन्त्रेण पूजयेच्चक्रनायकम्।
वाक्परायै केशवोऽथ परायै च परापरा॥ ९५॥
वाली दामोदरारूढ़स्तात्तीयञ्च सदाशिवम्।

---

नञ्पूर्वान् धर्मादीन् तारमात्रात्रयाद्यं अं उं मं पूर्वं सूर्य्यं सोमाग्निमण्डलं गुणान् सत्त्वरजस्तमांसि स्ववर्णाद्यान् सं सत्त्वाय नम इत्यादि। आत्मानमित्यादीन् मात्रात्रयादीन् अं आत्मने उं अन्तरात्मने मं परमात्मने परादिकं मायावीजाद्यं ज्ञानात्मानं ह्रीं ज्ञानात्मने मयातत्त्वादीनि स्ववर्णाद्यानि मां मायातत्त्वाय नम इत्यादि। ब्रह्मविष्णुरुद्रेश्वरसदाशिवान् प्रेतशब्दान्तान् ब्रह्मप्रेताय नम इत्यादि॥ ८७—९२॥

काष्ठासु दिक्षु पीठशक्तीराह इच्छेति॥ ९३—९४॥

पीठमन्त्रमुद्धरति वागिति। वाक् ऐं केशवः क्लः॥ ९५॥

महाप्रेतं पठेत् पद्मासनाय हृदयान्तिकः ॥ ९६ ॥
एकोनत्रिंशदर्णाढ्यो मनुरासनसंज्ञकः ।
एवं पीठं समापूज्य दद्यात् पुष्पाञ्जलिं ततः ॥ ९७ ॥
प्रकटान्तं गुप्तगुप्ततरान्ते सम्प्रदाय च ।
कुलान्ते नेत्रयुग्मे षो गर्भेरेति ततः पठेत् ॥ ९८ ॥
हस्यान्ते ति रहस्यार्णां परापररहस्य च ।
संज्ञकः श्रीचक्रगतो योगिनीपादुकापदम् ॥ ९९ ॥
भ्यो नमोऽन्ता धरावाणवर्णा माया रमादिकः ।
मन्त्रं पुष्पाञ्जलेर्दाने सर्वसिद्धिप्रदायकः ॥ १०० ॥
मुद्रां त्रिखण्डां कृत्वाथ पुष्पाण्यादाय चाञ्जलौ ।
ध्यात्वा पूर्वोदितां देवीं मूलविद्यां समुच्चरेत् ॥ १०१ ॥
चैतन्यं हृत्कमलतो नासिकारन्ध्रनिर्गतम् ।
ब्रह्मरन्ध्रस्य मार्गेण योजितं पुष्पसञ्चये ॥ १०२ ॥
महापद्मवनान्तस्थे कारणानन्दविग्रहे ।
सर्वभूतरते मातरेह्येहि परमेश्वरि ! ॥ १०३ ॥
मह: पूजाभ चैतन्यसंयुक्तकुसुमाञ्जलिम् ।
श्रीचक्रराजे संयोज्य ततः श्लोकद्वयं पठेत् ॥ १०४ ॥

---

वाची यः दामोदराढ्यः ऐयुतः यै तार्त्तीय ह्सौः हृदयान्तकः नमोऽन्तः स्वरूपमन्वन् यथा ऐं परायै अपरायै अपरायै परायै ह्सौः सदाशिवमहाप्रेत-पद्मासनाय नम इति ॥ ९६ ॥

पुष्पाञ्जलिमन्त्रमाह प्रकटेति । नेत्रयुक्षेषः नि ॥ ९८ ॥

मायारमादिकः यथा ह्रीं श्रीं प्रकटगुप्तगुप्ततरसम्प्रदाय कुलनिगर्भरहस्याति-रहस्य परापर-रहस्यसंज्ञकश्रीचक्रगतयोगिनीपादुकाभ्यो नम इति । धरावाणवर्णः एकपञ्चाशदक्षरः ॥ ९९ ॥ १०० ॥

त्रिखण्डा मुद्रोक्ता ॥ १०२ ॥

देवेशि ! भक्तिसुलभे सर्वावरणसंयुते ।
यावत् त्वां पूजयिष्यामि तावत् त्वं सुस्थिरा भव ॥ १०५ ॥
इदमावाहनं प्रोक्तं ततः स्थापनमाचरेत् ।
भैरवीमन्त्रमुच्चार्य्य श्रीमत्त्रिपुरसुन्दरि ॥ १०६ ॥
चक्रेऽस्मिन् कुरु सान्निध्यं नमोऽन्तः स्थापने मनुः ।
दर्शयेत् स्थापनीं मुद्रां सन्निधिं सन्निरोधनम् ॥ १०७ ॥
सम्मुखीकरणं तत्तन्मुद्राभिर्मन्त्रविच्चरेत् ।
न्यसेत् षड़ङ्गं देव्यङ्गे सकलीकरणं त्विदम् ॥ १०८ ॥
अवगुण्ठ्यामृतीकारपरमीकरणानि च ।
तत्तन्मुद्राभिराराध्य मूलेन त्रिः प्रपूजयेत् ॥ १०९ ॥
ततः पाद्यादिकान् सम्यक् उपचारान् प्रकल्पयेत् ।
मूलमन्त्रेण पुष्पान्तान् पुनः सन्तर्पयेत्त्रिधा ॥ ११० ॥
पुष्पाञ्जलिं विधायाथ ध्यात्वा देवीं यथाविधि ।
अनुज्ञां प्रार्थयेन्मन्त्री परिवारसमर्चने ॥ १११ ॥

इति श्रीमन्महीधरविरचिते श्रीमन्त्रमहोदधौ श्रीविद्याकथनं नाम एकादशस्तरङ्गः ।

---

आवाहनमन्त्रमाह चैतन्यमिति ॥ १०२—१०६ ॥
स्थापन्याद्या मुद्रा वक्ष्यन्ते ॥ १०७—१११ ॥

इति नौकासमाख्यायां मन्त्रमहोदधिटीकायां
एकादशस्तरङ्गः ।

# द्वादशस्तरङ्गः ।

श्रीविद्याया अथो वक्ष्ये परिवारप्रपूजनम् ।
कृतेन येन मन्त्रज्ञो लभते वाञ्छिताधिकम् ॥ १ ॥
शुक्लपक्षे यजेन्नित्याः कामेश्वर्य्यादिषोड़श ।
कृष्णपक्षे विचित्राद्याः कामेश्वर्य्यवसानकाः ॥ २ ॥
षोड़शीञ्च यजेन्मध्ये वक्ष्ये तद्‌यजनक्रमम् ।
एकैकं स्वरमुच्चार्य्य नित्यामन्त्रं समुच्चरेत् ॥ ३ ॥
कामेश्वर्य्यादिनामान्ते नित्याश्रीपादुकां पठेत् ।
पूजयामि तर्पयामि हृदयं प्रोच्य पूजयेत् ॥ ४ ॥
विन्दुं परित आकल्प्य त्रिकोणे विन्दुतोऽन्तिमम् ।
दक्षहस्तेन पुष्पादि वामेनाम्भो विनिक्षिपेत् ॥ ५ ॥
केचिदाहुरिहाचार्य्या आर्द्रकेण जलं क्षिपेत् ।
वामावर्त्तेन सम्पूज्या कोणपार्श्वेषु पञ्चशः ॥ ६ ॥
नित्यामन्त्राः प्रवक्ष्यन्ते स्मृताः सर्वेष्टसिद्धिदाः ।
वाला तारो नमः कामेश्वरि इक् दीर्घजादिमः ॥ ७ ॥

---

श्रीविद्याया आवरणार्चनं वक्तुं प्रतिजानीते श्रीविद्याया इति । येन मनोरथाधिकमाप्नोति ॥ १ ॥

शुक्लपक्षे कामेश्वर्य्यादिविचित्रान्तां विन्दुपरितः कल्पिते त्रिकोणे प्रतिपाद्यं वामावर्त्तेन पञ्च संपूज्य मध्ये षोड़शीं यजेत् । तत्र विधिमाह एकैकमिति । एकैकं स्वरमुक्ता वक्ष्यमाणमेकैकं नित्यामन्त्रं प्रोच्यते ॥ २ ॥ ३ ॥

नित्यानामान्ते अमुकनित्याश्रीपादुकां पूजयामीति ॥ ४ ॥

दक्षहस्तेन पुष्पचन्दनाक्षतानि तर्पयामीति वामहस्तेन जलं चार्पयेत् ॥ ५ ॥

जलं आर्द्रकं प्राहुरिति केचित् ॥ ६ ॥

कामफलप्रदे सर्वसत्ववान्ते तु शङ्करि ! ।
सर्वान्ते तु जगद्वर्णा चोभणान्ते करोति च ॥ ८ ॥
वर्मत्रयं पञ्चबाणः प्रतिलोमा कुमारिका ।
कामेश्वरी मनुः प्रोक्तः षट्चत्वारिंशदर्णवान् ॥ ९ ॥
वाग्बीजं भग वर्णाढ्या निद्रा गे भगिनीति च ।
भगोदरीति वर्णान्ते भगमाले भगावहे ॥ १० ॥
भगगुह्ये भगान्ते स्याद्योने भगनि पातिनि ।
सर्वान्ते भगशब्दान्ते वशङ्करि भगेति च ॥ ११ ॥
रूपे नित्यपदं क्लिन्ने भगस्वाग्निः सदीपिकः ।
पे सर्व भ स्मृति दीर्घा नि मे ह्यानयवाग्नयः ॥ १२ ॥
दे रेते सु सश्लिष्टेशः पावकस्ते भगार्णकाः ।
क्लिन्ने क्लिन्नद्रवे क्लेदय द्रावय च केशवः ॥ १३ ॥
मोघे भगान्ते विच्चे च चुं चोभय सर्वसत्वान् ।
भगेश्वरिप्रान्ते वाग् व्लूं जं व्लूं च भें पुनः ॥ १४ ॥
व्लूं मों व्लूं हें पुनर्व्लूं हें क्लिन्ने सर्वाणि भम् ।
गानि मे वशमानान्ते मारुतः स्त्रीं हरेति च ॥ १५ ॥

---

नित्यामन्त्रेषु । कामेश्वरीमन्त्रमाह वाक्षेति । बाला पूर्वोक्ता तारः प्रणवः हक् इ दीर्घयासौ नादिमया ॥ ७ ॥

वर्म हुं पञ्चबाणाः द्रां द्रीं क्लीं ब्लूं सः इति कुमारिका बाला प्रतिलोमा सौः क्लीं ऐं कामेश्वरीनित्याश्रीपादुकां पूजयामि तर्पयामि नम इति ॥ ८ ॥ ९ ॥

भगमालिनीमाह वागिति । वाग्बीजं ऐं वर्णाढ्या निद्रा उयुतो भः भुः ॥ १० ॥ ११ ॥

सदीपिकः वह्निः ऊयुतो रः रूः दीर्घा स्मृतिः गा वह्नीरेफः ॥ १२ ॥

सश्लिष्टेशः पावकः एयुतो रः रे केशवः कः ॥ १३ ॥

वाक् ऐं ॥ १४ ॥

मारुतो यः ॥ १५ ॥

व्लें मायाङ्गत्रिभूवर्णा प्रोदिता भगमालिनी।
नित्यक्लिन्ने मदद्रान्ते पद्मनाभयुतं जलम् ॥ १६ ॥
मायाद्याग्निप्रियान्तेयं नित्यक्लिन्ना शिवाचरा।
वान्तो रेफासनस्तारसंयुतो कुशसम्पुटः ॥ १७ ॥
चवर्गवर्णाश्चत्वारो वह्निमन्विन्दुसंयुताः।
वह्निप्रियान्तस्ताराद्यो भेरुण्डाया दशाचरः ॥ १८ ॥
मायान्ते वह्निवासिन्यै प्रणवाद्यो नमोऽन्तिकः।
मन्त्रोऽयं वह्निवासिन्या नववर्णः समीरितः ॥ १९ ॥
तारो माया शिखी वह्नि पद्मनाभेन्दुसंयुतः।
सविसर्गो भृगुर्नित्य क्लिन्ने पश्चान्मदद्रवे ॥ २० ॥

---

माया ह्रीं स्वरूपमन्यत् षड्त्रिभूवर्णा षट्त्रिंशदुत्तरशतार्णा भगमालिनी यथा ऐं भगभुगे भगिनि भगोदरि भगमाले भगावहे भगगुह्ये भगयोने भगनिपातिनि सर्वभगवशङ्करि भगरूपे नित्यक्लिन्ने भगस्वरूपे सर्वाणि भगानि मेह्यानय वरदे रेते सुरेते भगक्लिन्ने क्लिन्नद्रवे क्लेदय द्रावय अमोघे भगविच्चे क्षुं क्षोभय सर्वसत्वान् भगेश्वरि ऐं ब्लूं जं ब्लूं भें ब्लूं मों ब्लूं हें ब्लूं हें क्लिन्ने सर्वाणि भगानि मे वशमानय स्त्रीं हर ब्लें ह्रीं भगमालिनीनित्याश्रीपादुकां पूजयामि नमः। नित्यक्लिन्नामन्त्रमाह नित्येति। पद्मनाभयुतं जलं एयुतो वः वे ॥ १६ ॥

माया ह्रीं तदाद्या वह्निप्रिया स्वाहा तदन्ता शिवाचरा एकादशार्णाः यथा ह्रीं नित्यक्लिन्ने मदद्रवे स्वाहा नित्यक्लिन्नानित्याश्रीपादुकां पूजयामि। भेरुण्डामन्त्रमाह वान्त इति। वान्तो भः रेफयुतः तारसंयुतः औङ्कारसंयुतः भ्रौं व कीदृशः कुशसंपुटः क्रोमिति बीजेनादावन्ते युतः ॥ १७ ॥

चवर्गस्य चत्वारो वर्णा वह्निमन्विन्दुसंयुता र औविन्दुयुता च्रौं छ्रौं ज्रौं झ्रौं स्वाहान्तः प्रणवाद्यो दशवर्णाः यथा ओं क्रों भ्रौं क्रों च्रौं छ्रौं ज्रौं झ्रौं स्वाहा भेरुण्डानित्याश्रीपादुकां पूजयामि ॥ १८ ॥

वह्निवासिनीमन्त्रमाह मायेति स्पष्टं यथा ओं ह्रीं वह्निवासिन्यै नमः वह्निवासिनिनित्याश्रीपादुकां पूजयामि ॥ १९ ॥

महाविद्येश्वरीमन्त्रमाह तार इति। तार ओं माया ह्रीं शिखी फः वह्निपद्मनाभेन्दुसंयुतः रएविन्दुयुतः फ्रें सविसर्गो भृगुः सः ॥ २० ॥

स्वाहान्तो मनुवर्णोऽयं महाविद्येश्वरी मनुः ।
शिवदूती चतुर्थ्यन्ता मायाद्या हृदयान्तिकाः ॥ २१ ॥
शिवदूती मनुः प्रोक्तः सप्तवर्णोऽखिलेष्टदः ।
तारः परा वर्म खेचछेचः क्षोवामकर्णयुक् ॥ २२ ॥
गगनं शशिसंयुक्तं मेरुर्भगयुतोऽद्रिजा ।
फड़न्तो द्वादशार्णोऽयं त्वरिताया मनुर्मतः ॥ २३ ॥
दामोदरो विन्दुयुतः कली शान्तीन्दुसंयुतौ ।
भृगुर्मनुविसर्गाढ्यस्त्र्यक्षरा कुलसुन्दरी ॥ २४ ॥
भैरवी बालया युक्ता प्राक् पश्चाच्च क्रमोत्क्रमात् ।
तदन्ते पञ्चबाणाः स्युर्नित्यामचतुरेरिता ॥ २५ ॥
तारो माया फान्तरेफौ भ्रिण्टीशशशिसंयुतौ ।
हंसोऽग्न्यर्घीशविन्द्वाढ्यो हृल्लेखाङ्कुशनित्यम ॥ २६ ॥

---

मनुवर्णचतुर्दशार्णः यथा ओं ह्रीं फ्रें सः नित्यक्लिन्ने मदद्रवे स्वाहा महाविद्येश्वरीनित्याश्रीपादुकां पूजयामि । शिवदूतीमन्त्रमाह शिवेति । यथा ह्रीं शिवदूत्यै नमः शिवदूतीनित्याश्रीपादुकां पूजयामि । त्वरितामन्त्रमाह तार इति तार ओं परा ह्रीं वर्म हुं खेचछेचस्त्रीस्वरूपं वामकर्णयुक् ॥ २१ ॥ २२ ॥

शशियुतश्च गगनं ऊविन्दुयुतो हः ह्रं मेरुः चः भगं ए तद्युतः चे अद्रिजा ह्रीं यथा ओं ह्रीं हुं खेचछेचः क्षों ह्रं चे ह्रीं फट् त्वरितानित्याश्रीपादुकां पूजयामि ॥ २३ ॥

कुलसुन्दरीमन्त्रमाह दामोदरेति । दामोदरो ऐ विन्दुयुत ऐं कली शान्तीन्दुसंयुतौ ईविन्दुसंयुतौ क्लीं मनुविसर्गाढ्यो भृगुः औविसर्गयुतः सः सौः यथा ऐं क्लीं सौः कुलसुन्दरीनित्याश्रीपादुकां पूजयामि ॥ २४ ॥

नित्यामन्त्रमाह भैरवीति । प्राक्क्रमात् पश्चिमादुत्क्रमात् बालया युता त्रिपुरभैरवी ततः पञ्चबाणबीजानि एष मन्त्रश्चतुर्दशार्णनित्येरिता यथा ऐं क्लीं सौः हसौः ह्क्लीं ह्स्रीं सौः क्लीं ऐं द्रीं क्लीं ब्लूं सः नित्याश्रीपादुकां पूजयामि ॥ २५ ॥

नीलपताकिनीमन्त्रमाह तार इति । तार ओं माया ह्रीं फान्तरेफौ भरौ

द्रद्रवे वर्मसृष्ट्यन्ता प्रोक्ता नीलपताकिनी।
चतुर्दशाक्षरा सर्वत्रैलोक्याकर्षणक्षमा ॥ २७ ॥
वराहहंसचण्डीशजनार्दनकृशानवः।
पद्मनाभेन्दुसंयुक्ता विजयायै नमोऽन्तिकः ॥ २८ ॥
विजयाया मनुः प्रोक्तः सप्तवर्णोऽखिलार्थदः।
ताराद्यौ भृगुखड्गीशौ ङेन्ता स्यात् सर्वमङ्गला ॥ २९ ॥
नमोऽन्तो मनुराख्यातो नवार्णः सर्वमङ्गलः।
तारो नमो भगवति ज्वालामालिनि तत्परम् ॥ ३० ॥
देव्यन्ते सर्वभूतान्ते संहारान्ते तु कारिके।
जातवेदसि वर्णान्ते ज्वलन्ति प्रज्वलन्ति च ॥ ३१ ॥
ज्वलद्वयं प्रज्वलान्ते कवचं पावकद्वयम्।
वर्माख्रान्तोदिता ज्वालामालिन्यष्टयुगाक्षरा ॥ ३२ ॥

---

तौ भिण्टीशशशिसंयुतौ एविन्दुयुतौ फ्रें हंसः सः अग्न्यर्घीशविन्द्वाढ्यः र ऊविन्दुयुतः स्रूं हृल्लेखा ह्रीं षड्गुः क्रों नित्यमदद्रवे स्वरूपं वर्म हुं सृष्टिः क्रों यथा ऐं क्लीं फ्रें स्रूं ह्रीं क्रों नित्यमदद्रवे हुं क्रों नीलपताकिनीनित्याश्रीपादुकां पूजयामि ॥ २७ ॥

विजयामन्त्रमाह वराहेति। वराहो हः हंसः सः चण्डीशः खः जनार्दनः फः कृशानुरः एते पद्मनाभेन्दुसंयुक्ताः एविन्दुयुताः एतत् कूटं स्वरूपमन्यत् यथा ह्स्ख्फ्रें विजयायै नमः विजयाश्रीपादुकां पूजयामि ॥ २८ ॥

सर्वमङ्गलामन्त्रमाह ताराद्याविति। भृगुखड्गीशौ स्त्रौं ताराद्यौ ओंयुतौ स्त्रौं ङेन्ता चातुर्थ्येकवचनान्ता यथा स्त्रौं सर्वमङ्गलायै नमः सर्वमङ्गलानित्याश्रीपादुकां पूजयामि ॥ २९ ॥

ज्वालामालिनीमन्त्रमाह तार इति। तार ओं स्वरूपमये ॥ ३० ॥

कवचं हुं पावकद्वयं यथा रं रं वर्माख्रान्ता हुं फडन्ता अष्टयुगाक्षर अष्टचत्वारिंशद्वर्णा ज्वालामालिनी उदिता यथा ओं नमो भगवति ज्वालामालिनि देवि सर्वभूतसंहारकारिके। जातवेदसि ज्वलन्ति प्रज्वलन्ति ज्वल ज्वल प्रज्वल हुं रं रं हुं फट् ज्वालामालिनीनित्याश्रीपादुकां पूजयामि ॥ ३१ ॥ ३२ ॥

कूर्मः क्रोधीशमन्विन्दुसंयुतो ह्येकवर्णकः ।
विचित्राया मनुश्चैता नित्या पञ्चदशोदिताः ॥ ३३ ॥
मूलेन षोड़शीं मध्ये यजेत्त्रिपुरसुन्दरीम् ।
विन्दुत्रिकोणयोर्मध्ये त्रिभङ्गीभिर्गुरून् यजेत् ॥ ३४ ॥
दिव्यौघाश्चापि सिद्धौघा मानवौघास्त्रिधा हि ते ।
परप्रकाशः प्रथमस्ततःपरं शिवाभिधः ॥ ३५ ॥
परशक्तिश्च कौलेशः शुक्ला देवी कुलेश्वरः ।
कामेश्वरीति सप्तैव दिव्यौघा गुरवः पराः ॥ ३६ ॥
भोगः क्रीड़श्च समयः सहजश्च परावराः ।
सिद्धौघगुरवश्चैते चत्वारः परिकीर्त्तिताः ॥ ३७ ॥
गगनो विश्वविमलौ मदनो भुवनस्तथा ।
लीला स्वात्माप्रियेत्यष्टौ मानवा अपरा मताः ॥ ३८ ॥
आनन्दनाथा शब्दान्ताः पुरुषा गुरवः स्मृताः ।
अम्बान्तास्तु स्त्रियः कार्य्याः सर्वसिद्धिप्रदायिकाः ॥ ३९ ॥
परशक्तिस्तथा शुक्ला देवी कामेश्वरीति च ।
तिस्रः स्त्रियस्तु दिव्येषु प्रिया लीलेति मानवे ॥ ४० ॥

---

विचित्रामन्त्रमाह कूर्मेति । कूर्मो चकारः क्रोधीशः क मन्विन्दुयुतो औविन्दुयुतः चे् क्रौं अत्र प्रथमश्चकारः यथा चे् क्रौं विचित्रानित्याश्रीपादुकां पूजयामि । एता पञ्चदशनित्याः ॥ ३३ ॥

एतास्त्रिकोणे पञ्चदश संपूज्य विन्दौ मूलेन षोड़शीं यजेत् तथा ऐं मूलं महात्रिपुरसुन्दरीनित्याश्रीपादुकां पूजयामि तर्पयामि नमः । विन्दुत्रिकोणयोर्मध्ये विभक्तिभिः पंक्तित्रयेण गुरुन् यजेत् ॥ ३४ ॥

ते त्रिविधा इत्याह दिव्यौघा इति । दिव्यौघानाह परप्रकाश इति ॥३५॥३६॥
सिद्धौघानाह भोग इति ॥ ३७ ॥ ३८ ॥

पुमांसो गुरव आनन्दनाथशब्दान्ताः कार्य्याः स्त्रियो गुरवस्तु अम्बाशब्दान्ताः ॥ ३९ ॥

कतिस्त्रियः कति वा नरा इत्यत्राह परशक्तिरिति । दिव्यगुरुषु परशक्ति-

श्रीपादुकां पूजयामीत्यन्ते सर्वत्र योजयेत् ।
ततो बिन्दोश्चतुर्दिक्षु यजेदाम्नायदेवताः ॥ ४१ ॥
पूर्वं दक्षिणमाम्नायं पश्चिमञ्चोत्तरन्तथा ।
ततः प्रपूजयेद्दिक्षु मध्ये च पञ्चपञ्चिकाः ॥ ४२ ॥
आद्या मध्ये चतस्रोऽन्याः पूर्वाद्याशासु पूजयेत् ।
पञ्चस्वपि गणेष्वत्र श्रीविद्याद्याः प्रकीर्त्तिताः ॥ ४३ ॥
श्रीविद्या च तथा लक्ष्मीर्महालक्ष्मीस्तृतीयकाः ।
त्रिशक्तिः सर्वसाम्राज्या पञ्चलक्ष्म्यः प्रकीर्त्तिताः ॥ ४४ ॥
श्रीविद्या च परज्योतिः परनिष्कलशाम्भवी ।
अजया मातृका चेति पञ्चकोशा इमे स्मृताः ॥ ४५ ॥
श्रीविद्या त्वरिता चैव पारिजातेश्वरी पुनः ।
त्रिपुटा पञ्चबाणेशी पञ्चकल्पलता इमाः ॥ ४६ ॥
श्रीविद्यामृतपीठेशी सुधा श्रीरमृतेश्वरी ।
अन्नपूर्णेति विख्याताः पञ्चैताः कामधेनवः ॥ ४७ ॥
श्रीविद्या सिद्धलक्ष्मीश्च मातङ्गी भुवनेश्वरी ।

---

प्रकाशदेवीकामेश्वर्य्यंक्षिस्तः स्त्रियश्चत्वारोऽन्ये पुमांसः मानवगुरुषु प्रियालीले द्वे स्त्रियौ षडन्ये नराः सिद्धगुरुषु चत्वारोऽपि पुमांस एव । तथाच प्रयोगः । परप्रकाशानन्दनाथश्रीपादुकां पूजयामि नमः परशक्त्यं वा श्रीपादुकां पूजयामीत्यादि ॥ ४० ॥

बिन्दोः प्रागादिदिक्षु पूर्वाम्नायदेवताश्रीपादुकां पूजयामि ॥ ४१ ॥

दक्षिणाम्नायदेव इत्यादि चतुर आम्नायान् पूजयेत् । ततः पञ्चपञ्चिकाः पूजयेत् ॥ ४२ ॥

आद्यां मूर्धिन मध्ये द्वितीयाद्या दिक्षु स्वस्वमन्त्रैः एवमन्याः पञ्चिकाः ॥ ४३ ॥
तासु प्रथमपञ्चिकानाड श्रीविद्येति । आद्यपञ्चकं लक्ष्मीसंज्ञम् ॥ ४४ ॥
द्वितीयपञ्चकं कोशसंज्ञम् ॥ ४५ ॥
तृतीयपञ्चकं कल्पलता संज्ञम् ॥ ४६ ॥
चतुर्थपञ्चकं कामधेनुसंज्ञम् ॥ ४७ ॥

वाराही च स्मृतश्चैतन्मुनिभी रत्नपञ्चकम् ॥ ४८ ॥
श्रीविद्यां मूलमन्त्रेण मध्ये संयोज्य पूजयेत् ।
क्रमतोऽन्याश्चतुर्दिक्षु तासां मन्त्रान् क्रमान् ब्रुवे ॥ ४९ ॥
वकेशो वह्निमारूढो वामनेत्रेन्दुसंयुतः ।
लक्ष्मीमन्त्रोऽयमेकार्णस्तेन लक्ष्मीं प्रपूजयेत् ॥ ५० ॥
तारो पद्मा शक्तिपद्मा कमले कमलालये ।
प्रसीद युगलं लक्ष्मीर्माया पद्मा भुवो महा ॥ ५१ ॥
लक्ष्मीश्च नमोऽन्तो मन्त्रोऽयमष्टाविंशतिवर्णवान् ।
पूज्यानेन महालक्ष्मीः श्रीविद्या दक्षिणे स्थिता ॥ ५२ ॥
लक्ष्मीर्माया मनोजन्मा त्रिशक्तिमनुरीरितः ।
त्रिवर्णोऽनेन सम्पूज्या त्रिशक्तिः पश्चिमे स्थिता ॥ ५३ ॥
भृग्वाकाशकला मायारूढा पद्मालया पुटाः ।
त्रिवर्णाः सर्वसाम्राज्या तां यजेदुत्तरस्थिताम् ॥ ५४ ॥

---

पञ्चमपञ्चकं रत्नसंज्ञकम् ॥ ४८ ॥

तासां क्रमान्मन्त्रान् वदति तत्राद्यपञ्चके मूलेन श्रीविद्या मध्ये पूज्या दिक्षु लक्ष्म्याद्याः ॥ ४९ ॥

तत्र लक्ष्मीमन्त्रमाह वकेश इति । वकेशः सः वह्निरेफस्तद्युतं वामनेत्रमिन्दुर्बिन्दुस्तद्युतश्च तेन श्रीं लक्ष्मीपादुकां पूजयामि इति पूर्वे ॥ ५० ॥

महालक्ष्मीमन्त्रमाह तारेति । तार ओं पद्मा श्रीं शक्तिः ह्रीं पद्मा श्रीं लक्ष्मीः श्रीं माया ह्रीं पद्मा श्रीं भुव ओं स्वरूपं शेषे यथा ओं श्रीं ह्रीं श्रीं कमले कमलालये प्रसीद प्रसीद श्रीं ह्रीं श्रीं ओं महालक्ष्म्यै नमः महालक्ष्मीश्रीपादुकां पूजयामि इति दक्षिणे ॥ ५१ ॥ ५२ ॥

त्रिशक्तिमन्त्रमाह । लक्ष्मीः श्रीं माया ह्रीं मनोजन्मा क्लीं यथा श्रीं ह्रीं क्लीं त्रिशक्तिश्रीपादुकां पूजयामि नमः पश्चिमे ॥ ५३ ॥

सर्वसाम्राज्यामन्त्रमाह । भृग्विति । भृगुः सः आकाशो हः कला एते मायास्थिताः कूटं पद्मालया श्रीं तेन पुटाः यथा श्रीं सहक्लह्रीं श्रीं सर्वसाम्राज्या-पादुकां पूजयामि नमः उत्तरे ॥ ५४ ॥

तारो माया ततो हंसः सोऽहं वह्निप्रियान्तिमः।
अष्टवर्णाः परं ज्योतिर्मनुस्तां पूर्वतो यजेत् ॥ ५५ ॥
तारस्तु निष्कला देवी तेन तां दक्षिणे यजेत्।
नभः सबिन्दुः सर्गाढ्यो भृगुहंसर्णाजपाः स्मृताः ॥ ५६ ॥
अकारादिक्षकारान्ता वर्णाः प्रोक्ता तु मातृकाः।
प्रणवो भुवनेशानी हुं खेचछेक्षः पदं पुनः ॥ ५७ ॥
स्त्रीं हुं मेरुः सक्षिरण्टीशो मायास्त्रं द्वादशाक्षरः।
त्वरिताया मनुः प्रोक्तस्तेन तां पुरतोऽर्चयेत् ॥ ५८ ॥
आकाशहंसक्रोधीशपिनाकीशहराधराः।
सेन्दवस्तारमायाभ्यां संपुटाश्च सरस्वती ॥ ५९ ॥
ङेन्तो हृदन्तो मन्त्रोऽयं प्रोक्त एकादशाक्षरः।
अनेन पारिजातेशीं दक्षिणस्यां प्रपूजयेत् ॥ ६० ॥

---

द्वितीयपङ्क्तौ परज्योतिर्मन्त्रमाह तार इति। तार ओं माया ह्रीं यथा ओं ह्रीं हंसः सोऽहं स्वाहा परं ज्योतिः श्रीपादुकां पूजयामि नमः पूर्वे ॥ ५५ ॥

परनिष्कलशाम्भवीमन्त्रमाह तार इति। प्रणवस्तन्मन्त्रः यथा ओं परनिष्कलशाम्भवीश्रीपादुकां पूजयामि नमः दक्षिणे। अजपामाह नभ इति। नभो हः भृगुः सः यथा हंसः अजपाश्रीपादुकां पूजयामि नमः पश्चिमे ॥ ५६ ॥

आदिक्षान्तवर्णा तु मातृका अं आं इं ईं उं ऊं ऋं ॠं ऌं ॡं एं ऐं ओं औं अं अः कं खं गं घं ङं चं छं जं झं ञं टं ठं डं ढं णं तं थं दं धं नं पं फं बं भं मं यं रं लं वं शं षं सं हं ळं क्षं मातृकाश्रीपादुकां पूजयामि नमः उत्तरे। कल्पलतापङ्क्तौ त्वरितामन्त्रमाह प्रणव इति। भुवनेशिनी ह्रीं ॥ ५७ ॥

मेरुः क्षः सक्षिरण्टीशः एयुतः क्षे यथा ओं ह्रीं हुं खेचछेक्ष स्त्रीं हुं क्षे ह्रीं फट् त्वरिताश्रीपादुकां पूजयामि नमः पुरतः ॥ ५८ ॥

पारिजातेश्वरीमन्त्रमाह आकाशेति। आकाशो हः हंसः स क्रोधीशः कः पिनाकीशो लः हरस्वरूपं अधर ऐ एते सबिन्दवः कूटं तारमायासंपुटं यथा ओं ह्रीं ह्रीं हसकल् ह्रैं ह्रीं ओं सरस्वत्यै नमः पारिजातेश्वरीश्रीपादुकां पूजयामि नमः दक्षिणे ॥ ५९ ॥ ६० ॥

रमामायामनोभूभिस्त्रिवर्णा त्रिपुटोदिता।
तां यजेत् पश्चिमे भागे बाणेशीमुत्तरे पुनः॥ ६१ ॥
द्रां द्रीं क्लीं ब्लूं भृगुः सर्गी सोदिता पञ्चवर्णका।
वाक्कामौ भृगुरौ सर्गयुक्तो मन्त्रस्त्रिवर्णकः॥ ६२ ॥
प्रोदितोऽमृतपीठेश्यास्तेन तां पूर्वतो यजेत्।
नभो भृग्वग्नयो वामनेत्राद्याश्चन्द्रभूषिताः॥ ६३ ॥
सार्णाद्या भुवनेशी श्रीः कलाद्या भुवनेश्वरी।
सुधा श्रीमन्त्र उदितो वेदार्णस्तां यजेदवाक्॥ ६४ ॥
सकारोऽनुग्रही सर्गी कामो वागस्त्रपूर्विका।
त्रिवर्णमनुना पश्चात् पूजयेदमृतेश्वरीम्॥ ६५ ॥
विंशत्यर्णान्नपूर्णोक्ता तरङ्गे नवमे मया।
तन्मन्त्रेणोत्तरस्यान्तु पूजयेदन्नदायिनीम्॥ ६६ ॥

---

त्रिपुटामन्त्रमाह रमेति। मनोभूः क्लीं यथा श्रीं ह्रीं क्लीं त्रिपुटाश्रीपादुकां पूजयामि नमः पश्चिमे। द्रां द्रीं क्लीं ब्लूं सः पञ्चबाणेशीश्रीपादुकां पूजयामि नमः उत्तरे। कामधेनुपञ्चकेऽमृतपीठेशीमन्त्रमाह वागिति। यथा ऐं क्लीं सौः अमृतपीठेशीश्रीपादुकां पूजयामि नमः पूर्वे॥ ६१॥ ६२॥

सुधाश्रीमन्त्रमाह नभ इति। नभो हः भृगुः सः अग्निः रः एते वामनेत्रं ईकार-सद्युताः सबिन्दवश्च ह्स्रीं॥ ६३॥

साद्या भुवनेशानी स्ह्रीं श्रीकलाद्या भुवनेश्वरी क्लीं वेदार्णश्चतुर्वर्णोऽयं सुधा-श्रीमन्त्रः तेन तां अवाक् दक्षिणे यजेत् यथा ह्स्रीं स्ह्रीं श्रीं क्लीं सुधाश्रीपादुकां पूजयामि नमः॥ ६४॥

अमृतेश्वरीमाह सकार इति। अनुग्रही औयुतः अस्त्रपूर्विका वाक् फ्युतं वाग्बीजं यथा सौः क्लीं ऐं अमृतेश्वरीश्रीपादुकां पूजयामि नमः पश्चिमे॥ ६५॥

अन्नपूर्णा नवमे तरङ्गे उक्ता तेनोत्तरे तां यजेत् यथा ॐ ह्रीं श्रीं क्लीं नमो भगवति माहेश्वरि अन्नपूर्णे स्वाहा अन्नपूर्णाश्रीपादुकां पूजयामि नमः उत्तरे॥ ६६॥

वाणीबीजं ततः क्लिन्ने कामबीजं मदद्रवे ।
कुले वराहः हंसाग्निवर्णा औसर्गसंयुताः ॥ ६७ ॥
एकादशाक्षरो मन्त्रः सिद्धलक्ष्म्याः समीरितः ।
तेन तां पूजयेत् पूर्वे मातङ्गीं दक्षिणे पुनः ॥ ६८ ॥
वाक्कामः सौः पुनर्वाणी माया लक्ष्मीः भ्रुवो नमः ।
भगवत्यन्ते मातङ्गेश्वरि सर्वजनार्णकाः ॥ ६९ ॥
मनोहरिपदं प्रोच्य सर्वराजवशङ्करि ।
सर्वान्ते सुखरञ्जीति मेषो नेत्रसमन्वितः ७० ॥
सर्वलोकवशं पश्चात् करि मायां रमाङ्गजः ।
सर्वस्त्रीपुरुषान्ते तु वशङ्करिपदं वदेत् ।
सर्वदुष्टमृगप्रान्ते वशङ्करि पुनः पदम् ।
वाक् त्रिसप्ततिवर्णोऽयं मातङ्ग्या उदितो मनुः ॥ ७१ ॥
गगनं वह्निना वामनेत्रेन्दुभ्यां समन्वितम् ।
भुवनेशी मनुः प्रोक्तस्तेन तां पश्चिमे यजेत् ॥ ७२ ॥

---

रत्नपञ्चके सिद्धलक्ष्मीमन्त्रमाह वाणीति । वाणीबीजं ऐं कामबीजं क्लीं वराह हं साग्निवर्णा हसराः औसर्गयुता हे्सौः स्वरूपमन्यत् यथा ऐं क्लिन्ने क्लीं मदद्रवे कुले हेसौः सिद्धलक्ष्मीश्रीपादुकां पूजयामि नमः पूर्वे ॥ ६७ ॥

दक्षिणे मातङ्गी ॥ ६८ ॥

तन्मन्त्रमाह वागिति । वाक् ऐं काम क्लीं वाणी ऐं माया ह्रीं लक्ष्मीः श्रीं भ्रुव ओं ॥ ६९ ॥

नेत्रसमन्वितो मेषो नः नो रमा श्रीं मङ्गजः क्लीं स्वरूपमन्यत् यथा ऐं क्लीं सौः ऐं ह्रीं श्रीं ओं नमो भगवति मातङ्गेश्वरि सर्वजनमनोहरि सर्वराजवशङ्करि सर्वसुखरञ्जिनि सर्वलोकवशङ्करि ह्रीं श्रीं क्लीं सर्वस्त्रीपुरुषवशङ्करि सर्वदुष्टमृगवशङ्करि नमः मातङ्गीश्रीपादुकां पूजयामि इति ॥ ७० ॥ ७१ ॥

भुवनेश्वरीमाह गगनमिति । गगनं हः वह्निना रेफेण वामनेत्रेन्दुभ्यां ईबिन्दुभ्यां युतं यथा ह्रीं भुवनेश्वरीश्रीपादुकां पूजयामि नमः पश्चिमे ॥ ७२ ॥

तरङ्गे दशमे प्रोक्तो वेदरुद्राक्षरो मनुः ।
वाराह्यास्तेन तां देवीं वामभागे समर्चयेत् ॥ ७३ ॥
पञ्चिका एवमाराध्य दर्शनानि यजेच्च षट् ।
आद्यं मध्ये चतुर्दिक्षु चत्वारि पुरतोऽन्तिमम् ॥ ७४ ॥
शैवं शाक्तं तथा ब्राह्मं वैष्णवं सौरसौगतम् ।
दर्शनान्येवमाराध्य मूलेन त्रिः प्रतर्पयेत् ॥ ७५ ॥
अङ्गुष्ठानामिकाभ्यान्तु यच्छेत् पुष्पन्तु मुद्रया ।
ज्ञानाख्यया सा चाङ्गुष्ठतर्जनीयोगतो मता ॥ ७६ ॥
एवं सम्पूज्य विन्दुस्थां श्रीमत्त्रिपुरसुन्दरीम् ।
ततोऽङ्गाद्यावृतीनान्तु पूजनं सम्यगाचरेत् ॥ ७७ ॥
भूविम्बाद्विन्दुपर्य्यन्तं नवावृतिसमर्चनम् ।
मायाश्रीवीजपूर्वाणां नाम्नामन्ते ति योजयेत् ॥ ७८ ॥
श्रीपादुकां पूजयामीत्येतद्वर्णाश्च सर्वतः ।
अग्नीशासुरवायव्यपुरोदिक्ष्वङ्गपूजनम् ॥ ७९ ॥

---

दशमे तरङ्गे वेदरुद्राक्षरश्चतुर्दशोत्तरशतार्णो वाराहीमनुरुक्तस्तेन तां वामभागे यजेत् यथा श्रीं ऐं ग्लौं नमो भगवति वार्त्तालि वाराहि वाराहमुखि ऐं ग्लौं ऐं अन्धे अन्धिनि नमः रुन्धे रुन्धिनि नमः जम्भे जम्भिनि नमः मोहे मोहिनि नमः स्तम्भे स्तम्भिनि नमः ऐं ग्लौं ऐं सर्वदुष्टप्रदुष्टानां सर्वेषां सर्ववाक्चित्तचक्षुर्मुखगतिजिह्वास्तम्भं कुरु कुरु शीघ्रं वशं कुरु कुरु ऐं ग्लौं ऐं ठः ठः ठः ठः हुं फट् स्वाहा वाराहीश्रीपादुकां पूजयामि नमः वामभागे ॥ ७३ ॥

एवं पञ्चपञ्चिकाः सम्पूज्य दर्शनानि यजेत् अग्रे षट् स्पष्टम् ॥ ७४ ॥

शैवदर्शनश्रीपादुकां पूजयामि शाक्तदर्शनश्रीपादुकां पूजयामि इत्यादि ॥ ७५ ॥

ज्ञानमुद्रामाह सा चेति । अङ्गुष्ठतर्जनीयोगे ज्ञानमुद्रा ॥ ७६ ॥ ७७ ॥

भूविम्बमारभ्य विन्दुपर्य्यन्तं प्रतिलोमेन नवावरणपूजा आवरणदेवतानामादौ मायाश्रीवीजे अन्ते तु श्रीपादुकां पूजयामीति प्रयोगः ॥ ७८ ॥

आग्नेये हृद् ईशे शिरः नैरृत्ये शिखा वायौ कवचं पुरो नेत्रं दिक्ष्वस्त्रं यथा ह्रीं श्रीं क्लीं ऐं सौः हृदयं वाग्देवताश्रीपादुकां पूजयामि ॥ ७९ ॥

भूबिम्बस्याऽधरेखायां दिक्ष्वूर्ध्वोऽधः क्रमात् यजेत् ।
सिद्धिर्दशाणिमाख्याद्या महिमा लघिमेरिता ॥ ८० ॥
वशित्वसिद्धिः प्राकाम्या भुक्तिरिच्छाष्टमी पुनः ।
प्राप्तिश्च सर्वकामाख्या सिद्धयो दश कीर्त्तिताः ॥ ८१ ॥
तप्तहेमसमानाभाः पाशाङ्कुशधराः शुभाः ।
साधकेभ्यः प्रयच्छन्ति रत्नौघान् ताः विचिन्तयेत् ॥ ८२ ॥
भूपुरे मध्यरेखायां पश्चिमाद्यर्चयेदिमाः ।
ब्राह्मीं माहेश्वरीञ्चापि कौमारीं वैष्णवीमपि ॥ ८३ ॥
वाराहीञ्च तथेन्द्राणीं चामुण्डामथ सप्तमीम् ।
महालक्ष्मीमिमां ध्यायेत् सर्वाभरणसंयुताम् ॥ ८४ ॥
विद्याशूलं शक्तिचक्रे गदां वज्रं हि दण्डकम् ।
पद्मं करेण दधत्यः सर्वाभीष्टप्रदायिकाः ॥ ८५ ॥
तस्य तृतीयरेखायां दशमुद्राः प्रपूजयेत् ।
क्षोभणद्रावणाकर्षवश्योन्मादमहाङ्कुशाः ॥ ८६ ॥
खेचरीबीजयोनि च त्रिखण्डेति स्मृता इमाः ।
एवं भूबिम्बमाराध्य क्षोभमुद्रां प्रदर्शयेत् ॥ ८७ ॥

---

त्रिरेखं भूगृहमस्ति यस्याधररेखायां पूर्वादिषु ऊर्ध्वमधश्चाणिमाद्या दशसिद्धिर्यजेत् ह्रीं श्रीं अणिमासिद्धिश्रीपादुकां पूजयामीत्यादि प्रयोगः ॥ ८० ॥ ८१ ॥

तासां ध्यानमाह दक्षेऽङ्कुशधराः वामे पाशधराः साधकेभ्यो रत्नसमूहान् ददतीति ॥ ८२ ॥

भूगृहद्वितीयरेखायां पश्चिमादिब्राह्म्याद्या अष्टमातॄर्यजेत् ह्रीं श्रीं ब्राह्मीमातृश्रीपादुकां पूजयामि इत्यादि ॥ ८३ ॥

तासां ध्यानमाह इमा इति ॥ ८४ ॥

क्रमाद्विद्यादीन्यायुधानि दधती ॥ ८५ ॥

तस्य भूपुरस्य तृतीयरेखायां दिक्षु ऊर्ध्वमधश्च दश क्षोभणाद्या दशमुद्रा

त्रैलोक्यमोहने चक्रे योगिन्यः प्रकटा इमाः ।
पूजितास्तर्पिताः सन्तु खेष्टदा इति प्रार्थयेत् ॥ ८८ ॥
विन्दौ पुष्पाञ्जलिं दत्त्वा मूलेनान्यावृतिं यजेत् ।
षोड़शारे पश्चिमादिविलोमेन क्रमादिमाः ॥ ८९ ॥
कामाकर्षणिकी त्वाद्या बुध्याकार्षणिका ततः ।
अहङ्काराकर्षिणी च शब्दाकर्षणिका पुनः ॥ ९० ॥
स्पर्शाकर्षणिका तद्वद्रूपाकर्षणिकापि च ।
रसाकर्षणिका चान्या गन्धाकर्षणिका तथा ॥ ९१ ॥
चित्ताकर्षणिका चापि धैर्य्याकर्षणिका परा ।
नामाकर्षणिका चापि वीजाकर्षणिका तथा ॥ ९२ ॥
अमृताकर्षणिकान्या स्मृत्याकर्षणिका तथा ।
शरीराकर्षणिका चैवात्माकर्षणिका परा ॥ ९३ ॥
सर्वाशापूरके चक्रे षोड़शस्वरसंयुते ।
गुप्ता एतास्तु योगिन्यः पूजिताः सन्त्विदं वदेत् ॥ ९४ ॥
दर्शयेत् द्राविणीं मुद्रां द्वितीयावरणार्चने ।
काद्यष्टवर्गसंयुक्तेऽष्टारे पूज्या इमाः पुनः ॥ ९५ ॥
पूर्वादिष्वनुलोमेन बन्धूककुसुमप्रभाः ।
अनङ्गकुसुमा त्वाद्या द्वितीयानङ्गमेखला ॥ ९६ ॥

---

यजेत् क्लीं श्रीं चोभणमुद्राश्रीपादुकां पूजयामि। मुद्राणां लक्षणान्युक्तानि एवं प्रथमावरणमाराध्य ॥ ८६ ॥ ८७ ॥

त्रैलोक्यमोहने चक्रे इमाः प्रकटयोगिन्यः पूजितास्तर्पिता इष्टदाः सन्त्विति प्रार्थ्य मूलेन विन्दौ पुष्पाञ्जलिं दद्यात् ततः षोड़शारे विलोमेन पश्चिमादिषोड़श-कामाकर्षण्याद्याः शक्तीः पूजयेत् क्लीं श्रीं कामाकर्षणीशक्तिश्रीपादुकां पूजयामि इत्यादि एवं द्वितीयावरणं सम्पूज्य सर्वाशापूरके च एताः षोड़शगुप्तयोगिन्यः पूजितास्तर्पिताः सन्त्वित्युक्ता ॥ ८८—९४ ॥

द्राविणीमुद्रां दर्शयेत् सा गदिता ॥ ९५ ॥

अनङ्गमदना तद्वदनङ्गमदनातुरा।
अनङ्गरेखा चानङ्गवेगानङ्गाङ्कुशा पुनः॥ ९७॥
अनङ्गमालिनीत्यष्टौ पाशाङ्कुशलसत्कराः।
सर्वसंक्षोभणे चक्रे देव्यो गुप्ततराभिधाः॥ ९८॥
पूजिताः सन्त्विति प्रोच्याकर्षमुद्रां प्रदर्शयेत्।
चतुर्दशारे सम्पूज्याः कादिगन्तार्णराजिते॥ ९९॥
इन्द्रगोपनिभा रम्या मदोन्मत्ताः सुभूषणाः।
बिभ्रत्यो दर्पणं पानपात्रं पाशाङ्कुशावपि॥ १००॥
पश्चिमादिविलोमेन चतुर्थावरणस्थिताः।
सर्वसंक्षोभणी पूर्वा सर्वविद्रावणी परा॥ १०१॥
सर्वाकर्षणिका चान्या सर्वाह्लादकरी पुनः।
सर्वसम्मोहिनी चापि सर्वस्तम्भनकारिणी॥ १०२॥
सर्वजृम्भनिका नामाष्टमी सर्ववशङ्करी।
सर्वरञ्जनिका चापि सर्वोन्मादनिका तथा॥ १०३॥
सर्वार्थसाधनी चाथ सर्वसम्पत्तिरूपिणी।
सर्वमन्त्रमयी चान्या सर्वद्वन्द्वक्षयङ्करी॥ १०४॥
मूले पुष्पाञ्जलिं दत्त्वा वश्यमुद्रां प्रदर्शयेत्।
सर्वसौभाग्यदे चक्रे सम्प्रदायाभिधा इमाः॥ १०५॥

---

षटवर्गान्वितेऽष्टारे पूर्वाद्यनुलोमेनानङ्गकुसुमाद्या पूजयेत् ऐं श्रीं अनङ्गकुसुमा-श्रीपादुकां पूजयामि॥ ९६॥ ९७॥

एवं तृतीयावरणं सम्पूज्य सर्वसंक्षोभणे चक्रे एता गुप्ततरयोगिन्यः पूजिताः सन्तु इत्युक्त्वाकर्षणमुद्रां दर्शयेत् ततश्चतुर्थावरणे चतुर्दशारे कादिचतुर्दशार्णयुते॥ ९८॥ ९९॥

इन्द्रगोपेत्याद्युक्तरूपा दर्पणपाशधरवामकराः पानपात्राङ्कुशधरदक्षकराः॥१००॥

सर्वसंक्षोभण्याद्याश्चतुर्दशशक्तयः शक्तिपदादिकाः पश्चिमादिविलोमतः पूज्याः ऐं श्रीं सर्वसंक्षोभणीशक्तिश्रीपादुकां पूजयामि इत्यादि॥ १०१॥

योगिन्यः पूजितास्तृप्ता मङ्गलानि दिशन्तु मे।
सम्प्रार्थ्येति दशारे वादिभान्तार्णभूषिते ॥ १०६ ॥
सम्पूज्या दशयोगिन्यो जवापुष्पसमप्रभाः।
स्फुरन्मणिविभूषाढ्याः पाशाङ्कुशलसत्कराः ॥ १०७ ॥
पश्चिमादिविलोमेन साधकाभीष्टसिद्धिदाः।
सर्वसिद्धिप्रदा पूर्वा सर्वसम्पत्प्रदा ततः ॥ १०८ ॥
सर्वप्रियङ्करी चान्या सर्वमङ्गलकारिणी।
सर्वकामप्रदा पश्चात् सर्वदुःखविमोचिनी ॥ १०९ ॥
सर्वमृत्युप्रशमनी सर्वविघ्ननिवारिणी।
सर्वाङ्गसुन्दरी चान्या सर्वसौभाग्यदायिनी ॥ ११० ॥
विन्दौ पुष्पं समर्प्याथोन्मादमुद्रां प्रदर्शयेत्।
सर्वार्थसाधके चक्रे पञ्चमे सर्वतः स्थिताः ॥ १११ ॥
पूजिताः कुलयोगिन्यः सन्तु मेऽभीष्टसिद्धिदाः।
इति सम्प्रार्थ्य सम्पूज्य मादिक्षान्तविभूषिते ॥ ११२ ॥
परे दशारे योगिन्यः उद्यद्भास्करसन्निभाः।
ज्ञानमुद्राटङ्कपाशवरन्धारिकराम्बुजाः ॥ ११३ ॥
सर्वज्ञा सर्वशक्तिश्च सर्वैश्वर्य्यफलप्रदा।
सर्वज्ञानमयी पश्चात् सर्वव्याधिविनाशिनी ॥ ११४ ॥
सर्वाधारस्वरूपा च सर्वपापहरा परा।
सर्वानन्दमयी देवी सर्वरक्षास्वरूपिणी ॥ ११५ ॥

---

एवं चतुर्थावरणमाराध्य सर्वसौभाग्यदे चक्रे इमाश्चतुर्दश सम्प्रदायाः योगिन्यः पूजिताः सन्त्वित्युक्त्वा वश्यमुद्रां दर्शयेत् वादिदशवर्णयुते दशारे ॥ १०२—१०६ ॥

पश्चिमादिव्युत्क्रमेण सर्वसिद्धिप्रदाद्यादेवीपदाद्या दश पूजयेत् ह्रीं श्रीं सर्वसिद्धिप्रदादेवीश्रीपादुकां पूजयामि ॥ १०७—११० ॥

एवं पञ्चमावरणं सम्पूज्य सर्वार्थसाधके चक्रे इमा दशकुलयोगिन्यः पूजिताः

सर्वेप्सितार्थफलदा पश्चिमादिविलोमगाः ।
पुष्पं मूलेन दत्त्वाथो कुर्य्यान्मुद्रां महाङ्कुशाम् ॥ ११६ ॥
सर्वरक्षाकरे चक्रे निगर्भाः पूजिता इमाः ।
योगिन्यस्तर्पिताः सन्तु ममाभीष्टफलप्रदाः ॥ ११७ ॥
सम्प्रार्थ्यैवं तथाष्टारे दाड़िमा पुष्पसन्निभाः ।
रक्तांशुका धनुर्बाणविद्यावरलसत्कराः ॥ ११८ ॥
अकाराद्यष्टवर्णाद्या पश्चिमादिविलोमतः ।
पूजयेत् पूर्वसम्प्रोक्ता बीजाद्या अष्टदेवताः ॥ ११९ ॥
वशिनी चापि कौमारी मादिनी विमलारुणा ।
जयनी चापि सर्वेशी कौलिनीत्युदिता परा ॥ १२० ॥
सर्वरोगहरे चक्रे रहस्याः पूजिता मया ।
तर्पिताः पूजिताः सम्भूत्वैव दद्यात् सुमाञ्जलिम् ॥ १२१ ॥
खेचरीं दर्शयेन्मुद्रां सुन्दरीं तुष्टयेत्ततः ।
त्रिकोणे त्वकथाद्यर्णरचिते पश्चिमादितः ॥ १२२ ॥
यजेत् कामेशकामेश्यो बाणान् चापञ्च पाशकम् ।
अङ्कुशञ्चानुलोमेन चतुर्दिक्षु समाहितः ॥ १२३ ॥
जम्भमोहवशस्तम्भपदाद्यान् बीजपूर्वकान् ।
बाणबीजानि बाणादौ मीनकाणौ सबिन्दुकौ ॥ १२४ ॥

---

सन्निध्युन्मादमुद्रां दर्शयेत् । ततो परे दशारे मादिचान्तविभूषिते ज्ञानमुद्रा-वरदचकरा टङ्कपाशवामकरा उद्यद्रविनिभाः सर्वज्ञाद्या देव्याद्या दश पूजयेत् ह्रीं श्रीं सर्वज्ञादेवीश्रीपादुकां पूजयामि ॥ १११—११५ ॥

एवं षष्ठमावरणमभ्यर्च्य सर्वरक्षाकरे चक्रे इमा दशनिगर्भयोगिन्यः पूजिताः सन्निध्यङ्कुशमुद्रां दर्शयेत् ततो ष्टारे रक्तवस्त्रा बाणवरदचकरा धनुर्विद्यावामकरा । न्यासोक्ता अष्टा वशिन्याद्या अकारादिबीजपूर्विका यजेत् ह्रीं श्रीं अं आं अः वलूं वशिनीवाग्देवताश्रीपादुकां पूजयामि एवं सप्तमावरणमिष्ट्वा सर्वरोगहरे चक्रे

चापादौ पाशकस्यादौ पाशमाये नियोजयेत्।
अङ्कुशस्त्वङ्कुशस्यादौ स्मर्त्तव्या हेतिदेवताः॥ १२५॥
नानारत्नविभूषाढ्याः स्वस्वायुधसमन्विताः।
विद्युद्दामसमानाङ्ग्यो यौवनमदसम्भ्रमाः॥ १२६॥
अग्न्यादिकोणत्रितये पूज्याः कूटत्रयादिकाः।
कामेश्वरी च वज्रेशी तृतीया भगमालिनी॥ १२७॥
कामेश्वरी रुद्रशक्तिः शरच्चन्द्रसमप्रभा।
स्मर्त्तव्या दधती हस्तैः पुस्तकाभीवरस्रजः॥ १२८॥
वज्रेश्वरी विष्णुशक्तिरुद्यन्मार्त्तण्डसप्रभा।
इक्षुचापवराभीतिपुष्पवाणलसत्करा॥ १२९॥
भगमाला ब्रह्मशक्तिस्तप्तहाटकसप्रभा।
ज्ञानमुद्राम्बरं पाशमङ्कुशं दधती करैः॥ १३०॥
एवं त्रिकोणं सम्पूज्य यच्छेत् पुष्पाञ्जलिं ततः।
बीजमुद्रां प्रदर्श्याथ प्रार्थयेत् सुन्दरीमिदम्॥ १३१॥
सर्वसिद्धिप्रदे चक्रे योगिन्यः पूजिता मया।
दिशन्त्वतिरहस्याख्या मङ्गलं मे निरन्तरम्॥ १३२॥
बिन्दौ सम्पूजयेत् पश्चात् श्रीमत्त्रिपुरसुन्दरीम्।
मूलविद्यां समुच्चार्य्य ध्यात्वा पूर्वोक्तवर्त्मना॥ १३३॥

---

इमा अष्टौ योगिन्यः पूजिताः सन्त्वित्युक्त्वा खेचरीमुद्रां दर्शयेत् ततोऽकचादिवर्णरचिते त्रिकोणे पश्चिमाद्यनुलोमेन चतुर्दिक्षु स्वस्वबीजपूर्वकान् जम्भनीद्रावणशब्दविशेषणविशिष्टान् कामेश्वरकामेश्वर्यौ बाणधनुःपाशाङ्कुशान् पूजयेत्। बीजान्याह बाणेति बाणादौ पञ्च बाणबीजानि। चापादौ सबिन्दुमीनलक्ष्मी धकारथकारौ पाशमाये आं ह्रीमिति पाशादौ अङ्कुशस्यादौ त्वङ्कुशं क्रोमिति हेतिदेवता आयुधदेवताः॥ ११६—१२५॥

तासां ध्यानमाह नानेति। स्वस्वायुधानि बाणादीनि बाणदेवता बाणधरा इत्यादि प्रयोगो यथा ह्रीं श्रीं मूलं श्रीबाणपीठे श्रीमत्त्रिपुरसुन्दरीदेवीश्रीपादुकां

सर्वानन्दमये चक्रे सर्वाभीष्टविधायिनी ।
परापररहस्याख्या योगिनी पूजितास्तु मे ॥ १३४ ॥
योनिमुद्रां प्रदर्श्याथ तर्पणं त्रिः समाचरेत् ।
धूपं दीपञ्च नैवेद्यमन्त्रैर्नानाविधैर्दिशेत् ॥ १३५ ॥
वह्निं सम्पूज्य पूर्वोक्तं विधिना तत्र सुन्दरीम् ।
आवाह्य जुहुयाद्द्रव्यं पञ्चविंशतिसंख्यया ॥ १३६ ॥
ईशानाग्नेयनैर्ऋत्यवायुकोणेषु च क्रमात् ।
श्रीचक्रस्य बलिं दद्यात् हुतशेषेण संयुतः ॥ १३७ ॥
वटुकस्य च योगिन्याः चेत्रेशगणनाथयोः ।
निजैर्मन्त्रैः स्वमुरभिः पूर्वसंकीर्त्तिते मया ॥ १३८ ॥

---

पूजयामीति प्रयोगः यां रां लां वां सां द्रां क्लीं व्लूं सः कामेश्वरकामेश्वरीजम्भनबाणश्रीपादुकां पूजयामि पश्चिमे धं थं कामेश्वरकामेश्वरीमोहनधनुःश्रीपादुकां पूजयामि उत्तरे षां क्रीं कामेश्वरकामेश्वरीवशीकरणश्रीपादुकां पूजयामि पूर्वोक्तौ क्रों क्रों कामेश्वरकामेश्वरीस्तम्भनाङ्कुशश्रीपादुकां पूजयामि दक्षिणे अग्रेति अग्रदक्षिणवामकोणेषु कूटत्रयं पूर्वो रुद्रविष्णुब्रह्मणां शक्तयश्च तिस्रः कामेश्वरीवज्रेश्वरीभगमालिनीसंज्ञाः पूज्याः तासां ध्यानान्याह श्लोकत्रयेण कामेति । वामयोः पुस्तकोऽभये वराक्षमालि दक्षयोः उद्यन्मार्त्तण्डो भानुस्तेन समाना प्रभा यस्याः वरपुष्पबाणौ दक्षयोः इक्षुधनुरभयौ वामयोः भगेति हाटकं कनकं तत्तुल्यं कान्तिः ज्ञानमुद्रावरौ दक्षयोः पाशाङ्कुशौ वामयोः । प्रयोगो यथा क ए ईल क्रीं कामरूपपीठे कामेश्वरीरुद्रशक्तिश्रीपादुकां पूजयामि हसकलक्रीं पूर्णगिरिपीठे वज्रेश्वरीविष्णुश्रीपादुकां पूजयामि सकलक्रीं जालन्धरे भगमालिनीब्रह्मशक्तिश्रीपादुकां पूजयामि एवमष्टमावरणमिष्टा सर्वसिद्धिप्रदे चक्रे इमा अतिरहस्ययोगिन्यः पूजिताः सन्त्वित्युक्त्वा मूलेन पुष्पाञ्जलिं दत्त्वा बीजमुद्रां दर्शयेत् ततो मूलविद्यां पठित्वा ध्यात्वा बिन्दौ श्रीमत्त्रिपुरसुन्दरीश्रीपादुकां पूजयामीति यजेत् ॥ १२९—१३३ ॥

एवं नवमावरणमाराध्य सर्वानन्दमये चक्रे सर्वाभीष्टदायिनी परापररहस्ययोगिनी श्रीमत्त्रिपुरसुन्दरी पूजितास्त्वित्युक्त्वा योनिमुद्रां प्रदर्श्य त्रिः तर्पयित्वा धूपदीपादीनि दत्त्वा अग्नावावाह्य हुत्वोद्वासयेत् ततः ईशानादिकोणेषु हुतशेषे

नतीः प्रदक्षिणं कृत्वा मूलविद्यां ततो यजेत्।
एवं श्रीसुन्दरीं नित्यं पूजयन् विजितेन्द्रियः॥ १३९॥
नवावृतियुतां सर्वान् कामानिष्टानवाप्नुयात्।
अथ प्रयोगा वक्ष्यन्ते साधकाभीष्टसिद्धिदाः॥ १४०॥
नवलक्षजपेनास्य रुद्ररूपो नरो भवेत्।
मल्लिकामालतीपुष्पैर्होमाद्वागीशतामियात्॥ १४१॥
करवीरैर्जवापुष्पैर्होमान्मोहयते जगत्।
चन्द्रकुङ्कुमकस्तूरीहोमात् कामाधिको भवेत्॥ १४२॥
पद्मकैः पाटलैर्विश्वं वश्यमानयतेऽचिरात्।
लाजहोमो राज्यदायी मधुनोपद्रवक्षयः॥ १४३॥
निशि छागपलैर्होमो रिपुसैन्यविनाशकृत्।
दध्याज्यदुग्धमधुभिः क्रमाद्धोमादवाप्नुयात्॥ १४४॥
आरोग्यं सम्पदं ग्रामं धनं शर्करया सुखम्।
कमलैर्धनसम्पत्तिर्दाड़िमै राज्यवश्यता॥ १४५॥
क्षत्रिया मातुलिङ्गैस्तु वैश्या नारंगजैः फलैः।
शूद्राः कुष्माण्डसम्भूतैर्वश्याः स्युरचिरोद्भृतैः॥ १४६॥
पनसानां लक्षहोमात् वश्याः स्युश्चक्रवर्त्तिनः।
द्राक्षाफलैरिष्टसिद्धिं रम्भाभिर्मन्त्रिणो वशाः॥ १४७॥

---

वटुकयोगिनीक्षेत्रपालगणेशेभ्यः पूर्वोक्तैः स्वस्वमन्त्रैस्तत्तन्मुद्रादर्शनपूर्वकं बलिं दद्यात् नतीर्नमस्कारान्॥ १३४—१३९॥

नवावृतियुतां नवावरणैर्दत्तैर्युक्ताम्॥ १४०॥

प्रयोगानाह नवेति॥ १४१॥

चन्द्रः कर्पूरं कामाधिको भवेद्रूपेणेति शेषः दध्याज्येति दध्नारोग्यं आज्येन सम्पदं दुग्धेन ग्रामं मधुना धनमिति क्रमः॥ १४२—१४४॥

राज्यवश्यमाप्नुयादिति पूर्वेण सम्बन्धः॥ १४५॥

मातुलिङ्गैर्बीजपूरैर्हुतैः क्षत्रिया वश्याः एवमन्येऽपि॥ १४६॥

नारिकेलैस्तु सम्पत्तिस्तिलैः सर्वेष्टसिद्धयः ।
गुग्गुलैर्दुःखनाशः स्यात् सर्वेष्टं शर्करागुड़ैः ॥ १४८ ॥
पायसैर्धनधान्यासिर्वन्धूकैः प्राणिनो वशाः ।
पक्वैश्चूतफलैर्होमात् लक्षमात्राद्धरा वशा ॥ १४९ ॥
लवणैराजिकायुक्तैर्होमाद् दुष्टविनाशनम् ।
कर्पूरहोमाल्लभते वाक्पतित्वं नरोऽचिरात् ॥ १५० ॥
करञ्जफलहोमेन भूतप्रेतादयो वशाः ।
विल्वैः स्यादतुला लक्ष्मीरिक्षुदण्डैः सुखामयः ॥ १५१ ॥
घृतहोमाद्दीपिताग्निः शान्तिः स्यात्तिलतण्डुलैः ।
किं बहूक्तेन देवेशि ! सर्वेष्टं साधितं नृणाम् ॥ १५२ ॥
मध्ये कूटत्रिके भेदा वर्णान्तरनियोजनात् ।
बहवोऽन्ये न गदिता ग्रन्थगौरवभीतितः ॥ १५३ ॥
अपरीक्षिताय शिष्याय न देयं च कदाचन ।
पुत्राय वा सुशिष्याय दत्त्वाभीष्टप्रदायिनी ॥ १५४ ॥

---

धरा भूमिर्वशा तत्स्थाः प्राणिनो वश्याः स्युरित्यर्थः ॥ १४७—१५२ ॥

मध्ये मन्त्रमध्ये यत् कूटत्रयं तत्रान्यद्वर्णयोगात् कुवेरोपासितयोर्द्वाविंशद्भेदास्ते ग्रन्थगौरवभीत्या नोक्ता अनयैवोपासितया सर्वेष्टसिद्धेश्च मुख्यैषैव कामराजविद्या ते भेदा यथा हसकएलह्रींखक्लीं हसकएईलक्लीं हसकएईलक्लीं हकएईलक्लीं २ तत् कौवेरीद्वयं कूटद्वयं कामराजीयं सहसकलक्लीं ३-४ एतद्द्वयमगस्त्योपासितं हस-कलक्लीं अन्ते-कामराजीयं ५ आद्यद्वयं कामराजीयं स हसकलक्लीं ६ एतद्द्वयं चोपासुद्रीपासितं स हकएईलक्लीं सहकएईलक्लीं हसकएईलक्लीं ७ हसकएईलक्लीं सहकएईलक्लीं तृतीयमीदृशमेव ८ चान्द्रीद्वयमेतत् सकलक्लीं ९ कएईलहसकं हसहा क्लीं क्लीं हा एं सकहलक्लीं एतद्द्वयं दुर्वासार्चितम् तदुक्तं ज्ञानार्णवे,

कामराजाख्यविद्यायास्त्रिकूटेषु वरानने ! ।
या स्थिता भुवनेशानी द्विधा कुरु महेश्वरि ! ।
बिन्दुहीना नादहीना दुर्वासोपासिता भवेत् ॥

गोपालसुन्दरीं वक्ष्ये भोगमोक्षप्रदायिकाम् ।
माया रमा चितजन्मा क्षणालेति पदं ततः ॥ १५५ ॥
आद्यं वाक्कूटमुच्चार्य्य गोविन्दाय पदं वदेत् ।
द्वितीयन्तु ततः कूटं गोपीजनपदं ततः ॥ १५६ ॥
वल्लभाय पदान्ते तु तृतीयं कूटमुच्चरेत् ।
स्वाहान्ता वह्नियुग्मार्णा स्मृता गोपालसुन्दरी ॥ १५७ ॥

---

संहितायाञ्च—

वाग्भवस्थं चतुष्कञ्च कामराजस्थपञ्चकम् ।
शक्तिकूटं विकार्य्यञ्च कामराजस्य संलिखेत् ॥ १०
मायास्थाने हरीवर्णयुगलञ्च क्रमाल्लिखेत् ।
दुर्वाससा पूजितेयं पुरुषार्थप्रदायिनी ॥

कएईलहरी हसकहलहरी सकलहरी एतद्द्वयं दुर्वाससोऽर्चितं आद्या कामराजतुल्या ११ सहकलक्रीं सहसकलहलक्रीं आद्यमेव तृतीयं १२ नन्दिविद्याद्वयमेतत् हसकलक्रीं सकहसकलक्रीं सकहलक्रीं १३ हसएकलक्रीं द्वयमेतदेव स्कान्दीद्वयमेतत् कहकसईलक्रीं हकएईलक्रीं सकऐईलक्रीं १४ मीनवी कएकलक्रीं हकहलक्रीं सहकलक्रीं १५ धर्मराज आद्यं कामराजीयं द्वितीये तृतीये धर्मराजीये १६ एषा वारुणी कसकलक्रीं हसकलक्रीं सकलरक्रीं १७ आग्नेयी हसकलक्रीं हसकलक्रीं तृतीयमाग्नेयं १८ एषा शैषी कएरलरक्रीं हकलरहलक्रीं सरकलरक्रीं १९ वायवीयं कएईरलक्रीं हकहलक्रीं सहकरलक्रीं २० सौमीयं कहलक्रीं हकहलरक्रीं सकलक्रीं ऐशीयं कएकलक्रीं अन्ते कामराजीयं २१ शाक्तीयम् आद्यं कामराजद्वयम् अन्त्यम् सकलक्रीमिति रतिपूजिता २२ हसकलक्रीं हकहसरक्रीं आद्यमेव तृतीयं २३ जैवीयं आद्यं कामराजीयं हकसरक्रीं हसकलक्रीं २४ यं सकलह्रीं हसकहलह्रीं वैष्णवीयं २५ आद्यं कामराजीयं हकलह्रीं हसकह्रीं २६ उन्मनीयं हसकलह्रीं सकलह्रीं सकलह्रीं सकलहलह्रीं २७ गौरी एते भेदाः एषां श्रीबीजादिभिः संपुटिता कामराजवदेव उपासनमपि गोपालसुन्दरीवदिति ॥ १५३ ॥ १५४ ॥

मायेति । माया ह्रीं रमा श्रीं चितजन्मा क्लीं क्षणाय ॥ १५५ ॥
प्रथमकूटं गोविन्दाय द्वितीयकूटम् ॥ १५६ ॥

विद्याया द्वौ मुनी उक्तौ विधात्रानन्दभैरवौ ।
छन्दस्तु देवी गायत्री देवता सुन्दरीयुता ॥ १५८ ॥
गोपालो मन्मथो बीजं शक्तिः पावकवल्लभा ।
मायाश्रीर्मन्मथैर्हृत् स्यात् कृष्णाय शिर ईरितम् ॥ १५९ ॥
गोविन्दाय शिखा गोपीजनेति कवचं मतम् ।
वल्लभाय स्मृतं नेत्रमस्त्रं पावकभार्यया ॥ १६० ॥
मूर्ध्नि भाले भ्रुवोरक्ष्णोः कर्णयोर्नसयोर्मुखे ।
चिवुके च गले बाह्वोर्हृदये जठरे न्यसेत् ॥ १६१ ॥
नाभौ लिङ्गे गुदे सक्थ्नोर्जानुनोर्जङ्घयोरपि ।
गुल्फयोः पादयोर्वर्णान् कूटत्रयविवर्जितान् ॥ १६२ ॥
सृष्टिन्यासोऽयमुदितो हृदाद्यं सान्तिकास्थितिः ।
संहारोऽङ्घ्र्यादिमूर्द्धान्तः पुनः सृष्टिस्थितिञ्चरेत् ॥ १६३ ॥
करशुद्ध्यासनन्यासौ न्यासं वाग्देवताभिधः ।
कृत्वा पूर्वोदितान् कूटत्रयं कास्य हृदि न्यसेत् ॥ १६४ ॥
कूटत्रयं हिरावृत्त्या षड़ङ्गं पुनराचरेत् ।
कमला वसुधायुक्तं ध्यायेत् श्रीचक्रगं हरिम् ॥ १६५ ॥

क्षीराम्भोधिस्थकल्पद्रुमवनविलसद्रत्नयुग्मण्डपान्तः
प्रोद्यत् श्रीपीठसंस्थं करधृतजलजारीक्षुचापाङ्कुशेषुम् ।

---

गोपीजनवल्लभाय तृतीयं स्वाहा वह्नियुग्मार्णा त्रयोविंशतिवर्णाः । षड़ङ्गमाह मायेति ॥ १५७—१६० ॥

वर्णन्यासमाह मूर्ध्नीति । हृदादि वाङ्गतः स्थितिन्यासः पादादिमूर्द्धान्तः संहारन्यासः एवं न्यासत्रयं कृत्वा पुनः सृष्टिस्थितिन्यासौ कुर्य्यात् ॥ १६१—१६३ ॥

करशुद्धिन्यासवाग्देवतान्यासान् सुन्दर्युक्तान् कृत्वा मूर्द्धमुखहृत्सु कूटत्रयं न्यसेत् ॥ १६४ ॥ १६५ ॥

ध्यानमाह क्षीरेति । क्षीरसमुद्रस्य कल्पद्रुमवने विलसन् रत्नयुक् यो मण्ड-

पाशं वीणां सवेणुं दधतमवनिमाशोभितं रक्तकान्तिं
ध्यायेद्गोपालमीशं विधिसुखविबुधैरीड्यमानं समन्तात् ॥१६६॥

एवं ध्यात्वा जपेल्लक्षं दशांशं क्षायसान्धसा ।
जुहुयाद्वैष्णवे पीठे पूजयेत् सुन्दरीं हरिम् ॥ १६७ ॥
आदावङ्गानि सम्पूज्य प्रागाद्याशासु पूजयेत् ।
वासुदेवं सङ्कर्षणं प्रद्युम्नमनिरुद्धकम् ॥ १६८ ॥
पूज्या वङ्क्यादिकोणेषु शान्तिः श्रीश्च सरस्वती ।
रतिः पुनर्दिक्षु पूज्या रुक्मिणी सत्यभामिका ॥ १६९ ॥
कालिन्दी जाम्बवत्याख्या मित्रविन्दा सुनन्दया ।
सुलक्षणा नाग्निजिती ततोऽर्च्या निधयोऽपि च ॥ १७० ॥
महापद्मश्च पद्मश्च शङ्खो मकरकच्छपौ ।
मुकुन्दकुन्दनीलाश्च खर्वश्च निधयो नव ॥ १७१ ॥
ततश्च सुन्दरी प्रोक्ता वृतिपूजां समाचरेत् ।
प्रयोगानपि तत्रोक्तान् कुर्य्यादिष्टप्रसिद्धये ॥ १७२ ॥
एवं यो भजते नित्यं श्रीमद्गोपालसुन्दरीम् ।
सर्वान् कामानवाप्यान्ते सायुज्यं ब्रह्मणो व्रजेत् ॥ १७३ ॥

इति श्रीमन्महीधरविरचिते मन्त्रमहोदधौ त्रिपुरसुन्दरी-
गोपालसुन्दरीपूजनं नाम द्वादशस्तरङ्गः ।

---

पञ्चदन्तः प्रोद्यत् यत् श्रीपीठं तत्र स्थितमष्टकरं पञ्चबाणवेणुदचकरं चापपाशा-ङ्कुशवीणावामकरं अवनिसाभ्यां धरालक्ष्मीभ्यां शोभितं ब्रह्मादिसुरैः स्तूयमानं गोपालं ध्यायेत् ॥ १६६—१७० ॥

निधीनाह महापद्म इति । ततः सुन्दरीमन्त्रोक्तानि नवावरणानि यजेत् ॥ १७१ ॥ १७२ ॥

ब्रह्मणः सायुज्य ब्रह्मरूपं प्राप्नोति ॥ १७३ ॥

इति नौकासमाख्यायां श्रीमन्त्रमहोदधिटीकायां
सुन्दरीपूजनं नाम द्वादशस्तरङ्गः ।

# त्रयोदशस्तरङ्गः ।

अथोच्यन्ते हनुमतो मन्त्राः सर्वेष्टसिद्धये ।
इन्द्रस्वरेन्दुसंयुक्तो वराहो हसफाग्नयः ॥ १ ॥
भिण्टीशविन्दुसंयुक्ता द्वितीयं वीजमीरितम् ।
गदी पान्ताग्निरुद्रेन्दुसंयुतः स्यात् तृतीयकम् ॥ २ ॥
हसरा मनुचन्द्राद्याश्चतुर्थं हसखफराः ।
शिवेन्द्राद्या पञ्चमं स्याद्धसौ मन्विन्दुगौ परम् ॥ ३ ॥
ङेयुतो हनुमान् हार्दं मन्त्रोऽयं द्वादशाक्षरः ।
रामचन्द्रो मुनिश्चास्य जगती छन्द ईरितम् ॥ ४ ॥
हनुमान् देवता वीजं षष्ठशक्तिर्द्वितीयकम् ।
षड्वीजैरङ्गषट्कं स्यात् मूर्ध्नि भाले दृशोर्मुखे ॥ ५ ॥
कण्ठे च वाहुद्वितये हृदि कुक्षौ च नाभितः ।
लिङ्गे जानुद्वये पादद्वये वर्णान् क्रमान् न्यसेत् ॥ ६ ॥

---

श्रीहनुमतो मन्त्रान् वक्तुं प्रतिजानीते अथेति । मन्त्रमुद्धरति इन्द्रेति । वराहो हः इन्द्रस्वर औविन्दुभ्याभ्यां युतः हौं हसफास्वरूपं अग्नी रः ॥ १ ॥

एते भिण्टीशविन्दुयुताः एविन्दुयुताः तेन ह्स्फ्रें गदी खः पान्ताग्निरुद्रेन्दुयुतः पान्तः फः अग्नि रः रुद्र ए इन्दुविन्दुः तैर्युतः ख्फ्रें हसरा मनुचन्द्राद्या औविन्दुयुताः ह्स्रौं हसखफराः शिवेन्द्राद्या एविन्दुयुता तेन ह्स्ख्फ्रें हसौ मन्विन्दुयुतौ ह्सौं परं अष्टम् । हौं ह्स्फ्रें ख्फ्रें ह्स्रौं ह्स्ख्फ्रें ह्सौं हनुमते नमः । ङेयुतो हनुमान् हनुमते हार्दं नमः ॥ २—४ ॥

षष्ठ ह्सौमिति वीजं द्वितीयं ह्स्फ्रेमिति शक्तिः ॥ ५ ॥

हौं हृत् ह्स्फ्रें शिरः ख्फ्रें शिखा इत्यादिवर्णन्यासमाह मूर्ध्नीति । एकैकं सर्वत्र ॥ ६ ॥

षड़्वीजानि पदद्वन्द्वे मूर्ध्नि भाले मुखे हृदि।
नाभावूर्वोर्जङ्घयोश्च पादयोर्विन्यसेत् क्रमात् ॥ ७ ॥
बालार्कायुततेजसं त्रिभुवनप्रक्षोभकं सुन्दरं
सुग्रीवादिसमस्तवानरगणैः संसेव्य पादाम्बुजम्।
नादेनैव समस्तराक्षसगणान् सन्त्रासयन्तं प्रभुं
श्रीमद्रामपदाम्बुजस्मृतिरतं ध्यायामि वातात्मजम् ॥ ८ ॥
एवं ध्यात्वा जपेदर्कसहस्रं जितमानसः।
दशांशं जुहुयाद् व्रीहीन् पयोदध्याज्यसंयुतान् ॥ ९ ॥
विमलादियुते पीठे पूजा कार्य्या हनूमतः।
केसरेष्वङ्गपूजा स्याद्दलेष्वन्यांस्तदाह्वयान् ॥ १० ॥
रामभक्तो महातेजा कपिराजो महाबलः।
द्रोणाद्रिहारको मेरुपीठिकार्चनकारकः ॥ ११ ॥
दक्षिणाशा भास्करश्च सर्वविघ्ननिवारकः।
एवं नामानि सम्पूज्य दलाग्रेषु च वानरान् ॥ १२ ॥
सुग्रीवमङ्गदं नीलं जाम्बवन्तं नलं तथा।
सुषेणं द्विविदं मैन्दं पूजयेद्दिक्पतीनपि ॥ १३ ॥
एवं सिद्धे मनौ मन्त्री स्वपरेष्टं प्रसाधयेत्।
कदलीवीजपूराम्रफलैर्हुत्वा सहस्रकम् ॥ १४ ॥
द्वाविंशतिब्रह्मचारीन् विप्रान् सम्भोजयेदथ।
एवं कृते महाभूतविषचौराद्युपद्रवाः ॥ १५ ॥
नश्यन्ति क्षणमात्रेण विद्वेषिग्रहदानवाः।
अष्टोत्तरशतं वारिमन्त्रितं विषनाशनम् ॥ १६ ॥

---

पदन्यासमाह षड़िति। पदद्वन्द्वं हनुमते नम इति ॥ ७ ॥
ध्यानमाह बालेति। वातात्मजं हनुमन्तम् ॥ ८ ॥ ९ ॥
दलेषु तदाह्वयान् हनुमन्नामानि ॥ १० ॥

रात्रौ नवशतं मन्त्रं जपेद्दशदिनावधि ।
यो नरस्तस्य नश्यन्ति राजशत्रूत्थभीतयः ॥ १७ ॥
अभिचारोत्थभूतोत्थज्वरे तन्मन्त्रितैर्जलैः ।
भस्मभिः सलिलैर्वापि ताड़येज्ज्वरिणः क्रुधा ॥ १८ ॥
दिनत्रयाज्ज्वरान्मुक्तः स सुखं लभते नरः ।
तन्मन्त्रितौषधं जग्ध्वा नीरोगो जायते ध्रुवम् ॥ १९ ॥
तन्मन्त्रितं पयःपीत्वा योद्धुं गच्छेन्मनुं जपन् ।
तज्जप्तभस्मलिप्ताङ्गः शस्त्रसङ्घैर्न बाध्यते ॥ २० ॥
शस्त्रक्षतं व्रणः शोथो लूतास्फोटोऽपि भस्मना ।
त्रिमन्त्रितेन संस्पृष्टाः शुष्यन्त्यचिरतो नृणाम् ॥ २१ ॥
सूर्य्यास्तमयमारभ्य जपेत् सूर्य्योदयावधि ।
कीलकं भस्म चादाय सप्ताहावधिसंयुतः ॥ २२ ॥
निखनेद्भस्मकीलौ तौ विद्विषान्द्वार्य्यलक्षितः ।
विद्वेषं मिथ आपन्नाः पलायन्ते अथोऽचिरात् ॥ २३ ॥
अभिमन्त्रितभस्माम्बुदेहचन्दनसंयुतम् ।
खपाद्यादियुक्तं यस्मै दीयते स तु दासवत् ॥ २४ ॥
क्रूराश्च जन्तवोऽनेन भवन्ति विधिना वशाः ।
ईशानदिक्स्थमूलेन भूताङ्कुशतरोः शुभाम् ॥ २५ ॥
अङ्गुष्ठमात्रां प्रतिमां प्रविधाय हनूमतः ।
प्राणसंस्थापनं कृत्वा सिन्दूरैः परिपूज्य च ॥ २६ ॥

---

तानाह राममक्त इत्यादि ॥ ११—२० ॥

शस्त्रक्षतादयो वारत्रयमन्त्रितेन भस्मना मार्जिता अचिरात् शुष्यन्ति नश्यन्ति ॥ २१—२२ ॥

देहचन्दनं देहे धृतं यच्चन्दनं तेन युतं भस्माम्बु च मन्त्रितं यस्मै देयं सः वश्यः स्यात् ॥ २४ ॥

गृहस्याभिमुखी द्वारे निखनेन्मन्त्रमुच्चरन् ।
भूताभिचारचौराग्निविषरोगनृपोद्भवाः ॥ २७ ॥
सञ्जायन्ते गृहे तस्मिन्न कदाचिदुपद्रवाः ।
प्रत्यहं धनपुत्राद्यैरेधते तद्गृहं चिरम् ॥ २८ ॥
निशि श्मशानभूमिस्थे भस्मना मृत्स्नयापि वा ।
शत्रोः प्रतिकृतिं कृत्वा हृदि नाम समालिखेत् ॥ २९ ॥
कृतप्राणप्रतिष्ठान्तां भिन्द्याच्छस्त्रैर्मनुं जपन् ।
मन्त्रान्ते प्रोच्चरेच्छत्रोर्नाम छिन्धि च भिन्धि च ॥ ३० ॥
मारयेति च तस्यान्ते दन्तैरोष्ठं निपीड्य च ।
पाद्योस्तले प्रपीड्याथ तत्कान्तासदनं व्रजेत् ॥ ३१ ॥
एवं सप्तदिनं कुर्वन् हन्यात् शत्रून् शिवावितम् ।
अर्द्धचन्द्राकृतौ कुण्डे स्थण्डिले वा हुतं चरेत् ॥ ३२ ॥
मुक्तकेशः श्मशानस्थो लवणै राजिकायुतैः ।
उन्मत्तफलपुष्पैश्च नखरोमविषैरपि ॥ ३३ ॥
काककौशिकगृध्राणां पक्षैः श्लेष्मान्तकाक्षजैः ।
समिद्वरैश्च त्रिशतं दक्षिणाशामुखो निशि ॥ ३४ ॥
सप्तघस्रानिदं कुर्वन्मारयेद्रिपुमुद्धतम् ।
शतषट्कं जपेद्रात्रौ श्मशाने दिवसत्रयम् ॥ ३५ ॥
ततो वेताल उत्थाय वदेद्भावि शुभाशुभम् ।
उदितं कुरुते सर्वं किङ्करीभूय मन्त्रिणः ॥ ३६ ॥
हनुमत्प्रतिमां भूमौ विलिखेत् तं पुरो मनून्
साध्यनाम द्वितीयान्तं विमोचय विमोचय ॥ ३७ ॥

---

ईशानेत्यादि । भूताङ्कुशतरोः करञ्जस्य घरिट्टस्य ईशानदिशि स्थितेन मूलेनाङ्गुष्ठमितां हनुमत्प्रतिमां कृत्वा प्राणान् संस्थाप्य सिन्दूरैरभ्यर्च्य तद्गृहद्वारि निखनेत् तत्र सर्वोपद्रवनाशः तद्वृत्तिश्च शिवावितं शिवेनापि रक्षितं शत्रुमेवं कुर्वन्

तत्सर्वं मार्जयेद्वामहस्तेनाथ पुनर्लिखेत् ।
एवमष्टोत्तरशतं लिखित्वा मार्जयेत् पुनः ॥ ३८ ॥
एवं कृते पराधीनो मुच्यते निगड़ात् क्षणात् ।
एवं विद्वेषणादीनि कुर्यात्तत्पल्लवं लिखन् ॥ ३९ ॥
वश्यार्थे सर्षपैर्होमो विद्वेषे करवीरजैः ।
कुसुमैरिध्मकाष्ठैर्वा जीरकैर्मरिचैरपि ॥ ४० ॥
ज्वरे दूर्वागुडूचीभिर्दध्ना क्षीरेण वा घृतैः ।
शूलहोमः कुबेराक्षैरेरण्डसमिधा तथा ॥ ४१ ॥
तैलाक्ताभिश्च निर्गुण्डीसमिद्भिर्वा प्रयत्नतः ।
सौभाग्यं चन्दनैश्चन्द्रै रोचनैर्वा लवङ्गकैः ॥ ४२ ॥
सुगन्धपुष्पैर्वस्त्राप्तैश्च तत्तद्धान्यैस्तदाप्तये ।
तत्पादरजसा राजीलवणाक्तेन मृत्यवे ॥ ४३ ॥
किं बहूक्तैर्विषे व्याधौ भ्रान्तौ मोहे च मारणे ।
विवादे स्तम्भने द्यूते भूतभीतौ च सङ्कटे ॥ ४४ ॥
वश्ये युद्धे नृपद्वारे समरे चोरसङ्कटे ।
मन्त्रोऽयं साधितो दद्यादिष्टसिद्धिं ध्रुवं नृणाम् ॥ ४५ ॥

---

हन्यात् । अर्धचन्द्रेत्यादि रिपुमुद्धूतमित्यन्तं एकः प्रयोगः । उन्मत्तो धत्तूरः श्लेष्मान्तकश्चिकणफलो वृक्षः अक्षो विभीतकस्तद्द्रव्यसमिद्भिश्च हुतं चरेत् जुहुयात् सप्तघस्रान् दिवसान् ॥ २५—३८ ॥

पराधीनो बध्यो निगड़ात् शृङ्खलातो मुच्यते विद्वेषणादीनि विद्वेषमारणोच्चाटान् तत्कृतपल्लवं लिखन्नेवमेव कुर्यात् अमुकं द्वेष्य द्वेष्य इति । द्वेष्ये मारय मारय इति मारणे इत्यादि पल्लवलेखनम् ॥ ३९ ॥ ४० ॥

कुबेराक्षः सूक्ष्मकण्टकलतारूपविशेषः ॥ ४१ ॥ ४२ ॥

वस्त्रान्नैर्होमस्तदाप्तिः राजीलवणयुतेन यत्पादरजसा हुयते स म्रियते । ४३—४५ ॥

वक्ष्ये हनुमतो यन्त्रं सर्वसिद्धिप्रदायकम्।
वलयत्रितयं कृत्वा पुच्छाकारसमन्वितम्॥ ४६॥
साध्यनाम लिखेन्मध्ये पाशबीजप्रवेष्टितम्।
उपर्य्यष्टदलं कृत्वा वर्म पत्रेषु संलिखेत्॥ ४७॥
वलयं वह्निरालिख्य तद्बहिश्चतुरस्रकम्।
चतुरस्रस्य रेखाग्रे त्रिशूलानि समालिखेत्॥ ४८॥
भूपुरस्याष्टवज्रेषु ह्सौ बीजं लिखेत्ततः।
कोणेष्वङ्कुशमालिख्य मालामन्त्रेण वेष्टयेत्॥ ४९॥
ततस्सर्वं वेष्टयेद् यन्त्रं वलयत्रितयेन च।
वस्त्रे शिलायां फलके ताम्रपात्रेऽथ कुड्यके॥ ५०॥
भूर्जे वा ताड़पत्रे वा रोचनानाभिकुङ्कुमैः।
यन्त्रमेतत् समालिख्य त्यक्ताशो ब्रह्मचर्य्यवान्॥ ५१॥
कपिः प्राणान् प्रतिष्ठाप्य पूजयेत्तं यथाविधि।
सर्वदुःखनिवृत्त्यै तद्यन्त्रमात्मनि धारयेत्॥ ५२॥
ज्वरमार्य्यभिचारघ्नं सर्वोपद्रवशान्तिकृत्।
योषितामपि बालानां धृतं जनमनोहरम्॥ ५३॥
मालामन्त्रमथो वक्ष्ये प्रणवो वाक् हरिप्रिया।
दीर्घत्रयान्विता माया पूर्वोक्तं कूटपञ्चकं॥ ५४॥

---

यन्त्रमाह वलयेति। पुच्छाकारं वलयत्रयं विलिख्य मध्ये पाशमिति बीजेन वेष्टितं साध्यनाम लिखेत् तदुपर्य्यष्टदलेषु हुमिति॥ ४७॥

वहिरेकं वलयं तेजपारा चतुरस्रं कृत्वा तदग्रादि सन्धौ तत्र त्रिशूलानि कृत्व त्रिशूलेषु क्रोमिति वज्रेषु ह्सौमिति विलिख्य कोणेषु अङ्कुशमालिख्य ए-तन्मालामन्त्रेण वक्ष्यमाणेन संवेष्ट्य तत् पुनर्वलयत्रयेण वेष्टयेत्॥ ४८—५०॥

नाभिः कस्तूरी त्यक्ताश उपवासी॥ ५१—५२॥

मालामन्त्रमाह प्रणव इति। वाक् ऐं हरिप्रिया श्रीं माया दीर्घत्रयान्विता

तारो नमो हनुमते प्रकटान्ते पराक्रम।
आक्रान्तदिङ्मण्डलतो यशोवोति च तान च ॥ ५५ ॥
धवलीकृतवर्णान्ते जगच्चितयवज्र च।
देहज्वलदग्निसूर्य्यकोट्यन्ते तु समप्रभ ॥ ५६ ॥
तनूरुहपदं रुद्रावतारपदमीरयेत्।
लङ्कापुरीदहान्ते नो दधिलङ्घनवर्णकाः ॥ ५७ ॥
दशग्रीवशिरः पश्चात् कृतान्तकपदं ततः।
सीताश्वासनवाय्वन्ते सुतशब्दमुदीरयेत् ॥ ५८ ॥
अञ्जनीगर्भसम्भूत श्रीरामान्ते तु लक्ष्मणा।
नन्दकान्ते रकपि च सैन्यप्राकारवर्णकाः ॥ ५९ ॥
सुग्रीवसख्यका वर्णा रण वालिनिवर्हण।
कारण द्रोणपर्वान्ते तोत्पाटनपदं वदेत् ॥ ६० ॥
अशोकवनवीत्यन्ते दारणाक्षकुमारक।
छेदनान्ते वनपदं रक्षाकरसमूह च ॥ ६१ ॥
विभञ्जनान्ते ब्रह्मास्त्र ब्रह्मशक्तिग्रसेति न।
लक्ष्मणान्ते शक्तिभेद निवारणपदं पुनः ॥ ६२ ॥
विशल्यौषधिवर्णान्ते समानयनवर्णकाः।
वालोदितान्ते भान्वन्ते मण्डलग्रसनेति च ॥ ६३ ॥
मेघनादेति होमान्ते विध्वंसनपदं वदेत्।
इन्द्रजिद्वधकारान्ते न सीता रक्षकेति च ॥ ६४ ॥

---

ह्रां ह्रीं ह्रूं पूर्वोक्तं मूलमन्त्रस्थम् ऋषिर्दः वायुर्यः स्वरूपमन्यत् यथा ओं नमो हनुमते प्रकटपराक्रम आक्रान्तदिङ्मण्डलयशोवितान धवलीकृतजगत्त्रितय वज्रदेह ज्वलदग्निसूर्य्यकोटिसमप्रभ तनूरुह रुद्रावतार लङ्कापुरीदहनो दधिलङ्घन दशग्रीवशिरःकृतान्तक सीताश्वासन वायुसुताञ्जनीगर्भसम्भूत श्रीरामलक्ष्मणानन्दकर कपिसैन्यप्राकार सुग्रीवसख्यकारण वालिनिवर्हणकारण द्रोणपर्वतोत्पाटनाशोक वनविदारणाक्षकुमारक छेदन वनरक्षाकरसमूहविभञ्जन ब्रह्मास्त्रब्रह्मशक्तिग्रसन

राक्षसीसङ्घवर्णान्ते विदारण च कुम्भ च ।
कर्णादिवधशब्दान्ते परायणपदं वदेत् ॥ ६५ ॥
श्रीरामभक्तिशब्दान्ते तत्परेति समुद्र च ।
व्योमद्रुमलङ्घनेति महासामर्थ्यमेति च ॥ ६६ ॥
हातेजःपुञ्जवौत्यन्ते राजमानपदं पुनः ।
स्वामिवचनसम्पादितार्जुनान्ते च संयुग ॥ ६७ ॥
सहायान्ते कुमारेति ब्रह्मचारिन् पदं वदेत् ।
गम्भीरशब्दोऽत्निर्वायुर्दक्षिणाशापदं पुनः ॥ ६८ ॥
मार्त्तण्डमेरुशब्दान्ते पर्वतेति पदं वदेत् ।
पीठिकार्चनशब्दान्ते सकलेति पदं पुनः ॥ ६९ ॥
मन्त्रागमाचार्य्य मम सर्वग्रहविनाशन ।
सर्वज्वरोच्चाटनेति सर्वविषविनाशन ॥ ७० ॥
सर्वापत्तिनिवारण सर्वदुष्टेति सम्पठेत् ।
निवर्हणपदं सर्वव्याघ्रादिभय तत्परम् ॥ ७१ ॥
निवारण सर्वशत्रुच्छेदनेति पदं मम ।
परस्य च त्रिभुवनं पुंस्त्रीनपुंसकात्मकम् ॥ ७२ ॥
सर्वजीवपदं पश्चात् जातं वशय युग्मकम् ।
ममाज्ञाकारकं पश्चात् सम्पादय पदद्वयम् ॥ ७३ ॥

---

लक्ष्मणशक्तिभेदनिवारण विशल्यौषधिसमानयन बालोदितभानुमण्डलग्रसन मेघनादहोमविध्वंसन इन्द्रजिद्वधकारण सीतारक्षकराक्षसीसङ्घविदारण कुम्भकर्णादिवधपरायण श्रीरामभक्तितत्पर समुद्रव्योमद्रुमलङ्घन महासामर्थ्यमहातेजःपुञ्जविराजमान स्वामिवचनसम्पादितार्जुनसंयुगसहाय कुमारब्रह्मचारिन् गम्भीरशब्दोदयदक्षिणाशामार्त्तण्डमेरुपर्वतपीठिकार्चनसकलमन्त्रागमाचार्य्य मम सर्वग्रहविनाशन सर्वज्वरोच्चाटन सर्वविषविनाशन सर्वापत्तिनिवारण सर्वदुष्टनिवर्हण सर्वव्याघ्रादिभयनिवारण सर्वशत्रुच्छेदन मम परस्य च त्रिभुवनं पुंस्त्रीनपुंसकात्मकं सर्वजीवजातं वशय वशय ममाज्ञाकारकं सम्पादय सम्पादय नानानामधेयान्

नानानामपदं धेयान् सर्वान् राज्ञः स सम्पठेत्।
परिवारान् समेत्यन्ते सेवकान् कुरुयुग्मकम् ॥ ७४ ॥
सर्वशास्त्रास्त्रवीत्यन्ते षाणि विध्वंसयद्वयम्।
माया दीर्घत्रयोपेता हात्रयश्चैहि युग्मकम् ॥ ७५ ॥
विलोमपञ्चकूटानि सर्वशत्रून् हनद्वयम्।
परवान्ते लानि परसैन्यानि चोभय द्वयम् ॥ ७६ ॥
मम सर्वकार्य्यजातं साधय द्वितयं ततः।
सर्वदुष्टदुर्जनान्ते सुखानि कीलयद्वयम् ॥ ७७ ॥
घेत्रयं हात्रयं वर्मत्रितयं फट्त्रयं ततः।
वह्निप्रियान्तो मन्त्रोऽयं मालासंज्ञोऽखिलेष्टदः ॥ ७८ ॥
अष्टाशीत्युत्तराः पञ्चशतवर्णा मनोः स्मृताः।
महोपद्रवसम्पन्नो स्मृतोऽयं दुःखनाशनः ॥ ७९ ॥
द्वादशार्णान्तिमान् वर्णान् षट् त्यक्त्वैकं तथादिमम्।
पञ्चकूटात्मको मन्त्रो निखिलाभीष्टसाधकः ॥ ८० ॥
मुनीरामोऽथ गायत्रीच्छन्दो देवः कपीश्वरः।
पञ्चबीजैः समस्तेन षड़ङ्गं मुनिभिः स्मृतम् ॥ ८१ ॥
रामदूतो लक्ष्मणान्ते प्राणदाताञ्जनीसुतः।
सीताशोकविनाशोऽथ लङ्काप्रासादभञ्जनः ॥ ८२ ॥

---

सर्वान् राज्ञः सपरिवारान् मम सेवकान् कुरु कुरु सर्वशस्त्रास्त्रविषाणि विध्वंसय विध्वंसय ह्रां ह्रीं ह्रूं हा हा हा एह्येहि ह्सौं ह्स्ख्फ्रें ह्सौं ख्फ्रें ह्स्फ्रें हौं सर्वशत्रून् हन हन परबलानि परसैन्यानि क्षोभय क्षोभय मम सर्वकार्य्यजातं साधय साधय सर्वदुष्टदुर्जनसुखानि कीलय कीलय घे घे घे हा हा हा हुं हुं हुं फट् फट् फट् स्वाहा मन्त्रोऽयमष्टाशीत्यधिकपञ्चशतवर्णः ॥ ५४—७९ ॥

मन्त्रान्तरमाह द्वादशेति। द्वादशाक्षरस्यान्तिमान् षट्वर्णान् हनुमते नम इति प्रथमैकं हौमिति त्यक्त्वा शेषः। पञ्चार्णो मन्त्रः ह्स्फ्रें ख्फ्रें ह्सौं ह्स्ख्फ्रेंमिति ॥ ८० ॥ ८१ ॥

हनूमदाद्याः पञ्चैते वीजाद्याः ङेसमन्विताः।
षड़ङ्गमन्त्राः सन्दिष्टा ध्यानपूजादि पूर्ववत् ॥ ८३ ॥
तारो वाक् कमला माया दीर्घत्रयसमन्विताः।
पञ्चकूटानि मन्त्रोऽयं रुद्रार्णोऽभीष्टसिद्धिदः ॥ ८४ ॥
अर्चना पूर्ववच्चास्य परो मन्त्रोऽभिधीयते।
हृदयं भगवान् ङेन्त आञ्जनेयमहाबली ॥ ८५ ॥
तद्वद्वह्निप्रियान्तोऽयं मनुरष्टादशाक्षरः।
मुनिरीश्वर एवास्यानुष्टुप् छन्दः समीरितम् ॥ ८६ ॥
हनूमान् देवता वीजं हुं शक्तिर्वह्निवल्लभा।
आञ्जनेयो रुद्रमूर्त्तिर्वायुपुत्त्रस्तथैव च ॥ ८७ ॥
अग्निगर्भो रामदूतो ब्रह्मास्त्रविनिवारणः।
एतैर्ङेन्तैः षड़ङ्गानि कृत्वा ध्यायेत् कपीश्वरम् ॥ ८८ ॥
दहनतप्तसुवर्णसमप्रभभयहरं हृदये विहिताञ्जलिम्।
श्रवणकुण्डलशोभिमुखाम्बुजं नमामि वानरराजमिहाद्भुतम् ॥ ८९
अयुतं प्रजपेन्मन्त्रं दशांशं जुहुयात्तिलैः।
वैष्णवे पूजयेत् पीठे पूर्ववत् कपिनायकम् ॥ ९० ॥
जितेन्द्रियो नक्तभोजी प्रत्यहं साष्टकं शतम्।

---

षड़ङ्गमाह रामदूत इति। हनुमदाद्याश्चतुर्थ्यन्ता वीजाद्याः षड़ङ्गमन्त्राः यथा ह्स्फ्रें हनुमते हृत् खे्फ्रं रामभक्ताय शिरः ह्स्रौं वज्रप्राणदात्रे शिखा इत्यादि पूर्ववद्वादशवर्णवत्। मन्त्रान्तरमाह तार इति। तार ओं वाक् ऐं कमला श्रीं माया दीर्घत्रयाद्या ह्रां ह्रीं ह्रूं पञ्चकूटानि च इदानीं मुक्तानि रुद्रार्णः एकादशाक्षरः ॥ ८२—८४ ॥

मन्त्रान्तरमाह हृदयमिति। तद्वत् ङेन्तो नमो भगवते आञ्जनेयाय महाबलाय स्वाहेति ॥ ८५ ॥ ८६ ॥

षड़ङ्गमाह आञ्जनेय इति। आञ्जनेयाय हृत् रुद्रमूर्त्तये शिर इत्यादि ॥ ८७ ॥ ८८ ॥

ध्यानमाह दहनेति ॥ ८९ ॥ ९० ॥

जपित्वा चुद्ररोगेभ्यो मुच्यते दिवसत्रयात् ॥ ९१ ॥
भूतप्रेतपिशाचादिनाशायैवं समाचरेत् ।
महारोगनिवृत्त्यै तु सहस्रं प्रत्यहं जपेत् ॥ ९२ ॥
यत्ताशनो युतं नित्यं जपन् ध्यायन् कपीश्वरम् ।
राचसौघं विनिघ्नन्तमचिराज्जयति द्विषम् ॥ ९३ ॥
सुग्रीवेण समं रामं सन्दधानं स्मरन् कपिम् ।
प्रजप्यायुतमेतस्य सन्धिं कुर्य्याद्विरुद्धयोः ॥ ९४ ॥
लङ्कां दहन्तं तं ध्यायन्नयुतं प्रजपेन्मनुम् ।
शत्रूणां प्रदहेद् ग्रामानचिरादेव साधकः ॥ ९५ ॥
प्रयाणसमये ध्यायन् हनूमन्तं मनुं जपन् ।
यो जाति सोऽचिरात् स्वेष्टं साधयित्वा गृहं व्रजेत् ॥९६॥
यः कपीशं सदा गेहे पूजयेज्जपतत्परः ।
आयुर्लक्ष्मी प्रवर्द्धेते तस्य नश्यन्त्युपद्रवाः ॥ ९७ ॥
शार्दूलतस्करादिभ्यो रचेन्मनुरयं स्मृतः ।
प्रस्वापकाले चौरेभ्यो दुष्टस्वप्नादपि ध्रुवम् ॥ ९८ ॥
अथः प्लीहारोगघ्नो हनुमन्मन्त्रकं ब्रुवे ।
पवनद्वितयं सद्योजातयुक्तं हनूपदम् ।
महाकालः शशाङ्काढ्यः कामिका फलकक्रिया ॥ ९९ ॥
सनेत्रा शान्तमीनो ग सात्वतो गित आयुरा ।
पलोहितं रुड़ाहेति वेदनेत्राचरो मनुः ॥ १०० ॥

---

शयीगानाह जितेन्द्रिय इति ॥ ९१—९८ ॥

उदररोगनाशकमन्त्रमाह पवनेति। सद्योजात ओङ्कार तद्युतं पवनरूपं यो हनुस्वरूपं शशाङ्को व्योम महाकालः सविन्दुमः मं कामिक तः फलफलस्वरूपं सनेत्रा क्रिया इयुती सः लि शान्तसः मीनो धः गस्वरूपं सात्वती घः गित आयुरा स्वरूपं लोहितः यः रुड़ाहस्वरूपं वेदनेत्राचर चतुर्विंशत्यर्णः यथा यो यो हनुमन्नफलफलितधगधगित: आयुराषपरुड़हेति ॥ ९९ ॥ १०० ॥

प्लीहरोगहरस्यास्य सुन्याद्यं पूर्ववन्मतम्।
प्लीहयुक्तोदरे स्थाप्य नागवल्लीदलं शुभम्॥ १०१॥
तदुपर्य्यष्टगुणितं वस्त्रमाच्छादयेत्ततः।
वंशजं शकलं तस्योपरि सुचेत् कपिं स्मरन्॥ १०२॥
आरण्यप्रस्तरोत्पन्ने वह्नौ यष्टिं प्रतापयेत्।
वदरीतरुसम्भूतां मन्त्रेणानेन सप्तशः॥ १०३॥
तया सन्ताड़येद्दंशशकलं जठरस्थितम्।
सप्तकृत्वः प्लीहरोगो नश्यत्येव नृणां क्षणात्॥ १०४॥
पुच्छाकारे सुवसने लेखिन्या कोकिलोत्थया।
अष्टगन्धैर्लिखेत् रूपं कपिराजस्य सुन्दरम्॥ १०५॥
तन्मध्येऽष्टादशार्णन्तु शत्रुनामयुतं लिखेत्।
तेन मन्त्राभिजप्तेन शिरोवद्धेन भूमिपः॥ १०६॥
जयत्यरिगणं सर्वं दर्शनादेव निश्चितम्।
युद्धं जिगीषुर्नृपतिः पूर्वोक्तं लेखयेत् ध्वजे॥ १०७॥
ध्वजमादायोपरागे संस्पर्शान्मोक्षणावधि।
मातृकां जापयेत् पश्चात् दशांशेन च हावयेत्॥ १०८॥
सर्षपैस्तिलसंमिश्रैः संस्पर्शान्मोक्षणावधिः।
गजस्थन्तं ध्वजं दृष्ट्वा पलायन्तेऽरयोऽचिरात्॥ १०९॥
अथो हनुमतो यन्त्रं वक्ष्ये रक्षाविधायकम्।

---

प्लीहरोग उदररोगः तन्नाशकः प्रयोगमाह प्लीहेति। आरण्यप्रस्तरोत्पन्ने वनपाषाणान्निष्काशितेऽग्नौ वदर्य्युत्थां यष्टिं सप्तधा मन्त्रेण तापयेत् तयोदरस्थिते वंशखण्डे ताड़िते रोगी नश्यति॥ १०१—१०४॥

प्रयोगान्तरमाह पुच्छेति। पुच्छाकारे वस्त्रे कोकिलापिच्छलेखिन्याऽष्टगन्धैर्हनुमद्रूपं कृत्वा तदुदरेऽष्टादशार्णं विलिख्याभिमन्त्रितेन शिरोधृतेन तेनारीन् जयति॥ १०५—१०९॥

लिखेदष्टदलं पद्मं साध्याख्ययुतकर्णिकम् ॥ ११० ॥
दलेष्वष्टार्णमालिख्य मालामन्त्रेण वेष्टयेत्।
तद्बहिर्मायया वेष्ट्य प्राणस्थापनमाचरेत् ॥ १११ ॥
लिखितं स्वर्णलेखिन्या दले भूर्जतरोः शुभे।
रोचनाकुङ्कुमाभ्यान्तु वेष्टितं कनकादिभिः ॥ ११२ ॥
सम्पातसाधितं यन्त्रं भुजे वा मूर्ध्नि धारयेत्।
रणे जयमवाप्नोति व्यवहारे दुरोदरे ॥ ११३ ॥
ग्रहैर्विघ्नैर्विषैः शस्त्रैश्चौरैर्नैवाभिभूयते।
रोगान् सर्वानपाकृत्य चिरं जीवति भाग्यवान् ॥ ११४ ॥
वियदग्नियुतं दीर्घषट्काढ्यं तारसम्पुटम्।
अष्टार्णो मन्त्र आख्यातो मालामन्त्रोऽथ कथ्यते ॥ ११५ ॥
वज्रकाय वज्रतुण्ड कपिलेत्यथ पिङ्गल।
ऊर्द्ध्वकेश महावर्ण बलरक्तमुखेति च ॥ ११६ ॥
तड़िज्जिह्व महारौद्र दंष्ट्रोत्कटकहद्वयम्।
करालिने महादृढ़प्रहारिन्निति वर्णकाः ॥ ११७ ॥
लङ्केश्वरवधायान्ते महासेतु पदं ततः।
बन्धान्ते च महाशैलप्रवाह गगनेचर ॥ ११८ ॥
एह्येहि भगवन्नन्ते महाबलपराक्रम।
भैरवाज्ञापयैह्येहि महारौद्रपदं पुनः ॥ ११९ ॥

---

यन्त्रमाह लिखेदिति। अष्टार्णमालामन्त्रौ वक्ष्यमाणौ दुरोदरे द्यूते॥ ११०—११४ ॥

अष्टार्णमाह वियदिति। वियत् हः अग्निः रः यथा ॐ ह्रां ह्रीं ह्रूं ह्रैं ह्रौं ह्रः ॥ ११५ ॥

मालामन्त्रमाह वज्रेति। यथा ॐ वज्रकाय वज्रतुण्ड कपिल पिङ्गल ऊर्द्ध्वकेश महाबल रक्तमुख तड़िज्जिह्व महारौद्रदंष्ट्रोत्कटकह कह करालिने महा-

दीर्घपुच्छेन वर्णान्ते वेष्टयान्ते तु वैरिणम् ।
जम्भयद्वितयं हुं फट् प्रणवाद्रिसमीरितः ॥ १२० ॥
बाणनेत्रेन्दुवर्णोऽयं मालामन्त्रोऽखिलेष्टदः ।
युद्धे जप्तो जयं दद्यात् व्याधौ व्याधिविनाशनम् ॥ १२१ ॥
अष्टार्णमालामन्त्रोऽस्तु मुन्याद्यर्चा तु पूर्ववत् ।
भूरिणा किमिहोक्तेन सर्वं दद्यात् कपीश्वरः ॥ १२२ ॥

इति मन्त्रमहोदधौ हनुमन्मन्त्रकथनं नाम
त्रयोदशस्तरङ्गः ।

---

## चतुर्दशस्तरङ्गः ।

अथ वक्ष्ये महाविष्णोर्मन्त्रान् सर्वार्थसाधकान् ।
ब्रह्माद्या यान् समाराध्य ससृजुर्विविधाः प्रजाः ॥ १ ॥
मेरुः कृशानुसंयुक्तोऽनुग्रहेन्दुसमन्वितः ।
एकाक्षरो नरहरेर्मन्त्रः कल्पद्रुमो नृणाम् ॥ २ ॥

---

हृद्‌महारिन् लङ्केश्वरवधाय महासेतुबन्धमहाशैलप्रवाह गगनेचर एह्येहि भगवन् महाबलपराक्रम भैरवाज्ञापय एह्येहि महारौद्र दीर्घपुच्छेन वेष्टय वैरिणं भञ्जय भञ्जय हुं फट् ॥ ११९—१२० ॥

बाणनेत्रेन्दुवर्णः पञ्चविंशत्युत्तरशतार्णः ॥ १२१ ॥

अष्टार्णमालामन्त्रौ स्वतन्त्राविति सूचयन्नाह अष्टार्णेति ॥ १२२ ॥

इति नौकासमाख्यायां श्रीमन्त्रमहोदधिटीकायां
त्रयोदशस्तरङ्गः ।

त्र्यक्षरं सम्पुटः प्रोक्तो मायया प्रणवेन च ।
ऋषिरत्रिश्च गायत्री छन्दो देवो नृकेशरी ॥ ३ ॥
षड्दीर्घयुक्तबीजेन षड़ङ्गानि समाचरेत् ।
वर्णौ मायापुटेनैव तारसम्पुटितेन वा ॥ ४ ॥
तपनसोमहुताशनलोचनं घनविरामहिमांशुसमप्रभम् ।
अभयचक्रपिनाकवरान् करैर्दधतमिन्दुधरं नृहरिं भजे ॥ ५ ॥
लक्षमेकं जपेन्मन्त्रं दशांशं घृतपायसैः ।
जुहुयात् पूजयेत् पीठे विमलादिसमन्विते ॥ ६ ॥
केसरेष्वङ्गपूजा स्याद्दिग्दलेषु खगेश्वरम् ।
शङ्करं शेषनागञ्च शतानन्दं प्रपूजयेत् ॥ ७ ॥
श्रियं ह्रियं धृतिं पुष्टिं कोणपत्रेषु साधकः ।
द्वात्रिंशत्पत्रमध्ये तु नृसिंहांस्तावतोऽर्चयेत् ॥ ८ ॥
कृष्णो रुद्रो महाघोरो भीमो भीषण उज्ज्वलः ।
करालो विकरालश्च दैत्यान्तो मधुसूदनः ॥ ९ ॥
रक्ताक्षः पिङ्गलाक्षश्चाञ्जनसंज्ञस्तयोदशः ।
दीप्ततेजाः सुघोरश्च सुहनुः षोड़शः स्मृतः ॥ १० ॥
विश्वाख्यो राक्षसान्तश्च विशालो धूम्रकेशरः ।

---

विष्णुमन्त्रान् स्वं वक्तुं प्रतिजानीते अथेति । मन्त्रानाह नैहरिति । नैहः ष: क्रमात् ए:-षकुशह क्षौ इन्दुर्बिन्दुः तेन क्षौं माया ह्रीं तत् संपुटः प्रणवसंपुटितेति द्वौ व्यर्णौ ॥ १—४ ॥

ध्यानमाह तपनेति । सूर्येन्दग्निनेत्रं घनेति घनविरामः शरत्तत्र यः शीतांशुश्चन्द्रः तत्तुल्यकान्तिः घनघनानगलमिति पाठे नीलकण्ठं शशिसमप्रभं शशिना समाना प्रभा यस्य तं करयोर्दक्षवामयोश्चक्रपिनाके अधस्थयोर्वराभये इन्दुधरं शशिशेखरं विमलादय उक्ताः ॥ ५ ॥ ६ ॥

शतानन्दं ब्रह्माणम् ॥ ७ ॥

तावतो द्वात्रिंशत्संख्यकान् ॥ ८ ॥

हयग्रीवो घनस्वरो मेघनादस्तथापरः॥ ११ ॥
मेघवर्णः कुम्भकर्णः कृतान्तक इतीरितः।
तीव्रतेजा अग्निवर्णो महोग्रो विश्वभूषणः॥ १२ ॥
विघ्नक्षमो महासेनः सिंहो द्वात्रिंशदीरिताः।
इन्द्रादीन् वज्रमुख्यांश्च पूजयेच्चतुरस्रके॥ १३ ॥
एवं संसाधितो मन्त्रः प्रयोगेषु क्षमो भवेत्।
सहस्राष्टकसंख्यातैः शतपर्वात्रिकैस्तु यः॥ १४ ॥
जुहुयादुदके तस्य सर्वे नश्यन्त्युपद्रवाः।
महोत्पातहरोऽप्येष होमः सर्वेष्टदो नृणाम्॥ १५ ॥
संस्थाप्य विधिवत् कुम्भं जपेदष्टसहस्रकम्।
अभिषिञ्चेद्विषाक्रान्तं विषजातिनिवृत्तये॥ १६ ॥
विचरन् विपिने चौरव्याघ्रसर्पाकुले नरः।
जपन्नमुं मन्त्रवरं न भयं प्रतिपद्यते॥ १७ ॥
ईक्षिते निशि दुःस्वप्ने जपन्मन्त्रं निशां नयेत्।
अवशिष्टां स्वप्नफलं सम्यगादिशति ध्रुवम्॥ १८ ॥
कर्णनेत्रशिरःकण्ठरोगान्मन्त्रो विनाशयेत्।
अभिचारकृतां पीड़ां मनुमन्त्रितभस्म च॥ १९ ॥
आत्मानं नृहरिं ध्यात्वा वैरिणं मृगवालकम्।
आदाय प्रक्षिपेद् यस्यां दिशि तस्यां स गच्छति॥ २० ॥
स्वकुटुम्बं परित्यज्य न चैवावर्त्तते पुनः।
नृसिंहं संस्मरन् वादे रिपुं तस्य विनष्टये॥ २१ ॥
प्रजपेदयुतं मन्त्रं मारणोत्थाय नष्टये।
प्रसूनैर्बिल्ववृक्षोत्थैः फलैस्तत्काष्ठसम्भवैः॥ २२ ॥

---

तानाह क्षच इति। प्रयोगानाह सहस्रेति शतपर्वा दूर्वा निशि दुःस्वप्ने दृष्टे मन्त्रं जपन्नवशिष्टां निशां नयेत् स दुःस्वप्नः सुखप्रस्येव फलं ददाति॥९—२१॥

सहस्रं जुहुयाद्वह्नौ वाञ्छितश्रीसमृद्धये ।
पुत्रजीवेध्मवह्नौ तु तत्फलैः पुत्रसम्पदे ॥ २३ ॥
ब्राह्मीं वचां वा मन्त्रेण मन्त्रितां शतसंख्यया ।
संवत्सरमदन् प्रातर्विद्यापारङ्गमो भवेत् ॥ २४ ॥
किं बहुक्तेन नृहरिः सर्वेष्टफलदो नृणाम् ।
अथोच्यते नरहरिर्भीतिहारीष्टसाधकः ॥ २५ ॥
जयद्वयं श्रीनृसिंहेत्यष्टार्णो मनुरीरितः ।
ऋषिर्ब्रह्मास्य गायत्रीच्छन्दो देवो नृकेशरी ॥ २६ ॥
शक्तिर्नतं वियद्बीजमुभे चन्द्रसमन्विते ।
वियता दीर्घयुक्तेन चन्द्राढ्येन षडङ्गकम् ॥ २७ ॥

श्रीमन्नृकेशरितनो जगदेकबन्धो
श्रीनीलकण्ठ करुणार्णव सामराज ।
वह्नीन्दुतीव्रकरनेत्र पिनाकपाणे
शीतांशुशेखर रमेश्वर पाहि विष्णो ! ॥ २८ ॥

एवं ध्यात्वा जपेन्मन्त्राष्टकं तस्य दशांशतः ।
जुहुयात् पायसेनाग्नौ पूजाद्यस्य तु पूर्ववत् ॥ २९ ॥

---

प्रसङ्गान्मारणप्रायश्चित्तमाह प्रजपेदिति । अभिचारजातपापनिवृत्त्यै अयुतं जपेत् पुत्रजीवेध्मवह्नौ पुत्रजीवतरुकाष्ठदीप्तेऽग्नौ तत्फलैः पुत्रार्थेव जुहुयात् । मन्त्रान्तरमाह जयेति । यथा जय जय श्रीनृसिंहेति ॥ २२—२६ ॥

नेवं इ शक्तिः वियत् हः बीजं उभे शक्तिबीजे बिन्दुयुते दीर्घयुतेन सबिन्दुना वियता हैन षडङ्गं ह्रां हन् ह्रीं शिर इत्यादि ॥ २७ ॥

ध्यानमाह श्रीमदिति । साम्नां राजा ईशः यद्वा सामसु राजते प्रकाशते सामराजः सामगाने कृते प्रत्यक्षो भवतीत्यर्थः तीव्रकरो रविः पिनाकपाणे इत्युपलक्षणं वराभयचक्राणां वामोर्ध्वादिदक्षोर्ध्वान्तं पिनाकाभयवरचक्रधर इत्यर्थः अस्य पूजादि पूजाप्रयोग एव एकार्णवत् ॥ २८ ॥ २९ ॥

लक्ष्मीनृसिंहमन्त्रः तारः पद्मा च हृल्लेखा जय लक्ष्मीप्रियाय च ।
नित्यप्रमुदितान्ते तु चेतसे पदमीरयेत् ॥ ३० ॥
लक्ष्मीश्रितार्द्धदेहाय रमामाये नमः पदम् ।
एकाधिकस्त्रिंशदर्णो मनुः पद्मभवो मुनिः ॥ ३१ ॥
छन्दोऽतिजगती प्रोक्तं देवः श्रीनरकेशरी ।
वीजं रमाद्रिजा शक्तिः श्रीवीजेन षड़ङ्गकम् ॥ ३२ ॥
क्षीराब्धौ वसुमुख्यदेवनिकरैरग्रादिसंवेष्टितः
शङ्खं चक्र गदाम्बुजं निजकरैर्बिभ्रत् त्रिनेत्रः सितः ।
सर्पाधीशफणातपत्रलसितः पीताम्बरालङ्कृतो
लक्ष्म्याश्लिष्टकलेवरो नरहरिस्तान्नीलकण्ठो मुदे ॥ ३३ ॥
एवं ध्यात्वा जपेल्लक्षत्रयं षष्टिसहस्रकम् ।
मध्वक्तैर्मल्लिकापुष्पैर्जुहुयाज्जातवेदसि ॥ ३४ ॥
षट्शतं त्रिसहस्राणि पीठे पूर्वोदिते यजेत् ।
प्रथमावरणेऽङ्गानि परशक्तीरिमाः पुनः ॥ ३५ ॥
भास्वती भास्करी चिन्ता द्युतिरुन्मीलनी तथा ।
रमा कान्ती रुचिश्चेति शक्राद्या हेतिसंयुताः ॥ ३६ ॥
इत्थं सिद्धे मनौ मन्त्री निग्रहानुग्रहक्षमः ।
मल्लिकाकुसुमैर्होमादिष्टसिद्धिमवाप्नुयात् ॥ ३७ ॥

---

मन्त्रान्तरमाह तार इति । तार ॐ पद्मा श्रीं हृल्लेखा ह्रीं रमामायेति श्रीं ह्रीं स्वरूपमन्यत् यथा ॐ श्रीं ह्रीं जय लक्ष्मीप्रियाय नित्यप्रमुदितचेतसे लक्ष्मी-श्रितार्द्धदेहाय श्रीं ह्रीं नमः पद्मभवो ब्रह्मा ॥ ३०—३१ ॥

अद्रिजा ह्रीं श्रीं बीजेन षड्दीर्घयुक्तेन श्रां श्रीं श्रूमित्यादि ॥ ३२ ॥

ध्यानमाह क्षीराब्धाविति । क्षीरसमुद्रगतश्वेतद्वीपे वस्वादिदेवौघैरग्रादि यैर्यथा तथा वेष्टितः । अग्रे वसुभिः दक्षे रुद्रैः पश्चिमे आदित्यैः वामे विश्वदेवैरित्यर्थः अधो वामदक्षयोः स्वचक्रे ऊर्ध्वयोर्गदापद्मे सितं चन्द्रवर्णं शेषफणा एवातपत्रं तेन लसितो दीप्तः ईदृङ्नृसिंहो मम मुदे हर्षाय स्तात् भूयात् ॥ ३३—३७ ॥

अथ दशावतारो नृसिंहः ।

प्रणवो नृहरेर्वीजं नमो भगवते पदम् ।
नरसिंहाय तारश्च वीजं मत्स्येति कीर्त्तयेत् ॥ ३८ ॥
रूपाया तात वीजञ्च कूर्मरूपाय वर्णकाः ।
तारवीजे वराहार्णा रूपाय तारवीजके ॥ ३९ ॥
नृसिंहरूपायान्ते तु तारो वीजञ्च वामनम् ।
रूपाय त्रिस्तारवीजे रामायेति पदं वदेत् ॥ ४० ॥
तारो वीजञ्च कृष्णाय तारो वीजञ्च कल्किने ।
जयद्वयं ततः शालग्राम दीर्घा सनेत्रका ॥ ४१ ॥
वासिने दिव्यसिंहाय स्वयम्भू ङेन्तिमः स्मृतः ।
पुरुषाय नमस्कारो वीजमित्युदितो मनुः ॥ ४२ ॥
हरेर्नवनवत्यर्णो मुनिरत्रिः किलास्य तु ।
छन्दोऽतिजगती देवो नृकेशर्य्यवतारवान् ॥ ४३ ॥
वीजं पूर्वोदितं शक्तिराद्यवीजेन चाङ्गकम् ।
कृत्वा षड्दीर्घयुक्तेन ध्यायेत् क्षीरोदधिस्थितम् ॥ ४४ ॥
सहस्रचन्द्रवतिमो दयालुर्लक्ष्मीसुखालोकनलोलनेत्रः ।
दशावतारैः परितः परीतो नृकेशरी मङ्गलमातनोतु ॥ ४५ ॥
जपोयुतं दशांशेन हवनं पायसेन तु ।
पीठे पूर्वोदिते पूर्वमङ्गानि परिपूजयेत् ॥ ४६ ॥

---

मन्त्रान्तरमाह प्रणव इति । नृहरेर्वीजं क्ष्रौं ॥ ३८ ॥ ३९ ॥

त्रिस्त्रिवारं;तारवीजे ॥ ४० ॥

सनेत्रा दीर्घा इयुतो नः नि ङेन्तिमश्च चतुर्थ्यन्तः । नवनवत्यर्णः एकोनशताक्षरः मन्त्रो यथा ॐ क्ष्रौं नमो भगवते नरसिंहाय ॐ क्ष्रौं मत्स्यरूपाय ॐ क्ष्रौं कूर्मरूपाय ॐ क्ष्रौं वराहरूपाय ॐ क्ष्रौं नृसिंहरूपाय ॐ क्ष्रौं वामनरूपाय ॐ क्ष्रौं ॐ क्ष्रौं ॐ क्ष्रौं रामाय ॐ क्ष्रौं कृष्णाय ॐ क्ष्रौं कल्किने जय जय शालग्रामनिवासिने दिव्यसिंहासनाय स्वयम्भुवे पुरुषाय नमः ॐ क्ष्रौं । अवतारवान्

दशावतारान् मत्स्यादीन् दिक्पालानायुधान्यपि ।
प्रयोगाः पूर्ववत् प्रोक्ताः सर्वसिद्धिप्रदे मनौ ॥ ४७ ॥

अथ अभयनृसिंहमन्त्रः ।

तारो नमो भगवते नरसिंहाय हृच्च ते ।
जस्तेजसे आविराविर्भवव्रजनखान्ततः ॥ ४८ ॥
वज्रदंष्ट्र च कर्मान्ते त्वाशयान् रन्धयद्वयम् ।
तमोग्रसद्वयं वह्नेः कलत्रमभयं पुनः ॥ ४९ ॥
आत्मन्यन्ते च भूयिष्ठास्तारो वीजं मनुः स्मृतः ।
द्विषड्वर्णैः शुकः प्रोक्तो मुनिश्छन्दस्तु पूर्ववत् ॥ ५० ॥
अभयो नारसिंहस्तु देवतान्यन्तु पूर्ववत् ।
अथ गोपालमनवः प्रोच्यन्ते स्वेष्टसाधकाः ॥ ५१ ॥
गोपीजनपदस्यान्ते वल्लभायाग्निसुन्दरी ।
दशाक्षरो मनुः प्रोक्तो मनोरथफलप्रदः ॥ ५२ ॥
नारदोऽस्य विराट्कृष्णो मुनिपूर्वाः समीरिताः ।
वीजशक्ती तु विज्ञेये क्रमात् कामानलप्रिये ॥ ५३ ॥
आचक्राय हृदाख्यातं विचक्राय शिरापि च ।
सुचक्राय शिखा पश्चात्त्रैलोक्यरक्षणं ततः ॥ ५४ ॥

---

दशावतारयुतो नृसिंहो देवता ओं क्ष्रौं वीजं स्वाहेति शक्तिः क्ष्रां क्ष्रीमित्याद्यङ्गम् ॥ ४१—४७ ॥

मन्त्रान्तरमाह तार इति । हृत् नमः वह्नेः कलत्रं स्वाहा वीजं क्ष्रौं यथा ओं नमो भगवते नरसिंहाय नमस्तेजस्तेजसे आविराविर्भव वज्रनखवज्रदंष्ट्रकर्माशयान् रन्धय रन्धय तमोग्रस स्वाहा अभयमात्मनि भूयिष्ठा ओं क्ष्रौमिति ॥ ४८—५१ ॥

अन्यत् पूजादि गोपालमन्त्रमाह गोपीति । अग्निसुन्दरी स्वाहा । यथा गोपीजनवल्लभाय स्वाहा ॥ ५२ ॥

विराट्छन्दः क्लीं वीजं स्वाहा शक्तिः ॥ ५३ ॥

चक्राय कवचं प्रोक्तमसुरान्तकमन्त्रतः ।
चक्रायास्त्रमिदं कुर्य्यादङ्गानां पञ्चकं मनोः ॥ ५५ ॥
सर्वाङ्गे त्रिमनुं न्यस्य वर्णन्यासं समाचरेत् ।
मस्तके नेत्रयोः श्रुत्योर्नसोर्वक्त्रे हृदम्बुजे ॥ ५६ ॥
जठरे लिङ्गदेशे च जानुनोः पादयोरपि ।
वर्णांस्तारपुटान् न्यसेद्बिन्द्वाढ्यान् नमसा युतान् ॥ ५७ ॥
वृन्दारण्यगकल्पपादपतले सद्रत्नपीठेऽम्बुजे
शोणाभे वसुपत्रके स्थितमजं पीताम्बरालङ्कृतम् ।
जीमूताभमनेकभूषणयुतं गोगोपगोपीवृतं
गोविन्दं स्मरसुन्दरं मुनियुतं वेणुं रणन्तं स्मरेत् ॥ ५८ ॥
एवं ध्यात्वा जपेल्लक्षं दशांशं सरसीरुहैः ।
जुहुयात् पूजयेत् पीठे वैष्णवे नन्दनन्दनम् ॥ ५९ ॥
अग्न्यादिकोणेष्वभ्यर्च्य हृदाद्यङ्गचतुष्टयम् ।
दिशास्वस्त्रं दलेष्वष्टौ महिषीः परिपूजयेत् ॥ ६० ॥
रुक्मिणी सत्यभामा च नग्नजित्तनयार्कजा ।
मित्रविन्दा लक्ष्मणा च जाम्बवती सुशालिका ॥ ६१ ॥
महिष्योऽष्टौ सुवर्णाभा विचित्राभरणस्रजः ।
दलाग्रे वसुदेवञ्च देवकीं नन्दगोपतिम् ॥ ६२ ॥
यशोदां बलभद्रञ्च सुभद्रां गोपगोपिकाः ।

---

पञ्चाङ्गमाह । चचक्राय हृत् विचक्राय शिरः सुचक्राय शिखा त्रैलोक्य-रक्षचक्राय कवचं असुरान्तकचक्राय अस्त्रम् ॥ ५४ ॥ ५५ ॥

वर्णन्यासमाह मस्तक इति ॥ ५६ ॥

तारपुटानि ओं अं ओं नमः मस्तके इत्यादि ॥ ५७ ॥

ध्यानमाह वृन्देति । वृन्दावनगतकल्पवृक्षतले मणिपीठरक्ताष्टपत्रे स्थितं ध्यायेत् जीमूताभं मेघश्यामं स्मरादपि सुन्दरम् ॥ ५८—६० ॥

इन्द्रादीनपि वज्रादीन् पूजयेत्तदनन्तरम् ॥ ६३ ॥
इत्थं सिद्धे मनौ मन्त्री साधयेत् स्वमनीषितम् ।
गुड़ूचीशकलैरग्नौ जुहुयात् ज्वरशान्तये ॥ ६४ ॥
कृष्णाद्वेषं प्रकुर्वन्तं बलदेवस्य रुक्मिणः ।
द्यूतासक्तस्य सञ्चिन्त्य गोमयोद्भवगोलकान् ॥ ६५ ॥
जुहुयाद्वेषसिद्धार्थं नरयोः सुहृदोर्मिथः ।
पिचुमन्दफलोत्पन्नतैलाभ्यक्तैः समिद्वरैः ॥ ६६ ॥
अर्चजैर्जुहुयाद्रात्रावयुतं शत्रुशान्तये ।
अयुतं प्रजपेन्मन्त्रमात्मानं संस्मरन् हरिम् ॥ ६७ ॥
मञ्चस्खलगतप्राणाकृष्टकंसं रिपुं सुधीः ।
शत्रुजन्मर्चवृक्षोत्थसमिद्भिरयुतं निशि ॥ ६८ ॥
जुहुयादित्यसुग्रोऽपि सपत्नो निधनं व्रजेत् ।
पलाशकुसुमैर्लक्षं विद्यासिद्धैश्च जुहोतु ना ॥ ६९ ॥
तण्डुलैः सितपुष्पाद्यैराज्याक्तैः प्रत्यहं नरः ।
हुत्वा सप्तदिनान्ते तद्भस्म भाले च मूर्द्धनि ॥ ७० ॥
धारयन् वशयेत् सद्यो यौवनं तच्च पुरुषान् ।
पुष्पं वासोऽञ्जनं वापि ताम्बूलमथ चन्दनम् ॥ ७१ ॥
सहस्रं मनुना जप्तं दद्याद् यस्मै नराय सः ।
वशमेत्यचिरादेव सपुत्रपशुबान्धवाः ॥ ७२ ॥
वृन्दावनस्थं गायन्तं गोपीभिः संस्मरन् हरिम् ।
अपामार्गसमिद्भिर्यो जुहुयाद्वशयेज्जगत् ॥ ७३ ॥

---

चर्कजा कालिन्दी गोपाश्च गोपिकाश्च ॥ ६१—६७ ॥
मञ्चात् स्खलन्तः गतप्राणवाची आकृष्टवाची कंसश्च तथाभूतं रिपुं स्मरन्
रिपुजन्मनक्षत्रवृक्षसम्भूतसमिद्भिर्जुहुयात् नक्षत्रवृक्षा उक्ताः ॥ ६८—७० ॥

रासक्रीड़ागतं कृष्णं ध्यायन् योऽयुतमाजपेत् ।
षण्मासाद्वाञ्छितां कन्यामुद्वहेद्भक्तितत्परः ॥ ७४ ॥
जपेत् सहस्रं ध्यायन्ती यावदेव स्थितं हरिम् ।
कन्यका वाञ्छितं नाथं मण्डलान्तर्लभेत सा ॥ ७५ ॥
पत्रैः फलैः समिद्भिर्वा विल्वोत्थैर्मधुसंयुतैः ।
कमलैः शर्करायुक्तैर्होमाल्लक्ष्मीपतिर्भवेत् ॥ ७६ ॥
बहुना किमिहोक्तेन कृष्णः सर्वार्थदो नृणाम् ।
अथ मन्त्रान्तरं वच्मि गोविन्दस्येष्टदं नृणाम् ॥ ७७ ॥
कामो वियद्रेचिकाढ्यं पीता वामाक्षिसंयुता ।
चक्री झिण्टीशमारूढ़ो वक्रोऽनन्तान्वितो मरुत् ॥ ७८ ॥
हृदयान्तो मनुश्रेष्ठो वसुवर्णोऽखिलेष्टदः ।
मुनिः सम्मोहनाद्योऽस्य नारदः परिकीर्त्तितः ॥ ७९ ॥
गायत्रीच्छन्द इत्युक्तं देवस्त्रैलोक्यमोहनः ।
कामबीजेन षड्दीर्घयुक्तेनाङ्गं समाचरेत् ॥ ८० ॥
कल्पद्रुरुहमूलसंस्थितवयोराजन्नतांसस्थितम् ।
पौष्पं बाणमथेक्षुचापकमले पाशाङ्कुशे बिभ्रतम् ॥ ८१ ॥
चक्रं शङ्खगदे करैरुदधिजासंश्लिष्टदेहं हरिम् ।
नानाभूषणरक्तलेपकुसुमं पीताम्बरं संस्मरेत् ॥ ८२ ॥

---

तत्र यौवनं युवतिसमूहः पुरुषान् वशयेत् ॥ ७१—७४ ॥

मण्डलमेकोनपञ्चाशद्दिनानि तन्मध्ये वाञ्छितं प्रियं प्राप्नोति ॥ ७५—७७ ॥

मन्त्रान्तरमाह काम इति । कामः क्लीं वियत् हः रेफिकाढ्यं रयुतं ह पीता य वामाक्षिसंयुता इयुता चक्री कः झिण्टीश ए तदारूढ़ः के वक्रः षः अनन्तान्वित आयुतः षा मरुत् य हृदयं नमः यथा क्लीं हृषीकेशाय नमः ॥ ७८ ॥ ७९ ॥

षडङ्गमाह कामेति । क्लां हृत् क्लीं शिर इत्यादि ॥ ८० ॥

ध्यानमाह कल्पेति । कल्पवृक्षमूलस्थितगरुड़ासनस्थं बाणपाशाङ्कुशशङ्खादीषु चक्रा चक्रेषु । क्लां क्लीं क्लूं क्लैं क्लौं क्लः ॥ ८१ ॥ ८२ ॥

एवं ध्यात्वा जपेत् सूर्य्यलचं त्रिमधुरप्लुतैः।
पलाशपुष्पैर्जुहुयात्तत् सहस्रं हुताशने ॥ ८३ ॥
तर्पयेत् सलिलैस्तावत् पीठे पूर्वोदिते यजेत्।
पक्षिराजाय ठद्वन्द्वमनेन गरुडार्चनम् ॥ ८४ ॥
मुकुटं शिरसीष्ट्वाथ कर्णयोः कुण्डले यजेत्।
करेषु चक्राद्यस्त्राणि श्रीवत्सं कौस्तुभं हृदि ॥ ८५ ॥
वनमालां गले श्रोणिदेशे पीताम्बरं श्रियम्।
वामाङ्केऽभ्यर्च्य वस्त्रादि दिग्विदिक्ष्वङ्गपूजनम् ॥ ८६ ॥
दिक्षु प्रपूज्य चतुरो वाणान् कोणेषु पञ्चमम्।
लक्ष्म्याद्याः शक्तयः पूज्याः शक्राद्या आयुधान्यपि ॥ ८७ ॥
लक्ष्मीः सरस्वती चापि रतिप्रीतिश्चतुर्थिका।
कीर्त्तिः कान्तिस्तुष्टिपुष्टी इति लक्ष्म्यादयो मताः ॥८८॥
विजयापुष्पसंयुक्तैर्जलैः सन्तर्पयेत् शतम्।
प्रातः प्रत्यहमेतस्य वाञ्छितं मासतो भवेत् ॥ ८९ ॥
अयुतस्तु घृतेनाग्नौ हुत्वा सम्पातजं घृतम्।
तावज्जप्तं प्रिया कान्तं भोजयेद्वशमेति सः ॥ ९० ॥
कामवीजेऽपि विज्ञेया परिचर्य्योक्तमन्त्रवत्।
विशेषात् कामिनीवर्गमोहको मनुनायकः ॥ ९१ ॥
रमाभवानीकन्दर्पैः कृष्णाय स्मृतिरोयुता।
विन्दाय वह्निजायान्तो द्वादशार्णो मनुः स्मृतः ॥ ९२ ॥

---

सूर्य्यलचं द्वादशलचम् ॥ ८३ ॥

ठद्वयं स्वाहा ॥ ८४—९० ॥

मन्त्रान्तरमाह कामेति। क्लीमिति गोपालमन्त्रः तत्पूजादार्यवत्। अयं स्त्रीवशीकारी ॥ ९१ ॥

मन्त्रान्तरमाह रमेति। रमा श्रीं भवानी ह्रीं कन्दर्पः क्लीं कृष्णायस्वरूपं स्मृतिर्गः ओयुतो गो यथा श्रीं ह्रीं क्लीं कृष्णाय गोविन्दाय स्वाहेति ॥ ९२ ॥

मुनिर्ब्रह्मास्य गायत्री छन्दः कृष्णोऽस्य देवता ।
धरैकचन्द्ररामाब्धिनेत्रार्णैरङ्गमीरितम् ॥ ९३ ॥
उपासनास्य मन्त्रस्य पूर्ववत् परिकीर्त्तिता ।
अथ वच्ये षोड़शार्णं मनुं लोकविमोहनम् ॥ ९४ ॥

अथ रुक्मिणीवल्लभमन्त्रः ।

तारो हृद्भगवतेऽन्ते रुक्मिणी ङेन्तवल्लभः ।
द्विठान्तः षोड़शार्णोऽयं नारदो मुनिरस्य तु ॥ ९५ ॥
छन्दोऽनुष्टुप् देवता तु रुक्मणीवल्लभो हरिः ।
एकद्वियुगसप्ताच्चिवर्णैः पञ्चाङ्गमीरितम् ॥ ९६ ॥

चिन्ताश्मयुक्तनिजदोःपरिरब्धकान्त-
मालिङ्गितं सजलजेन करेण पत्न्या ।
सौवर्णवेत्रयुतहस्तमनेकभूषं
पीताम्बरं भजत कृष्णमभीष्टसिद्धैर ॥ ९७ ॥

लच्चं जपेद्दशांशेन पद्मैर्होमं समाचरेत् ।
अङ्गैर्नारदवत्राद्यैः पूजयेद्धरिम् ॥ ९८ ॥
नारदं पर्वतं जिष्णुं निशठोद्धवदारुकान् ।
विष्वक्सेनञ्च शैनेयं दिच्वग्रे विनतासुतम् ॥ ९९ ॥

अथ अष्टाचरीम् ।

कामोगो वल्लभो ङेन्तः स्वाहान्तोऽष्टाचरो मनुः ।

---

षड़ङ्गमाह धरेति धरा एकः ॥ ९३ ॥ ९४ ॥

मन्त्रान्तरमाह तार इति । ओँ नमो भगवते रुक्मिणीवल्लभाय स्वाहेति ॥९५॥

पञ्चाङ्गमाह एकेति ॥ ९६ ॥

ध्यानमाह चिन्तेति । चिन्तामणियुतनिजहस्तेनालिङ्गिता कान्ता येन तं सपद्महस्तया पत्न्यालिङ्गितं स्वर्णयष्टियुतदक्षकरं अङ्गैर्नारदादिभिः इन्द्रादिभिः वज्रादिभिः ॥ ९७—९९ ॥

गायत्रीकृष्णधातारः छन्दो देवर्षयो मताः ॥ १०० ॥
वर्णयुग्मैः समस्तेन पञ्चाङ्गविधिरीरितः ।
हरिं पञ्चवर्षं व्रजे धावमानं स्वसौन्दर्यसम्मोहितस्वर्गयोषम् ।
यशोदासुतं स्त्रीगणैरिष्टकेलिं भजे भूषितं भूषणैर्नूपुराद्यैः ॥१०१॥
अष्टलक्षं जपेदष्टसहस्रं ब्रह्मवृक्षजैः ।
समिद्वरैः प्रजुहुयादङ्गार्चा दिग्विदिक्ष्वथ ॥ १०२ ॥
वासुदेवः सङ्कर्षणः प्रद्युम्नश्चानिरुद्धकः ।
रुक्मिणी सत्यभामा च लक्ष्मणा जाम्बवत्यपि ॥ १०३ ॥
संक्रन्दनादयः पूज्या वज्राद्यान्यायुधानि च ।
एवं सिद्धे मनौ मन्त्री सम्पदामालयो भवेत् ॥ १०४ ॥
कामसम्पुटितं कृष्णपदं वेदाक्षरो मनुः ।
गायत्री नारदः कृष्णः छन्दो मुनिरधीश्वरः ॥ १०५ ॥
दीर्घारूढेन कामेन षडङ्गन्यासमाचरेत् ।
कल्पद्रुमूलसंरूढपद्मस्थं चिन्तयेद्धरिम् ॥ १०६ ॥
कल्पद्रोरतिरमणीयपल्लवेभ्यः
प्रोद्भूतैर्मणिनिकरैः प्रसिक्तमीशम् ।
ध्यायेयं कनकनिभांशुके वसान-
भुञ्जानं दधिनवनीतपायसानि ॥ १०७ ॥

---

मन्त्रान्तरमाह काम इति । क्लीं गोवल्लभाय स्वाहेति । गायत्रीच्छन्दः कृष्णो देवता ब्रह्मा ऋषिः ॥ १०० ॥

पञ्चाङ्गमाह वर्णैरिति । क्लीं गोहृत् वल्लशिरः भाय शिखा स्वाहा वर्म सर्वेणास्त्रम् । ध्यानमाह पञ्चेति । निजसौन्दर्यमोहितोऽप्सरसम् ॥ १०१ ॥

ब्रह्मवृक्षजैः पलाशोत्थैः ॥ १०२ ॥ १०३ ॥

संक्रन्दनादय इन्द्रादयः ॥ १०४ ॥

मन्त्रान्तरमाह कामेति । क्लीं कृष्ण क्लीमिति वेदाक्षरश्चतुर्वर्णः ॥ १०५ ॥

चतुर्लक्षं जपेन्मन्त्रं दशांशं विल्वसम्भवैः ।
फलैः प्रजुहुयादग्नौ यजेदङ्गानि पूर्ववत् ॥ १०८ ॥
महापद्मं तथा पद्मं शङ्खं मकरकच्छपौ ।
मुकुन्दकुन्दनीलांश्च निधीन् दिक्षु समर्चयेत् ॥ १०९ ॥
इन्द्रादीन् वज्रपूर्वांश्च प्रयजेत्तदनन्तरम् ।
इत्थं जपादिभिः सिद्धो मन्त्रो निधिरिवापरः ॥ ११० ॥
मन्त्रेष्वेषु दशार्णोक्तान् प्रयोगान् विदधीत च ।
अथ पुत्रप्रदं वच्मि कृष्णमन्त्रमनुष्टुभम् ॥ १११ ॥
देवकीसुतवर्णान्ते गोविन्दपदमुच्चरेत् ।
वासुदेवपदं प्रोच्य सम्बुध्यन्तं जगत्पतिम् ॥ ११२ ॥
देहि मे तनयं प्रोच्य कृष्ण त्वामहमीरयेत् ।
शरणङ्गत इत्युक्तो मन्त्रो द्वात्रिंशदक्षरः ॥ ११३ ॥
नारदो मुनिरस्योक्तोऽनुष्टुप् छन्दः समीरितम् ।
देवः सुतप्रदः कृष्णः पादैः सर्वेण चाङ्गकम् ॥ ११४ ॥
विजयेन युतो रथस्थितः प्रसमानीय समुद्रमध्यतः ।
प्रददत् तनयान् द्विजन्मने स्मरणीयो वसुदेवनन्दनः ॥११५॥
लक्षं जपोऽयुतं होमस्तिलैर्मधुरसंयुतैः ।
अर्चा पूर्वोदिता चैवं मन्त्रः पुत्रप्रदो नृणाम् ॥ ११६ ॥
नृसिंहो माधवारूढो लोहितो निगमादिमः ।
क्ष्मानुभार्या पञ्चार्णो मनुर्विषहरः परः ॥ ११७ ॥

---

ध्यानमाह फलेति । कलशैः कलशद्वयस्य मस्तिष्कमभिषिक्तम् ॥१०६—१११॥

मन्त्रान्तरमाह देवकीति । यथा देवकीसुत गोविन्द वासुदेव जगत्पते देहि मे तनयं कृष्ण त्वामहं शरणङ्गत इति ॥ ११२—११४ ॥

ध्यानमाह विजयेनेति । विजयेन युतोऽम्बुधिमध्यात्तनयानानीय विप्राय प्रददत् ध्येयः ॥ ११५ ॥ ११६ ॥

अनन्तपंक्तिपक्षीन्द्रा मुनिश्छन्दश्च देवता।
तारवह्निप्रिये वीजशक्ती मन्त्रस्य कीर्त्तिते ॥ ११८ ॥
ज्वलज्वलमहामति स्वाहा हृदयमीरितम्।
गरुड़ेति पदस्यान्ते चूड़ाननशुचिप्रिया ॥ ११९ ॥
शिरोमन्त्रो गरुड़तः शिखे स्वाहा शिखा मनुः।
गरुड़ार्णानुदित्वान्ते प्रभञ्जय युगं वदेत् ॥ १२० ॥
प्रभेदययुगं पश्चाद्वित्रासय विमर्दय।
प्रत्येकं द्विस्ततः स्वाहा कवचं मनुरीरितः ॥ १२१ ॥
उग्ररूपधरान्ते तु सर्वं विषहरेति च।
भीषय द्वितयं प्रोच्य सर्वं दह दहेति च ॥ १२२ ॥
भस्मीकुरु कुरु स्वाहा नेत्रमन्त्रोऽयमीरितः।
अप्रतिहतवर्णान्ते बला प्रतिहतेति च ॥ १२३ ॥
शासनान्ते तथा हुं फट् स्वाहास्त्रमनुरीरितः।
पादे कटौ हृदि मुखे मूर्ध्नि वर्णान् प्रविन्यसेत् ॥ १२४ ॥
तप्तस्वर्णनिभं फणीन्द्रनिकरैः कॢप्ताङ्गभूषं प्रभुं
स्मर्त्तॄणां शमयन्तमुग्रमखिलं नॄणां विषं तत्क्षणात्।
चञ्च्वग्रप्रचलद्भुजङ्गमभवं पाण्योर्वरं बिभ्रतं
पक्षोच्चारितसामगीतममलं श्रीपक्षिराजं भजे ॥ १२५ ॥

---

हरिप्रसङ्गात्तद्वाहनस्य गरुड़स्य मन्त्रमाह नृसिंह इति। नृसिंहे षः माधवारूढ़ः द्युतः चि वीड़ितः यः निगमादिना षीं क्ष्मानुभार्य्या स्वाहा ॥११७।११८॥

षड़ङ्गमाह ज्वलेति। ज्वल ज्वल महामति स्वाहा हृत् गरुड़चूड़ानन स्वाहा शिखः गारुड़प्रभञ्जय प्रभञ्जय प्रभेदय प्रभेदय वित्रासय वित्रासय विमर्दय विमर्दय स्वाहा वर्म। उग्ररूपधर सर्वविषहर भीषय भीषय सर्वं दह दह भस्मीकुरु कुरु स्वाहा नेत्रम्। अप्रतिहतबला प्रतिहतशासन हुं फट् स्वाहा अस्त्रम्। वर्णन्यासमाह पाद इति ॥ ११९—१२४ ॥

पञ्चलक्षं जपेन्मन्त्रं दशांशं जुहुयात्तिलैः।
पूजयेत् मातृकापद्मे गरुडं वेदविग्रहम् ॥ १२६ ॥
चतुर्थ्यन्तः पक्षिराजः स्वाहा पीठमनुः स्मृतः।
हृद्याङ्गं कर्णिकामध्ये नागान् पत्रेषु पूजयेत् ॥ १२७ ॥
अनन्तं वासुकिं चापि तृतीयं तक्षकं पुनः।
कार्कोटकं तथा पद्मं महापद्मं समर्चयेत् ॥ १२८ ॥
शङ्खपालञ्च कुलिकमिन्द्रादीन् वज्रसंयुतान्।
एवं सिद्धे मनौ मन्त्री नाशयेद्गरलद्वयम् ॥ १२९ ॥
विष्णुभक्तिपरो नित्यं यो भजेत् पक्षिनायकम्।
शत्रून् सर्वान् पराभूय सुखी भोगसमन्वितः ॥ १३० ॥
जीवेदनेकवर्षाणि सेवितो धरणीधरैः।
कलेवरान्ते श्रीनाथसायुज्यं लभते तु सः ॥ १३१ ॥

इति श्रीमन्त्रमहोदधौ विष्णुमन्त्रनिरूपणं नाम
चतुर्दशस्तरङ्गः।

---

ध्यानमाह तप्तेति। यत्तृणां नृणामुग्रं विषं तत् शमयन्ति दक्षे दरं पक्षाभ्यामुच्चारिताः साम्नां बृहद्रथन्तरादीनां गीतयो येन तं बृहद्रथन्तरे पक्षाविति श्रुतेः ॥ १२५ ॥ १२६ ॥

पक्षिराजाय स्वाहेति पीठमन्त्रः ॥ १२७ ॥ १२८ ॥

गरलद्वयं विषद्वयं स्थावरजङ्गमाख्यम् ॥ १२९ ॥ १३० ॥

धरणीधरैर्भूपतिभिः सेवितश्चिरञ्जीवित्वा तनुक्षये हरिसायुज्यं प्राप्नोति ॥१३१॥

इति नौकासमाख्यायां मन्त्रमहोदधिटीकायां हरिमन्त्रकीर्त्तनं नाम चतुर्दशस्तरङ्गः॥

# पञ्चदशस्तरङ्गः ।

अथ वक्ष्ये रवेर्मन्त्रं रोगदारिद्र्यनाशनम् ।
प्रणवो भुवनेशानी मेधा रेचिकयान्विता ॥ १ ॥
उमाकान्तोऽत्रियुक् सर्गी सूर्य्य आदित्य इन्दिरा ।
दशवर्णो मनुर्देव भार्गोऽस्य मुनिरीरितः ॥ २ ॥
गायत्त्रीच्छन्द उद्दिष्टं देवता दिवसेश्वरः ।
मायावीजं रमाशक्तिर्नियोगोऽभीष्टसिद्धये ॥ ३ ॥
सत्येति हृदयं ब्रह्म शिरो विष्णुशिखा स्मृता ।
रुद्रवर्माग्निनेत्रं स्यात् सर्वेत्यस्त्रमुदीरितम् ॥ ४ ॥
तेजो ज्वालामणे हुं फट् स्वाहान्ता मनवोऽङ्गजाः ।
भूयः षडङ्गं षड्वर्णैः कृतान्तःस्थैः शिवाश्रियोः ॥ ५ ॥
शेषार्णैर्जठरे पृष्ठे ङेन्तं नाम्ना तयोर्न्यसेत् ।
आदित्यञ्च रविं भानुं भास्करं सूर्य्यमेव च ॥ ६ ॥
मूर्ध्नि वक्त्रे हृदि शिवे पादयोश्च प्रविन्यसेत् ।

---

रविमन्त्रमाह प्रणव इति । प्रणव ओं भुवनेशानी ह्रीं मेधा घः रेचिकयान्विता ऋयुता घृ अत्रियुक् इयुतः सर्गी च उमाकान्तो णः णिः सूर्य्य आदित्यस्वरूपं इन्दिरा श्रीं ॥ १—२ ॥

षडङ्गमाह सत्येति । सत्यतेजो ज्वालामणे हुं फट् स्वाहा हृत् ब्रह्मतेजः शिरः विष्णुतेजः शिखेत्यादि ॥ ४ ॥

भूय इति शिवाश्रियोः ह्रीं श्रीं वीजयोर्मध्यस्थितैः षड्वर्णैः पुनः षडङ्गं कृत्वा शेषवर्णैश्चतुर्थ्यन्तोदरपृष्ठयोर्न्यसेत् यथा ह्रीं ओं श्रीं हृत् ह्रीं घृं श्रीं शिरः ह्रीं णिं श्रीं शिखा ह्रीं सूं श्रीं वर्म ह्रीं र्यं श्रीं नेत्रं ह्रीं आं श्रीं अस्त्रं ह्रीं दिं श्रीं उदराय नमः उदरे ह्रीं त्यं श्रीं पृष्ठाय नमः पृष्ठे इत्यष्टाङ्गम् ॥ ५ ॥

पञ्चमूर्त्तिन्यासमाह आदित्यमिति ॥ ६ ॥

सद्यादिपञ्चह्रस्वाद्यान् चतुर्थीं नमसान्वितान् ॥ ७ ॥
माया रमागतानष्टौ वर्णान्मूर्ध्नि मुखे गले ।
हृत्कुक्षिनाभिजङ्घासु पादयोश्च प्रविन्यसेत् ॥ ८ ॥
स्वरान् सबिन्दूनुच्चार्य्य ङेन्तं शीतांशुमण्डलम् ।
शिखादिकण्ठपर्य्यन्तं विन्यसेत् संस्मरन् विधुम् ॥ ९ ॥
स्पर्शान् सेन्दुन् समुच्चार्य्य ङेन्तं भास्करमण्डलम् ।
कण्ठादिनाभिपर्य्यन्तं न्यसेत् ध्यायन् प्रभाकरम् ॥ १० ॥
यादीन् सेन्दूंश्चतुर्य्यन्तं वह्निमण्डलमुच्चरन् ।
नाभ्यादिपादपर्य्यन्तं विन्यसेत् पावकं स्मरन् ॥ ११ ॥
मण्डलत्रयविन्यासः प्रोक्तस्तेजोविधायकः ।
अकारादिठकारान्तवर्णाढ्यं सोममण्डलम् ॥ १२ ॥
ङेनमोऽन्तं न्यसेन्मन्त्री मूर्द्धादिचरणावधि ।
डकारादिक्षकारान्तवर्णाढ्यं वह्निमण्डलम् ॥ १३ ॥
हृदादिपादपर्य्यन्तं विन्यसेत् ङेनमोन्वितम् ।
अग्निसोमात्मको न्यासः कथितः सर्वसिद्धिदः ॥ १४ ॥

---

सद्य ओकारस्तदादिविलोमेन पञ्चह्रस्वाः ओ ए उ इ अए तदाद्यान् ङे नमोऽन्तानादित्यादीन्मूर्द्धादिषु न्यसेत् यथा ओं आदित्याय नमो मूर्ध्नि एं रवये नमो मुखे उं भानवे नमो हृदि इं भास्कराय नमो लिङ्गे अं सूर्य्याय नमः पादयोः ॥ ७ ॥

वर्णन्यासमाह मायेति । नमोऽन्वितानित्यपि बोध्यं यथा ओं ह्रीं श्रीं श्रीं नमो मूर्ध्नि ओं ह्रीं घृं श्रीं नमो मुखे ओं ह्रीं णिं श्रीं नमो गले ओं ह्रीं नृं श्रीं नमो हृदि ओं ह्रीं यं श्रीं नमः कुक्षौ ओं ह्रीं आं श्रीं नमो नाभौ ओं ह्रीं दिं श्रीं नमो लिङ्गे ओं ह्रीं त्यं श्रीं नमः पादयोः ॥ ८ ॥

मण्डलन्यासमाह स्वरानिति । विधुं चन्द्रं स्मरन् चन्द्रमण्डलं न्यसेत् यथा अं आं इं ईं उं ऊं ऋं ॠं लृं ॡं एं ऐं ओं औं अं अः सोममण्डलाय नमः शिखादिकण्ठान्तम् ॥ ९ ॥

स्पर्शान् कादीन् मान्तान् यथा कं खं गं घं ङं चं छं जं झं ञं टं ठं डं ढं

सविन्दून् मातृकावर्णानजपां पुरुषात्मने ।
नमोऽन्तं व्यापकं न्यस्येद्धंसन्यासोऽयमीरितः ॥ १५ ॥
अष्टावष्टौ स्वरान् पञ्च पञ्चशः शेषवर्णकान् ।
उक्तादित्यमुखान्न्यस्येच्चतुर्थ्यन्तान् ग्रहान्नव ॥ १६ ॥
आधारलिङ्गनाभीहृत्कण्ठेषु मुखमध्यतः ।
भ्रूमध्ये भालदेशे च ब्रह्मरन्ध्रे क्रमान्न्यसेत् ॥ १७ ॥
वदेत् खेचरनामान्ते पदं भगवते नमः ।
हंसाख्यमग्निसोमाख्यं मण्डलत्रयसंज्ञकम् ॥ १८ ॥
पुनर्न्यासत्रयं कुर्यात् मूलेन व्यापकं चरेत् ।
शोणाम्भोरुहसंस्थितं त्रिनयनं वेदत्रयीविग्रहं
दानाम्भोजयुगाभयानि दधतं हस्तैः प्रवालप्रभम् ।

---

णं तं थं दं धं नं पं फं वं भं मं सूर्य्यमण्डलाय नमः कण्ठादिनाभ्यन्तम् । यादीनिति यं रं लं वं शं षं सं हं लं क्षं वह्निमण्डलाय नमः नाभ्यादिपादान्तं अग्निसोमन्यासमाह अकारादीनिति । अं आं इं ईं उं ऊं ऋं ॠं ऌं ॡं एं ऐं ओं औं अं अः कं खं गं घं ङं चं छं जं झं ञं टं ठं सोममण्डलाय नमः मूर्द्धादिहृदयान्तं डं ढं णं तं थं दं धं नं पं फं बं भं मं यं रं लं वं शं षं सं हं लं क्षं वह्निमण्डलाय नमः हृदादिपादान्तम् ॥ १०—१४ ॥

हंसन्यासमाह सविन्दूनिति । अं आं इं ईं उं ऊं ऋं ॠं ऌं ॡं एं ऐं ओं औं अं अः हंसः पुरुषात्मने नमः सर्वाङ्गे ॥ १५ ॥

ग्रहन्यासमाह अष्टाविति । अं आं इं ईं उं ऊं ऋं ॠं आदित्याय भगवते नमः आधारे ऌं ॡं एं ऐं ओं औं अं अः सोमाय भगवते नमः लिङ्गे । कं खं गं घं ङं अङ्गारकाय भगवते नमः नाभौ । चं छं जं झं ञं बुधाय भगवते नमः हृदि । टं ठं डं ढं णं बृहस्पतये भगवते नमः गले । तं थं दं धं नं शुक्राय भगवते नमः मुखमध्ये । पं फं बं भं मं शनैश्चराय भगवते नमः भ्रूमध्ये । यं रं लं वं शं राहवे भगवते नमः भाले षं सं हं लं क्षं केतवे भगवते नमः ब्रह्मरन्ध्रे खेचरायेत्यन्तनामान्ते भगवते इति पदं वदेत् तच्च प्रयोगे लिखितम् ॥ १६ ॥ १७ ॥

हंसेति । ग्रहन्यासानन्तरं हंसाग्निसोममण्डलसंज्ञं न्यासत्रयं पुनः कुर्यात् ॥१८॥

केयूराङ्गदहारकङ्कणधरं कर्णोल्लसत्कुण्डलं
लोकोत्पत्तिविनाशपालनकरं सूर्यं गुणाब्धिं भजे ॥ १९ ॥
एवं ध्यायन् जपेल्लक्षदशकं तद्दशांशतः।
पद्मैस्तिलैर्वा जुहुयात्तर्पयेद्भोजयेद्द्विजान् ॥ २० ॥
प्रयजेत् पीठपूजायां धर्माद्यष्टस्थलेष्विमान्।
प्रभूतं विमलं सारं समाराध्यं विदिक्ष्वथ ॥ २१ ॥
परमादिसुखान् मध्येऽनन्तादीन् पूर्ववद् यजेत्।
सोमाग्निमण्डले प्रोच्य रविमण्डलमर्चयेत् ॥ २२ ॥
ततोऽष्टदिक्षु मध्ये च पीठशक्तीरिमा नव।
दीप्ता सूक्ष्मा जया भद्रा विभूतिर्विमला तथा ॥ २३ ॥
अमोघा विद्युता सर्वतोमुखीपीठशक्तयः।
ऋस्वत्रयक्लीवहीनस्वरान् वह्नीन्दुसंयुतान् ॥ २४ ॥
बीजानि पीठशक्तीनां तदाद्यास्ताः प्रपूजयेत्।
ब्रह्मविष्णुशिवात्मान्ते कायसौराय यो स्मृतिः ॥ २५ ॥

---

प्रथमचरणार्द्धपरीत्येनेत्यर्थः। ध्यानमाह शोणेति। रक्तपद्मस्थां वेदत्रयीतनुं सेषा त्रय्येव विद्यात्तपतीति श्रुतेः। ऊर्द्धयोः पद्मद्वयं अधो वामदक्षयोरभयदानं पीठपूजायां धर्मादिकाष्टस्थानेषु पश्चैव पूज्याः प्रभूताय विमलाय साराय समाराध्यायेति आग्नेयादिषु सम्पूज्य परमसुखाय नम इति मध्ये च पुनरनन्तादीन् पूर्ववत् प्रथमतरङ्गोक्तवत् ते चाष्टावेव ततः सोममण्डलाय वह्निमण्डलायेत्यभ्यर्च्य सूर्यमण्डलाय नम इति यजेत् एतावत् एव पीठदेवानिष्ट्वा पीठशक्तीर्यजेत् ता आह दीप्ता इति ॥ १९—२३ ॥

तासां बीजान्याह ऋस्वेति। ऋस्वत्रयं षण्ढा क्लीवाः ऋ ॠ ऌ ॡ एतद्व्यतिरिक्ता रेफबिन्दुयुताः स्वराक्रमात् तासां बीजानि तत्पूर्वास्ता यजेत् रां रीं रुं रें रैं रों रौं रं रः इति रां दीप्तायै नमः रीं सूक्ष्मायै इत्यादि ॥ २४ ॥

पीठमन्त्रमाह ब्रह्मेति। स्मृतिर्गः ओं ब्रह्मविष्णुशिवात्मकाय सौराय योग पीठात्मने नम इति ॥ २५ ॥

पीठात्मने नमस्कारः पूर्वः पीठमनुः स्मृतः।
तारः सेन्दुवियत्कान्तौ विन्दुमद्विन्दुवर्जितौ ॥ २६ ॥
खोल्काय हृदयं मन्त्रो नवार्णो मूर्त्तिकल्पने।
अनेन मूर्त्तौ क्लृप्तायां यजेत् प्रद्योतनं प्रभुम् ॥ २७ ॥
प्राग्वत् षड़ङ्गं सम्पूज्य दिक्ष्वष्टाङ्गं प्रपूजयेत्।
आदित्यं मध्यतोऽभ्यर्च्च रविं भानुञ्च भास्करम् ॥ २८ ॥
सूर्य्यं दिशासु सद्यादि पञ्चङ्खादिकान् यजेत्।
उषां प्रज्ञां प्रभां सन्ध्यामाद्यर्णाद्या विदिक्ष्वपि ॥ २९ ॥
ब्राह्म्याद्या दिग्दलेष्वर्च्चेन्महालक्ष्मीं स्थलेऽरुणम्।
सोमं बुधं गुरुं शुक्रं दिक्ष्वाद्यर्णादिकान् यजेत् ॥ ३० ॥
अङ्गारकं शनिं राहुं केतुं कोणेषु पूजयेत्।
इन्द्राद्यानायुधैर्युक्तान् पार्षदानर्चयेद्रवेः ॥ ३१ ॥
इत्थं सिद्धे मनौ दद्यादर्घ्यानवेऽर्घ्यञ्च तद्दिने।
प्राणायामं षड़ङ्गञ्च कृत्वा न्यासान् पुरोदितान् ॥ ३२ ॥
स्वमण्डले यजेदर्कं मानसैरुपचारकैः।
सुताम्रघटितं प्रस्थतोयग्राहि मनोहरम् ॥ ३३ ॥
मण्डले स्थापयेत् पात्रं रक्तचन्दननिर्मितम्।
विलोमां मातृकां मूलं विलोमञ्च पठन् जलैः ॥ ३४ ॥

---

मूर्त्तिकल्पने मन्त्रमाह तार इति। तार ओँ सेन्दु वियत् हं विं ,बयुतस-द्रहितश्चेति ह्रौ कान्तौ खौ खखोल्काय स्वरूप हृदयं नमः ॥ २६ ॥ २७ ॥

प्रागिति षड़ङ्गान्यग्न्यादिषु सम्पूज्य दिक्ष्वष्टाङ्गानि न्यासोक्तानि यजेत् आदित्यादीन् पञ्च मध्ये दिक्षु च न्यासवत् ओँकारादि पञ्च ङखाद्यान् उषादीनिति आद्यवर्णाद्याः उँ उषायै नम इत्यादि अष्टमातृःस्थानेऽरुणमेव यजेत्यर्थः। सोँ सोमायेत्यादि पूर्ववत् आद्यर्णाद्याः रविपार्षदेभ्यो नमः इति ॥ २८—३१ ॥

अर्घ्यविधिमाह प्राणेति ॥ ३२ ॥

प्रस्थं षोड़शपलानि ॥ ३३ ॥

रविमण्डलनिर्गच्छत्सुधावृद्धिविभावितैः ।
त्रयोदशैव वस्तूनि प्रक्षिपेन्मूलमुच्चरन् ॥ ३५ ॥
तिलतण्डुलदर्भाग्रशालिश्यामाकराजिका ।
हयारिकुसुमं रक्तं चन्दनं रक्तचन्दनम् ॥ ३६ ॥
गोरोचनं कुङ्कुमञ्च जयां वेणुयवानिति ।
तज्जले पीठमभ्यर्च्य वाह्यभानुं स्वमण्डलात् ॥ ३७ ॥
अखिलैरुपचारैस्तं पूजयेदावृतीरपि ।
प्राणायामत्रयं कृत्वा षड़ङ्गं न्यासमाचरेत् ॥ ३८ ॥
चन्दनेन सुधावीजं दक्षे करतले न्यसेत् ।
आच्छादयेदर्घ्यपात्रं वामाक्रान्तेन तेन च ॥ ३९ ॥
अष्टोत्तरशतावृत्त्या मूलेनाम्भोभिमन्त्रयेत् ।
पुनः पञ्चोपचारैस्तं पूजयेन्मूलमन्त्रतः ॥ ४० ॥
पाणिभ्यां पात्रमादाय जानुनी भूतले न्यसेत् ।
आमूर्द्धिपात्रमुद्धृत्य दृष्टिञ्चाधाय मण्डले ॥ ४१ ॥
मनसा पूजयेत्तत्र भानुमावरणान्वितम् ।
अर्घ्यं दद्याद्रविं ध्यायन् रक्तचन्दनमण्डले ॥ ४२ ॥
ततः पुष्पाञ्जलिं दद्यात् मण्डलस्थाय भानवे ।
अष्टोत्तरशतं मूलं जपेदासनसंस्थितः ॥ ४३ ॥
प्रत्यहं प्रातरेवं यो दद्यादर्घ्यं विवस्वते ।
लक्ष्मीयशःसुतान् विद्यामैश्वर्य्यं सोऽधिगच्छति ॥ ४४ ॥
गायत्र्युपासनासक्तः सन्ध्यावन्दनतत्परः ।

---

मूर्धं विलोमनेव सूर्यमण्डलान्निर्गच्छदयदमृतं तद्धिया षिन्तितैः ॥३४॥३५॥
वस्तून्याह तिलेति ॥ ३६ ॥
रक्तकरवीरवेणु यवान् वंशोत्पन्नयवान् ॥ ३७ ॥ ३८ ॥

दशवर्णं जपन् विप्रो नैव दुःखमवाप्नुयात् ॥ ४५ ॥
अथ वच्मि धरासूनुमन्त्रं सुतधनप्रदम् ।
तारो वियत् दीर्घविन्दुयुक्तं चन्द्राङ्कितं पुनः ॥ ४६ ॥
भृगुर्विसर्गी चण्डीशौ क्रमाद्रात्रीशसर्गिणौ ।
षड्वर्णो मनुराख्यातोऽभीष्टदायी ऋणापहः ॥ ४७ ॥
मुनिर्विरूपा गायत्रीच्छन्दो देवो धरात्मजः ।
षड्भिर्वर्णैः षडङ्गानि मनोः कुर्वीत साधकः ॥ ४८ ॥
जपाभं शिवस्वेदजं हस्तपद्मैर्गदाशूलशक्तीर्वरं धारयन्तम् ।
अवन्तौ समुत्थं सुमेषासनस्थं धरानन्दनं रक्तवस्त्रं समीड़े ॥४९॥
रसलक्षं जपो होमः समिद्भिः खदिरस्य च ।
शैवे पीठे यजेद्भौमं प्रागङ्गानि प्रपूजयेत् ॥ ५० ॥
एकविंशतिकोष्ठेषु मङ्गलादीन् प्रपूजयेत् ।
तद्बहिः ककुभां नाथान् कुलिशादीन् ततोऽर्चयेत् ॥५१॥
इत्थं जपादिभिः सिद्धं स्वेष्टसिद्धौ प्रयोजयेत् ।
नारी पुत्त्रमभीप्सन्ती भौमाहे तद्व्रतञ्चरेत् ॥ ५२ ॥
मार्गशीर्षेऽथ वैशाखे तस्यारम्भः प्रशस्यते ।
अरुणोदयवेलायामुत्थाय शुचिविग्रहा ॥ ५३ ॥
दन्तान् धावेदपामार्गसमिधा मौनसेविनी ।

---

सुधाबीजं वमिति तेन दचकरेण ॥ २९—४५ ॥

मङ्गलमन्त्रमाह तार इति । तार ओं वियत् हः दीर्घविन्दुयुतं हां पुनश्चन्द्राङ्कितं हं । विसर्गी भृगुः सः रात्रीशसर्गिणौ विन्दुयुतविसर्गयुतौ चण्डीशौ खौ खं खः धरात्मजो भौमो देवता ॥ ४६—४८ ॥

ध्यानमाह जपाभं इति । शूलवरौ दक्षयोः वामयोः वामयोरितरे रसलक्षं षट्लक्षं शैवे पीठे मत्युक्तयोक्ते ककुभां नाथादीनिन्द्रादीन् कुलिशादीन् वज्रादीन् ॥ ४९—५२ ॥

नद्यादिसलिले स्नात्वा धारयेद्रक्तवाससी ॥ ५४ ॥
नैवेद्यकुसुमालेपान् रक्तान् संपाद्य संयता ।
विधिज्ञं विप्रमाहूय भौममर्चेत्तदाज्ञया ॥ ५५ ॥
रक्तगोगोमयालिप्तदेशे पीठनिसेविनी ।
मङ्गलादीनि नामानि स्वप्रतीकेषु विन्यसेत् ॥ ५६ ॥
मङ्गलं विन्यसेदङ्घ्र्योर्भूमिपुत्रन्तु जानुनोः ।
ऊर्वोश्च ऋणहर्त्तारं कटिदेशे धनप्रदम् ॥ ५७ ॥
स्थिरासनं गुह्यदेशे महाकायमथोरसि ।
वामबाहौ ततो न्यस्येत् सर्वकर्मावरोधकम् ।
लोहितं दक्षिणे बाहौ लोहिताक्षं गले न्यसेत् ।
वदने विन्यसेत् साध्वी सामगानां कृपाकरम् ॥ ५८ ॥
धरात्मजं नसोरक्ष्णोः कुजं भौमं ललाटतः ।
भूतिदन्तु भ्रुवोर्मध्ये मस्तके भूमिनन्दनम् ॥ ५९ ॥
अङ्गारकं शिखादेशे सर्वाङ्गे विन्यसेद् यमम् ।
ततो बाहुद्वये न्यस्येत् सर्वरोगापहारकम् ॥ ६० ॥
मूर्द्धादिवृष्टिकर्त्तारं पादपर्य्यन्तविग्रहे ।
विन्यसेत् वृष्टिहर्त्तारं मूर्द्धान्तं चरणावधि ॥ ६१ ॥
दिक्षु प्रविन्यसेदन्त्यं सर्वकामफलप्रदम् ।
आरं वक्रं भूमिजञ्च नाभौ वक्षसि मूर्द्धनि ॥ ६२ ॥
एवं न्यस्तशरीरोऽसौ ध्यायेद्धरणिनन्दनम् ।
अर्घ्यं संस्थाप्य विधिवत् पूजयेदुपचारकैः ॥ ६३ ॥
एकविंशतिकोष्ठाढ्ये त्रिकोणे ताम्रपात्रगे ।
आवाह्य धरणीपुत्रं शोणैः पुष्पैश्च चन्दनैः ॥ ६४ ॥

---

भौमव्रतमाह नद्यादीति । शुचिविशुद्धा । शरीरचिन्तानिवर्त्तनानन्तरं प्रक्षालितपाणिपादमुखा स्वप्रतीकेषु निजाङ्गेषु ॥ ५३—५६ ॥

अङ्गानि पूजयेत् प्राग्वदेकविंशतिकोष्ठके।
मङ्गलादींस्त्रिकोणेषु चक्रमारच्य भूमिजम् ॥ ६५ ॥
ब्राह्म्याद्या मातृका बाह्ये शक्रादीनायुधान्यपि।
धूपदीपौ विधायाथ गोधूमान्नं निवेदयेत् ॥ ६६ ॥
जलपूर्णे ताम्रपात्रे गन्धपुष्पाक्षतान् क्षिपेत्।
फलं निधाय मन्त्राभ्यां भौमाय विनिवेदयेत् ॥ ६७ ॥
भूमिपुत्त्र महातेजाः स्वेदोद्भवपिनाकिनः।
सुतार्थिनी प्रयत्नात् त्वं गृहाणार्घ्यं नमोऽस्तु ते ॥ ६८ ॥
रक्तप्रवालसङ्काशजवाकुसुमसन्निभ।
महीसुतमहाबाहो! गृहाणार्घ्यं नमोऽस्तु ते ॥ ६९ ॥
एकविंशतिकृत्वोऽथ प्रणमेत् पूर्वनामभिः।
प्रदक्षिणा विधातव्यास्तावती वसुधात्मजे ॥ ७० ॥
खदिराङ्गारकेनाथ कुर्य्याद्रेखासमत्रयम्।
वामपादेन मन्त्राभ्यामेताभ्यां तत् प्रमार्जयेत् ॥ ७१ ॥
दुःखदौर्भाग्यनाशाय पुत्त्रसन्तानहेतवे।
कृतरेखात्रयं वामपादेनैतत् प्रमार्ज्म्यहम् ॥ ७२ ॥
ऋणदुःखविनाशाय मनोऽभीष्टार्थसिद्धये।
मार्जयाम्यसिता रेखास्तिस्रो जन्मत्रयोद्भवाः ॥७३ ॥
ततः पुष्पाञ्जलिकरा स्तुवीत धरणीसुतम्।
ध्यायती चरणाम्भोजं पूजासाङ्गत्वसिद्धये ॥ ७४ ॥
धरणीगर्भसम्भूतं विद्युत्तेजःसमप्रभम्।

---

न्यासमेवाह मङ्गलमिति। ओँ मङ्गलाय नमः पादयोः इत्यादि। मन्त्र-
माह भूमिपुत्त्रेति। पूर्वनामभिर्मङ्गलाद्यैः ॥ ५७—७१ ॥
रेखामार्जनमन्त्रमाह दुःखेति ॥ ७२—७४ ॥

कुमारं शक्तिहस्तञ्च मङ्गलं प्रणमाम्यहम् ॥ ७५ ॥
ऋणहर्त्रे नमस्तुभ्यं दुःखदारिद्र्यनाशिने ।
नमामि द्योतमानाय सर्वकल्याणकारिणे ॥ ७६ ॥
देवदानवगन्धर्वयक्षराक्षसपन्नगाः ।
सुखं यान्ति यतस्तस्मै नमो धरणिसूनवे ॥ ७७ ॥
यो वक्रगतिमापन्नो नृणां विघ्नं प्रयच्छति ।
पूजितः सुखसौभाग्यं तस्मै क्ष्मासूनवे नमः ॥ ७८ ॥
प्रसादं कुरु मे नाथ मङ्गलप्रद ! मङ्गल ! ।
मेषवाहन ! रुद्रात्मन् ! पुत्रान् देहि धनं यशः ॥ ७९ ॥
एवं संस्तूय संपूज्य गृह्णीयाद्ब्राह्मणाशिषः ।
गुरवे दक्षिणां दत्त्वा भुञ्जीतान्नं निवेदितम् ॥ ८० ॥
प्रतिभौमदिने कुर्य्यादेवं संवत्सरावधि ।
तिलैर्विधापयेद्धोमं शतार्द्धं भोजयेद्द्विजान् ॥ ८१ ॥
माहेयमूर्त्तिं सौवर्णामाचार्य्याय निवेदयेत् ।
मण्डलस्थघटेऽभ्यर्च्य सुतसौभाग्यसिद्धये ॥ ८२ ॥
एवं व्रतपरा नारी प्राप्नुयात् सुभगान् सुतान् ।
धनार्थैत्र ऋणनाशाय व्रतं कुर्य्यात् पुमानपि ॥ ८३ ॥
अग्निर्मूर्द्धेत्यपि मनुं वैदिकं ब्राह्मणो जपेत् ।
तथाङ्गारकगायत्रीं सर्वाभीष्टप्रसिद्धये ॥ ८४ ॥
अङ्गारकाय शब्दान्ते विद्महे पदमुच्चरेत् ।
शक्तिहस्ताय च पदं धीमहीति ततो वदेत् ॥ ८५ ॥
तन्नो भौमः प्रचोवर्णान् दयादिति च कीर्त्तयेत् ।
एषाङ्गारकगायत्री जप्ताभीष्टप्रदायिनी ॥ ८६ ॥

---

स्तुतिमाह धरणीति ॥ ७५—८० ॥
उद्यापनमाह तिलैरिति ॥ ८१ ॥

माहेयोपासनं प्रोक्तं गुरुमन्त्रसुदीर्य्यते।
खड्गीशौ भारभूतिस्थौ तत्राद्यो क्रूरसंयुतः ॥ ८७ ॥
नभो भृगुर्लोहितस्थो हरिर्वायुर्भयान्वितः।
हृदयान्तोऽष्टवर्णोऽयं मनुर्ब्रह्मा मुनिः स्मृतः ॥ ८८ ॥
छन्दोऽनुष्टुप् सुराचार्य्यो देवता वीजमादिमम्।
वराभ्यां दीर्घयुक्ताभ्यां षड़ङ्गानि प्रकल्पयेत् ॥ ८९ ॥
रत्नाष्टापदवस्त्रराशिममलं दद्यात् किरन्तं करात्।
आसीनं विपणौ करं निदधतं रत्नादिराशौ परम्।
पीतालेपनपुष्पवस्त्रमखिलालङ्कारसम्भूषितम्
विद्यासागरपारगं सुरगुरुं वन्दे सुवर्णप्रभम् ॥ ९० ॥
जपित्वाशीतिसाहस्रं हुत्वान्तेन घृतेन वा।
धर्माधर्मादिपीठे तं पूजयेदङ्गदिग्भवैः ॥ ९१ ॥
सिद्धे मनौ प्रकुर्वीत प्रयोगानिष्टसिद्धये।
हरिद्राकुसुमैर्हुत्वा घृताक्तैर्दिवसत्रयम् ॥ ९२ ॥
सविंशतिशतं मन्त्री वासांसि लभते मणीन्।
शत्रुरोगादिपीड़ासु स्वजने कलहोद्भवे ॥ ९३ ॥

---

मण्डलस्य इति सर्वतो भद्रमण्डले कुम्भं संस्थाप्य तत्र भौममूर्त्तिं सौवर्णीं प्रतिमां सम्पूज्याचार्य्याय दद्यात् ॥ ८२—८६ ॥

गुरुमन्त्रमाह खड्गीशाविति। खड्गीशौ द्वौ वकारौ भारभूतिस्थौ ऋवर्णस्थौ तयोराद्यो क्रूरेण विन्दुना युतः। नभो हः लोहितस्थो भृगुः पकारस्थः सकारः स्प हरिस्तकारः भयान्वितो वायुः एयुतो य ये हृदयं नमः हं बृहस्पतये नम इति ॥ ८७ ॥ ८८ ॥

आदिमं ब्रमिति वीजम्। षड़ङ्गमाह वराभ्यामिति। ब्रां हृत् ब्रीं शिर इत्यादि ॥ ८९ ॥

ध्यानमाह रत्नेति। दद्यद्धस्तात् रत्नहेमवस्त्रराशीन्निक्षिपन्तं वामकरं रत्नादि-समूहे आरोपयन्तं धर्माधर्मादिपीठे इति पीठशक्तयो न सन्तीत्यर्थः ॥ ९०—९१ ॥

जुहुयात् पिप्पलोत्याभिः समिद्भिस्तं निवृत्तये ।
तारो वस्त्रभगी सूर्यो देहि शुक्राय ठद्वयम् ॥ ९४ ॥
एकादशाक्षरो मन्त्रो हेमवस्त्रप्रदायकः ।
ब्रह्मा मुनिर्विराट् छन्दो देवता दैत्यपूजितः ॥ ९५ ॥
बीजं तारोऽग्निभार्या तु शक्तिरस्य प्रकीर्त्तिता ।
एकद्विचन्द्रनेत्राग्निनेत्रवर्णैः षड़ङ्गकम् ॥ ९६ ॥
मन्त्रवर्णैस्तु कृत्वाथ ध्यायेद्विद्यानिधिं सितम् ।
श्वेताम्भोजनिषण्णमापणतटे श्वेताम्बरालेपनं
नित्यं भक्तजनाय सम्प्रददतं वासो मणीन् हाटकम् ।
वामेनैव करेण दक्षिणकरे व्याख्यानमुद्राङ्कितं
शुक्रं दैत्यवरार्चितं स्मितमुखं वन्दे सिताङ्गप्रभम् ॥ ९७ ॥
अयुतं प्रजपेन्मन्त्रं दशांशं जुहुयाद् घृतैः ।
यजेद्धर्मादिपीठे तमङ्गेन्द्रादीन् तदायुधैः ॥ ९८ ॥
सुगन्धैः श्वेतकुसुमैर्जुहुयात् शुक्रवासरे ।
एकविंशतिवारं यो लभते सोऽंशुकं मणीन् ॥ ९९ ॥
वालः पवनदीर्घेन्दुयुक्तो झिण्टीशयुक् जलम् ।
अत्रिर्व्यासाय हृदयं मनुरष्टाक्षरो मतः ॥ १०० ॥
ब्रह्मानुष्टुप् मुनिश्छन्दो देवः सत्यवतीसुतः ।
आद्यबीजं नमः शक्तिर्दीर्घाद्योनादिनाङ्गकम् ॥ १०१ ॥

---

शुक्रमन्त्रमाह तार इति । तार ॐ वस्त्रं स्वरूपम्भगी सूर्य्यः एयुतो मः मे देहि शुक्राय स्वरूपं ठद्वयं स्वाहा ॥ ९४—९६ ॥

ध्यानमाह श्वेतेति । श्वेताम्भोजनिषण्णं श्वेतपद्मस्थितम् ॥ ९७—९९ ॥

व्यासमन्त्रमाह वाल इति । वालो वः पवनदीर्घेन्दुयुक्तः यकाराकारबिन्दुयुतः व्यां जलं झिण्टीशयुक् वकार एकारयुतः वे अत्रिर्दः व्यासाय स्वरूपं हृदयं नमः ॥ १००—१०१ ॥

व्याख्यामुद्रिकया लसत्करतलं सत्योगपीठस्थितं
वामे जानुतले दधानमपरं हस्ते सुविद्यानिधिम्।
विप्रव्रातवृतं प्रसन्नमनसम्पाथोरुहाङ्गद्युतिं
पाराशर्य्यमतीवपुण्यचरितं व्यासं स्मरेत् सिद्धये ॥ १०२ ॥
जपेदष्टसहस्राणि पायसैर्होममाचरेत्।
पूर्वोक्तपीठे व्यासस्य पूर्वमङ्गानि पूजयेत् ॥ १०३ ॥
प्राच्यादिषु यजेत् पैलं वैशम्पायनं जैमिनिम्।
सुमन्तुं कोणभागेषु श्रीशुकं रोमहर्षणम् ॥ १०४ ॥
उग्रश्रवसमन्यांश्च मुनीन् सेन्द्रादिकायुधान्।
एवं सिद्धमनुर्मन्त्री कवित्वं शोभनाः प्रजाः ॥ १०५ ॥
व्याख्यानशक्तिं कीर्त्तिञ्च लभते सम्पदाश्चयम्।
मृत्युञ्जयेन पुटितं यो व्यासस्य मनुं जपेत् ॥ १०६ ॥
सर्वोपद्रवसंत्यक्तो लभते वाञ्छितं फलम्।
तारः शूली वामकर्णविन्दुयुक्तः ससर्ग सः ॥ १०७ ॥
मृत्युञ्जयस्य मन्त्रोऽयं त्रिवर्णो मृत्युनाशनः।
जप्तोऽयं केवलं नृणामिष्टसिद्धिं प्रयच्छति।
किं पुनस्तेन पुटितो वेदव्यासमनूत्तमः ॥ १०८ ॥

इति श्रीमन्त्रमहोदधौ सूर्य्यादिमन्त्रकथनं
नाम पञ्चदशस्तरङ्गः।

---

विप्रव्रातवृतं ब्राह्मणसमूहपरिवेष्टितं पाथोरुहाङ्गद्युतिं नीलेन्दीवरकान्तिम् ॥ १०२ ॥

पूर्वोक्तपीठे धर्मादिके ॥ १०३—१०६ ॥

मृत्युञ्जयमन्त्रमाह तार इति। तार ओं वामकर्णविन्दुयुतः जविन्दुयुतः शूली नः जूं ससर्गः सः स्वरूपं केवलोऽप्ययं जप्तो नृणां मृत्युनाशनः। किं पुनः पुटितः व्यासमन्त्रः अस्य मन्त्रस्य कहोलऋषिः देवी गायत्री छन्दः मृत्युञ्जयो देवता जं वीजं सः शक्तिः दीर्घाव्यसकारेण षडङ्गम् ॥ १०७—१०८ ॥

इति नीलकाख्यायां मन्त्रमहोदधिटीकायां पञ्चदशस्तरङ्गः ॥

# षोड़शस्तरङ्गः ।

महामृत्युञ्जयं वच्चे दुरितापन्निवारणम् ।
यं प्राप्य भार्गवः शम्भोर्मृतान् दैत्यानजीवयत् ॥ १ ॥
तारः खं व्यापिनीचन्द्रयुक् तारश्चतुराननः ।
अर्घीशबिन्दुसंयुक्तो हंसः सर्गी च भूर्भुवः ॥ २ ॥
सकारो बालसर्गाढ्यस्त्र्यम्बकं वैदिको मनुः ।
भूर्भुवः स्वर्भुजङ्गेशस्तारो जूं सर्गवान् भृगुः ॥ ३ ॥
आकाशो मनुबिन्द्वाढ्यः प्रणवान्तो मनूत्तमः ।
महामृत्युञ्जयाख्योऽयं पञ्चाशद्वर्णनिर्मितः ॥ ४ ॥
वामदेवकहोलाख्यवशिष्ठा मुनयोऽस्य तु ।
छन्दांस्युक्तानि रुद्रेण पङ्क्तिगायत्र्यनुष्टुभः ॥ ५ ॥
सदाशिव-महामृत्युञ्जय-रुद्रोऽस्य देवता ।
माया शक्ती रमा वीजं विनियोगार्थसिद्धये ॥ ६ ॥

---

महामृत्युञ्जयमन्त्रमाह तार इति। तार ओं व्यापिनीचन्द्रयुक् औबिन्दुयुतं खं हं हौं तारः ओं अर्घीशबिन्दुयुक्तश्चतुराननः ऊबिन्दुयुतो जः जूं सर्गी हंसः सः भूर्भुवः स्वरूपं सकारो बालविसर्गाढ्यः व विसर्गयुतः सकारः स्वः त्र्यम्बकं वैदिको मन्त्रः यथा त्र्यम्बकं यजामहे सुगन्धिं पुष्टिवर्द्धनं उर्वारुकमिव बन्धनान्मृत्योर्मुक्षीय मामृतादिति भूर्भुवः स्वः स्वरूपं तारो ओं-युतो भुजङ्गेशो रं रीं जूं स्वरूपं सर्गवान् भृगु सः मनुबिन्द्वाढ्यः आकाशः औबिन्दुयुतो हः हौं प्रणवान्तश्चायं मन्त्रः यथा ओं हौं ओं जूं सः भूर्भुवः स्वः त्र्यम्बकं यजामहे सुगन्धिं पुष्टिवर्द्धनं उर्वारुकमिव बन्धनान्मृत्योर्मुक्षीयमामृतात् भूर्भुवस्वरों जूं सः हौं ओं इति पञ्चाशद्वर्णः ॥ १—५ ॥

माया ह्रीं रमा श्रीं ॥ ६ ॥

मूर्ध्नि वक्त्रे हृदि शिवे पदोर्मुन्यादिकान् न्यसेत् ।
त्रिचतुर्वसुनन्देषु गुणवर्णाननुष्टुभः ॥ ७ ॥
तारो नमो भगवते रुद्रायेति पदान्वितान् ।
मूलादिनववर्णाद्यानुक्त्वा कुर्य्यात् षड़ङ्गकम् ॥ ८ ॥
शूलान्ते पाणये स्वाहा हृन्मन्त्रान्ते नियोजयेत् ।
अमृतान्ते मूर्त्तये मां जीवयेति शिरोऽन्तिमम् ॥ ९ ॥
शिखान्ते चन्द्रशिरसे जटिले वह्निवल्लभा ।
त्रिपुरान्तकाय ह्रां ह्रीं कवचान्ते मनुः स्मृतः ॥ १० ॥
प्रवदेत् त्रिपदस्यान्ते लोचनामपदं पुनः ।
ऋग्यजुःसाममन्त्राय वर्णान्नेत्रमनुं पठेत् ॥ ११ ॥
अग्नित्रयाय ज्वल च ज्वल मां रक्ष रक्ष च ।
अघोरास्त्राय मन्त्रोऽयमस्त्रमन्त्रो ततः स्मृतः ॥ १२ ॥
द्वात्रिंशत् त्र्यम्बकाद्यर्णान् नमोऽन्तान् बिन्दुसंयुतान् ।
तारादिनववर्णाद्यानङ्गेष्वेषु प्रविन्यसेत् ॥ १२ ॥

---

मुन्यादिकानृष्यादीन् मूर्द्धादिषु न्यसेत् शिवे लिङ्गे। षड़ङ्गन्यासमाह त्रिचतुरिति चतुर्भिः। अनुष्टुभस्त्र्यम्बकमन्त्रस्य आदिवर्णान् मूलादिनववर्णाद्यान् मूलमन्त्रस्यादौ ये नववर्णास्ताराद्यास्तदाद्यान्। ओं नमो भगवते रुद्रायेति पदान्तात् तथा शूलपाणये इत्यादि प्रातिस्विकाङ्गमन्त्रयुतान् उक्त्वा षड़ङ्गं कुर्य्यादित्यर्थः यथा ओं ह्रौं ओं जूं सः भूर्भुवः स्वः त्र्यम्बकं ओं नमो भगवते रुद्राय शूलपाणये स्वाहा हृत् ओं यजामहे ओं ह्रौं ओं जूं सः भूर्भुवः स्वः अमृतमूर्त्तये मां जीवय शिरः। ओं सुगन्धिं पुष्टिवर्द्धनं ओं ह्रौं ओं जूं सः भूर्भुवः स्वः चन्द्रशिरसे जटिले स्वाहा शिखा। ओं उर्वारुकमिव बन्धनात् ओं ह्रौं ओं जूं सः भूर्भुवः स्वः त्रिपुरान्तकाय ह्रां ह्रीं कवचम्। ओं जूं सः भूर्भुवः स्वः ह्रौं मृत्योर्मुक्षीय ओं नमो त्रिलोचनाय ऋग्यजुःसाममन्त्राय नेत्रम्। ओं ह्रौं ओं जूं सः भूर्भुवः स्वः मामृतात् ओं नमो अग्नित्रयाय ज्वल ज्वल मां रक्ष रक्ष ओं अघोरास्त्राय अस्त्रम् ॥ ७—१२ ॥

वर्णन्यासमाह द्वात्रिंशदिति। प्रणवादिनववर्णाद्यान् सबिन्दुनमोऽन्तान् पूर्व-

पूर्वपश्चिमयाम्योदङ्मुखेषूरसि कण्ठतः ।
वदने नाभिहृत्पृष्ठे कुक्षौ लिङ्गे गुदे न्यसेत् ॥ १४ ॥
ऊरुमूलोरुमध्ये च जानुनोर्जानुवृत्तयोः ।
स्तनयोः पार्श्वयोरङ्घ्र्योः करयोर्नसि मूर्द्ध नि ॥ १५ ॥
अथैकादश विन्यसेत् पदानि शिरसि भ्रुवोः ।
नेत्रयोर्वदने गण्डे हृदये जठरे शिवे ॥ १६ ॥
ऊर्वोर्जानुप्रदेशे च पादयोः क्रमशः पुनः ।
त्रिवेदगुणबाणाब्धिद्विरामाब्धिगुणेन्दवः ॥ १७ ॥
त्रिभिर्गुणैश्च विज्ञेया पदसंख्या क्रमाद् बुधैः ।
मूलेन व्यापकं कृत्वा ततो ध्यायेत् त्रिलोचनम् ॥ १८ ॥
हस्ताम्भोजयुगस्थकुम्भयुगलादुद्धृत्य तोयं शिरः
सिञ्चन्तं करयोर्युगेन दधतं स्वाङ्के सकुम्भौ करौ ।
अक्षस्रक् मृगहस्तमम्बुजगतमूर्द्धस्थचन्द्रस्रवत्-
पीयूषोन्नत्तनुं भजे सगिरिजं मृत्युञ्जयं त्र्यम्बकम् ॥ १९ ॥

---

वक्त्रादिष्वङ्गेषु न्यसेत् श्रीं ह्रौं श्रीं जूं सः भूर्भुवः स्वः वंग नमः पूर्ववक्त्रे । श्रीं ह्रौं श्रीं जूं सः भूर्भुवः स्वः वं नम पश्चिमवक्त्रे इत्यादि प्रयोगः ॥ १३ ॥

अङ्गन्यासमाह पूर्वेति । पूर्ववक्त्रादिष्वेकैकं वर्णं न्यसेत् ॥ १४ ॥

ऊरुमूलोरुमध्यजानुवृत्तस्तनपार्श्वपादकरनासासु द्वौ द्वौ मूर्द्धन्येकैकम् ॥ १५ ॥

पदन्यासमाह अथेति । शिवे लिङ्गे ॥ १६ ॥ १७ ॥

पदेषु वर्णसंख्यामाह त्रिभिरिति । त्र्यम्बकं नमः शिरसि इत्यादि । पद बाधे मा अमृतादिति वरं पदम् ॥ १८ ॥

ध्यानमाह हस्तेति । अष्टहस्तविनियोगमाह अङ्कस्थं करयोः कुम्भं दधतं तदूर्ध्वस्थकरयोः कुम्भाभ्यां जलमुद्धृत्य करद्वयेन स्वशिरोऽभिषिञ्चन्तं करयोर्मृगाक्ष-मालाम् च दधतमिति मूर्द्धनि स्थितो यश्चन्द्रस्ततः स्रवतामृतेनोत्क्लिन्नातनुर्यस्य उन्दी क्लेदे इत्यस्य निष्ठायां उन्नेति स्वरूपं सगिरिजं भवानीयुतं त्रीण्यम्बकानि नेत्राणि यस्य तम् ॥ १९ ॥

मुष्टिसारङ्गशक्त्याख्यलिङ्गपञ्चमुखाभिधाः।
मुद्राः प्रदर्श्य प्रजपेल्लक्षं तस्य दशांशतः ॥ २० ॥
दशद्रव्यैः प्रजुहुयात्तानि विल्वफलं तिलाः।
पायसं सर्षपा दुग्धं दधि दूर्वा च सप्तमी ॥ २१ ॥
वटात् पलाशात् खदिरात् समिधो मधुराप्लुताः।
वामादिशक्तिसंयुक्ते पीठे शैवे यजेत् शिवम् ॥ २२ ॥
वामा ज्येष्ठा तथा रौद्री काली प्रोक्ता चतुर्थिका।
कलादिका विकरिणी वलाद्या विकरण्यपि ॥ २३ ॥
वलप्रमथनी चान्या सर्वभूतदमन्यपि।
मनोन्मनीति शर्वस्य नवोक्ताः पीठशक्तयः ॥ २४ ॥
तारो नमो भगवते सकलेति पदं ततः।
गुणात्मशक्तियुक्ताय अनन्ताय वदेत् पदम् ॥ २५ ॥

---

मुद्रा आह मुष्टीति। मुष्टिं दक्षिणहस्तेन विधायोर्द्धं समुन्नयेत्। मुद्रा मुष्टय-भिधा ख्याता सर्वविघ्नविनाशिनीति मुष्टिमुद्रालक्षणम्। सारङ्ग मृगास्तन्मुद्रालक्षणं यथा—

दक्षस्यानामिकाङ्गुष्ठमध्यमायाश्च योजयेत्।
शिष्टे द्वे उच्छ्रिते कुर्य्यान्मृगमुद्रेयमीरितेति ॥
मुष्टीकरौ विधाय द्वौ वामस्योपरि दक्षिणम्।
कृत्वा शिरसि युञ्जीत शक्तिमुद्रेयमीरिता ॥
इति शक्तिमुद्रालक्षणम्।
उच्छ्रितं दक्षिणाङ्गुष्ठं वामाङ्गुष्ठेन बन्धयेत्।
वामाङ्गुलीर्दक्षिणाभिरङ्गुलीभिश्च बन्धयेत्।
लिङ्गमुद्रेयमाख्याता शिवसान्निध्यकारिणी ॥ इति लिङ्गमुद्रा।
मणिबन्धकरौ युक्तावङ्गुल्यश्चापि मेलयेत्।
मुद्रा पञ्चमुखाख्येयं दर्शिता शिवतोषिणी ॥
इति पञ्चमुखमुद्रालक्षणम् ॥ २० ॥

दशद्रव्याण्याह बिल्वेति ॥ २१ ॥ २२ ॥
पीठशक्तीराह वामेति ॥ २३ ॥ २४ ॥

योगपीठात्मने पीठमन्त्रः प्रोक्तो नमोऽन्तिकः ।
पीठे पुष्पाञ्जलिं दत्त्वा मूर्त्तिं मूलेन कल्पयेत् ॥ २६ ॥
पाद्यादिकुसुमान्तोपचारान्ते त्वावृतिर्यजेत् ।
ईशानं शम्भुकोणे तु यजेदीशानमन्त्रतः ॥ २७ ॥
तत्पुरुषमघोरञ्च वामदेवं तृतीयकम् ।
सद्योजातं यजेद्दिक्षु वेदोक्तस्वस्वमन्त्रतः ॥ २८ ॥
ईशानादिसमीपेषु निवृत्त्याद्याः कला क्रमात् ।
निवृत्तिश्च प्रतिष्ठा च विद्या शान्तिश्चतुर्थ्यऽपि ॥ २९ ॥
शान्त्यतीता पञ्चमीति ततोऽङ्गानि यजेच्च षट् ।
सूर्य्येन्दुक्षितितोयाग्निपवनाकाशयज्वनाम् ॥ ३० ॥
मूर्त्तयोऽष्टौ क्रमात् पूज्यास्तृतीयावरणस्थिताः ।
रम्भा राका प्रभा ज्योत्स्ना पूर्णिमा पूरणी सुधा ॥ ३१ ॥
चतुर्थावरणे पूज्याः शक्तयो धवलप्रभाः ।
विश्वा वन्द्या सिता प्रह्वा सारा सन्ध्या शिवा निशा ॥३२॥
पञ्चमावरणेऽभ्यर्च्याः शक्तयः श्यामविग्रहाः ।
आर्य्या प्रज्ञा प्रभा मेधा शान्तिः कान्तिर्धृतिर्मतिः ॥३३॥
षष्ठावरणगा अष्टौ सम्पूज्या अरुणप्रभाः ।
धरा मायाविनी पद्मा शान्ता मोघा जयामलः ॥ ३४ ॥

---

आसनमन्त्रमाह तार इति । ओं नमो भगवते सकलगुणात्मशक्तियुक्ताय अनन्ताय योगपीठात्मने नम इति ॥ २५ ॥ २६ ॥

आवरणपूजाप्रकारमाह पाद्यादीति । पाद्यार्घ्याचमनीयस्नानवस्त्रोपवीतचन्दनपुष्पाणि दत्त्वावरणपूजां कुर्य्यात् तत्रेशानकोणे ईशानं सर्वविद्यानामित्यापस्तम्बशाखोक्तं मन्त्रं पठित्वेशानं यजेत् ॥ २७ ॥

तत्पुरुषाय विद्महे अघोरेभ्योऽथ घोरेभ्यो वामदेवाय नमः सद्योजातं प्रपद्यामि इत्यादिचतुर्भिर्मन्त्रैस्तत्पुरुषादीन् प्रागादिषु यजेत् तेषां समीपे स्वनामभिर्निवृत्याद्याः कलाः द्वितीयावरणेऽङ्गानि तृतीये सूर्य्यादीनां मूर्त्तयः सूर्य्यमूर्त्तये नमः

सप्तमावृत्तिगाः पूज्याः अनन्ताद्याः काञ्चनप्रभाः ।
अनन्तः सूक्ष्मसंज्ञश्च तृतीयस्तु शिवोत्तमः ॥ ३५ ॥
एकनेत्रैकरुद्रौ च त्रिमूर्त्तिः षष्ठ ईरितः ।
श्रीकण्ठोऽथ शिखण्डी च सम्पूज्या अष्टमावृतौ ॥ ३६ ॥
उत्तरादि यजेत् पश्चात् उमां चण्डेश्वरं पुनः ।
नन्दिनञ्च महाकालं गणेशं वृषभं पुनः ॥ ३७ ॥
यजेत् भृङ्गिरिटिं स्कन्दं नवमावरणस्थितान् ।
ब्राह्मग्राद्या मातरः पूज्या दशमावरणे ततः ॥ ३८ ॥
इन्द्रादयश्च वज्राद्या एवं सिद्धो भवेन्मनुः ।
जन्मभेदं शमेत् तस्मात् पुनश्चैकोनविंशके ॥ ३९ ॥
जुहुयाद् यः सुधावल्ल्याः समिधश्चतुरङ्गुलाः ।
स रोगान् सकलान् शत्रून् पराभूय श्रिया युतः ॥ ४० ॥
मोदते पुत्त्रपौत्राद्यैः शतवर्षाणि साधकः ।
समिद्भिः श्रीफलोत्थाभिर्होमः सम्पत्तिसिद्धये ॥ ४१ ॥
पलाशतरुजाभिस्तु ब्रह्मवर्चससिद्धये ।
वटोत्थाभिर्धनप्राप्तिः खादिरीभिस्तु कान्तये ॥ ४२ ॥
तिलैरधर्मनाशाय सर्षपैः शत्रुनष्टये ।
पायसेन कृतो होमः कान्तिश्रीकीर्त्तिदायकः ॥ ४३ ॥
कृतो मृत्युञ्चयकरो दध्ना संवादसिद्धिदः ।
होमसंख्या तु सर्वत्रायुतमानेन कीर्त्तिता ॥ ४४ ॥

---

इत्यादिप्रयोगः । चतुर्थे रम्भादयः । पञ्चमे विश्वादयः । षष्ठे आर्य्यादयः । सप्तमे धराद्याः । अनन्तादयोऽष्टमे । नवमे उत्तरादिदिशि उमादयः । दशमे मातरः ॥ २८—१८ ॥

प्रयोगानाह जन्मभ इति । सुधावल्ल्या गुड़ूच्याः चतुरङ्गुलप्रमाणाः समिधः श्रीफलं बिल्वम् ॥ ३९—४४ ॥

अष्टोत्तरशतं दूर्वात्रिकहोमाद्रुजां क्षयः ।
स्वजन्मदिवसे यस्तु पायसैर्मधुरान्वितैः ॥ ४५ ॥
जुहोति तस्य वर्द्धन्ते कमलारोग्यकीर्त्तयः ।
गुडूची च कुलोत्थाभिः समिद्भिर्हवनं नृणाम् ॥ ४६ ॥
जन्मतारात्रये रोगान् मृत्युञ्चापि विनाशयेत् ।
प्रत्यहं जुहुयात् दूर्वा अपमृत्युविनष्टये ॥ ४७ ॥
किं बहूक्तेन सर्वेष्टं प्रयच्छति शिवो नृणाम् ।
अपामार्गसमिद्भिश्च सिद्धान्नैर्ज्वरनष्टये ॥ ४८ ॥
दुग्धाक्तैरमृताखण्डैर्मासं होमोऽखिलाप्तये ।
तारो हृद्भगवान् ङेऽन्तो रुद्रोऽपीति दशाक्षरः ॥ ४९ ॥
बौधायनो मुनिः पङ्क्तिः छन्दो रुद्रोऽस्य देवता ।
पञ्चन्यासान् प्रकुर्वीत स्वस्य रुद्रत्वसिद्धये ॥ ५० ॥
यजुर्वेदस्थिता मन्त्रानेकत्रिंशत्स्थले न्यसेत् ।
याते रुद्रशिखादेशे ह्यस्मिन्महति मस्तके ॥ ५१ ॥
सहस्राणि ललाटे तु हंसः शुचिर्भ्रुवोर्न्यसेत् ।
त्र्यम्बकं नेत्रयोः श्रुत्योर्नमः स्तुत्याय विन्यसेत् ॥ ५२ ॥
मानस्तोके नासिकायामवतत्य मुखे तथा ।

---

रुजां रोगाणाम् ॥ ४५ ॥ ४६ ॥

जन्मताराव्रये जन्मनक्षत्रे ततो दशमैकोनविंशयोश्च ॥ ४७ ॥ ४८ ॥

रुद्रजपाङ्गभूतं दशार्णमाह तार इति । भगवान् रुद्रोऽपि । ङेन्तः पदद्वयं चतुर्थ्यन्तं यथा ॐ नमो भगवते रुद्रायेति ॥ ४९ ॥

रुद्रविधानमाह पञ्चेति ॥ ५० ॥

याते रुद्रेत्यृचं शिखायां न्यसेत् अस्मिन् महत्यर्णवे शिरसि ॥ ५१ ॥

सहस्राणि सहस्रशः भाले । हंसः शुचिः भ्रुवोः । त्र्यम्बकं यजामहे नेत्रयोः । नमः स्रुत्याय च पथ्याय चेति कर्णयोः ॥ ५२ ॥

नीलग्रीव इति ऋचोर्द्वयं कण्ठे न्यसेद्बुधः ॥ ५३ ॥
नमस्ते आयुधायेति मन्त्रमंसद्वये न्यसेत् ।
याते हेतिरिमां वाह्वो ये तीर्थानीति हस्तयोः ॥ ५४ ॥
सद्योजातं प्रपद्यामी ऋचमङ्गुष्ठयोर्न्यसेत् ।
वामदेवाय तर्जन्योरघोरेभ्योऽथ मध्ययोः ॥ ५५ ॥
तत्पुरुषायानामायामीशानस्तु कनिष्ठयोः ।
नमो वः किरिकेभ्यस्तु हृदि मन्त्रमिमं न्यसेत् ॥ ५७ ॥
नमो गणेभ्यः पृष्ठे तु विन्यसेत् साधकोत्तमः ।
ततः पार्श्वद्वये न्यस्येन्नमो हिरण्यवाहवे ॥ ५७ ॥
हिरण्यगर्भो नाभौ च कट्यां मीढुष्टमेति च ।
ये भूतानामिमं गुह्ये मन्त्रं विन्यस्य साधकः ॥ ५८ ॥
अपाने शिरसा युक्तां जातवेदस इत्यृचम् ।
मानो महान्तमित्यूर्वोरेष ते जानुनोर्न्यसेत् ॥ ५९ ॥

---

मानस्तोके नसोः । अवतत्य धनुः मुखे । नीलग्रीवाः शितिकण्ठादिवत् नीलग्रीवाः शितिकण्ठाः शर्वाः ऋग्द्वयं कण्ठे ॥ ५३ ॥

नमस्ते आयुधाय नातताय स्कन्धयोः यातेहेति वाह्वोः ये तीर्थानि करयोः ॥ ५४ ॥

सद्योजातमित्याद्यापस्तम्बशाखोक्तं मन्त्रपञ्चकमङ्गुष्ठाद्यङ्गुलीषु ॥ ५५ ॥

नमो वः किरिकेभ्यो देवाना ठं हृदयेभ्यो नमो विचिन्वत्केभ्यो नमो विचिण्वत्केभ्यो नम आनिर्हतेभ्य इति हृदि ॥ ५६ ॥

नमो गणेभ्यो गणपतिभ्यश्च वो नम इति पृष्ठे नमो हिरण्यवाहवे सेनान्ये दिशाञ्च पतये नम इति पार्श्वयोः ॥ ५७ ॥

हिरण्यगर्भः नाभौ मीढुष्टमशिवाय नमः कट्यां ये भूतानामधिपतयः गुह्ये ॥ ५८ ॥

जातवेदसे इमां ऋचं शिरोयुतं अपाने तानग्निवर्णान्तपसा अग्ने त्वं पारया विश्वानि नो दुर्गताः पृतनाजितं एतदृक्चतुष्टयं पूर्वऋचः शिरोयुतं इदमृचपञ्चकमपाने । मानो महान्तं ऊर्वोः । एष ते रुद्रभागः जानुनोः ॥ ५९ ॥

ये पथां पादयोर्न्यस्याध्यवोचत् कवचे न्यसेत् ।
मन्त्रं नमो विल्मिने चेत्युपवर्मणि विन्यसेत् ॥ ६० ॥
नमोऽस्तु नीलग्रीवाय तृतीयेऽचिणि साधकः ।
प्रमुञ्च धन्वन इति मन्त्रेणास्त्रं प्रविन्यसेत् ॥ ६१ ॥
इत्येकविंशदङ्गानां न्यासः प्रथम-ईरितः ।
ततः कुर्वीत दिग्बन्धं य एतावन्त-इत्यृचा ॥ ६२ ॥
मूलवर्णांस्तनौ न्यस्येत् मस्तके नसि चालिके ।
मुखे कण्ठे हृदि पुनस्तनयोर्दक्षवामयोः ॥ ६३ ॥
नाभौ पादोरिति न्यासो दशाङ्गेषु द्वितीयकः ।
पादोरुहृन्मुखे मूर्ध्नि सद्योजातमुखा ऋचः ॥ ६४ ॥
विन्यस्य प्रत्यृचं ब्रूयाद्धंसहंसेति साधकः ।
तृतीयन्यास इत्युक्तो कृते यस्मिन् शिवो भवेत् ॥ ६५ ॥
एवं न्यासत्रयं कृत्वा संपुटं रचयेत् ततः ।
दिक्षु वासवमुख्यानां न्यासः संपुट उच्यते ॥ ६६ ॥
त्रातारमिन्द्रमन्त्रेण प्राच्यां न्यस्येद्बिडौजसम् ।
त्वन्नो अग्ने ऋचा वह्निं सुगन्न-इत्यृचा यमम् ॥ ६७ ॥

---

ये पथां पथिरक्षयः पदोः । अध्यवोचदधिवक्ता कवचे । नमो विल्मिने च कवचिने इत्युपकवचे ॥ ६० ॥

नमोऽस्तु नीलग्रीवाय तृतीयनेत्रे । प्रमुञ्च धन्वन अस्त्रे ॥ ६१ ॥

इति प्रथमो न्यासः ।

य एतावन्तश्च दिग्बन्धः ॥ ६२ ॥

अक्षरन्यासमाह मूलेति । ओं नमः शिरसि नं नमः नसोरित्यादि ओं शिरसे नमः नां नासिकायै नम इति वा इति द्वितीयो न्यासः ॥ ६३ ॥

सद्योजातं प्रपद्यामीत्यादिकं मन्त्रपञ्चकं पादादिषु प्रत्यङ्गम् ॥ ६४ ॥

हंस हंस इति वदेत् इति तृतीयो न्यासः ॥ ६५ ॥

संपुटं नाम त्रातारमित्यादिमन्त्रैः पूर्वादिषु क्रमेण इन्द्रादिसन्निदर्शनं तेषां

असुन्वन्त निर्ऋतिश्च तत्त्वायामिति तोयपम्।
आनोनियुद्भिर्वायुश्च वयं सोमेत्यृचा विधुम् ॥ ६८ ॥
तमीशानमितीशानमाग्नेयादिषु विन्यसेत्।
अस्मे रुद्रा विधिश्चोर्द्ध्वं स्योनेति पृथिवीमधः ॥ ६९ ॥
एवं यः सम्पुटं कुर्य्यात् स स्यात् किल्बिषवर्जितः।
तं दीप्यमानमीक्ष्यन्ते प्रेतचौराद्युपद्रवाः ॥ ७० ॥
न पराभवितुं शक्ताः पलायन्तेति दूरतः।
मनोजूतिर्न्यसेत् गुह्येऽबोध्यग्निर्जठरानले ॥ ७१ ॥
मूर्द्धानं हृदये न्यस्येत् मुखे मर्माणि ते ऋचम्।
जातवेदास्तु शिरसि न्यासः प्रोक्तश्चतुर्थकः ॥ ७२ ॥
हृदयं शिवसङ्कल्पं शिरः पुरुषसूक्तकम्।
शिखाङ्गः संभृत इति वर्मप्रतिरथं मतम् ॥ ७३ ॥
विभ्राड़िति स्मृतं नेत्रं अस्त्रन्तु शतरुद्रियम्।
अयन्तु पञ्चमो न्यासः कृतः सर्वेष्टसिद्धिदः।
एवं न्यस्य प्रणम्याथ ध्यायेदात्मनि शङ्करम् ॥ ७४ ॥

---

नतयोऽपि कार्य्याः। एवं कृते तेजस्वी भवतीत्यर्थः। इति तृतीयन्यासः। चतुर्थन्यासमाह मनोजूतिं गुह्ये। अबोध्यग्निं उदरे ॥ ६६—७१ ॥

मूर्द्धानं दिवः हृदि। मर्माणि ते वर्मणा मुखे। जातवेदाः यदि वा पावकोऽसि शिरसि। एवं पञ्चाङ्गेषु न्यासश्चतुर्थः ॥ ७२ ॥

षड़ङ्गमाह हृदयमिति। यज्जाग्रतः हृत् सहस्रशीर्षा शिरः अद्भ्यः संभृतः शिखा आशुः शिशानः कवचम् ॥ ७३ ॥

विभ्राट् नेत्रं नमस्ते अस्त्रम्। इत्थं पञ्चाङ्गन्यासं कृत्वा प्रणम्याष्टाङ्गं नत्वात्मानं रुद्रस्वरूपं ध्यायेत्। नमस्कारश्चाष्टभिर्मन्त्रैर्विधेयः मन्त्रा यथा—हिरण्यगर्भः १ यः प्राणतः २ ब्रह्म यत् ज्ञानं ३ महीर्द्यौः ४ उपश्वासय ५ अग्ने नय ६ याते अग्ने ७ इमं यम ८ इमा अष्टावपः पठन्नष्टाङ्गं नमस्कुर्यात्। अष्टाङ्गानि यथा—

उरसा शिरसा दृष्ट्या मनसा श्रद्धयापि च।
पद्भ्यां कराभ्यां वाचा च प्रणामोऽष्टाङ्ग ईरितः ॥ इति ॥ ७४ ॥

कैलाशाचलसन्निभं त्रिनयनं पञ्चास्यमम्बायुतं
नीलग्रीवमहीशभूषणधरं व्याघ्रत्वचा प्रावृतम् ।
अक्षस्रक्वरकुण्डिकाभयकरं चान्द्रीं कलां बिभ्रतं
गङ्गाम्भोऽविलसज्जटं दशभुजं वन्दे महेशं परम् ॥ ७५ ॥

दशलक्षं जपेन्मन्त्रमयुतं परमान्नकैः ।
सघृतैर्जुहुयादग्नौ पीठे पूर्वोदिते यजेत् ॥ ७६ ॥
पूजामन्त्रमथो वक्ष्ये तथावरणदेवता ।
अष्टपत्रं षोड़शारं चतुर्विंशतिपत्रकम् ॥ ७७ ॥
दन्तपत्रं ततः कुर्यात् चत्वारिंशद्दलं ततः ।
तद्बहिर्भूपुरं कुर्य्यात् तत्र रुद्रं प्रपूजयेत् ॥ ७८ ॥
दृष्टान्तकर्णिकामध्ये सद्योजातादिकान् यजेत् ।
दिक्षु मध्ये ततोऽष्टारे नन्द्यादीनष्टसेवकान् ॥ ७९ ॥
नन्दी च महाकालश्च गणेशो वृषभस्तथा ।
ततो भृङ्गिरिटिः स्कन्द उमा चण्डीश्वरोऽष्टमः ॥ ८० ॥
ततस्तु षोड़शदले द्वितीयावरणे स्थिताः ।
अनन्तसूक्ष्मौ च शिव एकपादैकरुद्रकः ॥ ८१ ॥
ततस्त्रिमूर्त्तिश्रीकण्ठौ वामदेवोऽष्टमो मतः ।
ज्येष्ठः श्रेष्ठौ रुद्रकालौ कलाद्विकरणाभिधः ॥ ८२ ॥
बलोबलाद्विकरणो बलप्रमथनस्तथा ।
एतान् सम्पूज्य तार्त्तीये तत्त्वसंख्यान् सुरान् यजेत् ॥ ८३ ॥

---

ध्यानमाह कैलासेति । अहीशा वासुक्यादय एव भूषणभारा यस्य तं अक्षमाला वरौ दक्षयोः कुण्डिका कमण्डलुरभयञ्च वामयोः ॥ ७५ ॥

परमान्नकैः पायसैः ॥ ७६ ॥ ७७ ॥

दन्तपत्रं द्वात्रिंशद्दलम् ॥ ७८ ॥

कलाद्विकरणाभिधः कलविकरणः ॥ ७९—८२ ॥

सिद्धयोऽष्टौ मातरोऽष्टौ भैरवाष्टकमित्यमून्।
ततश्चतुर्थावरणे भवान्नागान् नृपान् गणान् ॥ ८४ ॥
भवः शर्वस्तथेशानः पशुपो रुद्र एव च।
उग्रो भीमो महादेवः शिवाष्टकमुदाहृतम् ॥ ८५ ॥
अनन्तो वासुकिश्चाथ तक्षकश्च कुलीरकः।
कर्कोटकः शङ्खपालः कम्बलाश्वतरावपि ॥ ८६ ॥
इमे नागा वैन्यपृथू हैहेयोऽर्जुनसंज्ञकः।
शाकुन्तलेयो भरतो नलो रामो नृपाष्टकम् ॥ ८७ ॥
हिमवान् निषधो विन्ध्यो माल्यवान् पारियात्रकः।
मलयो हेमकूटश्च गन्धमादन इत्यपि ॥ ८८ ॥
गिर्य्यष्टकं पञ्चमे तु चत्वारिंशत् सुरान् यजेत्।
वासवादय इत्येषां शक्तयो आयुधान्यपि ॥ ८९ ॥
वाहनानि गजाश्वेति चत्वारिंशत् सुराः स्मृताः।
इन्द्रोऽग्नियमरक्षांसि वरुणानिलभाधिपाः ॥ ९० ॥
ईशान इति दिक्पालाः शची स्वाहा वराहजा।
खड्गिनी वारुणी चापि वायवी च कुवेरजा ॥ ९१ ॥
ईशानीः शक्तयः पूज्याः कुलिशं शक्तिदण्डकौ।

---

वसाद्विकरणी वसविकरणः तार्तीये तृतीयावरणे तत्त्वावरणे तत्त्वसंख्यान् चतुर्विंशतिमितान् ॥ ८३ ॥

तानेवाह सिद्धय इति। ते उक्ताः भवान् षष्टौ एवं नगाद्वपतिरयोऽपि प्रत्येकमष्टौ ॥ ८४ ॥

तानेवाह भवेति ॥ ८५ ॥

नागानाह अनन्त इति ॥ ८६ ॥

नृपानाह वैन्येति ॥ ८७ ॥

गिरीनाह हिमवानिति ॥ ८८ ॥

वासवादय इति प्रत्येकमष्टौ ॥ ८९ ॥

खड्गं पाशोऽङ्कुशश्चैव गदा शूले च हेतयः ॥ ९२ ॥
ऐरावतोऽजमहिषो प्रेतमीनपृषन्नराः ।
वृषभा वाहनानि स्युर्दिक्पालानां क्रमादमी ॥ ९३ ॥
ऐरावतः पुण्डरीको वामनः कुमुदोऽञ्जनः ।
पुष्पदन्तः सार्वभौमः सुप्रतीकश्च दिग्गजाः ॥ ९४ ॥
पञ्चालान्येवमापूज्य भूगृहे दिक्षु दिक्पतीन् ।
पुनरभ्यर्चयेदीशान् षष्ठमावरणं स्मृतम् ॥ ९५ ॥
आग्नेय्यां भूगृहस्याथ विरूपाक्षं प्रपूजयेत् ।
विश्वरूपं यातुधानं वायव्यान्तु यशोः पतिम् ॥ ९६ ॥
ऊर्द्ध्वलिङ्गमथैशान्यामथो भूसदनाद्बहिः ।
दिक्षु नागाष्टकं पूज्यमेवं सप्तावृतिर्यजिः ॥ ९७ ॥
शेषाख्यस्तक्षकोऽनन्तो वासुकिः शङ्खपालकः ।
महापद्मः कम्बलश्च कार्कोटक इमेऽहयः ॥ ९८ ॥
श्वेतो नीलः कुङ्कुमाभः पीतकृष्णावथोज्ज्वलः ।
वर्णतः शेषमुख्याः स्युस्तेषां जातीः फणान् ब्रुवे ॥ ९९ ॥
विप्रो वैश्यस्तथा विप्रः क्षत्रियो वैश्यशूद्रकौ ।
शूद्रश्च क्रमतो ज्ञेयाः शेषाद्याः पूजने बुधैः ॥ १०० ॥
दिग्बाणदशसप्ताद्रिशरसंख्यानि तु क्रमात् ।
शतानि त्रिंशत् त्रिंशच्च फणास्तेषां समीरिताः ॥ १०१ ॥

---

तानाह ॥ ९०—९३ ॥

पञ्चालानि पद्मानि ॥ ९४ ॥ ९५ ॥

सप्तावृतिः सप्तावरणयुताः ॥ ९६ ॥ ९७ ॥

नागाष्टकमाह शेषाख्य इति अष्टौ नागाः ॥ ९८ ॥

एवमिति इत्थं पञ्चाङ्गन्यासं कृत्वा तेषां वर्णानाह श्वेत इति । पीतौ द्वौ वासुकिशङ्खपालौ कृष्णौ महापद्मकम्बलौ । जातीनाह विप्र इति ॥ ९९ ॥ १०० ॥

एवमर्चन्महादेवं पञ्चाङ्गन्यासपूर्वकम्।
दशाक्षरजपाशक्तो न सीदेत् स्वेष्टसाधने ॥ १०२ ॥
मनोहराणि गेहानि सुन्दर्य्यो वामलोचनाः।
धनमिच्छापूरणान्तं लभते शिवसेवनात् ॥ १०३ ॥
प्रयोगान् पूर्वमन्त्रोक्तान् कुर्वीतात्र दशाक्षरे।
दशाक्षरं भजन् विप्रो रुद्रजापी भजेत् सदा ॥ १०४ ॥
अथ मन्त्रं कुवेरस्य वक्ष्ये सर्वसमृद्धिदम्।
यक्षाय पदमुच्चार्य्य कुवेराय पदाच्च वै ॥ १०५ ॥
श्रवणाय धनार्णान्ते धान्याधिपतये धनम्।
धान्यशब्दात् समृद्धिं मे देहि दापय ठद्वयम् ॥ १०६ ॥
वाणरामाक्षरो मन्त्रो विश्रवा मुनिरस्य तु।
छन्दस्तु वृहती देवः शिवमित्रो धनेश्वरः ॥ १०७ ॥
त्रिचतुःपञ्चवस्वष्टमुनिवर्णैर्मनूद्भवैः।
कृत्वा षड़ङ्गं धनदं चिन्तयेदलकागतम् ॥ १०८ ॥
मनुजवाह्यविमानवरस्थितं गरुड़रत्ननिभं निधिनायकम्।
शिवसखं मुकुटादिविभूषितं वरगदे दधतं भज तुन्दिलम् ॥१०९
लक्षमेकं जपेन्मन्त्रं दशांशं जुहुयात्तिलैः।

---

फणसंख्यामाह दिगिति। शेषः सहस्रफणः तक्षकः पञ्चशतफणः अनन्तः सहस्रफणः वासुकिशङ्खपालौ सप्तशतफणौ महापद्मः पञ्चशतफणः कम्बलकर्कोटकौ विंशत्फणौ तथा चैवं प्रयोगः। श्वेताय विप्रवर्णाय सहस्रफणाय शेषाय नम इत्यादि ॥ १०१—१०४ ॥

कुवेरमन्त्रमाह यक्षायेति। यक्षाय कुवेराय वैश्रवणाय धनधान्याधिपतये धनधान्यसमृद्धिं मे देहि दापय स्वाहेति ॥ १०५—१०६ ॥

वाणरामाक्षरः पञ्चत्रिंशदर्णः ॥ १०७ ॥

षड़ङ्गमाह त्रीति। यक्षाय हृदयाय नम इत्यादि ॥ १०८ ॥

ध्यानमाह मनुजेति। गरुड़रत्नं गारुड़मणिः वरगदे दक्षवामयोः ॥ १०९ ॥

धर्मादिपीठे प्रयजेदङ्गलोकपहेतयः ॥ ११० ॥
शिवालये जपेन्मन्त्रमयुतं धनहृद्धये ।
विल्वमूलोपविष्टेन जप्तो लक्षं धनर्द्धिषु ॥ १११ ॥
आदौ तारपुटा लक्ष्मी ततो मायापुटा रमा ।
ततः कामपुटश्चैवं ङेन्तो वित्तेश्वरो नमः ॥ ११२ ॥
षोड़शाक्षरमन्त्रोऽयं सर्वदारिद्र्यनाशनः ।
त्रिनेत्रनयनद्वीपु युग्मार्णैरङ्गकं मनोः ॥ ११२ ॥
ध्यानार्चनादिकं सर्वमन्यत् पूर्ववदाचरेत् ।
अथ शम्भोः शिरस्थाय देव सिन्धोर्मनून् ब्रुवे ॥ ११३ ॥
प्रणवो हृदयं ङेन्तो शिवनारायणीपदे ।
तद्दशहरागङ्गे वह्निजाया नखाक्षरः ॥ ११४ ॥
मनुर्व्यासो मुनिः छन्दः कृतिर्गङ्गाख्य देवता ।
त्रिवह्निवेदबाणाग्निनेत्रवर्णैः षड़ङ्गकम् ॥ ११५ ॥
उत्फुल्लामलपुण्डरीकरुचिराक्षणेश विन्यात्मिका-
कुम्भेष्टाभयतोयजानि दधती श्वेताम्बरालङ्कृता ।
हृष्टास्या शशिशेखराखिलनदीशेणादिभिः सेविता
ध्येया पापविनाशिनी मकरगा भागीरथी साधकैः ॥११६॥

---

धर्मादीनि पीठशक्त्याभावः ॥ ११० ॥ १११ ॥

मन्त्रान्तरमाह आदाविति । श्रैव रमैव यथा ओं श्रीं ओं ह्रीं श्रीं ह्रीं श्रीं क्लीं क्लीं वित्तेश्वराय नम इति ॥ ११२—११४ ॥

षड़ङ्गमाह त्रीति । ओं श्रीं ओं हृत् ह्रीं श्रीं शिर इत्यादि ॥ ११५ ॥

गङ्गामन्त्रमाह प्रणव इति । शिवा नारायणीति पदद्वयं ङेन्तं दशहरा गङ्गेति पदद्वयमपि चतुर्थ्यन्तं वह्निजाया स्वाहा यथा ओं नमः शिवायै नारायण्यै दशहरायै गङ्गायै स्वाहेति नखाक्षरो विंशत्यर्णः ॥ ११४ ॥ ११५ ॥

ध्यानमाह उत्फुल्लेति । इष्टो वरः वरपद्मे दधती: कुम्भाभये वामयोः मकरगा मकरवाहना ॥ ११६ ॥

लक्षं जपेद्दशांशेन जुहुयात् सघृतैस्तिलैः।
जयादिशक्तिभिर्युक्ते पीठे भागीरथीं यजेत् ॥ ११७ ॥
प्रयजेत् केशरेष्वङ्गं दले रुद्रं हरिं विधिम्।
सूर्यं हिमाचलं मेनां भगीरथमपां पतिम् ॥ ११८ ॥
दलाग्रतो मीनकूर्ममण्डूकमकरानपि।
हंसान् कारण्डवांश्चक्रवाकान् सारसकान् यजेत् ॥ ११९ ॥
चतुरस्रे शक्रमुख्यानायुधैः संयुतान् यजेत्।
एवं संसाधितो मन्त्रोऽभीष्टं यच्छन्ति मन्त्रिणाम् ॥ १२० ॥
ज्येष्ठशुक्लदशम्यान्तां विशेषेण भजेद् बुधः।
दद्याद्दशभ्यो विप्रेभ्यो दशप्रस्थमितान् तिलान् ॥ १२१ ॥
जप्त्वा सहस्रं हुत्वा चोपोष्य तत्र विकल्मषः।
सर्वभोगसमायुक्तो जायते मानवो भुवि ॥ १२२ ॥
तारो नमो भगवति वाक् सदृक् गगनं लिहि।
क्रियान्तं दीपिनाकीशविषलाः सूक्ष्मसंयुताः ॥ १२३ ॥
गङ्गेमां पावयद्वन्द्वमन्ते हुतवहाङ्गना।
गिरिनेत्राचरी विद्या स्मृता पातकसङ्घहृत् ॥ १२४ ॥
रामवेदाङ्गवक्राङ्गनेत्रार्णैरङ्गमीरितम्।
द्वयमादिमसप्तार्णत्यक्तोक्ता नखराचरी ॥ १२५ ॥

---

जयादयः शक्तय उक्ताः ॥ ११७—१२२ ॥

मन्त्रान्तरमाह तार इति। वाक् ऐं गगनं हः सदृक् ऊयुतः क्रिया लः तन्द्री मः पिनाकीशोर्वः विषं मः वस्त्ररूपं एते सूक्ष्मसंयुता ऊयुताः तेन हिलि हिलि मिलि मिलि हुतवहाङ्गना स्वाहा गिरिनेत्राचरी सप्तविंशत्यर्णः यथा— ओं नमो भगवति ऐं हिलि हिलि मिलि मिलि ॥ १२३ ॥

गङ्गे मां पावय पावय स्वाहेति ॥ १२४ ॥

षडङ्गमाह रामेति। षडा नव द्वयमेव विद्या आदिमा प्रथमे ये समार्णा ओं नमो भगवतीति तद्धीना नखराचरा विंशतिवर्णा ॥ १२५ ॥

बाणवेदाग्निरामाब्धिनेत्रार्णैरङ्गमीरितम् ।
तारो ह्रिलि मिलिद्वन्द्वे गङ्गे देवि नमो मनुः ॥ १२६ ॥
तिथिवर्णोऽयमस्याग्निनेत्राब्धित्रियुगाब्धिभिः ।
तारो माया रमा हार्दं ततो भगवतीति च ॥ १२७ ॥
गां स्मृत्यन्ती सद्दक् वायुस्ते समो वर्म फट् मनुः ।
त्रिनेत्रवेदपञ्चाब्धियुग्मार्णैरङ्गमीरितम् ॥ १२८ ॥
एषां चतुर्णां मन्त्राणामुपास्तिः पूर्ववन्मता ।
वाक् माया कमला कामवेदाद्यो विषबिन्दुयुक् ॥ १२९ ॥
मणिकर्णिभगिब्रह्मा हृदयं ध्रुवसम्पुटः ।
मन्त्रः पञ्चदशार्णोऽस्य मुनिर्व्यासोऽतिशक्करी ॥ १३० ॥
छन्दः श्रीमणिकर्णी तु देवता सुखपुत्रदा ।
चन्द्रनेत्राब्धिनेत्रेषु वह्निवर्णैः षडङ्गकम् ॥ १३१ ॥
फुल्लेन्दीवरनिर्मितां करतले मालामसव्ये करे
बीजपूरफलं सिताम्बुजमयीं मालां दधाना हृदि ।
श्वेतक्षौमवृता शरद्विधुनिभा त्र्यक्षानि बद्धाञ्जलिः
ध्यातव्या मणिकर्णिका रविसमा तोयेशकाष्ठामुखी ॥१३२॥

---

मन्त्रान्तरमाह तार इति । ओं ह्रिलि ह्रिलि मिलि मिलि गङ्गे देवि नम इति ॥ १२६ ॥

तिथिवर्णः पञ्चदशार्णः । षडङ्गमाह अग्नीति । मन्त्रान्तरमाह तार इति । तार ओं माया ह्रीं रमा श्रीं हार्दं नमः ॥ १२७ ॥

स्मृतिर्गः षड्बिन्दुः सद्दग्वायुः इयुतो यः यि वर्म हुं स्वरूपमन्यत् यथा ओं ह्रीं श्रीं भगवति गङ्गे दयिते नमो हुं फट् अष्टादशार्णः । षडङ्गमाह त्रीति ॥१२८॥

उपास्तिः पूजा पूर्ववद्विंशत्यर्णवत् । मणिकर्णिकामन्त्रमाह वागिति । वाक् ऐं माया ह्रीं कमला श्रीं कामः क्लीं वेदाद्य ओं इन्दुयुक् विषं मन्दिरं मम् ॥१२९॥

मणिकर्णि स्वरूपं भगी ए ब्रह्मा एयुतः कः के हृदयं नमः ध्रुवसम्पुट आद्यन्तप्रणवयुतः ॥ १३०—१३२ ॥

लक्षत्रयं जपेन्मन्त्रं जुहुयात्तद्दशांशतः।
पुण्डरीकैस्त्रिमध्वक्तैर्यजेत् गङ्गया समम्॥ १३३॥
अयं मनुर्जनैर्जप्तो मोक्षलक्ष्मीं प्रयच्छति।
सुखं समस्तं सन्तानं सौभाग्यं धनसञ्चयम्॥ १३४॥
प्रणवो विन्दुयुग्मान्ते मण्यन्ते कर्णिके प्रण।
वात्मिके हृदयं मन्त्रो मनुवर्णोऽस्य पूर्ववत्॥ १३५॥
विधेयोपासना सर्वा मणिकर्ण्या उपासकः।
कुदेशेऽपि मृतो याति ब्रह्मैवामलमव्ययम्॥ १३६॥

इति श्रीमन्त्रमहोदधौ शिवादिमन्त्रकथनं नाम
षोड़शस्तरङ्गः।

---

षड़ङ्गमाह चन्द्रेति। षौं हृत् ऐं क्रौं शिरः श्रौं क्लौं शिखेत्यादि। ध्यानमाह फुल्लेति। असव्ये दक्षकरे इन्दीवरमालां दधती अपरे वामे वीजपूरं शरचन्द्रकान्तिः तेजसा रवितुल्या तीर्थेशकाष्ठामुखी पश्चिमाभिमुखी पुण्डरीकैः सिताम्भोजैः गङ्गया समं यजेत्॥ १३३॥

गङ्गामन्त्र इवावरणपूजां कुर्य्यात् तस्या एव मन्त्रान्तरमाह प्रणव इति। आन्तौ मं यथा मं मणिकर्णिके प्रणवात्मिके नमः। मनुवर्णश्चतुर्दशार्णः। अस्योपासना पञ्चदशार्णवद्विधेया मणिकर्णिकोपासकः कुदेशे मगधादौ मृतोऽपि ब्रह्मैव स्यात्॥ १३४—१३६॥

इति नौकासमाख्यायां मन्त्रमहोदधिटीकायां शिवादिमन्त्रकथनं नाम षोड़शस्तरङ्गः।

# सप्तदशस्तरङ्गः ।

अथेष्टदान् मनून् वक्ष्ये कार्त्तवीर्य्यस्य गोपितान् ।
यः सुदर्शनचक्रस्यावतारः क्षितिमण्डले ॥ १ ॥
वह्नितारयुता रौद्री लक्ष्मीरग्नीन्दुशान्तियुक् ।
वेधाधरेन्दुशान्त्याढ्यो निद्राघींशाग्निविन्दुयुक् ॥ २ ॥
पाशमायाङ्कुशं पद्मा वर्मास्त्रे कार्त्तवीपदम् ।
रेफो वाय्वासनोऽनन्तो वह्निजौ कर्णसंस्थितौ ॥ ३ ॥
मेघः सदीर्घः पवनो मनुरुक्तो हृदन्तिकः ।
ऊनविंशतिवर्णोऽयं तारादिर्नखवर्णकः ॥ ४ ॥
दत्तात्रेयो मुनिश्चास्य छन्दोऽनुष्टुबुदाहृतम् ।
कार्त्तवीर्य्यार्जुनो देवो वीजं शक्तिर्ध्रुवश्च हृत् ॥ ५ ॥
शेषाद्यवीजयुग्मेन हृदयं विन्यसेद् बुधः ।
शान्तियुक्तचतुर्थेन कामाद्येन शिरोऽङ्गकम् ॥ ६ ॥

---

अथ कार्त्तवीर्य्यार्जुनमन्त्रान् वक्तुं प्रतिजानीते अथेति । गोपितानन्यैराचार्य्यैः शङ्कराचार्य्यप्रभृतिभिरप्रकाशितान् ॥ १ ॥

मन्त्रराजमुद्धरति वह्नीति । रौद्री फः वह्नी रेफः तार ओँ ताभ्यां युता तेन फ्रोँ अक्षीः वः अग्नीन्दुशान्तियुक् रविन्दु इयुता तेन व्रीँ वेधाः कः धरेन्दुशान्त्याढ्यः लविन्दु इयुतः तेन क्लीँ निद्रा भः अघींशाग्निविन्दुयुक् ऊविन्दुयुता तेन भ्रूं पाशं आं माया ह्रीँ अङ्कुशः क्रोँ पद्मा श्रीँ वर्म हुं अस्त्रं फट् कार्त्तवीर्य्यस्वरूपं वाय्वासनो यथुतः अनन्तो आयुतो रेफः तेनयां वह्निजौ रेफनकारौ कर्णसंस्थितौ उयुतौ तेन र्नु ॥ २—४ ॥

मेघो नः सदीर्घः ना पवनो यः हृदन्तिको नमोऽन्तो मनुः कथितः प्रणवादि-विंशत्यर्णः ध्रुव ओँ वीजं नमः शक्ति ॥ ५ ॥

षडङ्गमाह शेषेति । शेष आ तद्युतेनाद्यवीजद्वयेन हृत् आकारयुतत्वादन्त-

इन्द्वाढ्यं वामकर्णाढ्यमायया घींशयुक्तया।
शिखामङ्गुशपञ्चाभ्यां सवाग्भ्यां वर्म विन्यसेत् ॥ ७ ॥
वर्मास्त्राभ्यामस्त्रमुक्तं शेषार्णैर्व्यापकं चरेत्।
हृदये जठरे नाभौ जठरे गुह्यदेशके ॥ ८ ॥
दक्षपादे वामपादे सक्थ्नि च जानुजङ्घयोः।
विन्यसेद्बीजदशकं प्रणवद्वयमध्यगम् ॥ ९ ॥
ताराद्यान्नवशेषार्णान् मस्तके च ललाटके।
भ्रुवोः श्रुत्योस्तथैवाक्ष्णोर्नसि वक्त्रे गले सके ॥ १० ॥
सर्वमन्त्रेण सर्वाङ्गे कृत्वा व्यापकमादयः।
सर्वेष्टसिद्धये ध्यायेत् कार्त्तवीर्य्यं जनेश्वरम् ॥ ११ ॥
उद्यत्सूर्य्यसहस्रकान्तिरखिलक्षौणीधवैर्वन्दितो
हस्तानां शतपञ्चकेन च दधच्चापानिषूंस्तावता।
कण्ठे हाटकमालया परिवृतश्चक्रावतारो हरे
पायात् स्यन्दनगोऽरुणाभवसनः श्रीकार्त्तवीर्य्यो नृपः ॥१२॥
लक्षमेकं जपेन्मन्त्रं दशांशं जुहुयात्तिलैः।
सतण्डुलैः पायसेन विष्णुपीठे यजेत्तु तम् ॥ १३ ॥

---

स्वरनिवृत्तिः तेन फ्रां व्रां हृदयाय नमः शान्तीति ईंयुतेन चतुर्थबीजेन कामबीजाद्येन शिरः। क्लीं श्रीं शिरसे स्वाहा ॥ ६ ॥

इं द्वितीय सविन्दुर्वामकर्णं ऊ आद्यो यस्य ईंदृशः घींशयुक्तया ऊयुतया मायया शिखा घ्रीं क्रूं शिखायै वषट् सवाग्भ्यां ऐंयुताभ्यां अङ्कुशपद्माभ्यां वर्म श्रीं श्रैं कवचाय हुम् ॥ ७ ॥

वर्मास्त्राभ्यामस्त्रं हुं फट् अस्त्राय फट् शेषार्णैः कार्त्तवीर्य्यार्जुनाय नम इति व्यापकम्। वर्णन्यासमाह हृदय इति। सक्थ्योर्जान्वोर्जङ्घयोरेकैकमेव प्रणवद्वयान्तस्थं बीजं न्यसेत् घ्रों फ्रों घ्रों हृदि घ्रों श्रीं घ्रों जठर इत्यादि ॥८॥९॥

ताराद्यानिति घ्रों वं मस्तके घ्रों तं ललाटे इत्यादि ॥ १० ॥ ११ ॥

वक्ष्यमाणं दशदले वृत्तभूपुरसंयुते ।
सम्पूज्य वैष्णवीः शक्तीस्तत्रावाह्यार्चयेन्नृपम् ॥ १४ ॥
मध्येऽग्नीशासुरमरुत् कोणेषु हृदयादिकान् ।
चतुरङ्गञ्च सम्पूज्य सर्वतोऽस्त्रं ततो यजेत् ॥ १५ ॥
खड्गचर्मधरा ध्येयाः चन्द्राभा अङ्गमूर्त्तयः ।
षट्कोणेषु षड़ङ्गानि ततो दिक्षु विदिक्षु च ॥ १६ ॥
चोरमदविभञ्जनं मारीमदविभञ्जनम् ।
अरिमदविभञ्जनं दैत्यमदविभञ्जनम् ॥ १७ ॥
दुःखनाशं दुष्टनाशं दुरितामयनाशकौ ।
दिक्ष्वष्टशक्तयः पूज्याः प्राच्यादिषु सितप्रभाः ॥ १८ ॥
क्षेमङ्करी वश्यङ्करी श्रीकरी च यशस्करी ।
आयुष्करी तथा प्रज्ञाकरी विद्याकरी पुनः ॥ १९ ॥
धनकर्य्यष्टमी पश्चात् लोकेश अस्त्रसंयुताः ।
एवं संसाधितो मन्त्रः प्रयोगार्हः प्रजायते ॥ २० ॥
कार्त्तवीर्य्यार्जुनस्याथ पूजार्थं यन्त्रमुच्यते ।
दिक्पत्रं विलिखेत् स्वबीजमदनश्रुत्यादि वाक्कर्णिकम् ।
वर्मान्तप्रणवादि बीजदशकं शेषार्णयन्त्रान्तरम् ॥ २१ ॥
उत्पाद्य स्वरकेसरं परिवृतं शेषैः स्वकोणोल्लसत्
भूतार्णक्षितिमन्दिरावृतमिदं यन्त्रं धराधीशितुः ॥ २२ ॥

---

ध्यानमाह उद्यदिति । अखिलक्षोणीधवैः सर्वपार्थिवैर्नतः तावता उल्लसत्पञ्चकैर्णपूर्न् बाणान् दधत् हाटकमालया स्वर्णस्रजा स्यन्दनगो रथस्थितः ॥ १२—१४ ॥

दिक्षु चोरमदविभञ्जनं मारीमदविभञ्जनादींश्चतुरः । विदिक्षु दुष्टनाशादीन् दुरितामयनाशकौ दुरितनाशकौ रोगनाशकश्च । यन्त्रमाह दिक्पत्रमिति । दशदलं विलिख्य कर्णिकायां स्वबीजमदनश्रुत्यादि वाचो विलिखेत् स्वबीजं फ्रौं

शुद्धभूमावष्टगन्धैर्लिखित्वा यन्त्रमादरात्।
तत्र कुम्भं प्रतिष्ठाप्य तत्रावाह्यार्चयेन्नृपम्॥ २३॥
स्पृष्ट्वा कुम्भं जपेन्मन्त्रं सहस्रं विजितेन्द्रियः।
अभिषिञ्चेत्तदम्भोभिः प्रियं सर्वेष्टसिद्धये॥ २४॥
पुत्रान् यशोरोगनाशमायुः स्वजनरञ्जनम्।
वाक्सिद्धिं सुदृशः कुम्भाभिषिक्तो लभते नरः॥ २५॥
शत्रूपद्रवमापन्ने ग्रामे वा पुटभेदने।
संस्थापयेदिदं यन्त्रमरिभीतिनिवृत्तये॥ २६॥
सर्षपारिष्टलशुनकार्पासैर्माथ्यते रिपुः।
धत्तूरैः स्तम्भ्यते निम्बैर्द्वेष्यते वश्यतेऽम्बुजैः॥ २७॥
उच्चाट्यते विभीतस्य समिद्भिः खदिरस्य च।
कटुतैलमहिष्याज्यैर्होमद्रव्याञ्जनं स्मृतम्॥ २८॥
यवैर्हुतैः श्रियः प्राप्तिस्तिलैराज्यैरघक्षयः।
तिलतन्दुलसिद्धार्थलाजैर्वश्यो नृपो भवेत्॥ २९॥

---

मदनः क्लीं शुन्यादि श्रीं वाक् ऐं स्वबीजानि वागन्तर्लिखेत् वर्मान्तानि प्रणवादि-दशबीजानि दलेषु यस्य तत्तथा शेषार्णाः फट् कार्त्तवीर्य्यार्जुनाय नम इति दश-पत्रान्तरेषु यस्य तत् ऊष्माणः शषसहक्षैराद्याः स्वराः केशरेषु यस्य तत् प्रतिकेशरं घ्रौं घ्रौं शेषः कादिभिरूष्महीनैर्वेष्टितं स्वकोणेषूल्लसत् भूतार्णाः पञ्चभूतवर्णा यत्र तादृशं यत् क्षितिमन्दिरश्चतुःकोणन्तेनावृतं तृतीयवर्गगाः कर्णवोलवाः कर्णौ ऊ ऊ श्रौं खवापार्घे वामता इत्यादि भूतानां वर्णस्त्रयोविंशे तरङ्गे वक्ष्यन्ते तत्र स्तम्भने भूवर्णा लिख्याः शान्तावाप्याः वश्ये तैजसाः उच्चाटने वायवीयाः विद्वेषणे तामसाः मारणेऽपि तैजसाः नभस्यमण्डलं प्रोक्तं प्रशस्तं शान्तिकर्मणि इत्यादि वक्ष्यमाणत्वात् इदं धराधीशितुः कार्त्तवीर्य्यस्य यन्त्रम्॥ १५—२२॥

अभिषेकमाह शुद्धेति। अष्टगन्धैः चन्दनागुरुबालकुष्ठकुङ्कुमकर्पूररोचना-जटामांसीभिः तत्र यन्त्रे तत्र कुम्भं॥ २३॥ २४॥

स्वजनं जनरञ्जनं जनवश्यताम्॥ २५॥

सुदृशो नार्यः पुटभेदने नगरे॥ २६॥

अपामार्गार्कदूर्वाणां होमो लक्ष्मीप्रदोऽघनुत् ।
क्षीवश्लक्ष्णत् प्रियङ्गूनां पुराणां भूतशान्तिदः ॥ ३० ॥
अश्वत्थोडुम्बरप्लक्षवटबिल्वसमुद्भवाः ।
समिधो लभते हुत्वा पुत्रानायुर्धनं सुखम् ॥ ३१ ॥
निर्मोकहेमसिद्धार्थलवणैश्चोरनाशनम् ।
रोचना गोमयैः स्तम्भो भूप्राप्तिः शालिभिर्हुतैः ॥ ३२ ॥
होमसंख्या तु सर्वत्र सहस्रादयुतावधि ।
प्रकल्पनीया मन्त्रज्ञैः कार्य्यगौरवलाघवात् ॥ ३३ ॥
कार्त्तवीर्य्यस्य मन्त्राणामुच्यन्ते सिद्धिदाभिधाः ।
कार्त्तवीर्य्यार्जुनं ङेन्तमन्ते च नमसान्वितम् ॥ ३४ ॥
स्वबीजाद्या दशार्णोऽसावन्यं नवशिवाक्षराः ।
आद्यबीजद्वयेनासौ द्वितीयो मन्त्र ईरितः ॥ ३५ ॥
स्वकामाभ्यां तृतीयोऽसौ स्वभ्रूभ्यां तु चतुर्थकः ।
स्वपाशाभ्यां पञ्चमोऽसौ षष्ठः स्वेन च मायया ॥ ३६ ॥

---

अरिष्टानि केनिखफलानि पद्यैर्वश्यते वशीक्रियते हुतैरिति सर्वत्रान्वयः ॥ २७—२९ ॥

पुराणां गुग्गुलूनां निर्मोकः सर्पकञ्चुकः हेम धत्तूरः ॥ ३०—३२ ॥

कार्य्यगौरवलाघवात् अधिककार्य्ये होमबाहुल्यं अल्पेऽल्पम् ॥ ३३ ॥

मन्त्रभेदानाह कार्त्तेति । दशस्वपि मन्त्रेषु ङेन्तं चतुर्थ्यन्तं नमोऽन्तं कार्त्तवीर्य्यार्जुनं योजयेत् ॥ ३४ ॥

आद्यो दशवर्णो अन्ये नवैकादशवर्णाः तानाह स्वेति । फ्रों कार्त्तवीर्य्यार्जुनाय नमः इति प्रथमः । द्वितीयमाह आद्येति । फ्रों ब्रीं कार्त्तवीर्य्यार्जुनाय नम इति द्वितीयः ॥ ३५ ॥

फ्रों क्लीं कार्त्तवीर्य्यार्जुनाय नम इति तृतीयः । फ्रों भ्रूं कार्त्तवीर्य्यार्जुनाय नम इति चतुर्थः । फ्रों आं कार्त्तवीर्य्यार्जुनाय नम इति पञ्चमः । फ्रों ह्रीं कार्त्तवीर्य्यार्जुनाय नम इति षष्ठः ॥ ३६ ॥

स्वाङ्कुशाभ्यां सप्तमः स्यात् स्वरमाभ्यामथाष्टमः।
स्ववाग्भवाभ्यां नवमो वर्मास्त्राभ्यां तथान्तिमः॥ ३७॥
द्वितीयादिनवान्ते तु वीजयोः स्याद् व्यतिक्रमः।
मन्त्रे तु दशमे वर्णा नववर्मास्त्रमध्यगाः॥ ३८॥
एतेषु मन्त्रवर्य्येषु स्वानुकूलं मनुं भजेत्।
एषामाद्ये विराट्छन्दोऽन्येषु त्रिष्टुबुदाहृतम्॥ ३९॥
दशमन्त्रा इमे प्रोक्ताः पदाः स्युः प्रणवादिकाः।
तदादिमः शिवार्णः स्यात् अन्ये तु द्वादशाक्षराः॥ ४०॥
एवं विंशतिमन्त्राणां यजनं पूर्ववन्मतम्।
त्रिष्टुप्छन्दस्तदाद्ये स्यादन्येषु जगती मता॥ ४१॥
दीर्घाब्धमूलवीजेन कुर्य्यादेषां षड़ङ्गकम्।
तारो हृत् कार्त्तवीर्य्यार्जुनाय वर्मास्त्र ठद्वयम्।
चतुर्दशार्णो मन्त्रोऽयमस्येज्या पूर्ववन्मता॥ ४२॥
भूनेत्रसप्तनेत्राक्षिवर्णैरस्याङ्गपञ्चकम्।
तारो हृत् भगवान् ङेन्तः कार्त्तवीर्य्यार्जुनस्तथा॥ ४३॥
वर्मास्त्राग्निप्रिया मन्त्रः प्रोक्तोऽष्टादशवर्णवान्।
त्रिवेदसप्तयुग्माक्षिवर्णैः पञ्चाङ्गकं मनोः॥ ४४॥

---

फ्रों क्रों कार्त्तवीर्य्यार्जुनाय नम इति सप्तमः। फ्रों श्रीं कार्त्तवीर्य्यार्जुनाय नम इत्यष्टमः। फ्रों ऐं कार्त्तवीर्य्यार्जुनाय नम इति नवमः। हुं फट् कार्त्तवीर्य्यार्जुनाय नम इति दशमः॥ ३७॥

इमे दशमन्त्रा यदा प्रणवाद्यास्तदाऽद्य एकादशार्णः अन्येतु द्वादशार्णाः॥ ३८—४१॥

पूर्ववत् मन्त्रराजवत् यजनं मतम्। तेषां षड़ङ्गमाह दीर्घेति। फ्रां हृत् फ्रीं शिर इत्यादि। चतुर्दशार्णमाह तार इति। ओं नमः कार्त्तवीर्य्यार्जुनाय हुं फट् स्वाहेति। इज्या पूजा॥ ४२॥

पञ्चाङ्गमाह भूनेत्रेति। अष्टादशार्णमाह तार इति। हृत् नमः कार्त्त-

नमो भगवते श्रीति कार्त्तवीर्य्यार्जुनाय च।
सर्वदुष्टान्तकायेति तपोबलपराक्रमः॥ ४५॥
परिपालितसप्तान्ते द्वीपाय सर्वरापदम्।
जन्यचूड़ामणान्ते ये महाशक्तिमते ततः॥ ४६॥
सहस्रबाहवे प्रान्ते वर्मास्त्रान्तो महामनुः।
त्रिषष्टिवर्णवान् प्रोक्तः स्मरणात् सर्वविघ्नहृत्॥ ४७॥
राजन्यचक्रवर्त्ती च वीरः शूरस्तृतीयकः।
माहिष्मतीपतिः पश्चात् चतुर्थः समुदीरितः॥ ४८॥
रेवाम्बुपरिदृप्तस्य कारागेहप्रबाधितः।
दशास्येति षड्भिः स्यात् पदैर्ङेन्तैः षड़ङ्गकम्॥ ४९॥
सिञ्चमानं युवतीभिः क्रीड़न्तं नर्मदाजले।
हस्तैर्जलौघं रुन्धन्तं ध्यायेन्मत्तं नृपोत्तमम्॥ ५०॥
एवं ध्यात्वायुतं मन्त्रं जपेदन्यत्तु पूर्ववत्।
पूर्ववत् सर्वमेतस्य समाराधनमीरितम्॥ ५१॥
कार्त्तवीर्य्यार्जुनो वर्णान्नाम राजापदं ततः।
उक्त्वा बाहुसहस्रान्ते वान् पदं तस्य मन्ततः॥ ५२॥

---

वीर्य्यार्जुनस्तथेति ङेन्तः ओं नमो भगवते कार्त्तवीर्य्यार्जुनाय हुं फट् स्वाहा इति॥ ४३॥ ४४॥

मन्त्रान्तरमाह नम इति। यथा नमो भगवते श्रीकार्त्तवीर्य्यार्जुनाय सर्वदुष्टान्तकाय तपोबलपराक्रमपरिपालितसप्तद्वीपाय सर्वराजन्यचूड़ामणये महाशक्तिमते सहस्रबाहवे हुं फट् इति॥ ४५—४७॥

अस्य षड़ङ्गमाह राजन्येति। ङेन्तैश्चतुर्थ्यन्तैः पदैः षड़ङ्गं स्यात् यथा राजन्यचक्रवर्त्तिने हृत् वीराय शिरः शूराय शिखा माहिष्मतीपतये वर्म॥ ४८॥

रेवाम्बुपरिदृप्ताय नेत्रं कारागेहप्रबाधितदशास्यायास्त्रम्॥ ४९॥ ५०॥

स्मरन् अयुतं जपेत् अन्यत् प्रयोगादिकं पूर्ववच्चतुर्दशाष्टादशार्णवत्॥ ५१॥

स्मरणादेव वर्णान्ते हृतं नष्टञ्च संपठेत्।
लभ्यते मन्त्रतर्पोऽयं द्वात्रिंशद्वर्णसंज्ञकम् ॥ ५३ ॥
पादैः सर्वेण पञ्चाङ्गं ध्यानयोगादि पूर्ववत्।
कार्त्तवीर्य्याय शब्दान्ते विद्महे पदमीरयेत् ॥ ५४ ॥
महावीर्य्याय वर्णान्ते धीमहीति पदं वदेत्।
तन्नोऽर्जुनः प्रवर्णान्ते चोदयात् पदमीरयेत् ॥ ५५ ॥
गायत्रेषार्जुनस्योक्ता प्रयोगादौ जपेत्तु ताम्।
अनुष्टुभं मनुं रात्रौ जपतां चौरसञ्चया ॥ ५६ ॥
पलायन्ते गृहात् दूरं तर्पणाद्वचनादपि।
अथो दीपविधिं वक्ष्ये कार्त्तवीर्य्यप्रियङ्करम् ॥ ५७ ॥
वैशाखे श्रावणे मार्गे कार्त्तिकाश्विनपौषतः।
माघफाल्गुनयोर्मासे दीपारम्भः प्रशस्यते ॥ ५८ ॥
तिथौ रिक्ताविहीनायां वारे शनिकुजौ विना।
हस्तोत्तराश्विरौद्रेषु पुष्यवैष्णववायुभे ॥ ५९ ॥
द्विदैवते च रोहिण्यां दीपारम्भः प्रशस्यते।
चरमे च व्यतीपाते धृतौ वृद्धौ सुकर्मणि ॥ ६० ॥
प्रीतौ हर्षे च सौभाग्ये शोभनायुष्मतोरपि।
करणे विष्टिरहिते ग्रहणेऽर्द्धोदयादिषु ॥ ६१ ॥

---

अनुष्टुभं मन्त्रान्तरमाह कार्त्तेति। कार्त्तवीर्य्यार्जुनो नाम राजा बाहुसहस्रवान्। तस्य संस्मरणादेव हृतं नष्टञ्च लभ्यते ॥ इति ॥ ५२ ॥५३ ॥

गायत्रीमाह। कार्त्तवीर्य्याय विद्महे महावीर्य्याय धीमहि तन्नोऽर्जुनः प्रचोदयादिति ॥ ५४—५६ ॥

दीपविधानमाह अथो इति ॥ ५७ ॥

आरम्भे मासानाह वैशाख इति ॥ ५८ ॥

रिक्ताश्चतुर्थीनवमीचतुर्दश्यस्तद्रहिततिथौ। नक्षत्राण्याह हस्तेति। रौद्रमार्द्रा वैष्णवं श्रवणंवायुभं स्वातिः ॥ ५९ ॥

एषु यागेषु पूर्वाह्णे दीपारम्भः कृतः शुभः।
कार्त्तिके शुक्लसप्तम्यां निशीथेऽतीवशोभनः॥ ६२॥
यदि तत्र रवेर्वारः श्रवणश्चन्तु दुर्लभम्।
अत्यावश्यककार्य्येषु मासादीनां न शोधनम्॥ ६३॥
आद्ये ह्युपोष्य नियतो ब्रह्मचारी शयीत कौ।
प्रातः स्नात्वा शुद्धभूमौ लिप्तायां गोमयोदकैः॥ ६४॥
प्राणानायम्य सङ्कल्पं न्यासान् पूर्वोदितांश्चरेत्।
षट्कोणं रचयेद्भूमौ रक्तचन्दनतन्दुलैः॥ ६५॥
अन्तः स्मरं समालिख्य षट्कोणेषु समालिखेत्।
मन्त्रराजस्य षड्वर्णान् कामबीजविवर्जितान्॥ ६६॥
सृणिं पद्मां वर्म चास्त्रं पूर्वाद्याशासु संलिखेत्।
नवार्णैर्वेष्टयेत्तच्च त्रिकोणं तद्बहिः पुनः॥ ६७॥
एवं विलिखिते यन्त्रे निदध्याद्दीपभाजनम्।
स्वर्णजं रजतोत्थं वा ताम्रजं तदभावतः॥ ६८॥
कांस्यपात्रं मृण्मयञ्च कनिष्ठं लोहजं स्मृतौ।
शान्तये मुद्गचूर्णोत्थं सन्धौ गोधूमचूर्णजम्॥ ६९॥
वुध्ने षूर्द्ध्वं समानन्तु पात्रं कुर्य्यात् प्रयत्नतः।
अर्कदिग्वसुषट्कञ्च चतुरासाङ्गुलैर्मितम्॥ ७०॥

---

द्विदैवतं विशाखायोगानाह चरमेति। चरमे वैधृतौ रात्रावखिलायां पूर्वाह्णे च॥ ६०—६३॥

विधिमाह आद्य इति। कौ भूमौ॥ ६४॥ ६५॥

स्मरं क्लीं॥ ६६॥

षड्वर्णान् श्रीं ह्रीं ग्लौं भूं श्रां श्रीमिति षट्कोणेषु स्वाग्रमारभ्य लिखेत् क्रों श्रीं हुं फडिति दिक्षु शेषैर्नवार्णैर्वेष्टयेत्॥ ६७—६९॥

पात्रमानमाह वुध्न इति। वुध्नमूले ऊर्द्ध्वञ्च पात्रं कुर्य्यात् कियत्तदाह

आज्ये पलसहस्रन्तु पात्रं शतपलैः कृतम्।
आज्ये युतपले पात्रं फलपञ्चशतीकृतम् ॥ ७१ ॥
पञ्चसप्ततिसंख्ये तु पात्रं षष्टिफलं मतम्।
त्रिसहस्रे घृतपले शरार्कपलभाजनम् ॥ ७२ ॥
द्विसहस्रे शरशिवं शतार्द्धं त्रिंशता मतम्।
शतेऽक्षिशरसंख्यातमेवमन्यत्र कल्पयेत् ॥ ७३ ॥
नित्यदीपे वह्निपलं पात्रमाज्यं पलं स्मृतम्।
एवं पात्रं प्रतिष्ठाप्य वर्त्तीः सूत्रोत्थिताः क्षिपेत् ॥ ७४ ॥
एका तिस्रोऽथवा पञ्च सप्ताद्या विषमा अपि।
तिथिमानाद्याः सहस्रन्तु संख्याविनिर्मिताः ॥ ७५ ॥
गोघृतं प्रक्षिपेत्तत्र शुद्धवस्त्रविशोधितम्।
सहस्रपलसंख्यादि दशान्तं कार्य्यगौरवात् ॥ ७६ ॥
सुवर्णादिकृतां रम्यां शलाकां षोड़शाङ्गुलाम्।
तदर्द्धां वा तदर्द्धां वा सूक्ष्माग्रां स्थूलमूलकाम् ॥ ७७ ॥
त्रिसुच्चेद्दक्षिणे भागे पात्रमध्ये कृताग्रकाम्।
पाचात् दक्षिणदिग्देशे सुक्राङ्गुलचतुष्टयम् ॥ ७८ ॥
अधोग्रां दक्षिणां धारां निखनेत् क्षुरिकां शुभाम्।

---

अर्केति। मूले तदर्द्धं च षोडशादिमानैरङ्गुलैः कार्य्यं शरार्कपलभाजनं पञ्चविंशत्यु-त्तरशतपलमितपात्रम् ॥ ७०—७२ ॥

दीति। सहस्रत्रयमिते घृते शरशिवं पञ्चदशोत्तरशतपलं तावत्पात्रं अक्षि-शरसंख्यातं त्रिपञ्चाशत्पलमितं अन्यत्रैवमेव घृतानुसारेण पात्रं कल्प्यम् ॥ ७३ ॥

वह्निपलं त्रिपलम् ॥ ७४ ॥

विषमवर्त्तिका एकाद्या एकोत्तरशतान्ता ज्ञेया। तिथीति। पञ्चदशादि-सहस्रपर्य्यन्तं या तत्संख्या तया विनिर्मिताः कृताः ॥ ७५ ॥ ७६ ॥

तदर्द्धमष्टाङ्गुलं तदर्द्धं चतुरङ्गुलम् ॥ ७७ ॥

दीपं प्रज्वालयेत्तत्र गणेशस्मृतिपूर्वकम् ॥ ७९ ॥
दीपात् पूर्वन्तु दिग्भागे सर्वतो भद्रमण्डले ।
तन्दुलाष्टदले वापि विधिवत् स्थापयेद्घटम् ॥ ८० ॥
तत्रावाह्य नृपाधीशं पूर्ववत् पूजयेत् सुधीः ।
जलाक्षतात् समादाय दीपं सङ्कल्पयेत्ततः ॥ ८१ ॥
दीपसङ्कल्पमन्त्रोऽथ कथ्यते द्वीषुभूमितः ।
प्रणवः पाशमाये च शिखाकार्त्तावराणि च ॥ ८२ ॥
वीर्य्यार्जुनाय पदान्ते माहिष्मतीपदं ततः ।
नाथाय पदमुच्चार्य्य सहस्रपदमीरयेत् ।
बाहवे इति वर्णान्ते सहस्रपदमुच्चरेत् ॥ ८३ ॥
क्रतुदीक्षितहस्ताय दत्तात्रेयप्रियाय च ।
आत्रेय्याय चानसूयागर्भरत्नाय तत्परम् ॥ ८४ ॥
नभोऽग्नी वामकर्णेन्दुस्थितौ पाश इमं ततः ।
दीपं गृहाण अमुकं रक्ष रक्ष पदं पुनः ॥ ८५ ॥
दुष्टान्नाशय युग्मं स्यात् तथा पातय घातय ।
शत्रून् जहिद्वयं माया तारः स्वबीजमात्मभूः ॥ ८६ ॥
वह्निजाया अनेनाथ दीपवर्य्येण पश्चिमा ।
अभिमुखेनामुकं रक्ष अमुकान्ते वरप्रदा ॥ ८७ ॥

---

पावाद्दक्षिणे चतुरङ्गुलभूमिं त्यक्त्वा क्षुरिकां भूमौ निक्षिपेत् अधोऽग्रं यस्यास्तां दक्षिणस्यां धारामस्यास्ताम् ॥ ७८—८१ ॥

द्वीषुभूमितिदिपञ्चाशदुत्तरशताक्षरो दीपसङ्कल्पे मन्त्रः । तमाह प्रणव इति । पाशम् आं माया ह्रीं शिखा वषट् ॥ ८२—८४ ॥

वामकर्णेन्दुस्थितौ नभोऽग्नी ऊविन्दुयुतौ हरौ तेन ह्रूं पाश आं अमुकमिति पदस्थाने साध्यनामोच्चार्य्यम् ॥ ८५ ॥

माया ह्रीं तार ओं स्वं बीजं फ्रौं आत्मभूः क्लीं ॥ ८६ ॥ ८७ ॥

मायाकाशद्वयं वामनेत्रचन्द्रयुतं शिवा।
वेदादिकामचामुण्डा स्वाहा तुपू सबिन्दुकौ ॥ ८८ ॥
प्रणवोऽग्निप्रिया मन्त्रो नेत्रबाणधराक्षरः।
दत्तात्रेयो मुनिर्मालामन्त्रस्य परिकीर्त्तितः ॥ ८९ ॥
छन्दोमितं कार्त्तवीर्य्यार्जुनो देवः शुभावहः।
चामुण्डया षड़ङ्गानि चरेत् षट्दीर्घयुक्तया ॥ ९० ॥
ध्यात्वा देवं ततो मन्त्रं पठित्वान्ते क्षिपेज्जलम्।
ततो नवाक्षरं मन्त्रं सहस्रं तत्पुरो जपेत् ॥ ९१ ॥
तारोऽनन्तो बिन्दुयुक्तो माया स्वंवामनेत्रयुक्।
कूर्माग्नी शान्तिचन्द्राढ्यौ वह्निनार्य्यङ्कुशध्रुवः ॥ ९२ ॥
ऋषिः पूर्वस्मृतोऽनुष्टुप्छन्दश्चान्यत्तु पूर्ववत्।
सहस्रं मन्त्रराजञ्च जपित्वा कवचं पठेत् ॥ ९३ ॥

---

आकाशद्वयं हद्वयं वामनेत्रचन्द्रयुतम् ईबिन्दुयुतं ह्रीं ह्रीं शिवा क्रीं वेदादिकामचामुण्डाः ओं क्लीं ग्लौन्तुपूतवर्गपवर्गौ ॥ ८८ ॥

नेत्रबाणधराक्षरो द्विपञ्चाशदुत्तरशतार्णः यथा ओं आं क्रीं वषट् कार्त्तवीर्य्यार्जुनाय माहिष्मतीनाथाय सहस्रबाहवे सहस्रक्रतुदीक्षिताय दत्तात्रेयप्रियाय आत्रेय्याय अनसूयागर्भरत्नाय क्रूं आं इमं दीपं गृहाण अमुकं रक्ष रक्ष दुष्टान्नाशय नाशय पातय पातय घातय घातय शत्रून् जहि जहि क्रीं ओं फ्रीं क्लीं स्वाहा अनेन दीपवर्य्येण पश्चिमाभिमुखेन अमुकं रक्ष अमुकवरप्रदानाय ह्रीं ह्रीं क्रीं ओं क्लीं ग्लौं स्वाहा तं थं दं धं नं पं फं बं भं मं ओं स्वाहेति मन्त्रः। चामुण्डया ग्लौमीति बीजेन ग्लां ग्लीं ग्लूं ग्लैं ग्लौं ग्लः इति षड़ङ्गम् ॥ ९० ॥

ध्यात्वा पूर्वोक्तविधिना ॥ ९१ ॥

नवाक्षरमाह तार इति। तार ओं अनन्तो बिन्दुयुतः आं माया क्रीं स्वं वामनेत्रयुक् फ्रीं कूर्माग्नी वरौ शान्तिचन्द्राढ्यौ ईबिन्दुयुतौ तेन व्रीं वह्निनारी स्वाहा अङ्कुशं क्रों ध्रुव ओं ॥ ९२ ॥

पूर्वो दत्तात्रेयः अन्यत् षड़ङ्गादि कवचं तु डामरोक्तम् ॥ ९३ ॥

एवं दीपप्रदानस्य कर्त्ता प्रैत्यखिलेप्सितम् ।
दीपप्रबोधकाले तु वर्जयेदशुभाङ्गिरम् ॥ ९४ ॥
विप्रस्य दर्शनं तत्र शुभदं परिकीर्त्तितम् ।
शूद्राणां मध्यमं प्रोक्तं म्लेच्छस्य वधवन्धदम् ॥ ९५ ॥
आखोर्त्वोर्दनं दुष्टगवाश्वस्य सुखावहम् ।
दीपज्वाला समा सिद्धैर वक्री नाशविधायिनी ॥ ९६ ॥
सशब्दा भयदा कर्त्तुरुज्ज्वला सुखदा मता ।
कृष्णा शत्रुभयोत्पत्त्यै वमन्ती पशुनाशिनी ॥ ९७ ॥
कृते दीपे यदा पात्रं भग्नं दृश्येत दैवतः ।
पञ्चाद्दर्वाक् तदा गच्छेत् यजमानो यमालयम् ॥ ९८ ॥
वर्त्त्यन्तरं यदा कुर्य्यात् कार्य्यं सिद्धेद्विलम्बतः ।
नेत्रहीनो भवेत् कर्त्ता तस्मिन् दीपान्तरे कृते ॥ ९९ ॥
अशुचिस्पर्शने व्याधिर्दीपनाशे तु चौरभीः ।
श्वमार्जाराखुसंस्पर्शे भवेद्भूपतितो भयम् ॥ १०० ॥
यात्रारम्भे वसुपलैः कृतो दीपोऽखिलेष्टदः ।
तस्माद्दीपः प्रयत्नेन रक्षणीयोऽन्तरायतः ॥ १०१ ॥
आसमाप्तेः प्रकुर्वीत ब्रह्मचर्य्यञ्च भूशयम् ।
स्त्रीशूद्रपतितादीनां सम्भाषामपि वर्जयेत् ॥ १०२ ॥
जपेत् सहस्रं प्रत्येकं मन्त्रराजं नवाक्षरम् ।
स्तोत्रपाठं प्रतिदिनं निशीथिन्यां विशेषतः ॥ १०३ ॥
एकपादेन दीपाग्रे स्थित्वा यो मन्त्रनायकम् ।

---

दीपप्रारम्भे शकुनमाह दीपेति ॥ ९४ ॥ ९५ ॥
आखोर्त्वोर्मूषकमार्जारयोः ॥ ९६—१०० ॥
वसुपलैरष्टपलैः अन्तरायतो विघ्नेभ्यः ॥ १०१ ॥
भूशयं भूमिशयनम् ॥ १०२ ॥

सहस्रं प्रजपेद्रात्रौ सोऽभीष्टं क्षिप्रमाप्नुयात् ॥ १०४ ॥
समाप्य शोभने घस्रे सम्पूज्य द्विजनायकान्।
कुम्भोदकेन कर्त्तारमभिषिञ्चेन्मनुं स्मरन् ॥ १०५ ॥
कर्त्ता तु दक्षिणां दद्यात् पुष्कलान्तोषहेतवे।
गुरौ तुष्टे ददातीष्टं कार्त्तवीर्य्यसुतो नृपः ॥ १०६ ॥
गुर्वाज्ञया स्वयं कुर्य्यात् यदि वा कारयेत् गुरुम्।
हत्वा रत्नादिदानेन दीपदानं धरापतेः ॥ १०७ ॥
गुर्वाज्ञामन्तरा कुर्य्यात् यो दीपं स्वेष्टसिद्धये।
प्रत्युतानुभवत्येषां हानिरेव पदे पदे ॥ १०८ ॥
दीपदानविधिं ब्रूयात् क्षतघ्नादिषु नो गुरुः।
दुष्टेभ्यः कथितो मन्त्रो वक्तुर्दुःखावहो भवेत् ॥ १०९ ॥
उत्तमं गोघृतं प्रोक्तं मध्यमं महिषीभवम्।
तिलतैले तु तादृक् स्यात् कनीयोऽजादिजं घृतम् ॥११०॥
आस्यरोगे सुगन्धेन दद्यात्तैलेन दीपकम्।
सिद्धार्थसम्भवेनाथ द्विषतां नाशहेतवे ॥ १११ ॥
सहस्रेण पलैर्दीपैर्विहिते चेन्न दृश्यते।
कार्य्यसिद्धिस्तदा कुर्य्यात् त्रिवारं दीपजं विधिः ॥ ११२ ॥
तदा स दुर्लभं कार्य्यं सिद्ध्यते च न संशयः।
यथा कथञ्चिद् यः कुर्य्याद्दीपदानं स्ववेश्मनि ॥ ११३ ॥
विघ्नाः सर्वेऽरिभिः साकं तस्य नश्यन्ति दूरतः।
सर्वदा जयमाप्नोति पुत्त्रान् पौत्त्रान् धनं यशः ॥ ११४ ॥

---

निशीथिन्यां रात्रौ ॥ १०२—१०६ ॥

रत्नादिदानेन गुरुं हत्वा धरापतेः कार्त्तवीर्य्यस्य दीपदानं कारयेत् इत्यन्वयः ॥ १०७—१०९ ॥

अजादिघृतं कनीयोऽधमम् ॥ ११०—११४ ॥

यथा कथञ्चित् यो दीपं नित्यं गेहे समाचरेत् ।
कार्त्तवीर्य्यार्जुनप्रीत्यै सोऽभीष्टं लभते नरः ॥ ११५ ॥
दीपप्रियः कार्त्तवीर्य्यो मार्त्तण्डो नतिवल्लभः ।
स्तुतिप्रियो महाविष्णुर्गणेशस्तर्पणप्रियः ॥ ११६ ॥
दुर्गार्चनप्रिया नूनमभिषेकप्रियः शिवः ।
तस्मात्तेषां प्रतोषाय विदध्याच्च तादृशम् ॥ ११७ ॥

इति मन्त्रमहोदधौ कार्त्तवीर्य्यमन्त्रकथनं नाम
सप्तदशस्तरङ्गः ।

---

## अष्टादशस्तरङ्गः ।

कालरात्रिमथो वक्ष्ये सपत्नगणसूदनी ।
तारवाक्शक्तिकन्दर्परमाः काङ्क्षेश्वरीति च ॥ १ ॥
सर्वंजनमनोवर्णा हरिसर्वसुखान्ततः ।
स्तम्भन्यन्ते सर्वराजवशङ्करिपदं ततः ॥ २ ॥

---

यथा कथञ्चिदिति नित्यदीपे पूर्वोक्तस्य पात्रे घृतनियमस्यानावश्यकतां दर्शयति विपलमिते पात्रे एकपलघृतेन नित्यं दीपो देयो यथाकथञ्चिद्वा सर्वथा दातव्यः ॥ ११५ ॥

दीपदानप्रियोऽर्जुनस्तत्प्रसङ्गादन्यदेवानां यत् प्रियं तदाह मार्त्तण्डः सूर्यो नमस्कारप्रियः दुर्गा सुन्दरी ॥ ११६ ॥ ११७ ॥

इति श्रीनीलकण्ठव्याख्यायां मन्त्रमहोदधिटीकायां कार्त्तवीर्य्यार्जुनमन्त्रनिरूपणं नाम सप्तदशस्तरङ्गः ॥

---

कालरात्रिमन्त्रमाह तारेति । तार ॐ वाक् ऐं शक्तिः ह्रीं कन्दर्पः क्लीं रमा श्रीं भवेश्वरेदं यथा ॐ ऐं ह्रीं क्लीं श्रीं काङ्क्षेश्वरि सर्वजनमनोहरि सर्व-

सर्वदुष्टनिर्दलनि सर्वस्त्रीपुरुषाकर्षिणीति ततो वन्दीशृङ्खलास्फोटयद्वयम् ॥ ३ ॥
सर्वशत्रून् भञ्जय द्विर्द्विष्टान्निर्दलय द्वयम्।
सर्वं स्तम्भय युग्मं स्यान्मोहनास्त्रेण तत्परम् ॥ ४ ॥
द्वेषिणः पदमुच्चार्य तत उच्चाटय द्वयम्।
सर्वं वशंकुरु द्वन्द्वं स्वाहा देहि युगं पुनः ॥ ५ ॥
सर्वञ्च कालरात्रीति कामिनीति गणेश्वरि।
नमोऽन्तेयं महाविद्या गुणरामधराचरा ॥ ६ ॥
ऋषिर्दक्षोऽतिजगती छन्दोऽलर्कनिवासिनी।
देवता कालरात्रिः स्यात् कालिकाबीजमीरितम् ॥ ७ ॥
माया रात्रीति शक्तिः स्यान्नियोगः स्वेष्टसिद्धये।
पञ्चाङ्गुलिषु ताराद्यं विन्यसेद्बीजपञ्चकम् ॥ ८ ॥
हृदयं वेदनेत्रार्णैः शिरो बाणाक्षिवर्णकैः।
प्रोक्ता शिखैकविंशत्यावर्माष्टादशभिः स्मृतम् ॥ ९ ॥
षड्विंशत्या नेत्रमस्त्रं नन्दचन्द्राक्षरैर्मतम्।
विधायैव षडङ्गानि ध्यायेद्विश्वविमोहिनीम् ॥ १० ॥

उद्यन्मार्त्तण्डकान्तिं विगलितकवरीं कृष्णवस्त्रावृताङ्गीं
दण्डं लिङ्गं कराब्जैर्वरमथ भुवनं सन्दधानां त्रिनेत्राम्।

---

मुखस्तम्भिनि सर्वराजवशङ्करि सर्वदुष्टनिर्दलनि सर्वस्त्रीपुरुषाकर्षिणि वन्दीशृङ्खला-स्फोटय स्फोटय सर्वशत्रून् भञ्जय भञ्जय द्विष्टान् निर्दलय निर्दलय सर्वं स्तम्भय स्तम्भय मोहनास्त्रेण द्वेषिण उच्चाटय उच्चाटय सर्वं वशङ्कुरु कुरु स्वाहा देहि देहि सर्वकालरात्रिकामिनि गणेश्वरि नम इति गुणरामधराचराः त्रयस्त्रिंश-दुत्तरशतवर्णाः ॥ १—६ ॥

कालिकाबीजं क्रीं ॥ ७ ॥ ८ ॥

वेदनेत्रार्णैश्चतुर्विंशतिवर्णैः बाणाक्षिवर्णकैः पञ्चविंशतिवर्णैः ॥ ९ ॥

नन्दचन्द्राक्षरैरेकोनविंशत्यर्णैः ॥ १० ॥

नानाकल्पौघभासां स्मितसुखकमलां सेवितां देवसङ्घैः
माया रात्री मनोभूशरविकलतनूमाश्रये कालरात्रिम्॥११॥

अयुतं प्रजपेन्मन्त्रं दशांशं जुहुयात्तिलैः।
पयोवृक्षैर्वा विप्रेन्द्रान् सन्तर्प्य श्रेयमाप्नुयात्॥ १२॥
ता यजेत् कालिकापीठे पूजार्थं यन्त्रमुच्यते।
विन्दुत्रिकोणषट्कोणवृत्ताष्टदलवृत्तकम्॥ १३॥
कलापत्रं पुनर्वृत्तं त्रिरेखं धरणीगृहम्।
चतुर्द्वारयुतं कृत्वा विन्दौ देवीमथार्चयेत्॥ १४॥
तत्यन्त्रं विलिखेद्भूर्जे क्षीरद्रोः फलकेऽपि वा।
शान्तये त्वष्टगन्धेन लेखिन्या चम्पकोत्थया॥ १५॥
कर्पूरागुरुकर्पूररोचनारक्तचन्दनम्।
कुङ्कुमं चन्दनं वापि कस्तूरीत्यष्टगन्धकम्॥ १६॥
सिन्दूरहिङ्गुलाभ्यां च वश्याय विलिखेत् सुधीः।
सारसोद्भवलेखिन्या स्तम्भने कोकिलच्छदैः॥ १७॥
हरितालहरिद्राभ्यां मारणे वायसच्छदैः।
धत्तूरभानुनिर्गुण्डीखराश्वमहिषासृजा॥ १८॥
एवं विलिखिते यन्त्रे कुर्यादावरणार्चनम्।
त्रिकोणे देवताश्तिस्रो वामावर्त्तेन पूजयेत्॥ १९॥

---

ध्यानमाह उद्यदिति। दक्षकरे दक्षयोः खड्गभुवने वामयोः शूलं श्यामां नानाकल्पैर्विभासां विविधाभरणसमूहशोभितां मनोभूशरविकलतनूं कामबाणव्याकुलशरीराम्॥ ११॥ १२॥

कालिकापीठे नवादिशक्तियुते। पूजायन्त्रमाह बिन्द्विति॥ १३॥

कलापत्रं षोडशदलं तिस्रो रेखा यस्य त्रिरेखं धरणीगृहं चतुःकोणम्॥१४॥

कामनाभेदात् लेखनभेदमाह शान्तिति। क्षीरद्रोः क्षीरवृक्षस्याश्वत्थोडुम्बरप्लक्षवटान्यतमस्य॥ १५॥ १६॥

स्तम्भने कोकिलपक्षैः॥ १७॥

सम्मोहिनीं मोहिनीञ्च तृतीयाञ्च विमोहिनीम् ।
षट्सु कोणेषु वक्त्रादि षड़ङ्गानि ततो यजेत् ॥ २० ॥
वृत्तेस्वराः समभ्यर्च्या मातरोऽष्टौ वसुच्छदे ।
कादिक्षान्ताः हलो वृत्ते उर्वश्याद्याः कलादले ॥ २१ ॥
उर्वशी मेनका रम्भा घृताची मञ्जुघोषया ।
सहजन्या सुकेशी स्यादष्टमी तु तिलोत्तमा ॥ २२ ॥
गन्धर्वी सिद्धकन्या च किन्नरी नागकन्यका ।
विद्याधरी किम्पुरुषा यक्षिणीति पिशाचिका ॥ २३ ॥
पुनर्वृत्ते यजेन्मन्त्री देवता दशकं यथा ।
मन्त्रादिमां पञ्चबीजां स्वस्वदेवतया युताम् ॥ २४ ॥
पञ्चबाणान् स्वबीजाद्यानित्युक्ता दशदेवताः ।
भूगृहान्तः समभ्यर्च्या अणिमाद्यष्टसिद्धयः ॥ २५ ॥
भूगृहस्य त्रिरेखासु सम्पूज्याश्चैव देवताः ।
इच्छाशक्तिः क्रियाशक्तिर्ज्ञानशक्तिरिति त्रयम् ॥ २६ ॥
आद्यरेखागतं पूज्यं द्वितीयायां शिवाजका ।
तृतीयायान्तु रेखायां सत्त्वमुख्यं गुणत्रयम् ॥ २७ ॥
पूर्वादिषु चतुर्द्वार्षु गणेशं क्षेत्रपालकम् ।

---

हरितालहरिद्राभ्यामित्यन्वयः मारणे वायसच्छदैः शत्वा धत्तूररसादिभि-र्लिखेत् इत्यस्यान्वयो भानुरक्तंरसः खरादीनामसृजा रक्तेन ॥ १८—२० ॥

स्वरा अं नम इत्यादि हलो व्यञ्जनानि कं नम इत्यादि कलादले षोड़श-पत्रे ॥ २ ॥

मञ्जुघोषया सह घृताची ॥ २२ ॥ २३ ॥

मन्त्रादिमामिति मन्त्रादौ वर्त्तमानं बीजं पञ्चकं स्वदेवतायुतं यजेत् यथा ओँ परमात्मने नमः ऐं सरस्वत्यै नमः क्लीं गौर्य्यै इति ॥ २४ ॥

पञ्चेति। स्वबीजाद्यान् बाणान् द्रां द्रावणबाणाय नमः इत्यादि पूर्वोक्तान् अणिमादय उक्ताः ॥ २५ ॥ २६ ॥

वटुकं योगिनीश्चापि जयमिन्द्रादिकानपि ॥ २८ ॥
एवं वाह्यार्चनं कृत्वा देवीपार्श्वगताः पुनः ।
देव्यो द्वादश सम्पूज्याः प्रतिदिक् त्रितयं त्रयम् ॥ २९ ॥
मायाद्या कालरात्रिश्च तृतीया वटवासिनी ।
गणेश्वरी च काङ्काख्या व्यापिकालर्कवासिनी ॥ ३० ॥
माया राज्ञी च मदनप्रिया स्याद्दशमी रतिः ।
लक्ष्मीः काङ्केश्वरी चेति देव्यो द्वादश कीर्त्तिताः ॥ ३१ ॥
नैवेद्यान्तार्चनं कृत्वा दद्यान्मद्यादिना वलिम् ।
एवं सम्पूजिता स्वेष्टं कालरात्रिः प्रयच्छति ॥ ३२ ॥
शनिवारे तु सन्ध्यायां गच्छेद्रम्यं सरोवरम् ।
हरिद्राक्षतपुष्पैस्तन्मन्त्रेणानेन पूजयेत् ॥ ३३ ॥
तारो नमो जलौकायै द्वितयं सर्वतः परम् ।
जनं वश्यं कुरुद्वन्द्वं हुमतो मनुरीरितः ॥ ३४ ॥
गृहमागत्य गोचायां शय्याद्देवीं स्मरन्निशि ।
प्रातस्तत्रैव गत्वाथ जलौकाद्वितयं ततः ॥ ३५ ॥
गृहीत्वा तत् प्रशोष्याथ छायायां चूर्णयेत् पुनः ।
जलौकाचूर्णयुक्तेन कृष्णकार्पाससूत्रतः ॥ ३६ ॥
वर्त्तिं विधाय सुश्वेत भाजने निर्मिते मृदा ।
कुलालचक्रोत्थितया तत्र तैलं पुनः क्षिपेत् ॥ ३७ ॥
तैलं यन्त्रात् समानीतं भ्रमतो निर्मलं शुचिः ।
वारस्त्रीसदनाद्वह्निमानीय ज्वालयेत्तु तम् ॥ ३८ ॥

---

शिवाजका रुद्रविष्णुब्रह्माणः सत्त्वरजस्तमांसि ॥ २७—३२ ॥

वशीकरणमाह शनिवार इत्यादि। हरिद्राक्षतपुष्पैः स्पर्शयितुर्भवेदित्य-र्थेन ॥ ३३ ॥ ३४ ॥

गोचायां भूमौ ॥ ३५—३८ ॥

द्वारभिः कोकिलाक्षस्य प्रकुर्य्यात्तत्र दीपकम्।
वह्निपूरद्वयं चौणीपूरयन्त्रे निधापनम्॥ ३९॥
निशारसेन रचिते मध्ये लाजसमन्विते।
कालरात्रिं ततो दीपे समावाह्य प्रपूजयेत्॥ ४०॥
युक्तामावरणैः पश्चान्नवीनं खर्परं न्यसेत्।
दीपोत्थपात्रपतितमादद्यात् कज्जलं सुधीः॥ ५१॥
पश्चिमाभिमुखो मन्त्री कज्जलं तन्तु मन्त्रयेत्।
वक्ष्यमाणेन मनुना शतत्रितयसम्मितम्॥ ४२॥
तारो वाङ्मदनो माया रमा भूमिर्वलो हसौः।
नमः काङ्क्षेश्वरिपदं सर्वान् मोहय मोहय॥ ४३॥
कृष्णेऽन्ते कृष्णवर्णे च कृष्णाम्बरसमन्विते।
सर्वानाकर्षय द्वन्द्वं शीघ्रं वशं कुरु द्वयम्॥ ४४॥
वर्म वाक् गिरिजा कामः श्रीवीजान्तो महामनुः।
वसुसायकवर्णोऽयमञ्जनस्याभिमन्त्रणे॥ ४५॥

---

कोकिलाक्षस्य कुचिलाह्वयस्य वह्निपुरस्त्रिकोणं तद्द्वयं षट्कोणं चौणीपुर-चतुरस्रम्॥ ३९—४२॥

भूमिः ग्लौं॥ ४३॥

वसुसायकवर्णोऽष्टपञ्चाशद्वर्णः। प्रयोगो यथा साधकः शनिवासरे सन्ध्याकाले तड़ागं गत्वा ओं नमो जलौकायै सर्वजनं वशं कुरु कुरु हुमिति मन्त्रेण हरिद्राक्षतपुष्पैर्जलं सम्पूज्य गृहं गत्वा देवीं स्मरन्निशि भूमौ शयीत प्रातस्तस्मात् सरसो जलौकाद्वयमादाय छायाशुष्कं कृत्वा संचूर्ण्य तच्चूर्णयुक्तेन कृष्णकार्पाससूत्रेण वर्त्तिं कृत्वा कुलालचक्रानीतमृन्निर्म्मिते पात्रे तां निधाय भल्लातकैलयन्त्रात्तिलतैलमादाय तत्र निक्षिपेत् वेश्यागृहादग्निमानीय कचिटा इति काव्यकुब्जभाषाप्रसिद्धतरोः काष्ठैस्तं प्रज्वाल्य तेन तत्पात्रे दीपं कृत्वा हरिद्रारसेन रचिते त्रिकोण-षट्कोण-चतुःकोणात्मके यन्त्रे मध्ये लाजान् प्रक्षिप्य तदुपरि दीपपात्रं स्थापयित्वा दीपे कालरात्रिमावाह्य सावरणामिष्ट्वा खर्परं दीपोपरि धृत्वाञ्जनं पातयेत् तदञ्जनमादाय पश्चिमाभिमुखः शतत्रयमनेन मन्त्रेण मन्त्रयेत्।

दीपादात्मनि संयोज्य देवतामञ्जनं पुनः ।
भौमवारे समभ्यर्च्य नवनीतेन मर्दयेत् ॥ ४६ ॥
मूलेनाष्टोत्तरशतं पुनर्होमं समाचरेत् ।
मधुककुसुमैः साष्टशतं वह्नौ सुसंस्कृते ॥ ४७ ॥
कुमारीं वटुकं नारीं भोजयेन्मधुरान्वितम् ।
तेनाञ्जनेन रचिततिलको मन्त्रिसत्तमः ॥ ४८ ॥
दर्शनादेव वशयेत् नरनारीनरेश्वरान् ।
दुग्धेनादौ प्रदद्यात्तन्नराणां वश्यकारकम् ॥ ४९ ॥
तेन स्पृष्टो नरो नूनं दासः स्पर्शयितुर्भवेत् ।
वशीकरणमाख्यातं स्तम्भनं प्रोच्यतेऽधुना ॥ ५० ॥
हरिद्रारञ्जिते वस्त्रे लिखेद् यन्त्रमिदं शुभम् ।
निशागोरोचनीकुष्ठाञ्जनैर्गोमूत्रमर्दितैः ॥ ५१ ॥
लिखेदष्टदलं पद्मं रिपुनामाढ्यकर्णिकम् ।
दलेषु विलिखेत्तारद्वयं भूबीजयुग्मकम् ॥ ५२ ॥
चटद्वयं ततो यन्त्रं पीतसूत्रेण वेष्टयेत् ।
कोकिलाख्यतरोः सप्तकण्टकैः परिकीलितम् ॥ ५३ ॥
भानुत्वचदलैः सम्यक् वेष्टितं निःक्षिपेत् पुनः ।
वल्मीकरन्ध्रे मेषस्य मूत्रेणोपरि पूजयेत् ॥ ५४ ॥

---

मन्त्रो यथा श्रीं ऐं क्लीं ह्रीं श्रीं ग्लौं ब्लूं ह्स्रौः नमः कामेश्वरि सर्वाङ्गोद्भव मोहय ज्ञापं ...चर्षि ज्वालाम्बरसमन्विते सर्वानाकर्षयाकर्षय शीघ्रं वशं कुरु कुरु हुं ऐं क्लीं ह्रीं श्रीं इति ॥ ४४—४५ ॥

ततो दीपाद्देवीमात्मनि संयोज्य तत्कज्जलं भौमवारे नवनीतमर्दितं पात्रे संस्थाप्य तदग्रे वह्निं संस्थाप्य संस्कृत्य मधूकपुष्पैरष्टोत्तरशतं मूलेन हुत्वा कुमारीवटुकस्त्रियो भोजयेत् तदञ्जनकृततिलको जगद्वशयेदित्यादिफलं स्पष्टम् ॥४६—५०॥

स्तम्भनमाह हरिद्रेति ॥ ५१ ॥

' गगनबीजौ हकौ चन्द्रो बिन्दुः तेन ह्रां ह्रीं ह्रूमिति ध्वनितः चः भवि

अश्मानं रन्ध्रवदने निधायाश्मस्थितः सुधीः।
सहस्रं प्रजपेन्मन्त्रं निशाचरदिशामुखः ॥ ५५ ॥
निशया निर्मितैरच्चैः समन्त्रः प्रोच्यतेऽधुना।
प्रणवो गगनचौखौ चन्द्रदीर्घत्रयान्वितैः ॥ ५६ ॥
कामाच्चिमायावर्णान्ते रूपिणीति पदं ततः।
सर्वान्ते मनोहारिण्यन्ते स्तम्भय युग्मकम् ॥ ५७ ॥
रोधय द्वितयं पश्चात् मोहय द्वितयं पुनः।
दीर्घत्रयाढ्यं कामस्य वीजं कामान्तिमो भगौ ॥ ५८ ॥
काङ्क्षेश्वरि ततो वर्मत्रयं पश्चाद्दशाक्षरः।
प्रोक्तो मन्त्रः प्रजप्तेऽस्मिन् शत्रूणां स्तम्भनं भवेत् ॥ ५९ ॥
रवौ हरिद्रामानीय पिष्ट्वा दुग्धेन योषितः।
तद्रसेन लिखेद्भूर्जे वृत्तमन्तस्मरान्वितम् ॥ ६० ॥
तद्वृत्तं वेष्टयेत् कामवीजैर्दशभिरादरात्।
पुनर्वृत्तं प्रकल्प्याथ वेष्टयेदर्कमन्मथैः ॥ ६१ ॥
विरच्याथ पुनर्वृत्तं वेष्टयेत् षोड़शस्मरैः।
तस्योपरष्टात् षट्कोणं कोणेषु मदनान्वितम् ॥ ६२ ॥

---

एयुतः चे यथा रवौ हरिद्रारोचनकुष्ठतगरैर्गोमूत्रपिष्टैर्हरिद्रारञ्जिते वस्त्रेऽष्टदलं कृत्वामुकं स्तम्भयेति मध्ये घों घों ग्लौं ग्लौं घट घटेति वर्णान् दलेषु लिखेत् तद्वस्त्रं पीतवस्त्रं सूत्रेण संवेष्ट्य कोकिलतरोः सप्तकण्टकैर्विध्वार्कपत्रैः संवेष्ट्य वल्मीकरन्ध्रे प्रक्षिप्य लेपसूत्रमुपरि सिक्त्वा रन्ध्रोपरि शिलां संस्थाप्य तत्र स्थितोऽमुं मन्त्रं हरिद्रामणिभिः सहस्रं जपेन्नैरृत्याभिमुखः मन्त्रो यथा ओं ह्रां ह्रीं ह्रूं कामाक्षिमायारूपिणि सर्वमनोहारिणि स्तम्भय स्तम्भय रोधय रोधय मोहय मोहय क्लां क्लीं क्लूं कामाक्षे काङ्क्षेश्वरि हुं हुं हुमिति एवं कृते रिपुस्तम्भः ॥ ५२—५९ ॥

मोहनमाह रवाविति। पर्वान्तमध्येर्दादशकामवीजैः यथा रविवारे हरिद्रां नारीदुग्धेन पिष्ट्वा तद्रसेन भूर्जपत्रे मध्यकामवीजयुतं वृत्तं कृत्वा दशकामवीजैः

वाग्बीजमध्ये तत्सर्वं यन्त्रमोहनकारकम्।
उपविश्याथ तद् यन्त्रे दशवर्णं मनुं जपेत्॥ ६३॥
ङेन्तः कामः कामबीजं कामिन्ये कामसंपुटः।
ताराद्यो दशवर्णोऽयं मनुर्लोकविमोहनः॥ ६४॥
पश्चाद्दं प्रजपेन्मन्त्रं प्रत्यहं शुद्धमानसः।
तद्दशांशं प्रजुहुयात्तिलैराज्यपरिप्लुतैः॥ ६५॥
होमोत्थभस्मना कुर्वन् तिलकं नरसत्तमः।
मोहयेदखिलं विश्वं तद् यन्त्रस्यापि धारणात्॥ ६६॥
उक्तं मोहनमाकर्षं वक्ष्ये कृष्णाष्टमीदिने।
भूते वा भूमिजन्मार्कयुते प्रातर्जलान्तरे॥ ६७॥
नाभिदघ्ने स्थितो मूलं सहस्रं सशतं जपेत्।
ततो गृहं समागत्य तैलाभ्यक्तकलेवरः॥ ६८॥
पीठादावञ्जनैः कृत्वा स्त्र्याकारं वा नराकृतिम्।
इष्टा लज्जावतीपत्रैः प्रोक्षितन्मूलजै रसैः॥ ६९॥
तदग्रे प्रजपेच्चत्वारिंशदक्षरकं मनुम्।
तारो नमः कालिकायै सर्वाकर्षिपदं ततः॥ ७०॥
रतिवायू भौतिकस्थावमुकीमिति वर्णतः।
आकर्षय द्वयं शीघ्रमानय द्वितयं ततः॥ ७१॥

---

संवेष्ट्य पुनर्वृत्तं कृत्वा द्वादशकामबीजैः संवेष्ट्य पुनर्वृत्तं कृत्वा षोडशबीजैः संवेष्ट्योपरि बीजत्रयुक् षट्कोणं कृत्वा सर्वं वाग्बीजमध्यस्थं कुर्यात् तद्यन्त्रोपरि स्थित्वा पञ्चदिनं प्रत्यहं सहस्रं दशाक्षरं जपेत् मन्त्रो यथा ॐ क्लीं कामाय क्लीं कामिन्यै क्लींमिति जपदशांशेन तिलतैलेनैव जुहुयात् तद्भस्मना तिलकेन तद्यन्त्रधारणेन च विश्वं मोहयेत्॥ ६०—६६॥

आकर्षणमाह उक्तमिति॥ ६७॥

लज्जावती लज्जालुः स्पर्शमात्रेण यत्पत्राणि सङ्कुचन्ति सा लज्जालुः॥६८—७०॥

रतिवायू यरौ भौतिकस्थौ ऐयुतौ तेन य्रैं॥ ७१॥

पाशो मायाङ्कुशं भद्रकाल्यै हृदयमन्ततः।
चत्वारिंशल्लिपिर्मन्त्रः प्रोक्त आकर्षणक्षमः॥ ७२॥
शतं षड्धिकं जप्त्वा लोहितैः करवीरजैः।
पञ्चाशत्प्रमितैर्मन्त्री पूजयेत् लिखिताकृतिम्॥ ७३॥
मातृकावर्णमेकैकं तन्नामाकर्षय द्वयम्।
नम इत्यभिसंजप्य पुष्पमेकैकमर्पयेत्॥ ७४॥
धूपदीपनैवेद्यानि कृत्वा होमं समाचरेत्।
चणकैराज्यसंमिश्रैराकर्षमनुना शतम्॥ ७५॥
कृष्णकार्पाससूत्रस्य कुमारीनिर्मितस्य च।
गुणदेहमितं कृत्वा अष्टाविंशतितन्तुभिः॥ ७६॥
आकर्ष मनुना दद्यात् ग्रन्थीनष्टोत्तरं शतम्।
तत् डोरके धृते शीघ्रमायाति स्त्री नरोऽपि वा॥ ७७॥
त्रिरात्रात् ग्राममध्यस्थोऽन्यदेशो नवरात्रतः।
उक्तमाकर्षणमिदमुच्चाटनमथोच्यते॥ ७८॥
शून्यागारे चतुर्दश्यां कृष्णायां कुक्कुटासनः।
यमाशावदनो मुक्तकचो नीलाम्बरावृतः॥ ७९॥

---

आकर्षणमनुश्चत्वारिंशद्वर्णः प्रयोगश्च कृष्णाष्टम्यां कृष्णचतुर्दश्यां कुजरव्यन्यतरयुक्तायां प्रातर्नाभिमात्रे जले स्थित्वा सूर्यमेकादशशतं प्रजप्य गृहमागत्य शरीरं तैलेनाभ्यज्य पीठेऽञ्जनैर्नराकारं योषिदाकारं वा विलिख्य लज्जावतीपत्रैस्तं सम्पूज्य लज्जावतीमूलरसेन सम्प्रोक्ष्य तदग्रेऽमुं मन्त्रं षड्धिकं शतं जपेत् मन्त्रो यथा ओं नमः कालिकायै सर्वाकर्षिण्यै अमुकीमाकर्षय आकर्षय शीघ्रमानय आनय आं क्रीं क्रों भद्रकाल्यै नमः। ततः पञ्चाशत्करवीरपुष्पैः अं अमुकीं आकर्षय आकर्षय नमः आं अमुकीमित्यादि पञ्चाशद्वर्णपूर्वकमीतन्त्वपन्। तामाकारं पूजयेत् धूपदीपनैवेद्यं कृत्वा तदग्रेऽग्निं प्रतिष्ठाप्य तत्राज्याक्तचणकैः शतमनुनोक्तमनुना हुत्वा कुमारीकर्त्तितेन कृष्णकार्पाससूत्रेणाष्टाविंशतितन्तुनिर्मितं स्वदेहमितं डोरकं कृत्वाकर्षमन्त्रेणाष्टोत्तरशतं ग्रन्थीन् दत्त्वा तद्धारणान्नरं नारीं चाकर्षतीति॥ ७२—७८॥

ग्रन्थिसंयुतया मौञ्ज्या रज्ज्वा मन्त्रमिमं जपेत्।
सहस्रद्वयसंख्यातं शववर्त्ती देवतां स्मरन्॥ ८०॥
तारो भूधरभृग्वर्कसंवर्त्ता क्रिययान्विताः।
प्रत्येकं दीपिका चन्द्रयुक्ता वीजचतुष्टयम्॥ ८१॥
कालरात्रिमहाध्वाङ्क्षिपदान्तेऽमुकमुच्चरेत्।
आशूच्चाटय युग्मन्तु छिन्धि भिन्धि शुचिप्रिया॥ ८२॥
प्रासादवीजं कामाचि स्मृगन्तो मनुरीरितः।
षट्त्रिंशद्वर्णसंयुक्तः शीघ्रमुच्चाटको रिपोः॥ ८३॥
जपान्ते तद्दशांशेन सर्षपैर्जुहुयान्निशि।
ततः सर्षपपिण्याकैस्तत्तैलोदकसंयुतैः॥ ८४॥
बलिं प्रदद्यात्तेनैवं मनुना विशिखो भुवि।
एवं कृते सप्तरात्रं देशाद्दूरं व्रजेदरिः॥ ८५॥
ययोर्विद्वेषमन्विच्छेत्तयोर्जन्मतरूद्भवम्।
फलकद्वितयं कृत्वा तत्राकारौ तयोर्लिखेत्॥ ८६॥

---

उच्चाटनमाह शून्येति। कुक्कुटासनलक्षणमन्ते वक्तव्यम्॥ ७९॥ ८०॥

मन्त्रान्तरमाह तार इति। भूधरो वः भृगु सः अर्को मः सम्वर्त्त चः एते चत्वारः प्रत्येकं क्रियया लकारेण युतास्तथा दीपिका चन्द्रयुता ऊविन्दुयुताश्चत्वारि वीजानि तेन व्लूं स्लूं म्लूं च्लूं॥ ८१॥

शुचिप्रिया स्वाहा॥ ८२॥

प्रासादवीजं ह्रौं स्मृणिः क्रों॥ ८३॥

प्रयोगो यथा, कृष्णचतुर्दश्यां शून्यगृहे नीलवस्त्रावृतो मुक्तकचो मुक्तशिखो दक्षिणामुखः कुक्कुटासनेनोपविश्य ग्रन्थियुक्तया मुञ्जरज्ज्वा निशि सहस्रद्वयमप्तकं मन्त्रं जपेत् मन्त्रो यथा व्लूं स्लूं म्लूं च्लूं कालरात्रिमहाध्वाङ्क्षि अमुकं आशूच्चाटय आशूच्चाटय छिन्धि भिन्धि स्वाहा ह्रौं कामाचि क्रोमिति ततः प्रतदशांशेनैव मन्त्रेण सर्षपैर्हुत्वा तैलोदकयुतेन सर्षपपिण्याकेन तेन मनुना बलिं दद्यात्। एवं सप्ताहं कृते उच्चाटनसिद्धिः॥ ८४—८५॥

विद्वेषणमाह ययोरिति। जन्मतरवो जन्मवृक्षाः ते उक्ताः॥ ८६॥

विषाष्टकेन वालेयीदुग्धाक्तेनाभिधान्वितम्।
तत् स्पृष्ट्वा प्रजपेन्मन्त्रं सहस्रमधियामिनि ॥ ८७ ॥
वियत्पावकमन्विन्दुयुक् ग्लौं खं मनुहंसयुक्।
निद्राग्निमनुविन्दुस्था भगवत्यन्तेति दण्डधा ॥ ८८ ॥
रिण्यन्तेऽसुकमसुकं शीघ्रं विद्वेषय द्वयम्।
रोधय द्वितयं पश्चाद्भञ्जये द्वितयं रमा ॥ ८९ ॥
मायाराज्ञौ चतुर्थ्यन्ता प्रणवं कवचद्वयम्।
पञ्चाशदक्षरो मन्त्रस्ताराद्विः सर्वसिद्धिदः ॥ ९० ॥
जपान्ते फलकद्वन्द्वं बद्धा रज्वा परस्परम्।
खरसैरिभगन्धर्वपुच्छरोमसमुत्थया ॥ ९१ ॥
वल्मीकरन्ध्रे निखनेत् पुनस्तावज्जपेन्नरः।
सप्ताहाज्जायते वैरं तयोः प्रीतिमतोरपि ॥ ९२ ॥
मारणन्तु प्रकुर्वीत ब्राह्मणेतरविद्विषम्।
शुद्ध्यर्थं प्रजपेन्मूलमन्त्रमष्टोत्तरं शतम् ॥ ९३ ॥

---

विषाष्टकमन्ते वक्ष्यति वालेयी रासभी अधियामिनि रात्रौ ॥ ८७ ॥

मन्त्रमाह वियदिति। पावकमन्विन्दुयुक् र् औविन्दुयुतं वियत् ह: ह्रौं ग्लौं विन्दु मनुरौ हंसः सः तैर्युक्तं खं ह्सौं अग्निमनुविन्दुस्था निद्रा भः भ्रौं ॥ ८८ ॥

रमा श्रीं ॥ ८९ ॥

कवचं हुं ॥ ९० ॥

सैरिभो महिषः गन्धर्वोऽश्वः ॥ ९१ ॥

प्रयोगः प्रीतिमतोर्द्वयोर्जन्मवृक्षीयं फलकद्वयं विधाय तत्र राजनीचोरमर्दितेन विषाष्टकेनोपरि नामयुक्तमाकारद्वयं विलिख्य तत् स्पृष्ट्वा निशि सहस्रमनुमन्त्रं जपेत् मन्त्रो यथा ओं ह्रौं ग्लौं ह्सौं भ्रौं भगवति दण्डधारिणि अमुकममुकं शीघ्रं विद्वेषय विद्वेषय रोधय रोधय भञ्जय भञ्जय श्रीं मायाराज्ञ्यै ओं हुं हुमिति। ततः खरमहिषाश्वपुच्छरोमजातया रज्वा तत्फलकद्वयं निबध्य वल्मीकरन्ध्रे निखाय पुनर्मन्त्रसहस्रं जपेत् एवं विद्वेषणविधिः ॥ ९२ ॥

मारणमाह मारणमिति। स्पष्टमेतदवशिष्टम् ॥ ९३ ॥ ९४ ॥

कृष्णाङ्गारचतुर्दश्यां गोपुराद्वा चतुष्पथात् ।
श्मशानाद्वा समानीय मृदं तत्र विनिःक्षिपेत् ॥ ९४ ॥
विडङ्गानि हयार्य्यर्ककुसुमान्यपि मन्त्रवित् ।
तन्मृदा पुत्तलीं कुर्य्यात् श्मशाने निर्जनालये ॥ ९५ ॥
उपविश्य शिखायुक्तो नीलवस्त्रावृतो निशि ।
तद्वक्षसि रिपोर्नाम लिखित्वा स्थापयेदसून् ॥ ९६ ॥
श्मशानवाससाच्छाद्य तैलाभ्यक्तामथार्चयेत् ।
स्नापयेत् पुत्तलीन्तान्तु खराश्वमहिषास्रजा ॥ ९७ ॥
रक्तचन्दनधत्तूरकुसुमान्यर्पयेत्ततः ।
मारणाख्येन मनुना कुर्य्याद्धोमञ्च पूजनम् ॥ ९८ ॥
दीर्घत्रयाग्निरात्रीशयुक्ता तन्द्री स्मृतीश्वरि ।
क्रं कृत्यन्तेऽसुकं शीघ्रं मारय द्वितयं सृणिः ॥ ९९ ॥
त्रयोविंशत्यक्षराढ्यो ध्रुवादिर्मारणे मनुः ।
अनेन मनुना पूजां कृत्वा होमं समाचरेत् ॥ १०० ॥
उग्रासर्षपभल्लातोन्मत्तवीजैः सुमिश्रितैः ।
श्मशानाग्नौ शतं साग्रं छित्वा तत्प्रतिमाशिरः ॥ १०१ ॥
तदग्नौ प्रदहेन्मन्त्री पूर्णाहुतिमथाचरेत् ।

---

विडङ्गं कृमिघ्नं हयारिः करवीरः ॥ ९५—९८ ॥

मारणमन्त्रमाह दीर्घेति । तन्द्री मः दीर्घत्रयम् अग्नी रः रात्रीशो बिन्दुस्तैर्युक्तः तेन म्रां म्रीं म्रूं सृणिः क्रों ॥ ९९ ॥

ध्रुवादिः प्रणवादिः ॥ १०० ॥

उग्रा वचा उन्मत्तो धत्तूरः सूर्य्यशातिर्यमातिथिः स्यात् म्रियत इत्यर्थः । प्रयोगश्च कुजवारयुतायां कृष्णचतुर्दश्यां पुरद्वारचतुष्पथश्मशानान्यतमस्थान्मृदमानीय विडङ्गकरवीरार्कपुष्पयुतां कृत्वा श्मशानस्थो विशिखो नीलवस्त्रो निशि तया पुत्तलीं हृदि तन्नामयुतां कृत्वा प्राणान् प्रतिष्ठाप्य श्मशानवस्त्रेणाच्छाद्य तैलेनाभ्यज्य खराश्वमहिषरुधिरेण संस्नाप्य रक्तचन्दनेन विलिप्य धत्तूरपुष्पैः सम्पूज्य तदग्रे श्मशा-

एवं क्वते त्रिसप्ताहाद्रिपुः स्यात् सूर्य्यजातिथिः ॥ १०२ ॥
कर्मस्वेवंविधेष्वादौ भैरवाय बलिं दिशेत्।
माषान्नपलमद्याद्यैरेवं सिद्धिर्भवेत् ध्रुवम् ॥ १०३ ॥
यो मन्त्रो विदधातीदृक् कर्म तेन प्रयत्नतः।
सर्वात्मना च संसेव्यो नरसिंहो हरोऽपि वा ॥ १०४ ॥

अथ चण्डीविधानम्।

आद्यो नवाचरं मन्त्रं वक्ष्ये चण्डीप्रवृत्तये।
वाङ्माया मदनो दीर्घा लक्ष्मीस्तन्द्री श्रुतीन्दुयुक् ॥१०५॥
डाये सदृक् जलं कूर्मद्वयं झिण्टीशसंयुतम्।
नवाचरोऽस्य ऋषयो ब्रह्मविष्णुमहेश्वराः ॥ १०६ ॥
छन्दांस्युक्तानि मुनिभिर्गायत्र्युष्णिगनुष्टुभः।
देव्याः प्रोक्ता महापूर्वाः काली लक्ष्मी सरस्वती ॥ १०७ ॥
नन्दा शाकम्भरी-भीमाः शक्तयोऽस्य मनोः स्मृताः।
स्याद्रक्तदन्तिका दुर्गा भ्रामर्य्यौ वीजसञ्चयः ॥ १०८ ॥
अग्निवायुभगास्तत्त्वं फलं वेदत्रयोद्भवम्।
सर्वाभीष्टप्रसिद्ध्यर्थं विनियोग उदाहृतः ॥ १०९ ॥
ऋषिश्छन्दो दैवतानि शिरोमुख हृदि न्यसेत्।

---

नाग्निं संस्थाप्य तदग्नौ वचासर्षपभल्लातकधर्त्तूरवीजमिश्रितैरष्टोत्तरशतं जुहुयात् मन्त्रेण। स च यथा—श्रों सां सीं सूं स्ततीश्वरि ह्रां क्रत्ये श्रमुकं शीघ्रं मारय मारय क्लीमिति। ततः पुत्तलीशिरश्छित्वाग्नौ हुत्वा पूर्णाहुतिं कुर्य्यात् एवमेकविंशतिरात्रे रिपुर्म्रियत इति ॥ १०१ ॥ १०२ ॥

ततः प्रायश्चित्तं कुर्य्यात् ॥ १०३ ॥ १०४ ॥

सप्तशतीपीठाङ्गभूतं चण्डीमन्त्रमाह वागिति। वाक् ऐं माया ह्रीं मदनः क्लीं दीर्घा लक्ष्मीः चा तन्द्री मः श्रुतीन्दुयुक् उबिन्दुयुक्ता मुं ॥ १०५ ॥

डाये स्वरूपं सदृक् जलं वि कूर्मद्वयञ्च युग्मं झिण्टीश ए चे ॥ १०६ ॥

महाकाली महालक्ष्मी महासरस्वत्यौ देवताः ॥ १०७ ॥ १०८ ॥

शक्तिबीजानि स्तनयोस्तत्त्वानि हृदये पुनः ॥ १०० ॥
तत एकादशन्यासान् कुर्वीतेष्टफलप्रदान् ।
प्रथमो मातृकान्यासः कार्यः पूर्वोक्तमार्गतः ॥ १११ ॥
कृतेन येन देवस्य सारूप्यं याति मानवः ।
अथ द्वितीयं कुर्वीत न्यासं सारस्वताभिधम् ॥ ११२ ॥
बीजत्रयन्तु मन्त्राद्यं तारादिहृदयान्तिकम् ।
क्रमादङ्गुलिषु न्यस्येत् कनिष्ठाद्यासु पञ्चसु ॥ ११३ ॥
करयोर्मध्यतः पृष्ठे मणिबन्धे च कूर्परे ।
हृदयादिषडङ्गेषु विन्यसेज्जातिसंयुतम् ॥ ११४ ॥
अस्मिन् सारस्वते न्यासे कृते जाड्यं विनश्यति ।
ततस्तृतीयं कुर्वीत न्यासं मातृगणान्वितम् ॥ ११५ ॥
मायाबीजादिका ब्राह्मी पूर्वतः पातु मां सदा ।
माहेश्वरी तथाग्नेय्यां कौमारी दक्षिणेऽवतु ॥ ११६ ॥
वैष्णवी यातुकाष्ठायां वाराही पश्चिमेऽवतु ।
इन्द्राणी पावके कोणे चामुण्डा चोत्तरेऽवतु ॥ ११७ ॥
ऐशाने तु महालक्ष्मीरूर्द्धं व्योमेश्वरी तथा ।
सप्तद्वीपेश्वरी भूमौ रक्षेत् कामेश्वरी तले ॥ ११८ ॥

---

भगः सूर्यः ॥ १०९ ॥ ११० ॥

एकादशन्यासानाह तत इति । पूर्वोक्तमार्गतः प्रथमपटलोक्तविधिना ॥१११॥

सारस्वतन्यासमाह अथेति ॥ ११२ ॥

बीजेति । मन्त्रादिमं बीजत्रयं प्रणवादिनमोऽन्तं कनिष्ठादिपञ्चाङ्गुलिषु न्यस्य हृदयादिषु जातियुक्तं न्यसेत् यथा ओं ऐं ह्रीं क्लीं नमः कनिष्ठायामित्यादि ओं ऐं ह्रीं क्लीं हृदयाय नम इत्याद्यङ्गेष्वपि ॥ ११३ ॥ ११४ ॥

फलमाह अस्मिन्निति ॥ ११५ ॥

मायेति । ह्रीं ब्राह्मी पूर्वतो मां पातु इत्यादि यातुकाष्ठायां नैर्ऋते ॥ ११६—११८ ॥

तृतीयेऽस्मिन् कृते न्यासे त्रैलोक्यविजयी भवेत्।
न्यासं चतुर्थं कुर्वीत नन्दजादिसमन्वितम् ॥ ११९ ॥
नन्दजा पातु पूर्वाङ्गं कमला कुशमण्डिता।
खड्गपात्रकरा पातु दक्षिणे रक्तदन्तिका ॥ १२० ॥
पृष्ठे शाकम्भरी पातु पुष्पपल्लवसंयुता।
धनुर्बाणकरा दुर्गा वामे पातु सदैव माम् ॥ १२१ ॥
शिरः पात्रकरा भीमा मस्तकाच्चरणावधि।
पादादिमस्तकं यावत् भ्रामरी चित्रकान्तिभृत् ॥ १२२ ॥
तुर्य्यन्यासं नरः कुर्य्याज्जरामृत्युं व्यपोहति।
अथ कुर्वीत ब्रह्माख्यं न्यासं पञ्चममुत्तमम् ॥ १२३ ॥
पादादिनाभिपर्य्यन्तं ब्रह्मा पातु सनातनः।
नाभेर्विशुद्धिपर्य्यन्तं पातु नित्यं जनार्दनः ॥ १२४ ॥
विशुद्धेर्ब्रह्मरन्ध्रान्तं पातु रुद्रस्त्रिलोचनः।
हंसः पातु पदद्वन्द्वं वैनतेयः करद्वयम् ॥ १२५ ॥
चक्षुषी वृषभः पातु सर्वाङ्गानि गजाननः।
परापरौ देहभागौ पात्वानन्दमयो हरिः ॥ १२६ ॥
कृतेऽस्मिन् पञ्चमे न्यासे सर्वान् कामानवाप्नुयात्।
षष्ठं न्यासं ततः कुर्य्यात् महालक्ष्म्यादिसंयुतम् ॥ १२७ ॥
मध्यं पातु महालक्ष्मीरष्टादशभुजान्विता।
ऊर्द्ध्वं सरस्वती पातु भुजैरष्टाभिरूर्जिता ॥ १२८ ॥
अधः पातु महाकाली दशबाहुसमन्विता।
सिंहो हस्तद्वयं पातु परहंसोऽक्षियुग्मकम् ॥ १२९ ॥
महिषं दिव्यमारूढो यमः पातु पदद्वयम्।

---

एतत्फलमाह तृतीये इति। चतुर्थन्यासमाह नन्दजेति। फलमाह तुर्य-मिति। पञ्चमं न्यासमाह पादेति। एतत्फलमाह कृतेति ॥ ११९—१२७ ॥

सहैशखड्गिकायुक्तः सर्वाङ्गानि ममावतु ॥ १३० ॥
षष्ठेऽस्मिन् विहिते न्यासे सद्गतिं प्राप्नुयान्नरः ।
मूलाक्षरन्यासरूपं न्यासं कुर्वीत सप्तमम् ॥ १३१ ॥
ब्रह्मरन्ध्रे नेत्रयुग्मे श्रुत्योर्नासिकयोर्मुखे ।
पायौ मूलमनोर्वर्णान् ताराद्यान्नमसान्वितान् ॥ १३२ ॥
विन्यसेत् सप्तमे न्यासे कृते रोगक्षयो भवेत् ।
पायुतो ब्रह्मरन्ध्रान्तं पुनस्तानेव विन्यसेत् ॥ १३३ ॥
कृतेऽस्मिन्नष्टमे न्यासे सर्वं दुःखं विनश्यति ।
कुर्वीत नवमं न्यासं मन्त्रव्याप्तिस्वरूपकम् ॥ १३४ ॥
मस्तकाच्चरणं यावच्चरणान्मस्तकावधि ।
पुरो दक्षे पृष्ठदेशे वामभागेऽष्टशो न्यसेत् ॥ १३५ ॥
मूलमन्त्रकृतो न्यासो नवमो देवतात्मकृत् ।
ततः कुर्वीत दशमं षडङ्गन्यासमुत्तमम् ॥ १३६ ॥
मूलं मन्त्रं जातियुक्तं हृदयादिषु विन्यसेत् ।
कृतेऽस्मिन् दशमे न्यासे त्रैलोक्यं वशगं भवेत् ॥ १३७ ॥
दशन्यासोक्तफलदं कुर्य्यादेकादशं ततः ।
खड्गिनी शूलिनीत्यादि पठित्वा श्लोकपञ्चकम् ॥ १३८ ॥
आद्यं कृष्णतरं वीजं ध्यात्वा सर्वाङ्गके न्यसेत् ।
शूलेन पाहि नो देवीत्यादि श्लोकचतुष्टयम् ॥ १३९ ॥

---

षष्ठमाह मध्यमिति । अष्टादशभुजा महालक्ष्मीर्मम मध्यं पात्वित्यादि प्रयोगः ॥ १२८—१३० ॥

सप्तमन्यासमाह मूलेति । ह्रीं ऐं नमः ब्रह्मरन्ध्रे इत्यादि प्रयोगः ॥१३१॥१३२॥

एतत् न्यासफलं रोगक्षयः । पायुमारभ्य ब्रह्मरन्ध्रान्तं वर्णन्यासोऽष्टमः ॥ १३३ ॥

एतत्फलं दुःखनाशः । नवममाह कुर्वीतेति । शिरः पादान्तमष्टवारं मूलं विन्यसेत् एवं पादाच्छिरोऽन्तमष्टशः एवं पुरो दक्षिणभागे पृष्ठे वामभागेऽप्येवं प्रत्येकमष्टशो मूलं न्यसेत् एतत्फलं देवत्वप्राप्तिः ॥ १३४—१३६ ॥

पठित्वा सूर्य्यसदृशं द्वितीयं सर्वतो न्यसेत्।
सर्वस्वरूपे सर्वेशे इत्यादि श्लोकपञ्चकम्॥ १४०॥
पठित्वा स्फटिकाभासं तृतीयं स्वतनौ न्यसेत्।
ततः षड़ङ्गं कुर्वीत विभक्तैर्मूलवर्णकैः॥ १४१॥
एकेनैकेन चैकेन चतुर्भिर्युगलेन च।
समस्तेन च मन्त्रेण कुर्य्यादङ्गानि षट् सुधीः॥ १४२॥
शिखायां नेत्रयोः श्रुत्योर्नसोर्वक्त्रे गुदे न्यसेत्।
मन्त्रवर्णान् समस्तेन व्यापकं त्वष्टशश्चरेत्॥ १४३॥
खड्गं चक्रगदेषु चापपरिघान् शूलम्भूशुण्डीशिरः
शङ्खं संदधतीं करैस्त्रिनयनां सर्वाङ्गभूषावृताम्।
यामस्तौत् स्वपिते हरौ कमलजो हन्तुं मधुं कैटभं
नीलाश्मद्युतिमास्यपाददशकां सेवे महाकालिकाम्॥१४४
अक्षस्रक्परशुगदेषु कुलिशं पद्मं धनुः कुण्डिकां
दण्डं शक्तिमसिञ्च चर्मजलजं घण्टां सुराभाजनम्।
शूलं पाशसुदर्शने च दधतीं हस्तैः प्रवालप्रभां
सेवे सैरिभमर्दिनीमिह महालक्ष्मीं सुरोजोद्भवाम्॥१४५॥

---

दशममाह मूलेति। मूलं हृदयाय नम इत्यादि जातियुक्तं षड़ङ्गेषु न्यसेत् एतत्फलं जगद्वश्यम्। एकादशमाह खड्गिनीति॥ १३७—१४१॥

षड़ङ्गमाह एकेनेति॥ १४२॥

वर्णन्यासमाह शिखायामिति। नेत्रश्रुतिनासासु द्वौ षष्टशोऽष्टवारम्॥१४३॥

महाकालीध्यानमाह खड्गमिति। खड्गचक्रं बाणशिरः शङ्खान् दधेषु दधतीं इतराणि वामेषु आस्यपाददशकां दशवक्त्रां दशपादां दशभुजां त्रिंशन्नेत्रामित्यर्थः। हरौ सुप्ते कमलासनो ब्रह्मा मधुकैटभौ हन्तुं यामस्तौत् तुष्टाव हरेर्निद्रा वैष्णवीमायेत्यर्थः तदुक्तं यया त्वया जगत्स्रष्टा जगत्पालाति यो जगत् सोऽपि निद्रावशं नीत इति॥ १४४॥

महालक्ष्मीध्यानमाह अक्षस्रगिति। कुण्डिकां कमण्डलुं जलजं शङ्खं चष-

घण्टाशूलहलानि शङ्खमुसले चक्रं धनुः सायकं
हस्ताब्जैर्दधतीं घनान्तविलसच्छीतांशुतुल्यप्रभाम् ।
गौरीदेहसमुद्भवां त्रिजगतामाधारभूतां महा-
पूर्वामत्र सरस्वतीमनुभजे शुम्भादिदैत्यार्दिनीम् ॥ १४६ ॥

एवं ध्यात्वा जपेल्लक्षचतुष्कं तद्दशांशतः ।
पायसान्नेन जुहुयात् पूजिते हेमरेतसि ॥ १४७ ॥
जयादिशक्तिभिर्युक्ते पीठे देवीं यजेत्ततः ।
तत्त्वपत्रावृतत्र्यस्रषट्कोणाष्टदलान्विते ॥ १४८ ॥
त्रिकोणमध्ये सम्पूज्य ध्यात्वा तां मूलमन्त्रतः ।
पूर्वकोणे विधातारं सुरया सह पूजयेत् ॥ १४९ ॥
विष्णुं श्रिया च नैर्ऋत्ये वायव्ये तूमया शिवम् ।
उदग्दक्षिणयोः सिंहं महिषं च क्रमाद् यजेत् ॥ १५० ॥
षट्सु कोणेषु पूर्वा नं नन्दजां रक्तदन्तिकाम् ।
शाकम्भरीं तथा दुर्गां भीमाञ्च भ्रामरीं यजेत् ॥ १५१ ॥
सबिन्दुनामाद्यर्णाद्यास्ताराद्याश्च नमोऽन्तिकाः ।
नन्दजाद्या यजेत् शक्तीर्वक्ष्यमाणा अभीष्टदाः ॥ १५२ ॥
अष्टपत्रेषु ब्रह्माणी पूज्या माहेश्वरी परा ।
कौमारी वैष्णवी चाथ वाराही नारसिंह्यपि ॥ १५३ ॥

---

मालापद्मबाणखड्गवज्रगदाचक्रकमण्डलुशङ्खा दक्षेषु अन्ये वामेषु सैरिभमर्दिनी महिषासुरघातिनी सुरौजोद्भवां देवदेहनिर्गततेजस्समुद्भवाम् ॥ १४५ ॥

महासरस्वतीध्यानमाह घण्टेति । शङ्खमुसलचक्रबाणा दक्षेषु घण्टाशूलहल-धनूंषि वामेषु । घनान्तेति । शरच्चन्द्रप्रभाम् ॥ १४६ ॥

हेमरेतसि वह्नौ ॥ १४७—१५१ ॥

सबिन्द्विति ओं नं नन्दजायै नम इत्यादि वक्ष्यमाणाद्या अभीष्टदाः सबिन्दु-नामाद्यर्णाद्यास्ताराद्या नमोऽन्तां यजेत् ओं ब्रह्माण्यै नम इत्यादि ॥ १५२ ॥

पश्चादैन्द्री च चामुण्डा तथा तत्त्वदलेष्विमाः ।
विष्णुमाया चेतना च बुद्धिर्निद्रा क्षुधा ततः ॥ १५४ ॥
छायाशक्तिः परा तृष्णा चान्तिर्जातिश्च लज्जया ।
शान्ति श्रद्धा कान्तिलक्ष्मी धृतिर्वृत्तिः श्रुतिः स्मृतिः ॥१५५॥
तुष्टिः पुष्टिर्दया माता ततो भ्रान्तिरिति क्रमात् ।
वह्निर्भूगृहकोणेषु गणेशः क्षेत्रपालकः ॥ १५६ ॥
वटुकश्चापि योगिन्यः पूज्या इन्द्रादिका अपि ।
एवं सिद्धे मनौ मन्त्री भवेत् सौभाग्यभाजनम् ॥ १५७ ॥
मार्कण्डेयपुराणोक्तं नित्यं चण्डीस्तवं पठन् ।
पुटितं मूलमन्त्रेण जपन्नाप्नोति वाञ्छितम् ॥ १५८ ॥
आश्विनस्य सिते पक्षे आरभ्याग्नितिथिं सुधीः ।
अष्टम्यन्तं जपेल्लक्षं दशांशं होममाचरेत् ॥ १५९ ॥
प्रत्यहं पूजयेद्देवीं पठेत् सप्तशतीमपि ।
विप्रानाराध्य मन्त्री स्वमिष्टार्थं लभतेऽचिरात् ॥ १६० ॥
सप्तशत्याश्चरित्रे तु प्रथमे पद्मभूर्मुनिः ।
छन्दो गायत्रमुदितं महाकाली तु देवता ॥ १६१ ॥
वाग्बीजं पावकस्तत्त्वं धर्मार्थे विनियोजनम् ।
मध्यमे तु चरित्रेऽथ मुनिर्विष्णुरुदाहृतः ॥ १६२ ॥
उष्णिक्छन्दो महालक्ष्मीर्देवता बीजमद्रिजा ।
वायुस्तत्त्वं धनप्राप्त्यै विनियोग उदाहृतः ॥ १६३ ॥

---

तत्त्वदलेषु चतुर्विंशतिपत्रेषु विष्णुमायाद्या ॥ १५३—१५८ ॥

अग्नितिथिं प्रतिपदम् ॥ १५९ ॥ १६० ॥

चण्डीस्तवस्य मार्कण्डेयपुराणोक्तस्य छन्दादीनाञ्च सप्तशत्या इति। प्रथमं चरित्रं मधुकैटभवधः ॥ ६१ ॥

मध्यमः महिषासुरवधः ॥ ६२ ॥

अद्रिजा ह्रीं ॥ ६३ ॥

उत्तरस्य चरित्रस्य ऋषिः शङ्कर ईरितः ।
त्रिष्टुप्छन्दो देवतास्य प्रोक्ता महासरस्वती ॥ १६४ ॥
कामो बीजं रविस्तत्त्वं कामाप्त्यै विनियोजनम् ।
एवं संस्मृत्य ऋष्यादीन् ध्यात्वा पूर्वोक्तमार्गतः ॥ १६५ ॥
सार्थस्मृति पठेच्चण्डीस्तवं तुष्टपदाक्षरम् ।
समाप्तौ तु महालक्ष्मीं ध्यात्वा कृत्वा षडङ्गकम् ॥ १६६ ॥
जपेदष्टशतं मूलं देवतायै निवेदयेत् ।
एवं यः कुरुते स्तोत्रं नावसीदति जातुचित् ॥ १६७ ॥
चण्डिकां प्रभजन्मर्त्यो धनैर्धान्यैर्यशश्चयैः ।
पुत्रैः पौत्रैः स्वारोग्यैर्युक्तो जीवेद्बहुः समाः ॥ १६८ ॥

## अथ शतचण्डीविधानम् ।

शतचण्डीविधानन्तु प्रवक्ष्ये प्रीतये नृणाम् ।
नृपोपद्रव आपन्ने दुर्भिक्षे भूमिकम्पने ॥ १६९ ॥
अतिवृष्ट्यामनावृष्टौ परचक्रभये क्षये ।
सर्वे विघ्ना विनश्यन्ति शतचण्डीविधौ कृते ॥ १७० ॥
रोगाणां वैरिणां नाशो धनपुत्रसमृद्धयः ।
शङ्करस्य भवान्या वा प्रासादनिकटे शुभम् ॥ १७१ ॥

---

उत्तरं शुम्भनिशुम्भवधः ॥ ६४ ॥

कामः क्लीं ॥ ६५ ॥

सार्थस्मृति तदर्थस्मरणपूर्वकम् ॥ १६६ ॥ १६७ ॥

यशश्चयैः कीर्त्तिसमूहैः समा वर्षाणि ॥ १६८ ॥

शतचण्डीविधानमाह शतेति । तत्र निमित्तान्याह नृपोपद्रव इति । अथ प्रयोगः शास्त्रोक्तविधिना शङ्करालये भवान्यालये वा मण्डपं वेदिमध्ये निर्माय प्रतीच्यां कुण्डमध्ये वा कृत्वा कृतनित्यक्रियोऽमुककामः शतचण्डीविधानमहं करिष्य इति सङ्कल्पं विधाय मातृस्थापननान्दीश्राद्धे विधाय स्वस्तिवाचनं कृत्वा उक्तलक्षणान् दशविप्रान् मधुपर्कवस्त्रहेमदानादिना वृणुयात् ते च यजमानदत्ता-

अखण्डपद्दारवेद्याद्यं कुर्य्यात् सध्वजतोरणम्।
तत्र कुण्डं प्रकुर्वीत प्रतीच्यां मध्यतोऽपि वा॥ १७२॥
स्नात्वा नित्यकृतिं कृत्वा वृणुयाद्दशवाड़वान्।
जितेन्द्रियान् सदाचारान् कुलीनान् सत्यवादिनः॥१७३॥
व्युत्पन्नान् चण्डिकापाठरतांस्तन्त्रादयावतः।
मधुपर्कविधानेन वस्त्रस्वर्णादिदानतः॥ १७४॥
जपार्थमासनं मालां दद्यात्तेभ्योऽपि भोजनम्।
ते हविष्यान्नमश्नन्तो मन्त्रार्थगतमानसाः॥ १७५॥
भूमौ शयानाः प्रत्येकं जपेयुश्चण्डिकास्तवम्।
मार्कण्डेयपुराणोक्तं दशकृत्वः सुचेतसः॥ १७६॥
नवार्णं चण्डिकामन्त्रं जपेयुश्चायुतं पृथक्।
यजमानः पूजयेच्च कन्यानां दशकं शुभम्॥ १७७॥
द्विवर्षाद्या दशाब्दान्ताः कुमारीः परिपूजयेत्।
नाधिकाङ्गीं न हीनाङ्गीं कुष्ठिनीञ्च व्रणाङ्किताम्॥ १७८॥
अन्धाङ्काणाङ्केकराञ्च कुरूपां रोमयुक्तनुम्।
दासीजातां रोगयुक्तां दुष्टां कन्यां न पूजयेत्॥ १७९॥
विप्रां सर्वेष्टसंसिद्धैत्र यशसे चत्रियोद्भवाम्।
वैश्यानां धनलाभाय पुत्राप्त्यै शूद्रजां यजेत्॥ १८०॥
द्विवर्षा सा कुमार्य्युक्ता त्रिमूर्त्तिर्हायनत्रिका।
चतुरब्दा तु कल्याणी पञ्चवर्षा तु रोहिणी॥ १८१॥
षड़ब्दा कालिका प्रोक्ता चण्डिका सप्तहायनी।
अष्टवर्षा शाम्भवी स्यात् दुर्गा च नवहायनी॥ १८२॥

---

सर्वेषु दत्तमालाभिः समाहिताः सुमनसो भगवतीं स्मरन्तः सप्तशतीमूलमन्त्र वेद्यां कुम्भं संस्थापयित्वा तत्र दुर्गामावाह्य षोड़शोपचारैः सम्पूज्य तदग्रे प्रत्येकं दशकृत्वः सप्तशतीमयुतञ्च नवार्णं जपेयुः हविष्यभोजनब्रह्मचर्य्यभूशयना। सप्त-

सुभद्रा दशवर्षोक्तास्ता मन्त्रैः परिपूजयेत्।
एकाब्दायाः प्रीत्यभावो रुद्राब्दा तु विवर्जिताः॥ १८३॥
तासामावाहने मन्त्राः प्रोच्यन्ते शङ्करोदिताः।
मन्त्राक्षरमयीं लक्ष्मीं मातॄणां रूपधारिणीम्॥ १८४॥
नवदुर्गात्मिकां साक्षात् कन्यामावाहयाम्यहम्।
कुमारिकादिकन्यानां पूजामन्त्रान् ब्रुवेऽधुना॥ १८५॥
जगत्पूज्ये जगद्वन्द्ये सर्वदेवस्वरूपिणि।
पूजां गृहाण कौमारि जगन्मातर्नमोऽस्तु ते॥ १८६॥
त्रिपुरां त्रिपुराधारां त्रिवर्गज्ञानरूपिणीम्।
त्रैलोक्यवन्दितां देवीं त्रिमूर्त्तिं पूजयाम्यहम्॥ १८७॥
कलात्मिकां कलातीतां कारुण्यहृदयां शिवाम्।
कल्याणजननीं देवीं कल्याणीं पूजयाम्यहम्॥ १८८॥
अणिमादिगुणाधारामकाराद्यक्षरात्मिकाम्।
अनन्तां शक्तिकां लक्ष्मीं रोहिणीं पूजयाम्यहम्॥ १८९॥
कामचारां शुभां कान्तां कालचक्रस्वरूपिणीम्।
कामदां करुणोदारां कालिकां पूजयाम्यहम्॥ १९०॥
चण्डवीरां चण्डमायां चण्डमुण्डप्रभञ्जनीम्।
पूजयामि महादेवीं चण्डिकां चण्डविक्रमाम्॥ १९१॥
सदानन्दकरीं शान्तां सर्वदेवनमस्कृताम्।
सर्वभूतात्मिकां देवीं शाम्भवीं पूजयाम्यहम्॥ १९२॥
दुर्गमे दुस्तरे कार्य्ये भवार्णवविनाशिनि!।
पूजयामि सदा भक्त्या दुर्गां दुर्गार्त्तिनाशिनीम्॥ १९३॥

---

धर्मादिनियमांश्च चरेयुः यजमानश्च द्विवर्षाद्या उक्तलक्षणा अधिकाङ्गीत्यादि-दुर्लक्षणवर्जिताः कुमारीत्रिमूर्त्तिकल्याण्यादिनाम्नः दशकन्या भोजनवस्त्रभूषणदाना-दिना मन्त्राक्षरमयीमित्यादिमन्त्रेणावाह्य जगत्पूज्ये इत्यादि स्वस्वमन्त्रैः पूजयेत्

सुन्दरीं स्वर्णवर्णाभां सुखसौभाग्यदायिनीम्।
सुभद्रजननीं देवीं सुभद्रां पूजयाम्यहम् ॥ १९४ ॥
एतैर्मन्त्रैः पुराणोक्तैः स्नातां कन्यां प्रपूजयेत्।
गन्धैः पुष्पैर्भक्ष्यभोज्यैर्वस्त्रैराभरणैरपि ॥ १९५ ॥
वेद्यां विरचिते रम्ये सर्वतोभद्रमण्डले।
घटं संस्थाप्य विधिवत् तत्रावाह्यार्चयेत् शिवाम् ॥ १९६ ॥
तदग्रे कन्यकाश्चापि पूजयेद् ब्राह्मणानपि।
उपचारैस्तु विविधैः पूर्वोक्तावरणान्यपि ॥ १९७ ॥
एवं चतुर्दिनं कृत्वा पञ्चमे होममाचरेत्।
पायसान्नैस्त्रिमध्वक्तैर्द्राक्षारम्भाफलैरपि ॥ १९८ ॥
मातुलिङ्गैरिक्षुखण्डैर्नारिकेलैः पुरैस्तिलैः।
जातीफलैराम्रफलैरन्यैर्मधुरवस्तुभिः ॥ १९९ ॥
सप्तशत्या दशावृत्त्या प्रतिश्लोकं हुतञ्चरेत्।
अयुतञ्च नवार्णेन स्थापिताग्नौ विधानतः ॥ २०० ॥
कृत्वावरणदेवानां होमं तन्नाममन्त्रतः।
कृत्वा पूर्णाहुतिं सम्यक् देवमग्निं विसर्ज्य च ॥ २०१ ॥
अभिषिञ्चेच्च यष्टारं विप्रौघः कलशोदकैः।
निष्कं सुवर्णमथवा प्रत्येकं दक्षिणां दिशेत् ॥ २०२ ॥
भोजयेच्च शतं विप्रान् भक्ष्यभोज्यैः पृथग्विधैः।
तेभ्योऽपि दक्षिणां दत्त्वा गृह्णीयादाशिषस्ततः ॥ २०३ ॥

---

एवं चत्वारि दिनानि जपं कुमारीपूजाञ्च समाप्य पञ्चमेऽह्नि कुण्डे, आगमोक्तपूर्वविधिना वह्निं संस्थाप्य पायसान्नादिभिरुक्तैर्द्रव्यैर्जुहुयुः सप्तशत्याः प्रतिश्लोकं दशवारं नवार्णेनायुतञ्च होमसंख्या एको द्विजः सकृत् सप्तशतीप्रतिश्लोकं सहस्रं मूलेन च जुहुयात् इत्यर्थः। ततः आवरणदेवतानां नाममन्त्रैस्तारादिस्वाहान्तैरेकैकामाहुतिं हुत्वा पूर्णाहुतिं कृत्वा देवीं कुम्भस्थां सम्पूज्य बलिदानं विधाय

एवं कृते जगद्वश्यं सर्वे नश्यन्त्युपद्रवाः ।
राज्यं धनं यशः पुत्रानिष्टमन्यल्लभेत सः ॥ २०४ ॥
एतद्दशगुणं कुर्याच्चण्डीसाहस्रजं विधिः ।
विद्यावतः सदाचारान् ब्राह्मणान् वृणुयाच्छतम् ॥ २०५ ॥
प्रत्येकं चण्डिकापाठान् विदध्युस्ते दिशामितान् ।
अयुतं प्रजपेयुस्ते प्रत्येकं नववर्णकम् ॥ २०६ ॥
पूर्वोक्ताः कन्यकाः पूज्याः पूर्वमन्त्रैः शतं शुभाः ।
एवं दशाहं सम्पाद्य होमं कुर्युः प्रयत्नतः ॥ २०७ ॥
सप्तशत्याः शतावृत्त्या प्रतिश्लोकं विधानतः ।
लक्षसंख्यं नवार्णेन पूर्वोक्तैर्द्रव्यसञ्चयैः ॥ २०८ ॥ २०८ ॥
होतृभ्यो दक्षिणां दत्त्वा पूर्वोक्तान् भोजयेद्द्विजान् ।
सहस्रसम्मितान् साधून् देव्याराधनतत्परान् ॥ २०९ ॥
एवं सहस्रसंख्याके कृते चण्डीविधौ नृणाम् ।
सिद्ध्यत्यभीप्सितं सर्वं दुःखौघश्च विनश्यति ॥ २१० ॥

---

ऋत्विग्भ्यः प्रत्येकं निष्कं अशक्तौ सुवर्णमितं सुवर्णं दद्यात् । ततो विप्राः कलशोदकेन यजमानं निगमपुराणोक्तमन्त्रैरभिषिञ्चेयुराशिषश्च दद्युः । ततः शतं विप्राननानाविधान्नैर्भोजयेत् तेभ्योऽपि यथाशक्ति दक्षिणां दद्यात् । इति शतचण्डीविधिः ॥ १९९—२०३ ॥

शतचण्डीविधेः फलमाह एवं कृत इति ॥ २०४ ॥

सहस्रचण्डीविधानमाह एतद्दशगुणमिति । शतचण्डीविधानात् दशगुणं सहस्रचण्डीविधानमित्यर्थः तत्र शतविप्रवरणम् ॥ २०५ ॥

ते शतविप्राः प्रत्येकं दश दश सप्तशतीपाठान् कुर्युः अयुतमयुतं नवार्णजपं कुर्युः ॥ २०६ ॥

शतं कन्याश्च भोज्याः पूज्याः एवं दशदिनेषु सम्पाद्य एकादशेऽह्नि सप्तशतीशतावृत्त्या प्रतिश्लोकं तल्लक्षसंख्यं नवार्णेन च होमः ॥ २०७ ॥ २०८ ॥

ऋत्विग्भ्योऽपि दश दश निष्कमितं सुवर्णं प्रत्येकं दद्यात् शेषं पूर्वोक्तवत् इति सहस्रचण्डीविधिः ॥ २०९ ॥

मारीदुर्भिक्षरोगाद्या नश्यन्ति व्यसनोच्चयाः ।
नेमं विधिं वदेत् दुष्टे खले चौरे गुरुद्रुहि ॥ २११ ॥
साधौ जितेन्द्रिये दान्ते वदेद्विधिमिमं परम् ।
एवं सा चण्डिका तुष्टा वक्तॄन् श्रोतॄंश्च रक्षति ॥ २१२ ॥

इति मन्त्रमहोदधौ कालरात्रिचण्डीमन्त्रकथनं नाम अष्टादशस्तरङ्गः ॥

---

## ऊनविंशस्तरङ्गः ।

चरणायुधमन्त्रस्य विधानमभिधीयते ।
मन्त्री यद्विधिना कृत्वा साधयेत् स्वमनोरथान् ॥ १ ॥
तीक्ष्णार्घीशेन्दुसंयुक्ता सद्योजातयुतो विधिः ।
पिनाकी सूक्ष्मयुक् वर्णत्रयमेतत् पुनः पठेत् ॥ २ ॥
उत्कारी दीर्घसंयुक्ता मायाबीजं ततो वदेत् ।
द्विरभ्यस्तं पुनर्वर्णत्रयं पूर्वोदितं पुनः ॥ ३ ॥

---

एतत् फलमाह एवं सहस्रसंख्याक इति। एतदयुतचण्डीविधानलक्षचण्डीविधानयोरुपलक्षकं सहस्रचण्डीदशगुणोऽयुतचण्डीविधिः स दशगुणो लक्षचण्डीविधिः जपे होमे दक्षिणायां कन्यासु विप्रभोजने च दशगुणत्वम् ॥ २१०—२१२ ॥

इति नौकाख्यायां मन्त्रमहोदधिटीकायामष्टादशस्तरङ्गः ॥

---

कुक्कुटमन्त्रं वक्तुं प्रतिजानीते चरणेति। मन्त्रमुद्धरति तीक्ष्णेति। तीक्ष्णः यकारः अर्घीशेन्दुयुक्ता ऊबिन्दुयुता तेन यूं विधिः क सद्योजातयुत ओयुतः को पिनाकी लः सूक्ष्मयुक् इयुतः लि एतद्वर्णत्रयं पुनर्वारद्वयं यूं कोलि यूं कोलीति ॥ १ ॥ २ ॥

कूर्मः सकर्णो वो दीर्घो मन्त्रोऽयं समुदीरितः ।
पाशाद्योऽङ्कुशबीजान्तोऽष्टादशाक्षरसंयुतः ॥ ४ ॥
महारुद्रो मुनिश्चास्य छन्दोऽतिजगतीरितम् ।
मायाबीजं सृणिः शक्तिर्देवता चरणायुधः ॥ ५ ॥
वेदरामाक्षिरामाग्निवह्निवर्णैः षडङ्गकम् ।
कृत्वा वर्णान् प्रविन्यस्येन्मूर्ध्नि भाले भ्रुवोर्द्वयोः ॥ ६ ॥
अक्ष्णोः श्रुत्योर्नसोर्वक्त्रे कण्ठे कुक्षौ च नाभितः ।
लिङ्गे गुदे जानुपादे न्यस्यैवं संस्मरेत् प्रभुम् ॥ ७ ॥
सर्वालङ्कृतिदीप्तकण्ठचरणो हेमाभदेहद्युतिः
पक्षद्वन्द्वविधूननेऽतिकुशलः सर्वामराभ्यर्चितः ।
गौरीहस्तसरोजगोऽरुणशिखः सर्वार्थसिद्धिप्रदो
रक्तं चञ्चुपुटं दधच्चलपदः पायान्निजान् कुक्कुटान् ॥ ८ ॥
एवं ध्यात्वा समासीनः शैलाग्रे सरितस्तटे ।
वृषशून्ये पश्चिमास्ये यद्वा शङ्करसद्मनि ॥ ९ ॥
लक्षं जपेद्दशांशेन तिलैर्हवनमाचरेत् ।
शैवे पीठे यजेत्ताम्रचूड़ं गौरीकरस्थितम् ॥ १० ॥
आदावङ्गानि सम्पूज्य दलेषु प्रयजेदिमान् ।

---

उत्कारी वकारः दीर्घं ध्रा तेन संयुक्ता वा मायाबीजं ह्रीं पूर्वोदितं पुनर्वारत्रयं त्रिरभ्यस्तं पुनर्वदेदित्यन्वयः ॥ ३ ॥

कूर्मः च सकर्ण उयुतः चु दीर्घो वं वा पाशाद्यः आमाद्यः अङ्कुशबीजान्तः क्रोमन्तः यथा घां यूं कोलि यूं कोली वां क्रीं यूं कोली यूं कोली चु वा क्रीमिति ॥ ४ ॥ ५ ॥

षडङ्गमाह वेदेति । घां यूं कोलि हृदयाय नम इत्यादि । वर्णन्यासमाह मूर्ध्नीति । भ्रुवाक्षिश्रुतिनासासु द्वे द्वे अन्यत्रैकैकम् ॥ ६ ॥ ७ ॥

ध्यानमाह सर्वेति । सर्वालङ्कारैर्दीप्तः कण्ठचरणौ च यस्य निजान् सेवकान् पायात् रक्षतु ॥ ८ ॥

शम्भुं गौरीं गणपतिं कार्त्तिकेयं ततः परम् ॥ ११ ॥
मन्दारं पारिजातञ्च महाकालञ्च वर्द्धिणम्।
दलाग्रेषु सुराधीशप्रमुखानायुधान्वितान् ॥ १२ ॥
एवं कृते प्रयोगार्हो जायते मन्त्रनायकः।
प्रयोगादौ प्रजप्योऽसावयुतं द्विशताधिकम् ॥ १३ ॥
दध्ना क्षीरेण मधुना चन्द्रेण सितयान्वितैः।
दद्याद्बलिं सताम्बूलैः पायसैर्वलिमन्त्रतः ॥ १४ ॥
भोजनादौ भोजनान्ते लक्ष्मीसम्प्राप्तये सुधीः।
बलिमेतत् प्रदत्त्वाथ कुवेरो धननाथताम् ॥ १५ ॥
शान्तौ पुष्टावपि बलिमेतमेव प्रदापयेत्।
उक्तस्य वक्ष्यमाणस्य बलेर्मन्त्रोऽथ कथ्यते ॥ १६ ॥
वामकर्णेन्दुयुक् शूरः सबिन्दुश्चरसोऽद्रिजा।
कुक्कुटद्वितयं पश्चादेह्येहीमं बलिं वदेत् ॥ १७ ॥
गृह्णयुग्मं गृह्णापय सर्वान् कामांश्च देहि च।
वायुः सचन्द्रः कर्णेन्दुयुक् चक्री गिरिनन्दिनी ॥ १८ ॥
यूं नमः कुक्कुटायेति मन्त्रो व्योमयुगाक्षरः।
बलिं दद्यादनेनोक्तं वक्ष्यमाणञ्च साधकः ॥ १९ ॥

---

शैवे वामादिशक्तियुते ॥ ८—११ ॥

सुराधीशप्रमुखानिन्द्रादीन् ॥ १२ ॥ १३ ॥

चन्द्रेण कर्पूरेण ॥ १४—१६ ॥

बलिमन्त्रमाह वामेति। वामकर्णेन्दुयुक् शूरः ऊबिन्दुयुतः यः यं चरमः चः सबिन्दु चं अद्रिजा ह्रीं। वायुः सचन्द्रः यः सबिन्दुः यं कर्णेन्दुयुक् चक्री ऊबिन्दुयुतः कः कुं गिरिनन्दिनी ह्रीं। स्वरूपमन्यत् यथा यूं चं ह्रीं कुक्कुट कुक्कुट एह्येहि इमं बलिं गृह्ण गृह्ण गृह्णापय सर्वान् कामान् देहि यं कुं ह्रीं यूं नमः कुक्कुटायेति व्योमयुगाक्षरचत्वारिंशदर्णः। अनेन मन्त्रेण पूर्वोक्तं बलिं वक्ष्यमाणञ्च दद्यात् ॥ १७—१९ ॥

लाजैस्त्रिमधुरोपेतैर्दद्यान्मन्त्री बलिं निशि ।
वशयेदखिलं विश्वं त्रिदिनञ्चोदनैर्नृपम् ॥ २० ॥
दुग्धमिश्रितगोधूमपिष्टैः कुर्य्यादपूपकम् ।
आज्यकर्पूरयुक्तेन तेन दद्याद्बलिं निशि ॥ २१ ॥
त्र्यहमेवं बलौ दत्ते सुखी स्यात् वशयेज्जगत् ।
करवीरैर्बिल्वपत्रैः पीतपुष्पैः सुगन्धिभिः ॥ २२ ॥
सहस्रसङ्ख्यैः प्रत्येकं पूजयित्वा जपेन्मनुम् ।
सहस्रं निशि सप्ताहं यमुद्दिश्य जनं सुधीः ॥ २३ ॥
स याति दासतां तस्य मनोवचनकर्मभिः ।
छागलावकयोर्मांसैः सप्ताहं वितरेद्बलिम् ॥ २४ ॥
सहस्रं प्रत्यहं जप्त्वा वशयेदखिलं जगत् ।
नृपोत्थिते सपत्नोत्थे भये जाते च सङ्कटे ॥ २५ ॥
आपद्यपि तथान्यस्यां बलिं दद्यात् सुखाप्तये ।
गोपनीयो विधिरयं बलेः कथ्यो न दुर्मतौ ॥ २६ ॥
मुक्तकेश उदावक्त्रो जपेद्धानुसहस्रकम् ।
प्रत्यहं वसुघस्रान्तं यमुद्दिश्याधियामिनि ॥ २७ ॥
तमाकर्षति दूरस्थमपि किं निकटस्थितम् ।
जातीफलैलाचूर्णञ्च कर्पूरमध्यतः क्षिपेत् ॥ २८ ॥
अभिमन्त्र्यार्कसाहस्रं सिन्दूररजसा युतम् ।
उष्णीकृत्याग्नितापेन लोडयेत् गाङ्गपाथसा ॥ २९ ॥
स्थापयेदायसे पात्रे तत् स्पृष्टं स्तम्भितो भवेत् ।
कर्मारसदनाद्वह्निमानीयायसभाजने ॥ ३० ॥
स्थापयित्वैन्धयेत् काष्ठैः करवीरसमुद्भवैः ।

---

चोदनैस्त्रिदिनं बलिं दत्त्वा नृपं वशयेत् । वसुघस्रान्तम् अष्टदिनपर्य्यन्तम् अधियामिनि रात्रौ ॥ २०—२९ ॥

जुहुयात्तत्र धत्तूरबीजानि शतसंख्यया ॥ ३१ ॥
सिद्धार्थतैललिप्तानि विषकर्णयुतानि च।
सप्ताह एवं कृत्वारिं स्थानादुच्चाटयेत् ध्रुवम् ॥ ३२ ॥
पक्षं देशान्तरगतं मासं सम्प्रापयेन्मृतिम्।
तालपत्रं नराकारं कृत्वात्र स्थापयेदसून् ॥ ३३ ॥
जपेदष्टसहस्रञ्च तीक्ष्णतैलविलेपितम्।
तस्य खण्डानि पञ्चाशत् कृत्वा पितृवनोत्थिते ॥ ३४ ॥
उन्मत्ततरुसन्दीप्ते जुहुयाज्जातवेदसि।
एवं प्रकुर्वंस्त्रिदिनं मारयेन्मोहयेदरिम् ॥ ३५ ॥
साध्यर्क्षतरुकाष्ठेन कृत्वा पुत्तलिकां शुभाम्।
तस्यामसून् प्रतिष्ठाप्य सहस्रं प्रजपेन्मनुम् ॥ ३६ ॥
चिताकाष्ठस्य कीलेन तां स्पृष्ट्वा पितृकानने।
छिन्द्याद्यदङ्गं शस्त्रेण तदङ्गं तस्य नश्यति ॥ ३७ ॥
वैरिमूत्रयुतां मृत्स्नां तत्पादरजसा सह।
कुलालमृद्युतां कृत्वा पुत्तलीं रचयेत्तया ॥ ३८ ॥
तस्या हृदि पदे मूर्ध्नि नामकर्मान्वितं मनुम्।
लिखेत् श्मशानजाङ्गारैरसून् संस्थापयेत्ततः ॥ ३९ ॥

---

प्रयोगान्तरमाह कर्मारेति। लौहकारकगृहादग्निम् आनीय लौहपात्रे संस्थाप्य करवीरकाष्ठैः सन्दीप्य तत्र सर्षपतैलाक्तानि विषचूर्णयुतानि धत्तूरबीजानि शतं शतं सप्ताहं हुत्वा शत्रुमुच्चाटयेत्। एवं पक्षं कृत्वा देशान्तरं नयेत्। मासं कृत्वा मारयेत्। प्रयोगान्तरमाह तालेति। नराकारं तालपत्रं कृत्वा रात्रौ प्राणान् संस्थाप्य भल्लातकतैलेन विलिप्य अष्टाधिकं सहस्रमभिमन्त्र्य तस्य पञ्चाशत् खण्डानि कृत्वा धत्तूरकाष्ठदीप्ते श्मशानाग्नौ त्रिदिनं हुत्वारिं मारयेन्मोहयेच्च ॥ ३०—३५ ॥

प्रयोगान्तरमाह साध्येति। नक्षत्रवृक्षा उक्ताः चिताकाष्ठकीलेन तां पुत्तलीं स्पृष्ट्वा मनुं जपेदिति पूर्वेण सम्बन्धः तस्याः प्रतिमाया यदङ्गं शस्त्रेण छिन्द्यात्तदङ्गं तस्य शत्रोर्नश्यति ॥ ३६ ॥ ३७ ॥

जप्तां सहस्रं मन्त्रेण तीक्ष्णतैलविलेपिताम् ।
शस्त्रेण शतधा कृत्वा जुहुयात् पितृभूवसौ ॥ ४० ॥
विभीतकाष्ठसन्दीप्ते यमाशावदनो निशि ।
शत्रोर्निधनतारायां कृत्वैवं मारयेदरिम् ॥ ४१ ॥
निधाय गोमयं भूमौ प्रकुर्य्यात् प्रतिमां रिपोः ।
ताड़पत्रे समालिख्य मनुं नाम्ना विदर्भितम् ॥ ४२ ॥
तत्पत्रं निक्षिपेत् यस्या हृदि तत् प्रतिमोपरि ।
मृज्जं वा दारुजं कुम्भं गोमयोदकपूरितम् ॥ ४३ ॥
मनुनामयुतं ताड़पत्रेणाढ्यं निधापयेत् ।
तदसून् स्थापयेत् कुम्भे त्रिसन्ध्यं प्रजपेन्मनुम् ॥ ४४ ॥
प्रत्यहं शतसंख्याकं छाया यावद्भवेद्रिपोः ।
गोमयाम्भसि दृष्टायां तच्छायायान्तु साधकः ॥ ४५ ॥
अधश्छायाः प्रतिकृतेः छिन्द्यादङ्गमभीप्सितम् ।
शस्त्रेण तस्य नाशाय मृतये हृदयं गलम् ॥ ४६ ॥
प्रविद्धे कण्टकैर्मूर्ध्नि शिरोरोगी भवेद्रिपोः ।
आधयो हृदये विद्धे पदोः पादव्यथा भवेत् ॥ ४७ ॥

---

प्रयोगान्तरमाह वैरीति । पितृभूवसौ श्मशानाग्नौ ॥ ३८—४० ॥

यमाशावदनो दक्षिणदिङ्मुखः निधनतारा जन्मनक्षत्रात् सप्तमनक्षत्रं षोड़शं पञ्चविंशञ्च ॥ ४१ ॥

प्रयोगान्तरमाह निधायेति । गोमयेन शत्रोः प्रतिमां कृत्वा नामविदर्भितं मन्त्रं तालपत्रे विलिख्य तालपत्रं गोमयप्रतिमाहृदि निक्षिप्य प्रतिमोपरि उप-तास्मृदामन्यतरनिर्मितं घटं संस्थाप्य गोमयोदकाभ्यामापूर्य्य तत्रापि नामविद-र्भितं मन्त्रं लेखयुतं ताड़पत्रं निक्षिप्य तत्र शत्रोः प्राणस्थापनं कृत्वा प्रत्यहं त्रिसन्ध्यं शतं मन्त्रं कुम्भं स्पृष्ट्वा जपेत् यावत् शत्रोः प्रतिबिम्बं घटे दृश्यते तावत्-कालं जपेत् घटोदके शत्रुप्रतिबिम्बे दृष्टे घटाधःस्थाया गोमयप्रतिमाया यदङ्गं छिद्यते तद्रिपोर्नश्यति । हृदि गले च छिन्ने तन्मृतिः । प्रतिमामूर्ध्नि कण्टकै-

दारुणा कुक्कुटं कृत्वा तत्रास्य स्थापयेदसून्।
तं स्पृष्ट्वा पूर्ववत् ध्यात्वा जपेद्रविसहस्रकम् ॥ ४८ ॥
उपचारैः समभ्यर्च्य छादयेद्रक्तवाससा।
रथे संस्थाप्य तं देवं दिक्षु योद्धान् निधापयेत् ॥ ४९ ॥
चतुरो वर्मसंवीतानश्वारूढानुदायुधान्।
तत्संयुतो रणे गच्छेज्जेतुं बलवतो रिपून् ॥ ५० ॥
वीराद्यं कुक्कुटं दृष्ट्वा पलायन्ते रणेऽरयः।
भीता दशदिशः सर्वे हर्य्यक्षं करिणो यथा ॥ ५१ ॥
ताम्रचूड़स्य मन्त्रेण मोदकाद्यभिमन्त्रितम्।
यस्मै ददीत भक्षाय स वशी मन्त्रिणो भवेत् ॥ ५२ ॥
अष्टोत्तरशतं जप्ता रोचना चन्दनादिभिः।
विदध्यात्तिलकं भाले दर्शनात् वशयेज्जनान् ॥ ५३ ॥
अथ वच्चे शास्तृमन्त्रमुपासकसमृद्धिदम्।
शास्तारं स्तगयेत्युक्त्वा श्रान्तमश्वाग्निरूपतः ॥ ५४ ॥
ढ़ङ्गणाहृतमित्युक्त्वा पानीयार्थं वना च दे
त्यशास्त्रेऽन्ते ततो रैवते नमो मन्त्र ईरितः ॥ ५५ ॥
द्वाविंशद्वर्णोऽस्य ऋषि रैवतः परिकीर्त्तितः।
पंक्तिच्छन्दो देवता तु महाशास्ताखिलेष्टदः ॥ ५६ ॥
पादैः सर्वेण पञ्चाङ्गं कृत्वात्मनि विभुं स्मरेत्।
साध्यं स्वपाशेन विवध्य गाढ़ं निपातयन्तं खलु साधकस्य।

---

विद्धे शिरोरोगः हृदि विद्धे मनःपीड़ा पादयुग्मे कण्टकविद्धे पादरोग इत्यादि ॥ ४२—४७ ॥

दारुणेत्यारभ्य हर्य्यक्षं करिणो यथेत्यन्तमेकः प्रयोगः ॥ ४८—५१ ॥

हर्य्यक्षः केसरी चन्दनादिभिरित्यादि शब्दात् कुङ्कुमकस्तूरीकर्पूरगजमदाः ॥ ५२ ॥ ५३ ॥

पादाब्जयोर्दण्डधरं त्रिनेत्रं भजेत शास्तारमभीष्टसिद्धैत्र ॥ ५७ ॥

लक्षमेकं जपेन्मन्त्रं दशांशं जुहुयात्तिलैः ।
शैवे पीठे यजेद्देवमादावङ्गानि पूजयेत् ॥ ५८ ॥
दलेष्वष्टसु गोप्तारं पिङ्गलाक्षं ततः परम् ।
वीरसेनं शाम्भवञ्च त्रिनेत्रं शूलिनं तथा ॥ ५९ ॥
दक्षञ्च भीमरूपञ्च दिक्पालानस्त्रसंयुतान् ।
एवं सिद्धो मनुः सर्वमभीष्टं मन्त्रिणो यजेत् ॥ ६० ॥
मध्याह्नेऽञ्जलिना तस्मै जलं दत्त्वा जलार्थिने ।
गोप्तादिभ्यस्तद्गणेभ्यो दद्यादष्टौ जलाञ्जलीन् ॥ ६१ ॥
जलसन्तर्पितः शास्ता सगणोऽभीष्टदो भवेत् ।
निशि तस्मै बलिं दद्यात् गायत्र्या चाभिमन्त्रितम् ॥ ६२ ॥
तदग्रे प्रजपेन्मूलमष्टोत्तरशतं सुधीः ।
भूताधिपाय शब्दान्ते विद्महे पदमीरयेत् ॥ ६३ ॥
महादेवाय च ततो धीमहीति पदं वदेत् ।
तन्नः शास्ता प्रचोवर्णा दयादिति च कीर्त्तयेत् ॥ ६४ ॥
गायत्रेत्रषोदिता शास्तुः सर्वाभीष्टप्रदा नृणाम् ।
अथ पार्थिवलिङ्गस्य विधानमभिधीयते ॥ ६५ ॥
स्नातो नित्यं विधायादौ गत्वा शुद्धां भुवं सुधीः ।
उपरिष्टामया कृत्य षड्वर्णेनाधिमन्त्रयेत् ॥ ६६ ॥
आकाशः पृथिवीशेषस्थितो विन्दुसमन्वितः ।

---

शास्तृमन्त्रमाह जपेति । शास्ता शम्भोर्गणविशेषः शास्तारं मृगयाश्रान्तमश्वारूढं गणावृतं पानीयार्थं वनादित्य शास्त्रे रैवते नम इति शीकरूपी मन्त्रः । कपी रैशः उयुतः ॥ ५४—६१ ॥

गायत्र्या भूताधिपायेत्यादिकया ॥ ६२—६५ ॥

पार्थिवलिङ्गविधानमाह स्नात इत्यादि ॥ ६६ ॥

पृथिवी तु चतुर्थ्यन्ता नमोऽन्तः स्यात् षड़र्णकः॥ ६७॥
ततो मृदमुपादाय कृत्वा निःशर्करान्ततः।
पात्रे निदध्यात् संशुद्धप्रत्यहं पूजनाय ताम्॥ ६८॥
सद्दिने सद्गुरोर्मन्त्रौ गणेश्वरकुमारयोः।
हरद्यांश्च मनून् सप्त गृह्णीयाद् यागसिद्धये॥ ६९॥
अथार्चनं शुभे घस्रे आरभेतेष्टसिद्धये।
कृतनित्यक्रियः शुद्धः प्रदायार्घ्यं विवस्वते॥ ७०॥
मृदमादाय तोयेन सुधया मन्त्रितेन च।
आसिच्य पिण्डयेत् श्लेष्मानां पात्रे निधापयेत्॥ ७१॥
ततः कालमनुस्मृत्य कामनामपि हृद्गताम्।
लिङ्गानि पार्थिवानीह पूजयेऽमुकसंख्यया॥ ७२॥
सङ्कल्प्यैवं मृदः पिण्डादादायाल्पां मृदं सुधीः।
एकादशार्णमन्त्रेण कुर्य्याद्बालगणेश्वरम्॥ ७३॥
माया गणेश भूबीज ङेन्तो गणपतिः पुटः।
एकादशार्णमन्त्रोऽयं स्मृतो बालगणेशितुः॥ ७४॥
वराभयलसत्पाणिपद्मं बालगणेश्वरम्।
निर्माय स्थापयेत् पीठे लिङ्गानि रचयेत्ततः॥ ७५॥
हरमन्त्रेण गृह्णीयादक्षमात्राधिका मृदा।
महेश्वरस्य मन्त्रेण लिङ्गं कुर्य्यात्तया शुभम्॥ ७६॥

---

षड़र्णमाह आकाश इति। आकाशोऽहः पृथिवीशेषस्थितः स आयुतः बिन्दुयुतश्च ह्रां चतुर्थ्यन्ता पृथिवी पृथिव्यै नम इति॥ ६७॥ ६८॥

गणेश्वरकुमारयोर्मन्त्रौ वक्ष्यमाणौ हराद्यांश्च सप्तमन्त्रान् वक्ष्यमाणान्॥६९॥

विवस्वते सूर्य्यायार्घ्यं पूर्वोक्तम्॥ ७०॥

सुधया वन्हितिबीजेन मन्त्रितजलेन श्लक्ष्णामिति शेषोऽन्वयः॥ ७१—७२॥

बालगणेश्वरमन्त्रमाह मायेति। माया ह्रीं गणेशः गं भूबीजं ग्लौं गणपतये

अङ्गुष्ठमानादधिकं वितस्त्यवधिसुन्दरम् ।
पार्थिवं रचयेल्लिङ्गं न न्यूनं नाधिकञ्च तत् ॥ ७७ ॥
शूलपाणेस्तु मन्त्रेण लिङ्गं पीठे निधापयेत् ।
एवमन्यानि कुर्वीत यथा सङ्कल्पमादरात् ॥ ७८ ॥
अवशिष्टस्तदा कुर्यात् कुमारं तस्य मन्त्रतः ।
स्थापयेल्लिङ्गपंक्त्यन्ते स्वमन्त्रेणार्चयेच्च तम् ॥ ७९ ॥
वाग्वर्म कर्णविन्द्वाढ्यस्वरसो मीनकेतनः ।
कुमाराय नमोऽन्तोऽयं गुहमन्त्रो दशाक्षरः ॥ ८० ॥
मन्त्रेणावाहयेद्देवं प्रतिलिङ्गं पिनाकिनः ।
ततो लिङ्गस्थितं ध्यायेत् सुप्रसन्नं महेश्वरम् ॥ ८१ ॥
दक्षाङ्कस्थं गजपतिमुखं प्राक्शृशन् दक्षदोष्णा
वामोरुस्थां नगपतनयाङ्के गुहञ्चापरेण ।
इष्टाभीतीवरकरयुगे धारयन्निन्दुकान्ति-
रव्यादस्मांस्त्रिभुवननतो नीलकण्ठस्त्रिनेत्रः ॥ ८२ ॥
एवं ध्यात्वा पशुपतेर्मन्त्रेण स्नापयेत् शिवम् ।

---

ग्लौं गं ह्रीमिति । हरमन्त्रेण ओं नमो हरायेति । अचं विभीतकफलं ओं नमो महेश्वरायेति मन्त्रेण लिङ्गं कुर्यात् ॥ ७४—७६ ॥

लिङ्गमानमाह अङ्गुष्ठेति । अङ्गुष्ठादिद्वादशाङ्गुलान्तं यथेष्टं कुर्यात् ॥ ७७ ॥

ओं नमः शूलपाणये इति मन्त्रेण पीठे लिङ्गं स्थापयेत् ॥ ७८ ॥ ७९ ॥

कुमारमन्त्रमाह वागिति । वाक् ऐं वर्म हुं कर्णविन्द्वाढ्यः उविन्दुयुतः स्वरसः षः षुं मीनकेतनः क्लीं स्पष्टमन्यत् ॥ ८० ॥

ओं नमः पिनाकिने इति लिङ्गे शिवमावाहयेत् ॥ ८१ ॥

ध्यानमाह दक्षेति । दक्षदोष्णा दक्षिणबाहुना दक्षिणोत्सङ्गस्थं गणेशं प्राक्शृशन् अपरेण वामबाहुना वामोरुस्थितया नगपतितनयायाः पार्वत्या उत्सङ्गे वर्त्तमानं गुहं कुमारञ्च प्राक्शृशन् इष्टाभीतिवराभये कराभ्यां दक्षवामाभ्यां धारयन् ॥ ८२ ॥

शिवमन्त्रेण गन्धादीनर्पयेद्वसुरेतसि ॥ ८३ ॥
प्रागादिवामावर्त्तेन दिक्ष्वष्टौ परिपूजयेत्।
शर्वं भवं रुद्रमुग्रं भीमं पशुपतिं तथा ॥ ८४ ॥
महादेवमथैशानं क्रमात् क्षित्यादिमूर्त्तिकान्।
क्षित्यप्तेजोऽनिलाकाशयजमानेन्दुभास्कराः ॥ ८५ ॥
क्षित्यादयः स्युः शर्वाद्यांस्तत इन्द्रादिकान् यजेत्।
धूपदीपनिवेद्यानि नमस्कारप्रदक्षिणाः ॥ ८६ ॥
जपञ्च कृत्वा विसृजेत् महादेवस्य मन्त्रतः।
तारनत्यादिका ङेन्ता हराद्या मनवोऽद्रयः ॥ ८७ ॥
प्रतिलिङ्गं यजेद्देवमखिलानि सहैव वा।
पूजितौ निजमन्त्राभ्यां विसृजेद्गणराड्गुहौ ॥ ८८ ॥
धनपुत्त्रादिकामैस्तु शिवोऽर्च्यः प्रोक्तलक्षणः।
विद्याकामैश्चिन्तनीयः परशुं हरिणं वरम् ॥ ८९ ॥
ज्ञानमुद्रां दधद्धस्तैर्वटमूलमुपाश्रितः।
पुंसोर्विरुद्धयोः सन्धौ कुर्य्याल्लिङ्गानि साधकः ॥ ९० ॥

---

ओँ नमः पशुपतये इति मन्त्रेण स्नापयेत् ओँ नमः शिवायेति मन्त्रेण वह्निरेतसे शर्कारागन्धपुष्पधूपदीपनिवेद्यान्यर्पयेत् ॥ ८३ ॥

आवरणार्चनमाह प्रागादीति। क्षित्यादिमूर्त्तीन् शर्वादीन् प्रागादिषु वामावर्त्तेन पूजयेत् क्षित्यादीनाह क्षित्यप्तेन इत्यादि यथा शर्वाय क्षितिमूर्त्तये नमः ईशाने रुद्राय तेजोमूर्त्तये नमो उत्तरे उग्राय वायुमूर्त्तये नमो वायौ भीमायाकाशमूर्त्तये नमः पश्चिमे पशुपतये यजमानमूर्त्तये नमो नैरृत्ये महादेवाय चन्द्रमूर्त्तये नमो दक्षिणे ईशानाय सूर्य्यमूर्त्तये नमः आग्नेये इति ॥ ८४—८६ ॥

ओँ नमो महादेवायेति विसृजेत्। हरादिमन्त्रानाह तारेति। प्रणव नमः आद्याश्चतुर्थ्यन्ता हराद्या अद्रयः सप्तसंख्यका मन्त्राः ओँ नमो हरायेत्यादयो ज्ञेयाः एवमेकं सम्पूज्यापरं पूजयेत् अल्पकाले बहुकरणपक्षे बहूनि सहैव पूजयेत् गणेशगुहौ स्वमन्त्राभ्यामेवाखिलोपचारैः सम्पूज्य विसर्जयेत् ॥ ८७ ॥ ८८ ॥

विद्याकामस्य ध्यानमाह परशुमिति। वरज्ञानमुद्रे दधयोः परशुहरिणौ

नदीतीरद्वयानीतमृदा तानि च पूजयेत् ।
तत्र ध्येयो हरिहरः शङ्खपद्माहिशूलभृत् ॥ ९१ ॥
इन्द्रनीलशरच्चन्द्रनिभो भूषणपुञ्जवान् ।
दम्पत्योरविरोधार्थमर्द्धनारीश्वरः स्मृतः ॥ ९२ ॥
पीयूषपूर्णकलशं दधत्पाशाङ्कुशावपि ।
उच्चाटे मारणे द्वेषे ध्यातव्यः पुनरीदृशः ॥ ९३ ॥
कालीहस्ताम्बुजालम्बः शूलप्रोतद्विपश्च यः ।
मुण्डमालालसत्कण्ठोराववित्रासिताखिलः ॥ ९४ ॥
इत्थन्तु कामनाभेदात् ध्यानभेदाः प्रकीर्त्तिताः ।
पूजयेत् कार्य्यवशतो लक्षावधिसहस्रतः ॥ ९५ ॥
लक्षपार्थिवलिङ्गानां पूजनाद्भुवि मुक्तिभाक् ।
लक्षन्तु गुड़लिङ्गानां पूजनात् पार्थिवो भवेत् ॥ ९६ ॥
या नारी गुड़लिङ्गानि सहस्रं पूजयेत् सती ।
भर्त्तुः सुखमखण्डं सा प्राप्यान्ते पार्वती भवेत् ॥ ९७ ॥
नवनीतस्य लिङ्गानि सम्पूज्येष्टमवाप्नुयात् ।
भस्मनो गोमयस्यापि वालुकायास्तथा फलम् ॥ ९८ ॥
क्रीड़न्ति पृथुका भूमौ कृत्वा लिङ्गं रजोमयम् ।
पूजयन्ति विनोदेन तेऽपि स्युः क्षितिनायकाः ॥ ९९ ॥
प्रातर्गोमयलिङ्गानि नित्यं यस्त्रीणि पूजयेत् ।
बृहतीविल्वयोः पत्रैर्नैवेद्यं गुड़मर्पयेत् ॥ १०० ॥

---

वामयोः सव्यौ अर्द्धहरिहरौ ध्येयः शङ्खपद्मौ हरिहस्तयोः नागशूले हरहस्तयोः इन्द्रनीलनिभो हरिः शरचन्द्रनिभो हरः ॥ ८९—९२ ॥

उच्चाटनादिषु ध्यानमाह कालीति । शूले प्रोतः प्रवृत्तमूर्त्ती येन कार्य्यवशतः अल्पे कार्य्येऽल्पानां पूजा कार्य्यगौरवे बहूनां पूजा ॥ ९४—९९ ॥

धनप्रापकं प्रयोगमाह प्रातरिति ॥ १०० ॥

एवं मासत्रयं कुर्वन्ननल्पं लभते धनम्।
एकादशैव लिङ्गानि गोमयोत्थानि यो यजेत्॥ १०१॥
प्रातर्मध्याह्नयोः सायं निशीथे प्रतिवासरम्।
स सर्वः सम्पदोपायात् षण्मासादेवमाचरन्॥ १०२॥
एकादश यजेन्नित्यं शालिपिष्टमयानि यः।
लिङ्गानि मासमात्रेण स कल्मषचयं दहेत्॥ १०३॥
स्फाटिकं पूजितं लिङ्गमेनोनिकरनाशनम्।
सर्वकामप्रदं पुंसामुडुम्बरसमुद्भवम्॥ १०४॥
रेवाश्मजं सर्वसिद्धिप्रदं दुःखविनाशनम्।
यथा कथञ्चिल्लिङ्गस्य पूजा नित्यक्रतेष्टदा॥ १०५॥
यो यजेत् पिचुमन्दोत्थैः पत्रै गोमयजं शिवम्।
क्रुद्धं महेश्वरं ध्यायन् स पराजयते रिपून्॥ १०६॥
यो लिङ्गं पूजयेन्नित्यं शिवं भक्तिपरायणः।
मेरुतुल्योऽपि तस्याशु पापराशिर्लयं व्रजेत्॥ १०७॥
दोग्ध्रीनान्तु गवां लक्षं यो दद्याद्वेदपाठिने।
पार्थिवं योऽर्चयेल्लिङ्गं तयोर्लिङ्गार्चको वरः॥ १०८॥
चतुर्दश्यां तथाष्टम्यां पौर्णमास्यां विधुक्षये।
पयसा स्नापयेल्लिङ्गं धरादानफलं व्रजेत्॥ १०९॥
लिङ्गपूजां विधायाग्ने स्तोत्रं वा शतरुद्रियम्।
प्रजपेत्तन्मनो भूत्वा शिवे स्वं विनिवेदयेत्॥ ११०॥

---

सम्पादावहं प्रयोगमाह एकादशेति प्रत्यहं कालचतुष्टये एकादशैकादश पूजयेत्॥ १०२॥ १०३॥

एनोनिकरः पापौघस्तस्य नाशनं उडुम्बरसमुद्भवं ताम्रमयम्॥ १०४॥ १०५॥

पिचुमन्दो निम्बः॥ १०६—१०९॥

शतरुद्रियं नमस्ते रुद्रमन्यव इत्यध्यायं यजुर्वेदोक्तं स्वमात्मानं शिवे निवेदयेत्॥ ११०॥

यत्संख्याकं यजेल्लिङ्गं तन्मितं होममाचरेत् ।
आज्यान्वितैस्तिलैरग्नौ घृतैर्वा पायसेन वा ॥ १११ ॥
शिवमन्त्रेण तस्यान्ते ब्राह्मणान् भोजयेत् शतम् ।
एवं कृते समस्तेष्टसिद्धिर्भवति निश्चितम् ॥ ११२ ॥

अथ धर्मराजमन्त्रः ।

प्रणवाङ्कुशहृल्लेखां पाशः कं भौतिकेन्दुमत् ।
वैवस्वताय धर्मान्ते राजावर्णाः प्रभञ्जनः ॥ ११३ ॥
भक्तानुग्रहवर्णान्ते कृते नम उदीरितः ।
चतुर्विंशतिवर्णात्मा मन्त्रः शमनदैवतः ॥ ११४ ॥
त्रिनेत्रपञ्चबाणाद्रियुग्मर्णैरङ्गकं मनोः ।
विधाय सावधानेन मनसा चिन्तयेद् यमम् ॥ ११५ ॥
पाथः संयुतमेघसन्निभतनुः प्रद्योतनस्यात्मजो
नृणां पुण्यकृतां शुभावहवपुः पापीयसां दुःखकृत् ।
श्रीमद्दक्षिणदिक्पतिर्महिषगो भूषाभरालङ्कृतो
ध्येयः संयमनीपतिः पितृगणस्वामी यमो दण्डभृत् ॥ ११६ ॥
अभ्यस्तोऽयं सदा मन्त्रः सकलापद्विनाशनः ।
नरकप्राप्तिरुद्धः स्याद्रिपुभीतिनिवर्त्तकः ॥ ११७ ॥

---

शिवमन्त्रेण ओं नमः शिवायेति षडक्षरेण ततः सदाचारात् ॥ १११ ॥ ११२ ॥

यममन्त्रमाह प्रणवेति । प्रणवः ओं अङ्कुशः क्रों हृल्लेखा ह्रीं पाशः आं कं जलं वः भौतिकेन्दुमत् ऐं बिन्दुयुत वैं प्रभञ्जनो यः स्पष्टमन्यत् ॥ ११३ ॥

यथा ओं क्रों ह्रीं आं वैं वैवस्वताय धर्मराजाय भक्तानुग्रहकृते नमः शमनदैवतो यमदेवता कः ॥ ११४ ॥

षडङ्गमाह त्रिनेत्रेति । ओं क्रों ह्रीं हृदयाय नम इत्यादि आं वैं शिर इत्यादि ॥ ११५ ॥

ध्यानमाह पाथ इति । सजलमेघाभः प्रद्योतनो रविस्तस्य पुत्रः पुण्यवतां सौम्यः पापीयसां भीषणः ॥ ११६ ॥

सिद्धमन्त्रत्वादृष्यादि पूजाभावः ॥ ११७ ॥

अथ चित्रगुप्तमन्त्रः।

प्रणवो हृद्विचित्राय धर्मान्ते लेखकाय च।
यमवान्ते हि काधीति कारिणे पदमुच्चरेत् ॥ ११८ ॥
क्षुधा तन्द्री क्रियोल्कारी वज्रि यार्घीशसंयुता:।
यामिनीशयुता मूर्ध्नि जन्मसम्पत् पदन्ततः ॥ ११९ ॥
प्रलयं कथय द्वन्द्वं स्वाहाष्टत्रिंशदक्षरः।
मन्त्रोऽयं चित्रगुप्तस्य सर्वदुःखौघनाशनः ॥ १२० ॥
सप्तषस्ववस्वङ्गनेत्रार्णैर्मनुसम्भवैः।
प्रविधाय षडङ्गानि चिन्तयेत् कर्मलेखकम् ॥ १२१ ॥

किरीटोज्ज्वलं वस्त्रभूषाभिरामं
विचित्रासनासीनमिन्दुप्रभास्यम्।
नृणां पापपुण्यानि पत्रे लिखन्तं
भजे चित्रगुप्तं सखायं यमस्य ॥ १२२ ॥

सिद्धमन्त्रमिमं पुंसां जपतां चित्रगुप्तकः।
प्रसन्नो गणयेत् पुण्यं नैव पापं कदाचन ॥ १२३ ॥
वक्ष्याम्यथर्ववेदोक्तमासुरीविधिमुत्तमम्।
कटुके कटुकान्ते तु पत्रेऽन्ते सुभगे पदम् ॥ १२४ ॥
आनन्तसुरिरक्तेऽन्ते पदं स्याद्रक्तवाससे।

---

चित्रगुप्तमन्त्रमाह प्रणव इति ॥ ११८ ॥

क्षुधा यः तन्द्री मः क्रिया खः उल्कारी वः वज्री रः य स्वरूपं एते अर्घीश-संयुता उयुताः मूर्ध्नि यामिनीशयुता बिन्दुयुताः तेन यम्ल्वूमिति पिण्डं स्वरूप-मन्यत् ॥ ११९ ॥

मन्त्रो यथा ओं नमो विचित्राय धर्मलेखकाय यमवाहिकाधिकारिणे यमल्र्यूं जन्मसम्पत् प्रलयं कथय कथय स्वाहेति। षडङ्गमाह सप्तेति। वस्वोऽष्टौ अङ्गानि षट् ध्यानमाह किरीटेति ॥ १२०—१२२ ॥

अथर्वणस्य दुहिते केशवोघो भगी बली ॥ १२५ ॥
अघोरकर्मशब्दान्ते कारिके अमुकस्य च।
गतिं दहद्वयं कर्णः प्रविष्टस्य गदं दह ॥ १२६ ॥
दहसुप्तस्य तन्द्री नो दहयुग्मं प्रबुद्ध च।
भृगुः सबालो हृदयं दहद्वन्द्वं हनद्वयम् ॥ १२७ ॥
पचयुग्मं तावदन्ते दह तावत् पचेति च।
यावन्मे वशमायाति वर्मास्त्रे वह्निवल्लभा ॥ १२८ ॥
तारादिरासुरी मन्त्रो दशोत्तरशताक्षरः।
अङ्गिरास्य ऋषिश्छन्दो विराट् दुर्गासुरी मता ॥ १२९ ॥
देवता प्रणवो बीजं शक्तिः पावकनायिका।
हृन्नवार्णैः शिरोऽङ्गार्णैः शिखा सप्ताक्षरैर्मता ॥ १३० ॥
वर्माष्टभिर्नेत्रमीशैरस्त्रं बाणरसाक्षरैः।
हुं फट् स्वाहेति सर्वत्र पठेदङ्गेषु साधकः ॥ १३१ ॥
शरच्चन्द्रकान्तिर्वराभीतिशूलं
सृणिं हस्तपद्मैर्दधानाम्बुजस्थाम्।

---

आसुरीमन्त्रमाह कटुकेति। अनन्त आ केशवः ए बली रः भगि एयुतः॥ १२४ ॥ १२५ ॥

कर्ण उः ॥ १२६ ॥

तन्द्री मः भृगुः स सबाखी ययुतस्य मन्त्री यथा ओं कटुके कटुकपत्रे सुभगे आसुरीरक्ते रक्तवाससे अथर्वणस्य दुहिते अघोरे अघोरकर्मकारिकेऽमुकस्य गतिं दह दह उपविष्टस्य गदं दह दह सुप्तस्य मनो दह दह प्रबुद्धस्य हृदयं दह दह हन हन पच पच तावद्दह तावत्पच यावन्मे वशमायाति हुं फट् स्वाहेति। आसुरीसंज्ञा दुर्गादेवता ॥ १२७—१२९ ॥

पावकनायिका स्वाहा। षडङ्गमाह हृदिति ॥ ३० ॥

ईशैरेकादशार्णैः बाणरसाक्षरैः पञ्चषष्ट्यर्णैः हुं फट् स्वाहेति चत्वारो वर्णाः सर्वेष्वङ्गेषूक्तवर्णान्ते वाच्याः ॥ १३१ ॥

विभूषाम्बराब्यादियज्ञोपवीता-
सुदोऽथर्वपुत्री करोत्वासुरी नः ॥ १३२ ॥
अयुतं प्रजपेन्मन्त्रं जुहुयात्तद्दशांशतः ।
घृताक्तराजिकां वह्नौ ततः सिद्धो भवेन्मनुः ॥ १३३ ॥
पञ्चाङ्गामासुरी मन्त्री गृहीत्वा मन्त्रयेत् शतम् ।
तया धूपितमात्मानं यो जिघ्रेत् स वशो भवेत् ॥ १३४ ॥
मध्वक्तामासुरीं हुत्वा सहस्रं वशयेज्जगत् ।
राजिकाप्रतिमां कृत्वा दद्याद्धै मस्तकावधि ॥ १३५ ॥
अष्टोत्तरशतं खण्डान् जुहुयादसिना कृतान् ।
नार्य्याः प्रतिकृतेर्वामपादादिहवनञ्चरेत् ॥ १३६ ॥
एवं प्रकुर्य्यात् सप्ताहं राजीन्धनचितेऽनले ।
ससपत्नोऽपि स्त्यन्तं दासो जायेत मन्त्रिणः ॥ १३७ ॥
स्त्रीलिङ्गोऽहः प्रकर्त्तव्यो मन्त्रे नारीवशीकृतौ ।
कटुतैलान्वितां राजीं निम्बपत्रयुतां रिपोः ॥ १३८ ॥
नामयुग्मनुना हुत्वा ज्वरिणं कुरुते रिपुम् ।
एवं राजीं सलवणां हुत्वा स्फोटो भवेदरेः ॥ १३९ ॥
अर्कदुग्धाक्ततद्धोमात् नेत्रे नाशयते रिपोः ।
पलाशेन्धनदीप्तेऽग्नौ सप्ताहं घृतसंयुताम् ॥ १४० ॥

---

ध्यानमाह शरदिति । अभयाङ्कुशे वामयोः जयादिशक्तियुते पीठेऽरीन्द्रायुधैः पूज्या बोध्या पञ्चाङ्गमिति मूलशाखापत्रपुष्पफलान्वितम् ॥ १३२ ॥ १३४ ॥

मध्वक्तां खण्डघृतक्षौद्रयुताम् ॥ १३५ ॥ १३६ ॥

सपत्नोऽपि शत्रुरपि देहान्तपर्य्यन्तं दासः स्यात् किमुतान्यः ॥ १३७ ॥

स्त्रीलिङ्गोऽह इति । नार्य्या वशीकरणे प्रतिमा हैमादी मन्त्रे स्थितानां अमुकस्येति स्थाने देवदत्ताय उपविष्टस्येत्यादीनां षष्ठ्यन्तानां पदानां उपविष्टायाः सुमाया इत्याद्यूहो विधेयः ॥ १३८ ॥ १३९ ॥

अर्केति । अर्कदुग्धाक्तराजीहोमात् रिपुनेत्रनाशः ॥ १४० ॥

साधको राजिकां हुत्वा ब्राह्मणं वशयेद् ध्रुवम् ।
क्षत्रियन्तु गुड़ाभ्यक्तां वैश्यं दधियुताञ्च ताम् ॥ १४१ ॥
शूद्रं लवणसंयुक्तां हुत्वा तां साष्टकं शतम् ।
आसुरी समिधो हुत्वा मध्वक्तां लभते निधिम् ॥ १४२ ॥
तोयपूर्णे घटे मन्त्री राजिकापल्लवान्विते ।
आवाह्य तां पूजयित्वा शतं मूलेन मन्त्रयेत् ॥ १४३ ॥
तेनाभिषिक्तं मनुजमलक्ष्मीराधयो रुजः ।
उपसर्गाः पलायन्ते परित्यज्यातिदूरतः ॥ १४४ ॥
आसुरीकुसुमं शीतं प्रियङ्गुनागकेशरम् ।
मनःशिला च तगरमेतत् सर्वं विचूर्णितम् ॥ १४५ ॥
शताभिमन्त्रितं साध्यमूर्ध्नि क्षिप्तं वशंवदम् ।
निम्बकाष्ठसमिद्धेऽग्नावासुरीं सर्षपान्विताम् ॥ १४६ ॥
अष्टोत्तरशतं हुत्वा सप्ताहं दक्षिणामुखः ।
विदध्यादचिरात् शत्रुं सूर्य्यसूनुगृहातिथिम् ॥ १४७ ॥
किं कुर्य्यान्नृपतिः क्रुद्धः किं कुर्य्युरिपवोऽखिलाः ।
क्रुद्धः कालोऽपि किं कुर्य्यादासुरी चेदुपासिता ॥ १४८ ॥

---

गुड़युतां राजीं हुत्वा क्षत्रियं वशयेत् दध्यक्तां हुत्वा वैश्यम् ॥ १४१ ॥
होममानमष्टोत्तरशतं सर्वत्र ॥ १४२ ॥ १४३ ॥
उपसर्गा उपद्रवाः ॥ १४४ ॥
शीतं चन्दनम् ॥ १४५ ॥
वशम्वदं वशङ्गतः ॥ १४६ ॥
सूर्य्यसूनुगृहातिथिं यमातिथिं मृतमित्यर्थः ॥ १४७ ॥
किं कुर्य्यादिति चासुर्य्यामुपासितायां नृपादयो वशवर्त्तिनः स्युरित्यर्थः काऽन्यासुर्य्युपासको न पराभूयते किन्तुतान्यैः अथर्ववेदोक्तो यं सर्वोपद्रवशान्तिमन्त्रः ॥ १४८ ॥

ग्रन्थाननेकानालोक्य मन्त्रा गुप्ततमा मया ।
हिताय सुधियां ख्याता विस्तरादुपरम्यते ॥ १४९ ॥

इति मन्त्रमहोदधौ ताम्रचूड़ादिकथनं नाम
एकोनविंशस्तरङ्गः ।

---

## विंशस्तरङ्गः ।

अथ प्रवक्ष्ये यन्त्राणि गदितानि पूरारिणा ।
शुभे दिने समाराध्य स्वेष्टदेवं यतात्मवान् ॥ १ ॥
स्वप्यात्त्रिदिवसं भूमौ हविष्याशी जपे रतः ।
इदं मे लिखितं यन्त्रमिष्टन्तत् कीदृशं प्रभो ! ॥ २ ॥
इति पृष्ट्वा निजं देवं प्रत्यहं तं समर्चयेत् ।
तृतीये दिवसे रात्रौ स्वप्नं सम्प्राप्नुयान्नरः ॥ ३ ॥
सिद्धं साध्यं सुसिद्धं वा शत्रुभूतमथो इदम् ।
शत्रुपत्रं लिखेन्नैव तदा तदितरं लिखेत् ॥ ४ ॥
स्वप्नाभावेऽपि तद्धित्वा परं यन्त्रं लिखेत् सुधीः ।
अथ सम्प्रोच्यते सर्वयन्त्रसाधारणी क्रिया ॥ ५ ॥
स्नातः शुद्धाम्बरधरः पुष्पचन्दनभूषितः ।
द्रव्यैः समुदितैरुक्तास्थले यन्त्रं लिखेद्रहः ॥ ६ ॥

---

ग्रन्थविस्तरभयान्मन्त्रकथनमुपसंहरति ग्रन्थानिति ॥ १४९ ॥

इति श्रीमन्महीधरकृतायां मन्त्रमहोदधिटीकायां ताम्रचूड़ादिकथनं नामैकोनविंशस्तरङ्गः ।

षष्ठ्यन्तं साधकपदं मध्यबीजोपरि स्मृतम् ।
द्वितीयान्तं साध्यमधः पार्श्वयोः कुरु युग्मकम् ॥ ७ ॥
वियद्भृग्वौ सर्गबीजं मध्यभागादधो लिखेत् ।
ईशानादिचतुष्कोणे हंसः सोऽहमनून् पुनः ॥ ८ ॥
नेत्रे श्रोत्रे पार्श्वयुग्मे दिक्पबीजानि दिक्षु च ।
यन्त्रगायत्रिकावर्णान् प्रतिकाष्ठं त्रयं त्रयम् ॥ ९ ॥
यन्त्रराजाय शब्दान्ते विद्महे वर तत्परम् ।
प्रदाय धीमहीत्यन्ते तन्नो यन्त्रः प्रचोदयात् ॥ १० ॥
एषोक्ता यन्त्रगायत्री स्मृता सर्वेष्टसिद्धिदा ।
बहिःप्राणप्रतिष्ठाया मनुं सर्वत्र वेष्टयेत् ॥ ११ ॥
स्थलानुक्तौ भूर्जपत्रे क्षौमे वा ताड़पत्रके ।
यन्त्रं विलिख्याङ्गुलिकां बद्धा सूत्रेण वेष्टयेत् ॥ १२ ॥
लाक्षयाच्छादिते स्वर्णे रूप्ये ताम्रेऽथवा क्षिपेत् ।
मध्यबीजेन सम्पूज्य देवं मातृकयापि वा ॥ १३ ॥
संजप्य हुत्वा सम्पातसिक्तं कृत्वा नियोजयेत् ।
मूर्ध्नि वाहुगले वापि तत्तदिष्टार्थसिद्धये ॥ १४ ॥

---

यन्त्राणि वक्तुमुपक्रमते षधेति । पुरारिणा शिवेन गौरीं प्रति कथितानि पूर्वप्रक्रियामाह शुभ इति ॥ १—६ ॥

षष्ठ्यन्तमिति देवदत्तस्य इष्टं कुरु कुर्विति ॥ ७ ॥

वियदिति । वियत् हः भृगुः सः ह्सौः इति बीजं हंसः सोऽहमिति वर्णान् यन्त्रस्यासून् प्राणभूतान् कोणेषु ॥ ८ ॥

नेत्रे इई श्रोत्रे उऊ दिक्पतिबीजानीन्द्रादिबीजानि लं रं मं क्षं वं यं सं हं आं ह्रीमित्युक्तानि पूर्वादिषु प्रतिकाष्ठं प्रतिदिशम् ॥ ९ ॥

गायत्रीमाह यन्त्रेति ॥ १०—१२ ॥

मध्यबीजेन यद्देवताकं यन्त्रं तद्बीजेन तदभावे मातृकया ॥ १३ ॥

सम्पातो हुतशेषस्तेन सिक्तं भूतलिपिरूपास्त्रा जप्या सा यथा अं इं उं ऋं

यन्त्रसेवनसक्तेनोपास्या भूतलिपिः परा।
ययोपासितया सर्वं यन्त्रसिद्धिः प्रयायते ॥ १५ ॥
अथ वश्यकरं यन्त्रमुच्यते क्षिप्रसिद्धिदम्।
भस्मादिशोधिते कांस्यभाजनेऽष्टदलं लिखेत् ॥ १६ ॥
गोरोचनाकुङ्कुमाभ्यां लेखन्या जातिजातया।
कर्णिकासाध्यनामाद्यं वर्गयुक्ताष्टपत्रकम् ॥ १७ ॥
तद्वेष्टयेत् स्वराद्यष्टयुग्मपत्राम्बुजन्मना।
तद्वेष्टयेत्त्रिभिर्वृत्तैः पूजयेत् समवासरान् ॥ १८ ॥
नृपादिपुरुषाः सर्वे योषितोऽपि वशा ध्रुवम्।
मोहनाख्ये महामन्त्रे पूजिते स्युर्न संशयः ॥ १९ ॥
भूर्जादौ लिखितं लोहवेष्टितं शिरसा धृतम्।
नृपाणां दुष्टसत्त्वानां वशीकरणमुत्तमम् ॥ २० ॥

---

ह्रं एं ऐं ओं औं हं यं रं वं लं ङं कं खं घं गं ञं चं छं झं जं णं टं ठं ढं डं नं तं थं धं दं मं पं फं भं बं शं षं सं इयं द्विचत्वारिंशदर्णा भूतलिपिः तदुक्तं शारदायां—

ये च ह्रस्वा सन्धिवर्णाव्योमेरोशिर्जलन्धरा।
अन्त्यमाद्यं द्वितीयञ्च चतुर्थं मध्यमं क्रमात्।
पञ्च वर्गाक्षराणि स्युर्वान्तश्वेतेन्दुभिः सह इति।

अस्या दक्षिणामूर्त्तिर्ऋषिः गायत्रीछन्दः वर्णेश्वरीदेवता हं यं रं वं लं हृत् ङं कं खं घं गं शिरः ञं चं छं झं जं शिखा णं टं ठं ढं डं कवचं नं तं थं धं दं नेत्रं मं पं फं भं बं अस्त्रं गुदलिङ्गनाभिहृत्कण्ठभ्रूमध्यकेशान्तशिरोब्रह्मरन्ध्रेषु नवस्वराञ्यसेद्वंप्राग्दक्षिणोदक्पश्चिमवक्त्रेषु हादिपञ्चकं करयोरथ मूलकूर्पराङ्गुलिसन्धिनखपङ्क्तिषु ङादिवर्गौ णादिवर्गौ पादयोरथमूलजान्वङ्गुलिसन्धिगुल्फेषु थादिनादि उदरपार्श्वद्वयनाभिपृष्ठेषु मादिवर्गं गुह्यहृद्भ्रूमध्येषु शषसान्न्यसेत् ,एवं वर्णान्न्यस्य चन्द्रशेखरां त्रिनेत्रां वराक्षमालापुस्तकपात्रकरां सुरामत्तां ध्यायेत्। एवं ध्यात्वा लक्षं प्रजप्यायुतं तिलैर्हुत्वा सिद्धमन्त्री भवति। एवं भूतलिपिसेवया सर्वयन्त्रसिद्धिः श्रीविद्ययोराधारता च ॥ १४ ॥ १५ ॥

यन्त्रमाह अथेति। स्वरैराद्यानि युक्तानि अष्टयुग्मपत्राणि षोडशदलानि

मायासम्पुटितां साध्याभिधामादौ समालिखेत् ।
तस्या उपर्य्यधश्चापि मायाबीजं चतुष्टयम् ॥ २१ ॥
तद्वेष्टयेद्भूपुरेण रेखाद्वितयसंयुता ।
भूर्जपत्रे विलिखितं रोचनाशीतकुङ्कुमैः ॥ २२ ॥
अनामारक्तसंमिश्रं पूजितं वश्यकृन्मतम् ।
कुमारीवाड़वान्नारीः सम्भोज्य वितरेद्बलिम् ॥ २३ ॥
रक्तपुष्पान्नपललैर्वशीकरणसिद्धये ।
सर्वस्वमपहर्त्तुं वा निबद्धुं वाञ्छतीश्वरे ॥ २४ ॥
यन्त्रं बाहौ विधृत्येदं गच्छेद्भूमिपतिं नरः ।
क्रोधक्रान्तमना भूपः शान्तकोपस्तमर्चयेत् ॥ २५ ॥
बीजं सम्पुटनामेदं यन्त्रमुक्तं मनीषिभिः ।
दक्षिणोत्तरगं कुर्य्यात् रेखाद्वितयमुत्तमम् ॥ २६ ॥
तन्मध्ये विलिखेत् साध्यं तारपञ्चालयापुटम् ।
रेखाग्रयोः स्थिते कोष्ठद्वये सर्गिणमन्तिमम् ॥ २७ ॥
रेखाद्वयोः पर्य्यधश्च कोष्ठानां त्रितयं लिखेत् ।
मध्यकोष्ठे ससर्गं चं श्रीबीजं पार्श्वकोष्ठयोः ॥ २८ ॥

---

यस्वेष्टयेनान्वुजन्मना पद्मेन तदष्टदलं वेष्टयेत् खोडानि ईमरीप्यतावावि चत्र मातृकादेवता ॥ १९—२० ॥

द्वितीयमाह मायेति । रेखाद्वयकृतेन भूपुरेण चतुष्कोणेन । शीतं चन्दनम् ॥ २१ ॥ २२ ॥

वाड़वान् विप्रान् ॥ २३ ॥

पललं मांसम् ॥ २४ ॥

तृतीयमाह दक्षिणेति । दक्षिणोत्तरगं रेखाद्वयं कृत्वा मध्ये नाम विलिखेत् ॥ २५ ॥ २६ ॥

तारपञ्चालयापुटं प्रणवश्रीपुटितं श्रीं श्रीं देवदत्त श्रीं श्रीं इति ॥ २७ ॥

एतद्रोचनया भूर्जे लिखित्वा वह्निना दहेत्।
शरावसम्पुटस्थन्ततो भस्म समुद्धरेत् ॥ २८ ॥
दुग्धेन सह पीतं तत् स्त्रासिवश्यकरं परम्।
दिक्षुमाचतुष्कालं साध्यं षट्कोणमध्यतः ॥ ३० ॥
कोणेषु कोणमध्येषु मायाबीजं समालिखेत्।
रोचनाकुङ्कुमाभ्यान्तु भूर्जपत्रे मनोहरे ॥ ३१ ॥
तत् शरावस्थितं पूज्यं जपेन्मायां तदग्रतः।
शरावात्तत् समादाय बध्वा मूर्द्धनि मानवः ॥ ३२ ॥
अग्नितोयादिदिव्येषु शुचिर्द्रोहादिवर्जितः।
जयमाप्नोति तद्रावौ कर्त्तापि तत्प्रभावतः ॥ ३३ ॥
दिव्यस्तम्भनसंज्ञञ्च यन्त्रमुत्तमसौरितम्।
मायाविसर्गिसार्णाभ्यां पुटितं नाममध्यतः ॥ ३४ ॥
दलेष्वष्टसु सर्गाढ्यौ सौ मायापुटितौ लिखेत्।
चतुरस्रेण तत् पद्मं वेष्टयेद्भूर्जपत्रके ॥ ३५ ॥
रोचनाकुङ्कुमाभ्यान्तु लिखित्वा तच्छरावयोः।
प्रक्षिप्य पूजयेत् सप्तरात्रं मायां जपेन्नरः ॥ ३६ ॥
राजमोहननामेदं यन्त्रं नृपरुषं हरेत्।
क्रुद्धाज्जिघांसोर्नृपतेरात्मरक्षाविधित्सया ॥ ३७ ॥

---

रेखाद्वयोः पर्य्यधय कोष्ठद्वये श्रीं च: श्रीमिति रेखाद्वकोष्ठयोरन्तिमं चं सर्गिणं विसर्गयुतं चः शरावयोर्मध्ये दहेत् अत्र श्रीर्देवता ॥ २८ ॥ २९ ॥

चतुर्थं दिव्यस्तम्भनमाह दिक्ष्विति। पापकर्त्तापि दिव्ययन्त्रधारणाज्जयति गौरी देवता ॥ ३०—३३ ॥

राजमोहनं पद्ममाह मायेति। अष्टदलं कृत्वा मध्ये ह्रीं सः देवदत्त सः ह्रीमिति विलिख्य दलेषु ह्रीं सः सः ह्रीमिति लिखेत् उपरि भूपुरं गौरी देवता ॥ ३४—३६ ॥

मृत्युं जयाभिधं यन्त्रं पद्ममर्कदलं लिखेत् ।
कर्णिकायां चतुष्कोणे लिखेन्नाम क्रियान्वितम् ॥ ३८ ॥
सप्तरेखात्मकं कार्य्यं तच्चतुष्कोणमुत्तमम् ।
ईशादिद्वादशदलेष्वक्लीवस्वरसंयुतान् ॥ ३९ ॥
कर्णान् विलिख्य तत्पद्मं चतुरस्रेण वेष्टयेत् ।
चतुरस्रस्य कोणेषु त्रिशूलानि समालिखेत् ॥ ४० ॥
भूर्जपत्रद्वये चैतत् यन्त्रं कृत्वा पृथक् पुनः ।
यन्त्रद्वयपुटं कृत्वा स्थापयेत् कावुदङ्मुखः ॥ ४१ ॥
तस्योपरि शिलां न्यस्येत्तत्स्थितो मातृकां जपेत् ।
एवं कृते साधकः स्याद्गीतत्रासो यमादपि ॥ ४२ ॥
सर्वरोगसमूहाच्च किं पुनः राजमण्डलात् ।
लिखेच्चतुर्दलं पद्मं साध्याख्यायुतकर्णिकम् ॥ ४३ ॥
रोचनाकुङ्कुमाभ्यान्तु भूर्जे मायायुतच्छदम् ।
तद्यन्त्रं पयसि न्यस्य विवादं वादिनाचरेत् ॥ ४४ ॥
जयमाप्नोऽति गदितं विवादविजयाभिधम् ।
धनिके याचति द्रव्यं दानाशक्तोऽधमर्णके ॥ ४५ ॥
धनिकस्य वशीकृत्यै यन्त्रं भूर्जदले लिखेत् ।
रोचनाकुङ्कुमाभ्यान्तु षट्कोणं साध्यकर्णिकम् ॥ ४६ ॥
कोणाग्रे कोणमध्येषु कामान् द्वादश संलिखेत् ।
तद्वृत्तेन च संवेष्ट्य मायया वेष्टयेद्बहिः ॥ ४७ ॥

---

मृत्युञ्जयं पद्ममाह मृदादिति । सप्तरेखात्मकचतुःकोणेऽमुकस्य मृत्युं वारये-दिति विलिख्योपरि द्वादशदले ऋ ॠ ऌ ॡ ळ रहितान् स्वरान् सयुतान् कृत्वा त्रिशूलाङ्कितकोणेन चतुरस्रेण वेष्टयेत् । मातृकादेवताद्वये यन्त्रद्वयं कृत्वा संवीज्य की पृथिव्यां निखनेत् मातृका देवता ॥ ३७—४२ ॥

विवादे जयावहं यन्त्रमाह लिखेदिति गौरी देवता ॥ ४३ ॥ ४४ ॥

पुनर्वृत्तेन संवेष्ट्य पूजयेत् सप्तवासरान्।
पठेत् सप्तशतां नित्यमन्त्रे होमं शताधिकम्॥ ४८॥
कृत्वा सम्भोजयेत् कन्यां धरेद्यन्त्रं गलेऽंसके।
एवं धनी वशमितो न याचति ददात्यपि॥ ४९॥
दुष्टा राजसमीपस्थाः पैशुन्यं कुर्वते यदा।
तदा यन्त्रं प्रकुर्वीत दुष्टमोहनसंज्ञकम्॥ ५०॥
लिखेदष्टदलं पद्मं भूर्जे चक्रीवतोऽसृजा।
कर्णिकागतसाध्याख्यं मायायुक्तककुब्दलम्॥ ५१॥
सर्गान्तभृगुयुक् कोणं वृत्तद्वितयवेष्टितम्।
कृतासुस्थापनं यन्त्रं सम्पूज्य पयसि क्षिपेत्॥ ५२॥
एकविंशतिरात्रेण दुष्टाः स्युर्वशवर्त्तिनः।
चतुरस्रे विषानन्तं गतं मायापुटं भृगुम्॥ ५३॥
लिखित्वा तस्य कोणेषु ककुप्स्वपि दलाष्टकम्।
रोहरोधस्तम्भक्षोभदिग्दलेषु क्रमाल्लिखेत्॥ ५४॥
कोणेषु सर्गिचरमं भूर्जे रोचनयोत्तमे।
शरावद्वयमध्यस्थं मध्ये साध्याभिधान्वितम्॥ ५५॥
पूजयेद्गन्धपुष्पाद्यैर्दिक्पतिभ्यो बलिं हरेत्।
व्यवहारे विवादे च वशकृद्राजवेश्मनि॥ ५६॥

---

धनिकवश्यकरमष्टममाह धनिक इति। भूर्जदले भूर्जे गौरी देवता॥ ४५—४९॥

दुष्टमोहनं नवममाह दुष्टा इति। भूर्जे खररक्तेन साध्यगर्भमष्टदलं विलिख्य दिग्दलेषु मायां विदिग्दलेषु सः इति विलिख्य वृत्तद्वयेन संवेष्ट्य प्राणान् संस्थाप्य सम्पूज्य दुग्धक्षिप्तं वश्यकरं गौरी देवता। जयदं दशममाह चतुरस्र इति। विषं मः अनन्तः आः भृगुः सः चतुर्दले क्लीं वा क्लीमिति विलिख्य तदुपर्यष्टदलं कृत्वा दिक्पत्रेषु रोहरोधस्तम्भक्षोभ इति वर्णद्वन्द्वं विदिक्पत्रेषु च इति चरमः यः गौरी देवता॥ ५०—५६॥

यन्त्रमेतत् समाख्यातं जपदं मानवर्द्धनम् ।
यावज्जीवं वशीकर्त्तुं नरं यन्त्रं तथोच्यते ॥ ५७ ॥
घनामास्टक्गजमदरोचनालक्तकैर्लिखेत् ।
भूर्जे जातीयलेखन्या चतुरस्रं मनोहरम् ॥ ५८ ॥
तत्राद्यपंक्तौ संलेख्यं मायाबीजस्य सप्तकम् ।
द्वितीयायां सृणिर्मायाकामौ नामगणेट् पुटम् ॥ ५९ ॥
तृतीयायां सृणिपुटा मायया सम्पुटः स्मरः ।
लेख्यं पंक्तौ चतुर्थ्यान्तु मायाबीजचतुष्टयम् ॥ ६० ॥
चतुरस्राद्बहिर्दिक्षु दशबीजा गणेशितुः ।
विलेख्या दक्षिणां हित्वा कुर्य्याद्भूयोऽपि भूपुरम् ॥ ६१ ॥
एतद्यन्त्रं गणपतेरुदरान्तः प्रविन्यसेत् ।
विनिर्मितस्य सुक्षेत्रादात्तया क्षणया मृदा ॥ ६२ ॥
पञ्चोपचारैर्गणपं सम्पूज्यामुं मनुं पठेत् ।
देवदेव ! गणाध्यक्ष ! सुरासुरनमस्कृत ! ॥ ६३ ॥
देव ! दत्तं मया यन्त्रं यावज्जीवं कुरु प्रभो ! ।
हस्तमात्रे धरागर्त्ते तं विन्यस्य गणाधिपम् ।
सम्पूरयेत् मृदा गर्त्तमेवं वश्यो भवेन्नरः ॥ ६४ ॥
पद्मं चतुर्दलं कृत्वा साध्याख्या नेत्रकर्णिकम् ।
तारो नम इमान् वर्णान् लिखेद्दलचतुष्टये ॥ ६५ ॥

---

गणेशयन्त्रमेकादशमाह यावदिति । चतुरस्रं कृत्वा मध्ये पङ्क्तिचतुष्टयं कार्य्यं आद्यायां मायासप्तकं द्वितीयायां क्रौं ह्रीं क्लीं गं देवदत्तं वशय गं इति । तृतीयायां क्रौं ह्रीं क्रौं ह्रीं क्लीं ह्रीमिति । चतुर्थ्यां मायाचतुष्कं चतुरस्राद्बहिर्दक्षिणदिशं हित्वा तिसृषु दिक्षु गं बीजस्य दशकं दशकं तदुपर्य्यपि चतुष्कोणं एतद्यन्त्रं क्षणमृत्कृतगणेशोदरे न्यस्य तं सम्पूज्य देवदेवेति सम्प्रार्थ्य हस्तमात्रं गर्त्तं पूरयेदिति गणपतिर्देवता ॥ ५७—६४ ॥

अजिते इत्यपि लिखेद्दक्षिणोत्तरपत्रयोः।
भूर्जे गोरोचना चन्द्रे केशरागुरुभिः पुनः॥ ६६॥
त्रिदिनं नियतो यन्त्रं सम्पूज्याह्निचतुर्थके।
एकं सम्भोज्य विप्रेन्द्रं यन्त्रं बाहौ विधारयेत्॥ ६७॥
हैमादिसंस्थितं भूयो वशकृद्दर्शनादपि।
चतुर्दलान्तर्विलिखेत् भृत्यनामक्रियान्वितम्॥ ६८॥
दलेषु मायाबीजानि भूर्जे रोचनया सुधीः।
दध्नि क्षिप्ते तु तद्यन्त्रे भृत्य आज्ञाकरो भवेत्॥ ६९॥
चतुरस्रे लिखेत् साध्यनामार्णान् गिरिजायुतान्।
भूर्जे रोचनया मन्त्री दुष्टप्रभुवशीकृती॥ ७०॥
शत्रुप्रतिकृते यन्त्रं हृदये तत् प्रविन्यसेत्।
कृताया राजिकापिष्टैः शत्रुपादरजोयुतैः॥ ७१॥
प्रतिमां पूजयित्वा तां चुल्लीपार्श्वे निखानयेत्।
अजासृग्युक्तभक्तेन कृष्णभूते बलिं हरेत्॥ ७२॥
महाकालाय दिग्पेभ्योऽरुणपुष्पाज्यसंयुतम्।
एवं कृते भवेद्वश्यो नृपो दुष्टोऽपि तत्क्षणात्॥ ७३॥
दौर्भाग्यशमनं भर्त्तृवशकृद्यन्त्रमुच्यते।
नारीणामीप्सितप्राप्तिकरं सौभाग्यवर्द्धनम्॥ ७४॥

---

नृपवश्यकरं द्वादशमाह पद्मनिति। चतुर्दले इयुतं नाम ओं नम इति प्रतिदलं अजिते इति दक्षिणोत्तरदलयोरधिकं अजिता देवता॥ ६५—६७॥

भृत्यवश्यकरं त्रयोदशमाह चतुर्दलेति। क्रिया वशयेति तद्युतं गौरी देवता॥ ६८॥ ६९॥

दुष्टवश्यकरं चतुर्दशमाह चतुरस्र इति। मायाबीजगतान्नामार्णांश्चतुरस्रे विलिख्य दुष्टपादरजोयुक्तराजिकापिष्टकृततत्प्रतिमायां हृदि न्यस्य तां चुल्ली-निखाय कृष्ण चतुर्दश्यां महाकालायारुणपुष्पाज्येन युक्तं अजाय। रक्तयुक्त-भक्तेन बलिं दद्यात् उक्तफलसिद्धिः गौरी देवता॥ ७०—७२॥

कुर्य्यादष्टदलं पद्मं चतुष्कोणाढ्यकर्णिकम् ।
चतुष्कोणे लिखेन्मायाबीजानां त्रितयं शुभम् ॥ ७५ ॥
ततः स्वनःथनामार्णान्मायाबीजत्रयं पुनः ।
दिक्पत्रे त्रिगिरिस्तुतां विदिक्पत्रेष्वथैकशः ॥ ७६ ॥
भूर्जे सितत्रयोदश्यां रोचनानाभिकुङ्कुमैः ।
विलिख्योत्तरदिग्वक्त्रो निश्यर्चेत् सप्तवासरान् ॥ ७७ ॥
तदन्ते भोजयेत् सप्त पतिपुत्रान्विताः स्त्रियः ।
ललिता प्रीतये पश्चात् यन्त्रं धातुगतं धृतम् ॥ ७८ ॥
रूपसौभाग्यसम्पत्तिकरं प्रियवशंदम् ।
सम्प्रोक्तं ललितायन्त्रं कामिनीनामभीष्टदम् ॥ ७९ ॥
गोरोचनाकुङ्कुमाभ्यां भूर्जेऽष्टदलमालिखेत् ।
साकारपुटितं नाम कर्णिकायां दलेऽद्रिजा ॥ ८० ॥
दिनद्वयं निशाखिष्टा भोजयित्वाङ्गनात्रयम् ।
कण्ठे धृतं भर्तृवश्यकारकं यन्त्रमुत्तमम् ॥ ८१ ॥
भृग्वाकाशविधिच्माखवह्नीन् शान्तीन्दुभूषितान् ।
लिखेदष्टारपद्मस्य कर्णिकायां दलेष्वपि ॥ ८२ ॥
गोरोचनाचन्दनाभ्यां भूर्जेऽभ्यर्चेद्दिनत्रयम् ।
धृतं हेमगतं कण्ठे नार्य्या वाह्नोर्नरेण वा ॥ ८३ ॥

---

ललितायन्त्रं पञ्चदशभिराह दौर्भाग्येति । शुक्लत्रयोदश्यां भूर्जे रोचनाकस्तूरीकुङ्कुमैश्चतुःकोणगर्भमष्टदलं कृत्वा मायात्रयपुटितं भर्तृनामान्तर्विलिख्य दिक्पत्रेषु मायात्रयं कोणदले एकां कृत्वोत्तरदिग्वक्त्रो रात्रावर्चेत् ललिता देवता। ७४—७९ ॥

षोडशभिराह गोरोचनेति । सा देवदत्त सा इति मध्ये पत्रेषु ह्रीं गौरी देवता ॥ ८० ॥ ८१ ॥

बीजत्रयं सप्तदशभिराह भृग्विति । भृगुः सः आकाशो हः विधिः कः

सौभाग्यदं वीजयन्त्रं प्रोक्तं दौर्भाग्यनाशनम् ।
चतुर्दलं लिखेद्भूर्जे खाष्टगयुक्रक्तचन्दनैः ॥ ८४ ॥
कर्णिकायां साध्यनाम क्रोधवीजदलेष्वपि ।
तद्यन्त्रं पूजयित्वाज्ये चिप्तमाव्रष्टिकृद्भवेत् ॥ ८५ ॥
षट्कोणे विलिखेन्नाम वाङ्मनोभवमध्यतः ।
गं कोणेषु भृगुरौ सर्गी भूर्जे रोचनयार्पितम् ॥ ८६ ॥
पूजितं त्रिपुरायन्त्रं घृतान्तर्विनिवेशितम् ।
इष्टस्याकर्षणन्तेन भवेत् सप्ताहमध्यतः ॥ ८७ ॥
हरिद्रया लिखेदष्टदलं वह्न्यस्रकर्णिकम् ।
शिलायां मध्यतो नाम भूवीजं दलमध्यतः ॥ ८८ ॥
तदभ्यर्च्य पिधायाथ शिलया निखनेत् चितौ ।
वादे विवादे जायेत प्रतिवाद्यास्यमुद्रणम् ॥ ८९ ॥
वृत्ते नाम समालिख्य क्रियाकर्मसमन्वितम् ।
दिच्चु वृत्ताद्बहिर्लेख्यं वकाराणाञ्चतुष्टयम् ॥ ९० ॥
वेष्टितं चतुरस्रेण यन्त्रमेतत् सुसाधितम् ।
गोरोचनाचन्दनाभ्यां भूर्जे लिखितमुत्तमम् ॥ ९१ ॥
एतद्यन्त्रं वृतं लोहत्रयेण भुजया धृतम् ।
निवर्त्तयेदग्निभयं सदनेऽपि च संस्थितम् ॥ ९२ ॥

---

भालः खं हः वह्नी रः एतान् शान्तीन्दुविभूषितान् ईंविन्दुयुतान् तेन षट् कूटं सहकलह्रीमिति सुन्दरी देवता ॥ ८२ ॥ ८३ ॥

आकर्षणयन्त्रमष्टादशमाह चतुर्दलमिति । खदधिरयुक्तरक्तचन्दनैः क्रोधवीजं हुं रुद्री देवता ॥ ८४ ॥ ८५ ॥

त्रिपुरायन्त्रमेकोनविंशमाह षट्कोण इति । वाक् ऐं मनोभवः क्लीं भृगुः सः श्री सर्गी सः त्रिपुरा देवता ॥ ८६ ॥ ८७ ॥

मुखमुद्रणं विंशमाह हरिद्रयेति । हरिद्रया शिलायां त्रिकोणमध्यमष्टदलं

मायापुटितसङ्कारं नामकर्मयुतं लिखेत् ।
चतुर्दलेऽब्जे लेखन्या वायसच्छदजातयः ॥ ९३ ॥
दलेष्वपि तथा लेख्यं तिरोधिच्चतजेन तत् ।
निशि सम्पूज्य तद्यन्त्रमोदनं विनिवेदयेत् ॥ ९४ ॥
अजारुधिरसंयुक्तं नारीमेकाञ्च भोजयेत् ।
ततः श्मशाने शवस्य गेहे वा शून्यमन्दिरे ॥ ९५ ॥
निखातं तत् द्विषोर्द्वेषं जनयेदचिराद् ध्रुवम् ।
विद्वेषणमिदं यन्त्रमथो मारणमुच्यते ॥ ९६ ॥
लिखेदष्टदले पद्मे नाम वर्मास्त्रसम्पुटम् ।
दिग्दलेष्वथ वर्मैव विदिग्दलगमस्त्रकम् ॥ ९७ ॥
वृत्तेन पद्मं संवेष्ट्य वर्मणा वेष्टयेच्च तत् ।
श्मशानाङ्गारमेषासृग्विषैः काकच्छदोत्थया ॥ ९८ ॥
लेखन्या लिखितं यन्त्रं कपालनरसम्भवे ।
संच्छाद्य भस्मना तस्योपरि प्रज्वालयेद्वसुम् ॥ ९९ ॥
प्रत्यहं प्रदहेत् स्तोकं स्तोकं विंशद्दिनावधि ।
विंशेऽह्न्यखिलं दग्धं शत्रोर्लोकान्तरप्रदम् ॥ १०० ॥

---

कृत्वा त्रिकोणे नाम दलेषु ग्लौं कृत्वा सम्पूज्य शिलान्तरेण पिधाय निखनेदित्युक्तफलसिद्धिः भूमिर्देवता । अग्निभयहरमेकविंशतिमाह वृत्त इति क्रियेति । अमुष्याग्निभयं हरेति भुजया बाहुना मातृका देवता ॥ ८८—९२ ॥

विद्वेषणं द्वाविंशमाह मायेति । भूर्जे रिपुरुधिरेण काकपक्षलेखन्या चतुर्दले ह्रीं च ं ह्रीं अमुकौ द्वेषयेति मध्ये दलेष्वपि विलिख्य रात्रौ सम्पूज्य मेषीरुधिरयुक्तमोदनं निवेद्यैकनारीं सम्पूज्य यन्त्रे शत्रोः सद्मनि श्मशानादौ निखाते द्वेषसिद्धिः गौरी देवता । मारणं त्रयोविंशमाह लिखेदिति । चिताङ्गारमेषरक्तविषैः काकपक्षलेखन्या नरकपालेऽष्टदलान्तः हुं फट् देवदत्त फट् हुमिति दिग्दलेषु हुं कोणदलेषु फट् ततः पद्मं वृत्तेन तच्च वर्मणा वेष्ट्य सम्पूज्य भस्मनि प्रक्षिप्योपरि स्वल्पमग्निं प्रत्यहं प्रज्वालयेद् यथा दिनविंशत्या सर्वकपालस्य दाहः एवमुक्तफलसिद्धिः अस्त्रदेवता ॥ ९३—१०० ॥

चतुर्दले लिखेन्नाम दलगं सर्गिमारुतम्।
उलूककाकरक्तेन भूर्जे भूतदिने निशि ॥ १०१ ॥
रक्तवस्त्रधरो रक्तपुष्पमाल्यानुलेपनः।
लिखित्वा पूजयेद्यन्त्रं रक्तैः पुष्पैश्च चन्दनैः ॥ १०२ ॥
कुमारीं भोजयेन्नित्यं दद्यात्तस्यै च दक्षिणाम्।
एवं विंशतिघस्रान्तं विधाय चरमे दिने ॥ १०३ ॥
यन्त्रं तत् खण्डशः कृत्वा क्षिपेदुच्छिष्ट ओदने।
दत्ते तस्मिन् वायसेभ्य उच्चाटो जायते रिपोः ॥ १०४ ॥
रोचनामृगकर्पूरकुङ्कुमैः शोभने दिने।
भूर्जे प्रविलिखेद्यन्त्रं लेखन्या जातिजातया ॥ १०५ ॥
प्राक्प्रत्यक्दक्षिणोदक्च कुर्याद्रेखाष्टकं समम्।
एवमेकोनपञ्चाशज्जायन्ते कोष्ठकास्ततः ॥ १०६ ॥
दिग्गतान्तिमपङ्क्तिस्थान् चतुर्विंशतिवर्णकान्।
अकारादिजकारान्तान् लिखेच्चन्द्रसमन्वितान् ॥ १०७ ॥
तदन्तर्गतपङ्क्तिस्थान् झादिभान्तांश्च षोड़श।
तदन्तस्थान्मादिसान्तान् हकारं शिष्टकोष्ठके ॥ १०८ ॥
रेखाग्रेषु त्रिशूलानि कुर्वीत रदसंख्यया।
उपर्य्यधस्त्रिशूलान्तर्ह्रींलेखा सप्तकं लिखेत् ॥ १०९ ॥
एवं विलिख्य तद्यन्त्रं पूजयेद्दिवसत्रयम्।

---

उच्चाटनं चतुर्विंशमाह चतुर्दल इति सार्धत्रयः ॥ १०१—१०१ ॥

चरमेऽन्त्ये तस्मिन् यन्त्रखण्डयुक्तोच्छिष्टौदने काकेभ्यो दत्ते, फलं वायुर्देवता ॥ १०४ ॥

शान्तिकरं पञ्चविंशमाह रोचनेति। भूर्जे रोचनादिभिः पूर्वापरायतं दक्षिणोत्तरायतं च रेखाष्टकं कृत्वा तत्र बहिः कोष्ठपंक्तिष्वीशानादि षादिजान्तान् तदन्तःपंक्तिषु झादिभान्तान् तदन्तः पंक्तिषु मादिसान्तान् मध्ये ह्रं विलिख्य रेखा-

चण्डीपाठकरो विप्रभोजको भूमिशायकः ॥ ११० ॥
ततो लोहत्रयाविष्टं धारयेद्दोष्णि वा गले ।
उपसर्गाः कलिकृत्याः शमं यान्ति विधारणात् ॥ १११ ॥
पूर्वोक्तविधिना कुर्यात् पद्ममष्टदलान्वितम् ।
मध्ये नाम्ना युतं सर्गि भृगुणाष्टदलेष्वपि ॥ ११२ ॥
पूर्ववत् पूजितं चैतद्बद्धं कण्ठे भुजे शिशोः ।
शाकिनीभूतवेतालग्रहान् सद्यो निवर्त्तयेत् ॥ ११३ ॥
धत्तूररसतो लेख्यं पितृकान्तारवाससि ।
कृष्णे वसुतिथौ भूते पुटितं भूपुरद्वयम् ॥ ११४ ॥
कोणान्तराले कोणेषु रेफषोड़शकं लिखेत् ।
दिक्षु रेफचतुष्कोणयुतं नामापि मध्यतः ॥ ११५ ॥
पूजितं तत् पितृवने निखातं ज्वरशान्तिकृत् ।
भूर्जे सुगन्धैर्विलिखेत् पद्ममष्टदलान्वितम् ॥ ११६ ॥
नामान्वितं कर्णिकायां दलेष्वजपया युतम् ।
पूजितं विधृतं बाहौ सर्पभीतिनिवारकम् ॥ ११७ ॥

---

यानि सन्त्यर्ध्वं त्रिशूलाकाराणि यन्त्रपूर्वभागे पश्चिमे त्रिशूलमध्यभागेषु समस्त ह्रीं सप्तकं कृत्वोक्तविधिना पूजितं दोष्णि बाहौ धृतमुक्तफलदं मातृका देवता ॥ १०५—१११ ॥

शाकिनी निवर्त्तकं षड्विंशमाह पूर्वोक्तेति पूर्वोक्तविधिना रोचनादिभिर्भूर्जे जातीलेखन्या भृगुणा सकारेण ॥ ११२ ॥

पूर्ववदिति दिनत्रयं चण्डीपाठादिना मातृका देवता ॥ ११३ ॥

ज्वरहरं सप्तविंशमाह धत्तूरेति । कृष्णाष्टम्यां कृष्णचतुर्दश्यां वा श्मशानवस्त्रे धत्तूररसेन परस्परव्यतिभिन्नं चतुःकोणद्वयं कृत्वा द्वष्टसु कोणेषु तन्मध्येऽपि रमिति विलिख्य मध्ये रं वेष्टितं नाम कृत्वा पूजितं श्मशाने निखातं ज्वरहरं अग्निर्देवता ॥ ११४ ॥ ११५ ॥

सर्पभयहरमष्टाविंशमाह भूर्ज इति । रोचनादिना भूर्जेऽष्टदलं कृत्वा मध्ये नाम दलेषु हंस इति लिखेत् । हंसो देवता ॥ ११६ ॥ ११७ ॥

रोचनाहिमकर्पूरकुङ्कुमैः छद्मना लिखेत्।
षोड़शारं स्वरैर्युक्तं दलं मायाद्यकर्णिकम्॥ ११८॥
तस्योपरिष्टात् द्वात्रिंशद्दलं व्यञ्जनयुक्दलम्।
पद्मं दिग्विदिशाहचं युक्तच्छापुरवेष्टितम्॥ ११९॥
एतद्यन्त्रं कांस्यपात्रे लिखितं सप्तवासरान्।
पूजितं भूर्जलिखितं धृतं वा बन्धमोचकृत्॥ १२०॥
पूर्वोक्ताखिलयन्त्राणां सिद्धिकामेन मन्त्रिणा।
उपास्या मातृका देवी यद्वा भूतलिपिः परा॥ १२१॥
यद्वोपास्यो लेखकाले स्वर्णाकर्षणभैरवः।
प्रणवो वाग्भवं कामशक्ती दीर्घत्रयान्विते॥ १२२॥
सर्गी भृगुर्भया सेन्दुरापदुद्धारणाय च।
अजामलान्ते वद्धाय हुतो लोकेश्वरस्तथा॥ १२३॥
स्वर्णाकर्षणभैरान्ते दीर्घो वालः प्रभञ्जनः।
मम दारिद्र्यविद्वेषणायान्ते प्रणवो रमा॥ १२४॥
ङेन्तो महाभैरवोऽन्ते हृदयं कीर्त्तितो मनुः।
अष्टपञ्चाशदर्णाद्यो मुनिरस्य चतुर्मुखः॥ १२५॥

---

बन्धमोचकृदेकोनविंशमाह रोचनेति। हिमं चन्दनं कांस्यपात्रे रोचनादिना षोड़शदले माया दलेषु स्वरान् तदुपरि कादिसान्तार्णयुक्तम् द्वात्रिंशद्दलं तदुपरि कोणेषु हचयुतं चतुःकोणं कृत्वा सप्ताहं पूजितं बन्धहरम्॥ ११८—१२१॥

उक्तयन्त्रसिद्धये मातृकाभूतलिपिभैरवाणामन्यतमसुपास्यं तत्र हं उक्तं। भैरवमाह प्रणव इति॥ १२२॥

भृगुः सः भया वः॥ १२३॥

दीर्घो वालः वा प्रभञ्जनो यः रमा श्री॥ १२४॥

हृदयं नमः मन्त्रो यथा ओं ऐं क्लां क्लीं क्लूं ह्रां ह्रीं ह्रूं सः वं आपदुद्धारणाय अजामलवद्धाय लोकेश्वराय स्वर्णाकर्षणभैरवाय मम दारिद्र्यविद्वेषणाय ओं श्रीं महाभैरवाय नम इति॥ १२५॥

पङ्क्तिश्छन्दो देवतोक्ता स्वर्णाकर्षणभैरवः ।
नन्दाष्टार्कं नवाशा दिक्वर्णैरङ्गं मनोः स्मृतम् ॥ १२६ ॥
अथवा कामशक्तिभ्यां दीर्घाढ्याभ्यां षड़ङ्गकम् ।
पारिजातद्रुकान्तारस्थिते माणिक्यमण्डपे ॥ १२७ ॥
सिंहासनगतं ध्यायेद्भैरवं स्वर्णदायिनम् ।
गाङ्गेयपात्रं डमरुं त्रिशूलं वरं करैः सन्दधतं त्रिनेत्रम् ।
देव्या युतं तप्तसुवर्णवर्णं स्वर्णाकृषं भैरवमाश्रयामः ॥ १२८ ॥
लक्षं जपेद्दशांशेन पायसैर्जुहुयात् सुधीः ।
शैवे पीठे यजेद्देवमङ्गदिक्पालहेतिभिः ॥ १२९ ॥
सिद्धं मनुं जपेन्नित्यं त्रिशतीं मण्डलावधि ।
दारिद्र्यं दूरमुत्क्षिप्य जायते धनदोपमः ॥ १३० ॥
जपादिभिर्मनौ सिद्धे यन्त्रेभ्यः सिद्धिमाप्नुयात् ।
सुवर्णमेधते गेहे नैवारेः स्यात् पराभवः ॥ १३१ ॥

इति मन्त्रमहोदधौ यन्त्रकथनं नाम विंशस्तरङ्गः ।

---

षड़ङ्गमाह नन्देति । नन्दा नव आशा दश अथवेति क्लां क्रां हृत् क्लीं शीं शिर इत्यादि । ध्यानमाह पारिजातेति । पारिजातवनमध्यगते माणिक्यमण्डपे हेमासनगं ध्यायेत् । गाङ्गेयपात्रं हेमभाजनं वरश्च दक्षयोः त्रिशूलडमरू वामयोः ॥ १२६—१२८ ॥

हेतयो वज्राद्याः ॥ १२९ ॥

मण्डलमेकोनपञ्चाशद्दिनानि ॥ १३० ॥

एधते वर्द्धते अरेः शत्रोः सकाशात् पराभवो न स्यात् ॥ १३१ ॥

इति नौकासमाख्यायां श्रीमन्त्रमहोदधिटीकायां
यन्त्रकथनं नाम विंशस्तरङ्गः ॥ २० ॥

# एकविंशस्तरङ्गः ।

नित्यपूजाविधिं सर्वदेवसाधारणं ब्रुवे ।
ब्राह्मे मूहूर्त्ते उत्थाय कृत्वा शौचादिकं सुधीः ॥ १ ॥
परिधायाम्बरं शुद्धं मन्त्रस्नानं विधाय च ।
प्रविश्य देवतागारं कुर्य्यात् सम्मार्जनादिकम् ॥ २ ॥
माङ्गल्यारत्रिकं कृत्वा निर्माल्यमपसारयेत् ।
दद्यात् पुष्पाञ्जलिं दन्तधावनाचमने अपि ॥ ३ ॥
नमस्कृत्यासने शुद्धे उपविश्य गुरुं स्मरेत् ।
शिरस्थं शुक्लपद्मस्थं प्रसन्नं द्विभुजाञ्चिकम् ॥ ४ ॥
अहं ब्रह्मास्मि सद्रूपं नित्यमुक्तं न शोकभाक् ।
गुरुदेवात्मनामित्थमैक्यं स्मृत्वार्चयेत्तु तम् ॥ ५ ॥
त्रैलोक्यचैतन्यमयादिदेव ! श्रीनाथ ! विष्णो ! भवदाज्ञयैव ।
प्रातः समुत्थाय तव प्रियार्थं संसारयात्रामनुवर्त्तयिष्ये ॥ ६ ॥
जानामि धर्मं न च मे प्रवृत्तिर्जानाम्यधर्मं न च मे निवृत्तिः ।
केनापि देवेन हृदि स्थितेन यथा नियुक्तोऽस्मि तथा करोमि ॥७॥
एतत्श्लोकद्वयेनेष्टदेवतां प्रार्थयेद्बुधः ।
श्रीनाथविष्णोः स्थाने तु कार्य्य ऊहोऽन्यदेवते ॥ ८ ॥
देवतागुणनामादि स्मरन् स्नातुमथो व्रजेत् ।
स्नानमान्तरवाह्याख्यं द्विविधं कथितं बुधैः ॥९ ॥

---

एवं मन्त्रजातं कथयित्वा सर्वदेवतानां कामनाविशेषेण यन्त्राणि च, निरूप्य सर्वदेवसाधारणं पूजाविशेषं वक्तुमुपक्रामति नित्येति । द्वौ भुजौ दं अञ्चितौ च यस्य स द्विभुजाञ्चितः तम् ॥ १—५ ॥

कोटिसूर्य्यप्रतीकाशं निजभूवायुधैर्युतम् ।
शिरस्थं संस्मरेद्देवं तत्पादोदकधारया ॥ १० ॥
विशन्त्या ब्रह्मरन्ध्रेण निजं देहं विशुद्धया ।
प्रक्षाल्यान्तर्गतं पापं विरजा जायते नरः ॥ ११ ॥
एवं कृत्वान्तरं स्नानं स्नायाद्वेदोक्तमार्गतः ।
अघमर्षणसूक्तञ्च स्मरेदन्तर्जले सुधीः ॥ १२ ॥
मन्त्रस्नानं ततः कुर्य्यात्तत्प्रकारोऽधुनोच्यते ।
प्राणानायम्य मूलेन कृत्वा न्यासं षडङ्गकम् ॥ १३ ॥
आदित्यमण्डलात्तीर्थान्याह्वयेत् सृणिमुद्रया ।
मन्त्रत्रयेणाम्बुमध्ये लिख्यते तन्मनुत्रयम् ॥ १४ ॥
ब्रह्माण्डोदरतीर्थानि करैः स्पृष्टानि ते रवेः ।
तेन सत्येन मे देव ! तीर्थं देहि दिवाकर ! ॥ १५ ॥
गङ्गे च यमुने चैव गोदावरि सरस्वति ।
नर्मदे सिन्धुकावेरि जलेऽस्मिन् सन्निधिं कुरु ॥ १६ ॥
आवाहयामि त्वां देवि ! स्नानार्थमिह सुन्दरि ! ।
एहि गङ्गे ! नमस्तुभ्यं सर्वतीर्थसमन्विते ॥ १७ ॥
ततो वमिति बीजेन योजयेत्तानि तज्जले ।
अग्न्यर्केन्दुमण्डलानि तत्र सञ्चिन्तयेत् पुनः ॥ १८ ॥
मन्त्रयेत्तेन मन्त्रेण रविवारं ततो जलम् ।

---

श्रीनाथविष्णो इत्यस्य स्थले विष्णो शम्भो ! भवदाज्ञयैवेति शिवोपासकेन भवानिदुर्गे ! इत्यम्बोपासकेनोह्यो विधेयः ॥ ८ ॥ ९ ॥

आन्तरं स्नानमाह कोटीति । वेदोक्तमार्गतः स्वशाखोक्तविधिना स्वस्वशाखाभिन्नत्वान्न लिखितः अघमर्षणसूक्तं ऋतं च सत्यं चेत्यादिकामृचं अघमर्षणऋषिमनुष्टुप् छन्दस्कं भाववृत्तदैवतकम् । सृणिमुद्राङ्कुशमुद्रा प्रोक्ता । ब्रह्माण्डेत्यादि श्लोकत्रयं पुराणोक्तं तीर्थावाहनमन्त्राः ॥ १०—१७ ॥

कवचेनावगुण्ठ्याथ रक्षेदस्त्रेण तत् पुनः ॥ १९ ॥
मूलमन्त्रेणेशवारमभिमन्त्र्य नमेज्जलम्।
मन्त्रेण वक्ष्यमाणेन देवतां मनसि स्मरन् ॥ २० ॥
आधारः सर्वभूतानां विष्णोरतुलतेजसः।
तद्रूपाश्च ततो जातास्ततो वै प्रणमाम्यहम् ॥ २१ ॥
मज्जेज्जले स्मरन् तत्र मूलञ्च देवताकृतिम्।
ततश्च सिञ्चेत् कं सप्तकृत्वः कलशमुद्रया ॥ २२ ॥
मूलेनाथ चतुर्मन्त्रैरभिषिञ्चेन्निजां तनुम्।
लिख्यन्ते तेऽथ चत्वारो मन्त्राः शङ्करभाषिताः ॥ २३ ॥
सिसृक्षोर्निखिलं विश्वं मुहुः शुक्रं प्रजापतेः।
मातरः सर्वभूतानामापो देव्यः पुनन्तु माम् ॥ २४ ॥
अलक्ष्मीर्मलरूपाया सर्वभूतेषु संस्थिता।
क्षालयन्ति निजस्पर्शादापो देव्यः पुनन्तु माम् ॥ २५ ॥
यन्मे केशेषु दौर्भाग्यं सीमन्ते यच्च मूर्द्धनि।
ललाटे कर्णयोरक्ष्णोरापस्तत् घ्नन्तु वो नमः ॥ २६ ॥
आयुरारोग्यमैश्वर्यमरिपक्षक्षयः सुखम्।
सन्तोषः क्षान्तिरास्तिक्यं विद्या भवतु वो नमः ॥ २७ ॥
विप्रपादोदकं पीत्वा शालग्रामशिलाजलम्।
शङ्खेन त्रिः परिभ्राम्य प्रक्षिपेन्निजमस्तके ॥ २८ ॥
ततो देवान् मनुष्यांश्च सङ्क्षेपात्तर्पयेत् पितॄन्।
वस्त्रं सम्पीड्य सङ्क्षाल्य सक्थिनी वाससी धरेत् ॥ २९ ॥

---

तेन बीजेन वमितिबीजेन कवचेन हुमितिबीजेन अस्त्रेण फडितिमन्त्रेण ईशवारमेकादशवारं वक्ष्यमाणेनाधार इत्यादिना देवताकृतिध्यानोक्तां कं शिरः कलशमुद्रया कुम्भमुद्रया हस्तद्वयेन सावकाशिकमुष्टिकरैव कुम्भमुद्रा ॥ १८—२८ ॥
देवमनुष्यान् पितॄंश्च संक्षेपात्तर्पयेत् ब्रह्मादयो देवास्तृप्यन्तां सनकादयो

तीर्थाभावात् स्वसदने स्नायादुष्णेन वारिणा ।
अल्पा एव प्रवक्तव्यास्तत्र मन्त्रा यथोचिताः ॥ ३० ॥
हस्तयोरप आदाय कुर्य्यात्तत्राघमर्षणम् ।
भस्मना गोरजोभिर्वा स्नायान्मन्त्रेण वाक्षमः ॥ ३१ ॥
तत आचम्य पीठस्थस्तिलकं रचयेत् सुधीः ।
केशवाद्यभिधानैस्तु स्थानेषु द्वादशस्वपि ॥ ३२ ॥
ललाटोदरहृत्कण्ठदक्षपार्श्वांसकं ततः ।
वामपार्श्वांसकर्णं च पृष्ठदेशे ककुद्यपि ॥ ३३ ॥
ललाटे तु गदां कुर्य्यात् हृदये नन्दकं पुनः ।
शङ्खं चक्रं भुजद्वन्द्वे शार्ङ्गं बाणं च मूर्द्धनि ॥ ३४ ॥
इत्थं तु वैष्णवः कुर्य्यात् शैवः कुर्य्यात् त्रिपुण्ड्रकम् ।
अग्निहोत्रे स्थितं भस्मादायाग्निरिति मन्त्रतः ॥ ३५ ॥
अभिमन्त्र्य त्र्यम्बकेन कुर्य्यात् पञ्चत्रिपुण्ड्रकम् ।
क्रमात्तत्पुरुषाघोरसद्यवामेशनामभिः ॥ ३६ ॥
मालां सोदरवक्षस्तु ऋटिभिस्तेषामथापि वा ।
कृत्वा सन्ध्यां स्वशाखोक्तां मन्त्रसन्ध्यां समाचरेत् ॥ ३७ ॥

---

मनुष्यास्तृप्यन्तां कव्यवाडनलादयः पितरस्तृप्यन्तां तर्पणार्हा अथात् पितरस्तृप्यन्तामिति संक्षेपतर्पणं सकृदिनी उक्त ॥ २९ ॥ ३० ॥

अक्षमो रोगादिना ॥ ३१—३३ ॥

नन्दकं खड्गम् ॥ ३४ ॥

अग्निरिति मन्त्रः भस्मादाय गृहीत्वा गृह्णमन्त्रो यथा अग्निरिति भस्म वायुरिति भस्म जलमिति भस्म स्थलमिति भस्म व्योमेति भस्म सर्वं ह वा इदं भस्म मन एतानि चक्षूंषि तस्माद् व्रतमेतत् पाशुपतं यद्भस्मनाङ्गानि संस्पृशेदिति मन्त्रः ॥ ३५ ॥

ततस्त्र्यम्बकं यजामह इति पूर्वोक्तमन्त्रेणाभिमन्त्र्य क्रमाल्ललाटादिषु तत्पुरुषादिनामभिः पञ्च त्रिपुण्ड्रकं कुर्य्यात् त्रयाणां पुण्ड्रकाणां समाहारस्त्रिपुण्ड्री यथा

प्राणायाम षड़ङ्गे च कृत्वादाय करे जलम् ।
त्रिर्जप्वा मूलमन्त्रेण आचमेत्त्रिर्जपन्मनुम् ॥ ३८ ॥
पुनर्दक्षकरेणाम्भो गृहीत्वा वामहस्ततः ।
निधाय तस्मात् च्योतद्भिर्विन्दुभिः सप्तधा तनुम् ॥ ३९ ॥
सम्मार्ज्य मूलमन्त्रेणावशिष्टं तत् पुनर्जलम् ।
दक्षहस्ते समादाय नासिकान्तिकमानयेत् ॥ ४० ॥
ईड़यान्तः समाकृष्य तद्धौतैः पापसञ्चयैः ।
कृष्णवर्णं पिङ्गलया रेचितं प्रविचिन्त्य तत् ॥ ४१ ॥
क्षिपेदस्त्रेण पुरतः कल्पिते भिदुरोपले ।
अघमर्षणमेतद्धि निखिलाघनिवारणम् ॥ ४२ ॥
पुनरञ्जलिनादाय जलमर्घ्यं दिशेत्ततः ।
त्रिवारं मूलमन्त्रान्ते षोड़शार्णमनुं जपन् ॥ ४३ ॥
रविमण्डलसंस्थाय देवायार्घ्यं पदं वदेत् ।
कल्पयामीति मन्त्रोऽयं षोड़शार्ण उदाहृतः ॥ ४४ ॥
सूर्य्यमण्डलगं ध्यायन्निष्टदेवमनन्यधीः ।
प्रजपेन्मन्त्रगायत्रीं मूलं वाष्टोत्तरं शतम् ॥ ४५ ॥
अष्टाविंशतिवारं वा तर्पयेत्तावदम्भसि ।
दत्त्वार्घ्यं दिननाथाय तीर्थं संहारमुद्रया ॥ ४६ ॥

---

तत्पुरुषाय नमो भाले अघोराय नमो दक्षांसे सद्योजाताय नमो वामांसे वामदेवाय नमो जठरे ईशानाय नमो वचसि यद्वा तत्पुरुषादि नामस्थले तत्पुरुषाय विद्महे अघोरेभ्यः सद्योजातं प्रपद्यामि वामदेवाय नमः ईशानः सर्वविद्यानामिति पञ्चभिरेव त्रिपुण्ड्राणि विधेयानि ॥ ३६ ॥ ३७ ॥

मन्त्रसन्न्यासमाह प्राणायाममिति । भिदुरोपले वज्रपाषाणे पापयुतं जलं क्षिपेत् एतदघमर्षणम् ॥ ३८—४२ ॥

मूलमन्त्रमुक्त्वा रविमण्डलसंस्थाय देवाय अर्घ्यं कल्पयामीति षोड़शार्णं मनुं जपन् देवायार्घ्यं दद्यात् ॥ ४३—४५ ॥

विसृज्यार्कं लोकपालान्नत्वा देवस्तुतिं पठन् ।
यागस्थानं तथागत्य प्रक्षाल्याङ्घ्रीं तथाचमेत् ॥ ४७ ॥
गार्हपत्यादिकानग्नीन् हुत्वोपस्थाय तानपि ।
देवतागारमागत्य समाचामेद्‌ यथाविधिः ॥ ४८ ॥
केशवनारायणमाधवैः पीत्वा जलं त्रिधा ।
करौ गोविन्दविष्णुभ्यां क्षालयेन्मधुसूदनः ॥ ४९ ॥
त्रिविक्रमाभ्यामोष्ठौ वामनश्रीधरतो मुखम् ।
हृषीकेशेन हस्तञ्च चरणौ पद्मनाभतः ॥ ५० ॥
दामोदरेण मूर्द्धानं प्रोक्ष्य सङ्कर्षणादिकान् ।
मुखादिषु कराङ्गुल्या वेदादिप्रीणने न्यसेत् ॥ ५१ ॥
मुखे सङ्कर्षणं वासुदेवप्रद्युम्नकौ नसोः ।
अनिरुद्धञ्च पुरुषोत्तममक्ष्णोः प्रविन्यसेत् ॥ ५२ ॥
अधोक्षजं नृसिंहञ्च कर्णयोर्नाभितोऽच्युतम् ।
जनार्दनं हृदि न्यस्येदुपेन्द्रमपि मूर्द्धनि ॥ ५३ ॥

---

संहारमुद्रया तीर्थं विसृज्य द्वौ हस्तौ विमुखौ संयोज्य तयोरङ्गुल्यः परस्पर-संश्लिष्टाः कृत्वा हस्तौ सम्मुखौ कुर्यादिति संहारमुद्रा ॥ ४६ ॥ ४७ ॥

सत्यग्निहोत्रे आवसथ्ये च तयोर्होममुपस्थानञ्च कृत्वा देवपूजा गृहमागत्य वैष्णवाचमनं कुर्यात् ॥ ४८ ॥

तदेवाह केशवेति । ओं केशवाय नमः नारायणाय नमः माधवाय नमः इति त्रिर्जलं पीत्वा गोविन्दाय नमः विष्णवे नम इति द्वाभ्यां करौ प्रक्षाल्य मधुसूदनाय नमः ॥ ४९ ॥

त्रिविक्रमाय नम इति द्विरोष्ठौ प्रक्षाल्य वामनाय नमः श्रीधराय नमः इति मुखं हृषीकेशाय नमः इति दक्षहस्तं प्रक्षाल्य पद्मनाभाय नम इति पादौ ॥ ५० ॥

दामोदराय नमः इति शिरश्च प्रोक्ष्य सङ्कर्षणाय नम इति मुखं वासुदेवाय प्रद्युम्नाय नम इति नसोः अाङ्गुष्ठप्रदेशिनीभ्यां स्पृष्टा अनिरुद्धाय नमः पुरुषोत्तमाय नमः इत्यक्षिणी ॥ ५२ ॥

अंसयोश्च हरिं विष्णुं वैष्णवाचमनं त्विदम् ।
केशवाद्याश्चतुर्थ्यन्ता नमोऽन्ताः प्रणवादिकाः ॥ ५४ ॥
आस्ये नसोः प्रदेशिन्यानामया नेत्रकर्णयोः ।
कनिष्ठया नाभिदेशेऽङ्गुष्ठः सर्वत्र संयुतः ॥ ५५ ॥
तलेन हृदये न्यस्येत् सर्वाभिर्मस्तकेंऽसयोः ।
आत्मविद्याशिवैः ख्यात्वा यः स्वधान्तैः पिबेदपः ॥ ५६ ॥
हां हीं हूमादिमैः शैवे शाक्ते वाग्वीजपूर्वकैः ।
चालनादिकमङ्गुल्या स्पर्शोऽपि स्यादमन्त्रकः ॥ ५७ ॥
एवमाचम्य सामान्यार्घ्येण द्वारं प्रपूजयेत् ।
तारं खं वह्निसर्गाढ्यं द्वारार्घ्यं साधयामि च ॥ ५८ ॥
उक्तास्त्रमनुना पात्रं चालयेत् पूरयद्वृदा ।
तीर्थान्यावाह्य गन्धादीन्निक्षिपेन्निगमादिना ॥ ५९ ॥
धेनुमुद्रां दर्शयित्वा मूलेनाप्यभिमन्त्रयेत् ।
सामान्यार्घ्यविधिः प्रोक्तस्तेनोक्ता द्वारदेवताः ॥ ६० ॥

---

अधोक्षजाय नमः नृसिंहाय नमः इति कर्णौ चाङ्गुष्ठानामिकाभ्यां स्पृशेत् अच्युताय नमः इति अङ्गुष्ठकनिष्ठाभ्यां नाभिं जनार्दनाय नमः इति करतलेन हृदयाय नमः उपेन्द्राय नमः इति शिरः हरये नमः कृष्णाय नमः इत्यंसौ च सर्वाभिः स्पृशेदिति वैष्णवाचमनम् ॥ ५३—५५ ॥

शैवाचमनमाह आत्मेति । हां आत्मतत्त्वाय स्वधा हीं विद्यातत्त्वाय स्वधा हूं शिवतत्त्वाय स्वधेति त्रिर्जलं पीत्वा करचालनाद्यं संस्पर्शान्तं उक्ताङ्गुलीभिः तूष्णीमेव कुर्यात् इति शैवम् । शाक्ते तु हामादिस्थाने वाग्बीजमेव ॥ ५६ ॥ ५७ ॥

सामान्यार्घ्यमाह तारमिति । तार ओं खं हः वह्निविसर्गाढ्यं रेफविसर्गयुतं हः निगमादिना प्रणवेन ॥ ५८ । ५९ ॥

यथा ओं हः द्वारार्घ्यं साधयामीत्युक्त्वा फडिति पात्रं प्रक्षाल्य नम इति जलेनापूर्य गङ्गे चेति तीर्थान्यावाह्य प्रणवेन गन्धपुष्पं निक्षिप्य धेनुमुद्रां प्रदर्श्याष्ट-कृत्वो मूलेन मन्त्रयेदिति सामान्यार्घ्यविधिः तेनार्घ्यजलेनोक्ता प्रवक्ष्यमाणोक्ता

इष्टार्चेत् द्वारपालांश्च ते कथ्यन्ते पृथग्विधाः ।
नन्दो सुनन्दश्चण्डश्च प्रचण्डो बलसंज्ञकः ॥ ६१ ॥
प्रबलो भद्रसंज्ञश्च सुभद्रो वैष्णवा मताः ।
नन्दिसंज्ञो महाकालो गणेशो वृषभस्तथा ॥ ६२ ॥
भृङ्गिरिट्यभिधः स्कन्दः पार्वतीशाभिधोऽपरः ।
चण्डेश्वर इमे शैवाः शाक्तेया मातरः स्मृताः ॥ ६३ ॥
वक्रतुण्डश्चैकदंष्ट्रो महोदरगजाननौ ।
लम्बोदरश्च विकटो विघ्नराजश्च सप्तमः ॥ ६४ ॥
धूम्रराजो गणपतेर्द्वारपाला इमे स्मृताः ।
इन्द्रो यमोऽथ वरुणः कुबेरस्त्रैपुरा स्मृताः ॥ ६५ ॥
ईशः क्षणानुरश्चांसि वायुश्चैवाष्टमः स्मृतः ।
द्वारपूजां विधायेत्थं विघ्नानुत्सारयेत् त्रिधा ॥ ६६ ॥
आत्मानं शङ्करं ध्यात्वा दृष्ट्या दिव्यान्निवारयेत् ।
नभस्थानार्घ्यपानीयैः पार्ष्णिघातैर्धरागतान् ॥ ६७ ॥
अपसर्पन्तु ते भूता ये भूता भूमिसंस्थिताः ।
ये भूता विघ्नकर्त्तारस्ते नश्यन्तु शिवाज्ञया ॥ ६८ ॥
अपक्रामन्तु भूतानि पिशाचाः सर्वतो दिशम् ।
सर्वेषामविरोधेन ब्रह्मकर्म समारभे ॥ ६९ ॥

---

द्वारदेवता गणेशमहालक्ष्मीसरस्वतीविघ्नक्षेत्रपालगङ्गायमुनाधातृविधातृशङ्खपद्मनिधिलक्षणा यथास्थानं सम्पूज्य वक्ष्यमाणान् द्वारपालान् पूजयेत् ॥ ६० ॥

वैष्णवान् द्वारपालानाह नन्द इति ॥ ६१ ॥

शैवानाह नन्दिसंज्ञ इति । ब्राह्म्याद्या मातरः शक्तेर्द्वारपालाः गणेशानाह वक्रतुण्ड इति ॥ ६२—६४ ॥

त्रिधा विघ्नकारान् दिव्यन्तरिक्षभूमिस्थान् ॥ ६५ ॥ ६६ ॥

अर्घ्यं पानीयैः सामान्यार्घ्यजलैरन्तरिक्षस्थान् ॥ ६७—६९ ॥

विनिर्व्वार्य्याखिलान् विघ्नानिदं मन्त्रद्वयं पठन् ।
अवकाशप्रदानायान्तरायाणां विनिर्य्यताम् ॥ ७० ॥
सङ्कोचयन् वामसङ्गं गृहं दक्षपदा विशेत् ।
क्षेत्रपालं विधातारं नैरृत्यां दिशि पूजयेत् ॥ ७१ ॥
अनन्तं विमलं पद्मं ङेन्तासननमोऽन्वितम् ।
जपन्निधाय दर्भांस्त्रीन् कुशचर्माम्बरासने ॥ ७२ ॥
काष्ठपल्लववंशाश्मगोशकृत्तृणसृष्टसयम् ।
विषमं कठिनं मन्त्री त्यजेदासनमाधिदम् ॥ ७३ ॥
पृथ्वि त्वयेति मन्त्रेण प्रागुदग्वासमाविशेत् ।
कुर्य्यात् स्वस्तिकपाथोजं वीरादिष्वेकमासनम् ॥ ७४ ॥
अर्घ्यं पाद्याचमनीयमधुपर्काचमस्य च ।
पञ्चपात्राणि पुष्पादीन् स्थापयेत् स्वीयदक्षिणे ॥ ७५ ॥

---

विनिर्य्यतां गृहान्निर्गच्छतां अन्तरायाणां विघ्नानां अवकाशप्रदानाय वामाङ्गं सङ्कोचयन् दक्षिणपादेन गृहं प्रविशेत् ॥ ७०—७१ ॥

कुशासनव्याघ्रचर्मवस्त्राणामुपर्य्युपरि अनन्तासनाय नमः विमलासनाय नमः पद्मासनाय नमः इति मन्त्रत्रयेण त्रीन् दर्भान्निदध्यात् ॥ ७२ ॥

आधिदं मानसपीड़ाप्रदम् ॥ ७३ ॥

प्रागुदग्वा प्राङ्मुख उदङ्मुखो वा पाथोजं पद्मं स्वस्तिकासनपद्मासनवीरासनेष्वन्यतममासनं कुर्य्यात् । स्वस्तिकासनलक्षणं यथा—

जानूर्वोरन्तरे कृत्वा सम्यक् पादतले उभे ।
ऋजुकायो विशेद्योगी स्वस्तिकं तत् प्रचक्षते ॥

पद्मासनं यथा—

ऊर्वोरुपरि विन्यस्य सम्यक् पादतले उभे ।
अङ्गुष्ठौ च निबध्नीयाद्धस्ताभ्यां व्युत्क्रमात्ततः ।
पद्मासनमिति प्रोक्तं योगिनां हृदयङ्गमम् ॥ इति ।

अत्र हस्ताभ्यां पादाङ्गुष्ठबन्धनन्तु योगाभ्यासान्वितं बोध्यं योगिनां हृदयं गम-मिति विशेषणोपादानात् नयादौ तु पादतलयोरूर्वोरुपरि न्यासमात्रं पद्मासनम् । वीरासनलक्षणं यथा—

वामेऽम्बुपात्रं व्यजनं छत्रमादर्शचामरे ।
कृताञ्जलिर्वामदक्षे गुरून् गणपतिं नमेत् ॥ ७६ ॥
न्यस्यास्त्रं करयोस्तालत्रयं दिग्बन्धनं चरेत् ।
अङ्गुष्ठयुक्ततर्जन्या सुदर्शनमनुं जपन् ॥ ७७ ॥
प्रणवो हृदयं ङेन्तं सुदर्शनपदं पुनः ।
अस्त्राय च फडित्युक्तो मन्त्रो द्वादशवर्णवान् ॥ ७८ ॥
विधाय वह्निप्राकारं भूतजेयो भवेत् सुधीः ।
भूतशुद्धिं तथा प्राणप्रतिष्ठां मातृकास्थितिम् ॥ ७९ ॥
पञ्चधोक्तां प्रकुर्वीत ततोऽन्या मातृकां चरेत् ।
श्रीकण्ठादीन् शम्भुभक्तो वैष्णवः केशवादिकान् ॥ ८० ॥
गणेशाद्यान्तु तत्सेवी शक्तिभाक् मातृकाः कलाः ।
ताः क्रमेणैव कथ्यन्ते मुन्यादिन्यासपूर्विकाः ॥ ८१ ॥
मुनिः स्याद्दक्षिणामूर्तिर्गायत्री छन्द ईरितम् ।
अर्द्धाद्रिजाहरो देवो नियोगः सर्वसिद्धये ॥ ८२ ॥
हलो वीजानि गुह्ये तु स्वरान् शक्तीः पदोः न्यसेत् ।
हसाभ्यां दीर्घयुक्ताभ्यां कृत्वाङ्गं शङ्करं स्मरेत् ॥ ८३ ॥

---

एकं पादमधःकृत्वा विन्यस्योरौ तथेतरम् ।
ऋजुकायो विशेद्योगी वीरासनमितीरितम् ।

इति शारदायां लक्षणानि षादिशब्दात् षट् कर्मोक्तमपि ॥ ७४ ॥ ७५ ॥

वामे गुरून् दक्षे गणेशम् ॥ ७६ ॥

करयोरस्त्रं न्यस्योपर्य्युपरि तालत्रयं कृत्वाङ्गुष्ठतर्जनीभ्यां शब्दं कुर्वन् सुदर्शनमन्त्रेण दिग्बन्धनञ्चरेत् ॥ ७७ ॥

सुदर्शनमन्त्रमाह प्रणव इति । ॐ नमः सुदर्शनाय अस्त्राय फडिति ॥ ७८ ॥ ७९ ॥

पञ्चधा मातृकास्थितिः सृष्टिस्थितिसंहारसृष्टिस्थितिलक्षणं पञ्चविधं मातृकान्यासं उक्तं प्रपञ्चतरङ्गे अन्यं श्रीकण्ठाद्यान् ॥ ८० ॥

तत्सेवी गणेशसेवी ॥ ८१—८३ ॥

पाशाङ्कुशवराचस्रक्पाणिशीतांशुशेखरम्।
त्र्यचं रक्तसुवर्णाभमर्द्धनारीश्वरं भजे ॥ ८४ ॥
एवं ध्यायन् शम्भुशक्ती चतुर्थ्यन्तनमोऽन्विते।
हसौं बीजमातृका पूर्वं विन्यसेन्मातृकास्थले ॥ ८५ ॥
श्रीकण्ठपूर्णोदर्य्यौ चानन्तो विरजयान्वितः।
सूक्ष्मेशः शाल्मलीयुक्तो लोलाचीयुक् त्रिमूर्त्तिकः ॥ ८६ ॥
अमरेशो वर्त्तुलाच्या चार्घीशो दीर्घघोणया।
भारभूतिर्दीर्घमुख्या तिथीशो गोमुखीयुतः ॥ ८७ ॥
स्थाखीशो दीर्घजिह्वायुक् हरः कुण्डोदरीयुतः।
झिण्टीशश्चोर्द्धकेशी च भौतिको विकृतमुख्यपि ॥ ८८ ॥
सद्यो ज्वालामुखी चानुग्रह उल्कामुखीयुतः।
अक्रूरः श्रीमुखी महासेनो विद्यामुखीयुतः ॥ ८९ ॥
क्रोधीशश्च महाकाल्या चण्डेशश्च सरस्वती।
पञ्चान्तकः सर्वसिद्धिर्गौरीयुक्तः प्रकीर्त्तितः ॥ ९० ॥
शिवोत्तमेशो विश्वेशो युक्तस्त्रैलोक्यविद्यया।
एकरुद्रो मन्त्रशक्तिः कूर्मेशश्चात्मशक्तियुक् ॥ ९१ ॥
एकनेत्रो भूतमात्रा युक्तः स्याच्चतुराननः।
लम्बोदर्य्या युतः प्रोक्तो ह्यजशो द्राविणीयुतः ॥ ९२ ॥
सर्वेशो नागरीयुक्तः सोमेशश्चापि खेचरी।
लाङ्गलीशश्च मञ्जर्य्या दारकेशश्च रूपिणी ॥ ९३ ॥
अर्द्धनारीशो वीरिण्या उमाकान्तः पुनर्युतः।
काकोदर्य्या तथाषाढ़ीपूतनायुक्त ईरितः ॥ ९४ ॥

---

ध्यानमाह पाशेति। पाशाङ्कुशौ वामयोः रक्तो हरांशः सुवर्णाभो देव्यंशः ॥ ८४ ॥

मातृकास्थले ललाटादौ पूर्वोक्ते ॥ ८५ ॥

चण्डीशो भद्रकालीयुगन्तीशो योगिनीयुतः ।
मीनेशः शङ्खिनीयुक्तो मेषेशस्तर्जनीयुतः ॥ ९५ ॥
लोहितः कालरात्र्या च शिखीशः कुब्जिनीयुतः ।
छागलण्डः कपर्दिन्या द्विरण्डेशश्च वज्रया ॥ ९६ ॥
महाकालो जयायुक्तो बालीशः सुमुखेश्वरी ।
भुजङ्गो रेवतीयुक्तः पिनाकी माधवीयुतः ॥ ९७ ॥
खड्गीशो वारुणीयुक्तो तकेशो वायवीयुतः ।
श्वेतो रक्षोविदारिख्या भृगुः सहजया युतः ॥ ९८ ॥
नकुलीशश्च लक्ष्मीयुक् शिवेशो व्यापिनीयुतः ।
संवर्त्तको महामाया प्रोक्ता श्रीकण्ठमातृका ॥ ९९ ॥
यत्र त्वीशपदं नोक्तं श्रीकण्ठादिषु नामसु ।
तत्र सर्वत्र वक्तव्यं शक्तिभ्यां सहितो वदेत् ॥ १०० ॥
त्वगसृङ्मांसमेदोऽस्थिमज्जाशुक्राख्यसून् वदेत् ।
शक्तिं क्रोधं तथात्मभ्यामन्तान्यादिदशस्वपि ॥ १०१ ॥
केशवादिमातृकायां साध्यं नारायणो मुनिः ।
अमृताद्या तु गायत्री छन्दो लक्ष्मीहरिः सुरः ॥ १०२ ॥
द्विरुक्तैः शक्तिश्रीकामैः षडङ्गानि समाचरेत् ।

---

प्रयोगो यथा ह्सौं अं श्रीकण्ठेशपूर्णोदरीभ्यां नमः ललाटे ह्सौं आं अनन्तेशविरजाभ्यां नमो मुखवृत्ते इत्यादि ॥ ८६—९९ ॥

श्रीकण्ठानन्तत्रिमूर्त्यादौ पदे यदीशपदं नास्ति तत्रापि ज्ञेयं श्रीकण्ठेश इत्यादिशक्तिभ्यां पूर्णोदरीप्रभृतिभ्यां चतुर्थीद्विवचनं ङत् नमः तथा प्रयोग उक्तः ॥ १०० ॥

त्वगिति । यादि-दशवर्णेषु त्वगादीनात्मभ्यामित्यन्तान् वदेत् । यथा—ह्सौं यं त्वगात्मभ्यां बालीशसुमुखेश्वरीभ्यां नमः हृदि ह्सौं रं असृगात्मभ्यां भुजङ्गेशरेवतीभ्यां नमो दक्षांसे इत्यादि ॥ १०१ ॥

केशवादिमातृकामाह केशवादीति ॥ १०२ ॥

शङ्खं चक्र-गदा-पद्म कुम्भादर्शाब्जपुस्तकम् ॥ १०३ ॥
बिभ्रतं मेघचपलावर्णं लक्ष्मीहरिं भजे।
एवं ध्यात्वा जपेत् शक्तिश्रीकामपुटिताक्षरम् ॥ १०४ ॥
श्यामन्तं विष्णुशक्त्यन्तं नमोऽन्तं प्रणवादिकम्।
केशवः कीर्त्तिसंयुक्तः कान्तिर्नारायणान्विता ॥ १०५ ॥
माधवस्तुष्टिसंयुक्तो गोविन्दः पुष्टिसंयुतः।
विष्णुस्तु धृतिसंयुक्तः शान्तियुङ्मधुसूदनः ॥ १०६ ॥
त्रिविक्रमः क्रियायुक्तो वामनो दययान्वितः।
श्रीधरो मेधया युक्तो हृषीकेशश्च हर्षया ॥ १०७ ॥
पद्मनाभयुता श्रद्धा लज्जा दामोदरान्विता।
वासुदेवश्च लक्ष्मीयुक् सङ्कर्षणः सरस्वती ॥ १०८ ॥
प्रद्युम्नः प्रीतिसंयुक्तोऽनिरुद्धो रतिसंयुतः।
चक्री जया गदी दुर्गा शार्ङ्गी तु प्रभयान्वितः ॥ १०९ ॥
खड्गी तु सत्यया युक्तः शङ्खी चण्डासमन्वितः।
हली वाणीसमायुक्तो मुसली च विलासिनी ॥ ११० ॥
शूली विजयया युक्तः पाशी विरजयान्वितः।
अङ्कुशी विश्वया युक्तो मुकुन्दो विनदायुतः ॥ १११ ॥
नन्दजः सुनन्दायुक्तो नन्दी सत्यासमन्वितः।
नर ऋद्धी नरकजित् समृद्धिशुद्धियुक् हरिः ॥ ११२ ॥
कृष्णबुद्धी सत्यभूक्तो सात्वती मतिसंयुतः।

---

षड़ङ्गमाह हृदिति। क्लीं हृत् श्रीं शिरः क्लौं शिखा क्रीं वर्म श्रीं नेत्रं क्लीं चस्त्रम्। ध्यानमाह शङ्खेति। शङ्खादीनि दक्षे कुम्भादीनि वामे मेघाभो हर्य्यंशः चपला विद्युत् तन्निभो लक्ष्म्यंशः ॥ १०२ ॥ १०४ ॥

श्यां अन्ते ययोस्तादृशौ विष्णुशक्ती अन्ते यस्यास्तां तथा नमोऽन्ते यस्याः सा नमोऽन्ता प्रणव आदौ यस्याः सा प्रणवादिका सा च सा च तां यथा—ॐ क्रीं श्रीं क्लीं श्यं क्लीं श्रीं क्रीं केशवकीर्त्तिभ्यां नम इत्यादि ॥ १०५ ॥

सौरिश्चमे शूररमे जनार्दन उमान्वितः ॥ ११३ ॥
भूधरः क्लेदिनीयुक्तो विश्वमूर्त्तिश्च क्लिन्नया।
वैकुण्ठो वसुधायुक्तो वसुदापुरुषोत्तमौ ॥ ११४ ॥
बली तु परया युक्तो बलोऽनुजपरायणे।
बालसूक्ष्मे वृषघ्नस्तु सन्ध्यायुक् प्रज्ञया वृषः ॥ ११५ ॥
हंसः प्रभासमायुक्तो वराहो निशयान्वितः।
विमलो मेधया युक्तो नृसिंहो विद्युता युतः ॥ ११६ ॥
केशवाद्या मातृकोक्ता यादियोगश्च पूर्ववत्।
गणेशमातृकायास्तु मुनिर्गणक ईरितः ॥ ११७ ॥
निचृद्गायत्रिका छन्दो देवः शक्तिविनायकः।
सृत्या दीर्घाढ्यया चाङ्गं कृत्वा ध्यायेद्गजाननम् ॥ ११८ ॥
गुणाङ्कुशवराभीतिपाणिं रक्ताब्जहस्तया।
प्रिययालिङ्गितं रक्तं त्रिनेत्रं गणपं भजे ॥ ११९ ॥
एवं ध्यात्वा न्यसेत् स्वीयबीजपूर्वाक्षरान्वितम्।
विघ्नेशो ह्रीसमायुक्तो विघ्नराजः श्रिया युतः ॥ १२० ॥
विनायकः पुष्टियुत. शान्तियुक्तः शिवोत्तमः।
विघ्नकृत् स्वस्तिसंयुक्तो विघ्नहर्त्ता सरस्वती ॥ १२१ ॥
गणस्तु स्वाहया युक्त एकदन्तः सुमेधया।
द्विदन्तः कान्तिसंयुक्तो गजवक्त्रश्च कामिनी ॥ १२२ ॥
निरञ्जनो मोहिनीयुक् कपर्दी तु नटीयुतः।

---

यादियोगश्च पूर्ववदिति यों क्लीं श्रीं क्लीं यं क्लीं श्रीं क्लीं त्वगात्मभ्यां पुरुषोत्तम-वसुदाभ्यां नमो इतीत्यादि ॥ १०६—११६ ॥

गणेशमातृकामाह गणेश इति ॥ ११७ ॥

षडङ्गमाह सृत्येति। दीर्घयुक्तगकारं गां गीं गूं गैं गौं गः इति ॥ ११८ ॥

ध्यानमाह गुणेति। गुणश्चिशूलं अङ्कुशवरौ दक्षयोः ॥ ११९ ॥

दीर्घजिह्वः पार्वतीयुक् शङ्कुकर्णश्च ज्वालिनी ॥ १२३ ॥
वृषभध्वजनन्दे च सुरेशागणनायकौ ।
गजेन्द्रः कामरूपिण्या सूर्य्यकर्णस्तथोमया ॥ १२४ ॥
त्रिलोचनस्तेजोवत्या लम्बोदरस्तु सत्यया ।
महानन्दश्च विघ्नेशा चतुर्मूर्त्तिः सुरूपिणी ॥ १२५ ॥
सदाशिवः कामदायुगामोदो मदजिह्वया ।
दुर्मुखो भूतिसंयुक्तः सुमुखो भौतिकायुतः ॥ १२६ ॥
प्रमोदः सितया युक्त एकपादो रमायुतः ।
द्विजिह्वो महिषीयुक्तः शूरश्चापि तु भञ्जिनी ॥ १२७ ॥
वीरो विकर्णया युक्तः षरमुखो भ्रकुटीयुतः ।
वरदो लज्जया वामदेवः स्याद्दीर्घघोणया ॥ १२८ ॥
धनुर्द्धरावक्रतुण्डो द्विरदो यामिनीयुतः ।
सेनीशो रात्रिसंयुक्तः कामान्धो ग्रामणीयुतः ॥ १२९ ॥
मत्तः शशिप्रभायुक्तो विमत्तो लोललोचना ।
मत्तवाहनचञ्चले जटी दीप्तिसमन्वितः ॥ १३० ॥
मुण्डी सुभगया युक्तः खड्गी दुर्भगया तथा ।
वरेण्यश्च शिवायुक्तो भगायुक् वृषकेतनः ॥ १३१ ॥
भक्तप्रियश्च भगिनी गणेशो भोगिनीयुतः ।
मेघनादश्च सुभगा व्यापी स्यात् कालरात्रियुक् ॥ १३२ ॥
गणेश्वरः कालिकेति प्रोक्ता विघ्नेशमातृका ।
त्वगादियोगो यादीनां पूर्ववत् परिकीर्त्तितः ॥ १३३ ॥
कलायुक् मातृकायास्तु प्रजापति ऋषिः स्मृतः ।

---

स्वीय बीजपूर्वाणि यान्यक्षराणि षकारादीनि तैर्युताः षं विप्रेशश्रीभ्यां नम इति ॥ १२०—१३२ ॥

छन्द उक्तं तु गायत्री देवता शारदाभिधा ॥ १३४ ॥
तारैः षडङ्गं कुर्वीत ह्रस्वदीर्घान्तरस्थितैः ।
शङ्खचक्राब्जपरशुकपालेनाक्षमालिकाः ॥ १३५ ॥
पुस्तकामृतकुम्भौ च त्रिशूलं दधतीं करैः ।
सितपीतासितश्वेतरक्तवर्णैस्त्रिलोचनैः ॥ १३६ ॥
पञ्चास्यसंयुतां चन्द्रसकान्तिं शारदाम्भजे ।
ध्यात्वैवं तारपूर्वान्तां न्यसेत् ङेन्तकलान्विताम् ॥ १३७ ॥
निवृत्तिश्च प्रतिष्ठा च विद्या शान्तिस्तथेन्धिका ।
दीपिका रेचिका चापि मोचिका च पराभिधा ॥१३८॥
सूक्ष्मा सूक्ष्मामृता ज्ञानामृता चाप्यायनी ततः ।
व्यापिनी व्योमरूपा चानन्ता सृष्टिः समृद्धिका ॥१३९॥
स्मृतिर्मेधा ततः कान्तिर्लक्ष्मीर्द्युतिः स्थिरा स्थितिः ।
सिद्धिर्जरा पालिनी च क्षान्तिरीश्वरिका रतिः ॥ १४० ॥
कामिका वरदा चाथाह्लादिनी प्रीतिसंयुता ।
दीर्घा तीक्ष्णा तथा रौद्री भया निद्रा च तन्द्रिका ॥१४१॥
क्षुधा स्यात् क्रोधिनी पश्चात् क्रियोत्कारी समृत्युका ।
पीता श्वेतारुणा पश्चादसितानन्तयान्विता ॥ १४२ ॥
उक्ता कलामातृकैवं तत्तज्ज्ञः समाचरेत् ।
ततः स्वमूलमन्त्रस्य न्यासान् कल्पोदितांश्चरेत् ॥ १४३ ॥
ऋष्यादिच्छन्दो दैवतानि मूर्ध्नि वक्त्रे हृदि न्यसेत् ।
बीजं गुह्ये पदोः शक्तिमङ्गानि करयोरपि ॥ १४४ ॥

---

त्वगादियोग इति गं यं त्वगात्मभ्यां जटीदीप्तिभ्यां नम इत्यादि ॥ १३३॥१३४॥ कलामातृकायाः षडङ्गमाह तारैरिति । यथा श्रीं अं श्रीं आं हृत् इं ईं शिरः उं श्रीं शिखा एं श्रीं ऐं वर्म श्रीं ऊं श्रीं नेत्रं अं श्रीं अः अस्त्रम् । ध्यानमाह शङ्खेति । शङ्ख परशु कपालाक्षमालामृतकुम्भा दधत्यां अन्यान्यपि ।

अङ्गुष्ठादिष्वङ्गुलीषु करस्य तलपृष्ठयोः।
अङ्गुष्ठाभ्यां तर्जनीभ्यां नम इत्यादिकं वदेत्॥ १४५॥
हृदयादिष्वथाङ्गानि जातियुक्तानि विन्यसेत्।
स्वस्वमुद्राभिरधुना प्रोच्यन्ते जातयश्च ताः॥ १४६॥
हृदयाय नमश्चेति शिरसे स्वाहया युतम्।
शिखायै वषड़ङ्गञ्च कवचाय हुमित्यपि॥ १४७॥
नेत्रत्रयाय वौषट् स्यादस्त्राय फड़िती‍रितम्।
जातिषट्कं द्विनेत्रे तु नेत्राभ्यां वौषडुच्चरेत्॥ १४८॥
पञ्चाङ्गे नेत्रसंत्यागो मुद्राङ्गानामथोच्यते।
प्रसारितमनङ्गुष्ठं तर्जन्यादिचतुष्टयम्॥ १४९॥
हृदि मूर्ध्नि हि चाङ्गुष्ठहीनो मुष्टिः शिखा तले।
स्कन्धमारभ्य नाभ्यन्ता दशाङ्गुल्यस्तु वर्मणि॥ १५०॥
तर्जन्यादित्रयं नेत्रत्रये नेत्रद्वये द्वयम्।
प्रसारिताभ्यां हस्ताभ्यां कृत्वा तालत्रयं सुधीः॥ १५१॥
तर्जन्यङ्गुष्ठयोरग्रे स्फालयन् बन्धयेद्दिशः।
एषास्त्रमुद्रा श्रीविष्णोरङ्गमुद्रा उदीरिताः॥ १५२॥
हृद्यङ्गुलित्रयं न्यस्येत्तर्जन्यादि द्वयं तु के।
शिखाप्रदेशेऽथाङ्गुष्ठं दशाङ्गुल्यस्तु वर्मणि॥ १५३॥
हृद्वन्नेत्रं पूर्वमन्त्रं शक्तेरङ्गस्य मुद्रिकाः।

---

मध्ये प्राग्दक्षिणपश्चिमोत्तरैर्मुखैः क्रमात्सित पीत-कृष्णसितरक्तैर्युताम्। तार-पूर्वामिति ॐ षं नित्यश्चै नम इत्यादि॥ १३५—१४५॥

स्वस्वमुद्राभिर्जातियुक्तान्यङ्गानि हृदयादिषु न्यसेत् ता मुद्रा जातयश्चोच्यन्ते॥ १४६—१४८॥

विष्णोरङ्गमुद्रा आह प्रसारितमिति॥ १४९॥

मूर्द्धनि च तर्जन्यादिचतुष्टयमेव॥ १५०—१५२॥

शक्तेः षड़ङ्गमुद्रा आह हृदीति। के शिरसि॥ १५३॥

सुष्टीविनिर्गताङ्गुष्ठौ संयुक्तौ हृदि विन्यसेत् ॥ १५४ ॥
निसृर्जनौ तादृशौ तु शिरस्यथ शिखातले ।
निरङ्गुष्ठकनिष्ठौ तौ निरङ्गुष्ठप्रदेशिनौ ॥ १५५ ॥
मुष्टी पृथक्कृतौ स्कन्धादूदन्तं वर्मणि स्मृतौ ।
तर्जन्यादित्रयं नेत्रे तलास्फोटोऽस्त्र ईरितः ॥ १५६ ॥
शैवी षडङ्गमुद्रोक्ता वर्णन्यासमथाचरेत् ।
जप्ता अप्यफला मन्त्रा विघ्नदा न्यासमन्तरा ॥ १५७ ॥
पीठस्य देवतान्यासाद्दे हे पीठं प्रकल्पयेम् ।
न्यसेत् मण्डूकमाधारे स्वाधिष्ठाने ततः सुधीः ॥ १५८ ॥
कालाग्निरुद्रं नाभौ तु कच्छपं हृदये ततः ।
आधारशक्तिमारभ्य हेमपीठावधि न्यसेत् ॥ १५९ ॥
दक्षवामांसवामोरुदक्षोरुषु यथाक्रमात् ।
धर्मं ज्ञानञ्च वैराग्यमैश्वर्यं विन्यसेत्ततः ॥ १६० ॥
वदने वामपार्श्वे च नाभौ दक्षिणपार्श्वके ।
अधर्मादीन् प्रविन्यस्य हृद्यनन्तमितोऽम्बुजम् ॥ १६१ ॥

---

षस्रं पूर्वं विष्णोरस्त्रतुल्यं शिवषड़ङ्गमुद्रा आह मुष्टीति ॥ १५४ ॥

निर्गता तर्जनी याभ्यां तौ निसृर्जनौ तादृशावङ्गुष्ठौ संयुक्तौ च मुष्टी शिरसि निरङ्गुष्ठं कनिष्ठौ तौ संयुक्तौ मुष्टी शिखायां अङ्गुष्ठतर्जनीभ्यां हीनौ वियुतौ मुष्टिः कवचे तलास्फोटः करतलास्फालनम् ॥ १५५—१५६ ॥

न्यासं विना मन्त्रा अफला विघ्नदास्ततो मूलमन्त्रस्य वर्णादिन्यासं कुर्यात् । १५७ ॥

पीठन्यासमनाह न्यसेदिति ॥ १५८ ॥

आधार-शक्ति कूर्मानन्त पृथिवी सागररत्नद्वीपसागरहेमपीठानि हृदि ॥१५९॥

दक्षांसादिषु धर्मादयः पीठपादाः ते च वृष केशरिभूतगजरूपाः ॥ १६० ॥

मुखादिष्वधर्मादयः पीठगात्राणि तेऽपि वृषादिरूपाः इतोऽनन्तमन्तं पद्मम् ॥ १६१ ॥

पद्मे सूर्य्येन्दुवह्नींश्च तेष्वर्णाद्या निजाः कलाः।
तत्तन्नामादिवर्णाद्यान् सत्त्वाद्यांस्त्रीन् गुणान्न्यसेत् ॥१६२॥
तत्रात्मत्रयमाद्यर्णपूर्वं तुर्य्यं परादिकम्।
मायातत्त्वं कलातत्त्वं विद्यातत्त्वं ततो न्यसेत् ॥ १६३ ॥
परतत्त्वञ्च नामादिवर्णपूर्वाणि विन्यसेत्।
स्वपीठशक्तीर्विन्यस्य न्यसेत् पीठ मनुं निजम् ॥ १६४ ॥
हृदि न्यस्यानन्तसुखं देवानासुत्तरोत्तरम्।
प्रत्याधारज्वलन्तञ्च पूर्वपूर्वस्य सत्तमैः ॥ १६५ ॥
इति देहमये पीठे ध्यायेत् स्वाभीष्टदेवताम्।
तत्तन्मुद्रां प्रदर्श्याथ कुर्य्यान्मानसपूजनम् ॥ १६६ ॥
अथार्पयेत्ततो देवं मन्त्रेणानेन तन्मनाः।
स्वागतं देवदेवेश सन्निधीभव केशव ! ॥ १६७ ॥
गृहाण मानसीं पूजां यथार्थपरिभाविताम्।
केशवेति पदस्थाने कार्य्य जहोऽन्यदैवते ॥ १६८ ॥
मनसा पूजयित्वेवं चणं तद्गतमानसः।
स्थित्वा मूलमनुं विद्वान् जपेदष्टोत्तरं शतम् ॥ १६९ ॥
जपं निवेद्य देवाय स्थापयेदर्घ्यमुत्तमम्।
बाह्यसम्पूजनायाथ तत्प्रकारो निगद्यते ॥ १७० ॥

इति मन्त्रमहोदधौ स्नानादिकथनं नाम एकविंशस्तरङ्गः।

---

तेषु सूर्य्यादिषु वर्णाद्याः सूर्य्यादिकलाः कं भं तपिन्यै नमः इत्यादि द्वादश-कलाः सूर्य्ये षं अमृतायै नम इत्याद्याः षोड़शकलाः रीं यं धूम्रार्च्चिषे नमः इत्याद्या दश वह्नौ नामादिवर्णान् सं सत्त्वाय नम इत्यादि ॥ १६२ ॥

आत्मत्रयं आदयः आ प प- वर्णास्तत्पूर्वं आं आत्मने पं अन्तरात्मने पं परमात्मने। तुर्य्यं ज्ञानात्मानं परादिकं ह्रींपूर्वम् ॥ १६३—१६७ ॥

अन्यदैवते जहः शङ्करपार्वतीत्यादि ॥ १६८—१७० ॥

इति नौकासमाख्यायां मन्त्रमहोदधिटीकायामेकविंशस्तरङ्गः।

---

# द्वाविंशस्तरङ्गः ।

स्ववामाग्रे तु षट्कोणवृत्तं भूपुरवेष्टितम् ।
कृत्वा त्रिकोणमूर्द्धाग्रं स्तम्भयेत् शङ्खमुद्रया ॥ १ ॥
पुष्पाक्षतैः षड़ङ्गानि तत्राग्न्यादिषु पूजयेत् ।
अस्त्रक्षालितमाधारं तत्रादध्यान्मनुं जपन् ॥ २ ॥
मं वह्निमण्डलायेति ततो दशकलात्मने ।
अमुकार्घ्येति पात्रान्ते सनाय नम इत्यपि ॥ ३ ॥
चतुर्विंशतिवर्णोऽयमाधारस्थापने मनुः ।
आधारे पूर्वकाष्ठादिदशार्चेत् पावकीः कलाः ॥ ४ ॥
स्वमन्त्रक्षालितं शङ्खं स्थापयेन्मनुमुच्चरन् ।
अं सूर्य्यमण्डलायान्ते द्वादशेति कलात्मने ॥ ५ ॥
अमुकार्घ्येति पात्राय नमोऽन्तस्त्र्यक्षिवर्णवान् ।
शङ्खस्थापनमन्त्रो यन्तारः कामो महाजलः ॥ ६ ॥

---

अर्घ्यस्थापनमाह स्वेति । स्वाग्रे त्रिकोणं षट्कोणवृत्तं चतुरस्रं कृत्वा शङ्खमुद्रया स्तम्भयेत् । शङ्खमुद्रालक्षणं यथा—

वामाङ्गुष्ठन्तु संगृह्य दक्षिणेन तु मुष्टिना ।
कुर्य्यादुत्तानं तथा मुष्टिमङ्गुष्ठन्तु प्रसारयेत् ॥
वामाङ्गुल्यस्तथा श्लिष्टाः संयुताः सुप्रसारिताः ।
दक्षिणाङ्गुष्ठके लग्ना मुद्रा शङ्खस्य भूतिदा ॥ १ ॥

ततः पुष्पाक्षतैरग्न्यादिषु षड़ङ्गानि संपूज्यास्त्रक्षालितमाधारं वह्निमण्डलाय दशकलात्मने देवार्घ्यपात्रासनाय नम इत्याधारस्त्रिकोणे स्थापयेत् तत्राधोऽकला धूम्रार्चिराद्याः पूजयेत् ॥ २—४ ॥

स्वमन्त्रेति । शङ्खमन्त्रक्षालितं शङ्खं अं सूर्य्यमण्डलाय द्वादशकलात्मने देवार्घ्यपात्राय नमः इति तमाधारे स्थापयेत् त्र्यक्षिवर्णवान् त्रयोविंशतिवर्णः शङ्ख-

चराय वर्म फट् स्वाहा पाञ्चजन्याय हृन्मनुः ।
शङ्खस्य विंशत्यर्णोयन्तेन प्रक्षालयेत्तु तम् ॥ ७ ॥
कला द्वादशसूर्य्यस्य शङ्खोपरि यजेत् क्रमात् ।
विलोममातृकां मूलं विलोमञ्च पठन् जलैः ॥ ८ ॥
आपूर्य्यमनुनेष्टा तत्त्वार्चेदैन्दवीः कलाः ।
ओँ सोममण्डलायान्ते षोड़शान्ते कलात्मने ॥ ९ ॥
अमुकार्घ्यामृतायेति हृन्मनुश्चार्घ्यं पूजयेत् ।
आह्वयेत्तत्र तीर्थानि तन्मन्त्रैः सृणिमुद्रया ॥ १० ॥
रविमण्डलतः स्वीयहृदो देवमथाह्वयेत् ।
अष्टकृत्वो जपेन्मन्त्रं स्पृष्ट्वा जलमनन्यधीः ॥ ११ ॥
अप्सु विन्यस्य चाङ्गानि हृदा सम्पूजयेदपः ।
मूलं जपेदष्टशतं छादयन्मत्स्यमुद्रया ॥ १२ ॥
संरक्षेदस्त्रमन्त्रेण छोटिकामुद्रया जलम् ।

---

वदस्थाने इष्टदेवतानामीशार्घ्यम् । ततश्च शङ्खमन्त्रमाह तार इति । कामः क्लीं षौं क्लीं महाजलचराय हुं फट् स्वाहा पाञ्चजन्याय नम इति ॥ ५ ॥ ६ ॥

तत्रार्ककलास्तपिन्याद्याः संपूज्य विलोमे मूलमातृके जपन् जलैस्तं सम्पूर्य्य षौं सोममण्डलाय षोड़शकलात्मने देवार्घ्यामृताय नम इत्यर्घ्यं संपूज्य तत्र तन्मन्त्रं सृणिमुद्रया गङ्गे चेत्यादि तीर्थमन्त्रणाङ्कुशमुद्रयार्कमण्डलात् तीर्थमावाह्य स्वहृदो देवमावाहयेत् । अङ्कुशमुद्रालक्षणमुक्तम् मत्स्यमुद्रोक्ता अङ्गुष्ठतर्जनीस्फोटं छोटिका मुद्रा वाममुष्टिनिर्गततर्जनीकं कृत्वा शङ्खोपरि भ्रमणमवगुण्ठनमुद्रा । वर्णिता एं-वीजेन गोमुद्रां धेनुमुद्रां सा यथा—

वामाङ्गुलीनां मध्येषु दक्षिणाङ्गुली संस्थिता ।
नियोज्य तर्जनीदक्षां वाममध्यमया तथा ॥
दक्षमध्यमया वामातर्जनीञ्च नियोजयेत् ।
वामयानामया दक्षां कनिष्ठाञ्च नियोजयेत् ॥
दक्षयानामया वामां कनिष्ठाञ्च नियोजयेत् ।
विश्लिष्टाधोमुखी चैषा धेनुमुद्रा प्रकीर्त्तिता ॥ इति ।

मुद्रया चावगुण्ठन्या वर्मणा त्ववगुण्ठयेत् ॥ १३ ॥
अमृतीकृत्य गोमुद्रां कुर्वन्नमृतबीजतः ।
संरोधिन्या सन्निरुध्य तत्र मुद्राः प्रदर्शयेत् ॥ १४ ॥
शङ्खमौशलचक्राख्या परमीकृत्य तत् पुनः ।
महामुद्रां विरचयन् योनिमुद्रां प्रदर्शयेत् ॥ १५ ॥
कृष्णमन्त्रे मालिनीञ्च रामे गरुड़मुद्रिकाम् ।
शङ्खाद्दक्षिणदिग्भागे प्रोक्षणीपात्रपूरणम् ॥ १६ ॥
कृत्वार्घ्यं तत्र निक्षिप्य तेनोक्षेक्षिर्निजां तनुम् ।
प्रजपन्मूलगायत्रीं पूजावस्तुचयं तथा ॥ १७ ॥
पाद्याचमनपात्रे च दद्यादर्घ्यस्य चोत्तरे ।
एवमर्घ्यविधिः प्रोक्तः सर्वसाधारणो मया ॥ १८ ॥
विहाय शङ्करसूर्य्यमर्घ्यं शङ्खः प्रशस्यते ।
हैमरूप्योडुम्बराजरीतिदारुमृदुद्भवम् ॥ १९ ॥
पालाशं पद्मपत्रं वा स्मृतं पाद्यादिभाजनम् ।
अशक्तावर्घ्यपात्रेण पाद्यादीनि निवेदयेत् ॥ २० ॥

---

अमृतबीजतः वमितिबीजेन संरोधिन्या मुद्रया सा यथा—

अङ्गुष्ठगर्भिणी सैव संनिरोधे समीरिता ।

इति अङ्गुष्ठगर्भं मुष्टिद्वयमित्यर्थः । तत्रार्घ्यमुद्राः शङ्खाद्याः ॥ ८—१४ ॥

शङ्खमुशलचक्रमुद्रा उक्ताः महामुद्राङ्कुर्वन् परमीकृत्य करयोरङ्गुष्ठौ संग्रथ्य करौ वियोजयेदिति महामुद्रोक्ता । कराङ्गुल्यग्राणि वक्रीकृत्य सम्मुखं योजितानि मालिनी मुद्रा । गरुड़मुद्रा यथा—

सम्मुखौ तु करौ कृत्वा ग्रन्थयित्वा कनिष्ठके ।
पुनश्चाधोमुखौ कृत्वा तर्जन्यौ योजयेत्तयोः ॥
मध्यमानामिके द्वे तु पक्षाविव विचालयेत् ।
मुद्रैषा पक्षिराजस्य सर्वविघ्ननिवारिणि ॥ इति ।

तेन प्रोक्षणीजलेन निजाङ्गमुक्षेत् सिञ्चेत् मूलगायत्र्या पूजोपकरणानि च उक्षेत् ॥ १५—१८ ॥

अन्तर्यागं ततः कुर्य्यात् पीठे देहमये सुधीः।
न्यासस्थानेषु मण्डूकमुखान् गन्धादिभिर्यजेत्॥ २१॥
पीठमन्त्रान्तमन्त्रेज्या हृदये स्वेष्टदेवता।
कुण्डलीमथ चोत्थाप्य द्वादशान्ते परं नयेत्॥ २२॥
तदुत्थामृतधाराभिः प्रीणयेत् स्वेष्टदेवताम्।
जपं कृत्वा निवेद्यास्मै मनसा न विसर्जयेत्॥ २३॥
मूर्द्धहृत्पादगुह्येषु तनौ पुष्पाञ्जलीन् क्षिपेत्।
अन्तर्यागं विधायेत्थं वाह्यपूजनमाचरेत्॥ २४॥
अन्तर्यागवहिर्यागौ गृहस्थः सर्वथाचरेत्।
आद्यमेव ब्रह्मचारी वाणप्रस्थो यतिस्तथा॥ २५॥
वर्द्धन्यां प्रक्षिपेत् किञ्चिदर्घ्योदकमनन्यधीः।
प्राणानायम्य मूलेन वामे गुरुत्रयं नमेत्॥ २६॥
दक्षिणे च गणेशानं पीठपूजामथाचरेत्।
स्वर्णादिनिर्म्मिते यन्त्रे यद्वा चन्दननिर्म्मिते॥ २७॥
मण्डूकात् परतत्त्वान्तं दिङ्मध्ये पीठशक्तयः।
पृथिव्यनन्तरं पूज्यः क्षीराब्धिर्माधवे श्रियाम्॥ २८॥
इक्षुसिन्धुर्गणेशे स्यादन्यत्रामृतसागरः।
अग्निराक्षसवायूीशकोणे धर्मादयः स्मृताः॥ २९॥
इन्द्रकीनाशवरुणसोमाशास्तु नञादिकाः।

---

उडुम्बरस्ताश्वं रीतिः पित्तलम्॥ १९—२१॥

कुण्डलीमिति। आधारचक्रात् कुण्डलिनीमुत्थाप्य द्वादशान्ते ब्रह्मरन्ध्रे वर्त्तमानं परब्रह्म नयेत्॥ २२—२४॥

ब्रह्मचारिवानप्रस्थयतय आद्यमन्तर्यागमेव तेषां द्रव्याभावात् वहिर्यागे नाधिकारः॥ २५—२७॥

मण्डूकादयः परतत्त्वान्ताः पीठदेवता उक्ताः॥ २८। २९॥

धर्मादिपूजने प्राची तथैवावरणार्चने ॥ ३० ॥
पूजकस्य पुरः कल्प्या शक्त्यादिषु यथा स्वकम् ।
श्वेता कृष्णारुणा पीता श्यामा रक्ता सितासिता ॥ ३१ ॥
रक्ताम्बराभयधरा ध्येयाः स्युः पीठशक्तयः ।
शालग्रामे मणौ यन्त्रे नित्यपूजां समाचरेत् ॥ ३२ ॥
हैमादिप्रतिमायां वा स्थापितायां यथाविधि ।
अङ्गुष्ठादिवितस्त्यन्तमानसा प्रतिमा गृहे ॥ ३३ ॥
पूज्या न दग्धा भिन्ना वा नोर्द्ध्वाधोदृक् न वक्रिका ।
लिङ्गं वा लक्षणोपेतं तत्रावाहनमाचरेत् ॥ ३४ ॥
मूलमुच्चार्य हृदयात् सुषुम्ना वर्त्मना सह ।
द्वारेण ब्रह्मरन्ध्रस्य नासारन्ध्रे विनिर्गतम् ॥ ३५ ॥
पुष्पाञ्जलौ मातृकाब्जे योजयित्वा विनिक्षिपेत् ।
मूर्त्तौ पुष्पाञ्जलिं चैतदावाहनमुदीरितम् ॥ ३६ ॥
शालग्रामे स्थिरायां वा नावाहनविसर्जने ।
आह्वानाद्युपचारेषु श्लोकान् अभ्यूदितान् पठेत् ॥ ३७ ॥
आत्मसंस्थमजं शुद्धं त्वामहं परमेश्वर ! ।
अरण्यामिव हव्यांशं मूर्त्तावावाहयाम्यहम् ॥ ३८ ॥
पञ्चायतनपक्षे तु मध्ये विष्णुं समर्चयेत् ।
अग्निनिर्ऋतिवायव्येशानेषु गणनायकम् ॥ ३९ ॥
रविं शिवां शिवं मध्ये गणेशश्चेत् शिवं शिवाम् ।
रवौ विष्णुं रवौ मध्ये विघ्नापहगणेश्वरान् ॥ ४० ॥

---

कीनाशो यमः नक्रादिका अधर्मादयः ॥ ३० ॥

शक्त्यादिषु यथा स्वकं प्रतिष्ठेव प्राची । पीठशक्तीनां ध्यानमाह श्वेतेति । यथाविधि स्थापितायां विधिना प्रतिष्ठितायां ऊर्द्ध्वदृक् अधोदृक् वक्रा न पूज्या ॥ ३१—३८ ॥

भवान्यां मध्यसंस्थाप्यामीशविघ्नार्कमाधवान् ।
हरे मध्यगते सूर्य्य-गणेश गिरिजाच्युतान् ॥ ४१ ॥
सम्पूज्यादौ मध्यगतं गणेशाद्दि ततो यजेत् ।
गणेशे मध्यसंस्थे तु पूजयेद्भास्करादितः ॥ ४२ ॥
काण्डानुसमयेनात्र पूजा प्रोक्ता मनीषिभिः ।
विधायावाहनं चेत्यमावाहन्या तु मुद्रया ॥ ४३ ॥
संस्थ्यापिन्या स्थापयेत्तु मूलान्ते श्लोकमुच्चरन् ।
तवेयं महिमा मूर्त्तिस्तस्यां त्वं सर्वगः प्रभो ! ॥ ४४ ॥
भक्तिस्नेहसमाकृष्टदीपवत् स्थापयाम्यहम् ।
ऊहः कार्य्यो भवान्यादौ श्लोकेष्वावाहनादिषु ॥ ४५ ॥
मूलश्लोकौ पठन् कुर्य्यादासनं चोपवेशनम् ।
सर्वान्तर्यामिने देव सर्वबीजमयं शुभम् ॥ ४६ ॥
स्वात्मस्थाय परं शुद्धमासनं कल्पयाम्यहम् ।
अस्मिन् वरासने देव सुखासीनोऽक्षरात्मक ॥ ४७ ॥
प्रतिष्ठितो भवेश त्वं प्रसीद परमेश्वर ! ।
मूलं श्लोकं ततः कुर्य्यात् सन्निधानं स्वमुद्रया ॥ ४८ ॥
अनन्या तव देवेश ! मूर्त्तिशक्तिरियं प्रभो ! ।
सान्निध्यं कुरु तस्यां त्वं भक्तानुग्रहतत्पर ! ॥ ४९ ॥

---

पञ्चायतनपूजामाह पञ्चेति ॥ ३९—४२ ॥

काण्डानुसमयेनेति । काण्डानुसमयः पदार्थानुसमयश्चेति द्वौ प्रकारद्वयम् एकस्य पूजाकाण्डं समाप्यापरार्चनङ्काण्डानुसमयः प्रतिपदार्थं सर्वेषां पूजापदार्थानुसमयः ततोऽत्र काण्डानुसमयस्ततोऽत्र काण्डानुसमयेन पूजा । आवाहनमुद्रया आवाहनं—

अनामामूलसंलग्नाङ्गुष्ठाग्राञ्जलिरीरिता ।
देवाह्वानकरी चैषा मुद्रावाहनसंज्ञका ॥ इति ।

आवाहनमुद्राधोमुखी संस्थापनी आत्मसंस्थापनां मित्याहुः ॥ ४३—४७ ॥

पठन्मूलं तथा श्लोकं सन्निरुध्यात् स्वमुद्रया ।
अत्रायाः तव देवेश ! कृपाम्भोधे गुणाम्बुधे ॥ ५० ॥
आत्मानन्दैकतृप्तं त्वां निरुणध्मि पितर्गुरो ! ।
मुद्रया सम्मुखीकुर्य्यात् मूलं श्लोकं च सम्पठन् ॥ ५१ ॥
अज्ञानाद्दुर्मनस्त्वाद्वा वैकल्यात् साधनस्य च ।
यदपूर्णं भवेत् कृत्यं तदप्यभिमुखो भव ॥ ५२ ॥
कुर्वीत मूलश्लोकाभ्यां प्रार्थन्या मुदयार्पणे ।
दृशापीयूषवर्षिण्या पूरयन् यज्ञविष्टरम् ॥ ५३ ॥
मूर्त्ता वा यज्ञसम्पूर्त्तः स्थितो भव महेश्वर ! ।
न्यसेत् षड़ङ्गं देवाङ्गे सकलीकरणं सुधीः ॥ ५४ ॥
मूलश्लोकं पठन् कुर्य्यादवगुण्ठं स्वमुद्रया ।
अव्यक्तवाङ्मनश्चक्षुःश्रोत्र प्रज्वलितद्युते ॥ ५५ ॥
स्वतेजःपुञ्जकेनाशु वेष्टितो भव सर्वतः ।
गोमुद्रयामृतीकृत्य विदध्यात् परमीकृतिम् ॥ ५६ ॥
महामुद्रां विरचयंस्ततः स्वागतमाचरेत् ।
मूलमन्त्रं तथा श्लोकं पठन् तद्गतमानसः ॥ ५७ ॥
यस्य दर्शनमिच्छन्ति देवाः स्वाभीष्टसिद्धये ।
तस्मै ते परमेशाय स्वागतं स्वागतञ्च मे ॥ ५८ ॥
ततः सुस्वागतं कुर्य्यात् मूलश्लोकौ समुच्चरन् ।
कृतार्थोऽनुगृहीतोऽस्मि सफलं जीवितं मम ॥ ५९ ॥

---

स्वमुद्रया सन्निधानमुद्रया उत्तानाङ्गुष्ठौ मुष्टीन्निधानमुद्रा स्वमुद्रया सन्निरोधिन्यासौक्ता ॥ ४८—५० ॥

मुद्रया सम्मुखीकरण्या उत्तानौ मुष्टी सम्मुखीकरणी ॥ ५१ ॥ ५२ ॥

हृदयाञ्जलिनिबन्धनं प्रार्थनीमुद्रा स्वमुद्रयाऽवगुण्ठन्या सौक्ता गोमुद्रोक्ता ॥ ५७—५६ ॥

महामुद्राप्युक्ता ॥ ५७—५९ ॥

आगतो देवदेवेश ! सुखागतमिदं पुनः ।
श्यामाकविष्णुक्रान्ताब्जदूर्वाः पाद्यजले क्षिपेत् ॥ ६० ॥
मूलश्लोकनमो मन्त्रैः पाद्यं पादाम्बुजेऽर्पयेत् ।
यद्भक्तिलेशसम्पर्कात् परमानन्दविग्रहम् ॥ ६१ ॥
तस्मै ते चरणाब्जाय पाद्यं शुद्धाय कल्पये ।
लवङ्गजातिकक्कोलं प्रक्षिप्याचमनीयके ॥ ६२ ॥
दद्यादाचमनं वक्त्रे मूलश्लोकसुधाक्षरैः ।
वेदानामपि वेद्याय देवानां देवतात्मने ॥ ६३ ॥
आचामं कल्पयामीश शुद्धानां शुद्धिहेतवे ।
अर्घ्यपात्रे क्षिपेत् दूर्वातिलदर्भाग्रसर्षपान् ॥ ६४ ॥
यवपुष्पाक्षतान् गन्धं तेनार्घ्यं मूर्ध्नि चाचरेत् ।
मूलश्लोकशिरोमन्त्रैर्देवस्य मनुवित्तमः ॥ ६५ ॥
तापत्रयहरं दिव्यं परमानन्दलक्षणम् ।
तापत्रयविनिर्मुक्तं तवार्घ्यं कल्पयाम्यहम् ॥ ६६ ॥
पात्रे तु मधुपर्कस्य दध्याज्यं मधु च क्षिपेत् ।
मूलश्लोकसुधामन्त्रैर्दद्यात्तत् वदने प्रभोः ॥ ६७ ॥
सर्वकालुष्यहीनाय परिपूर्णसुखात्मने ।
मधुपर्कमिदं देव ! कल्पयामि प्रसीद मे ॥ ६८ ॥
पुनराचमनं दद्यान्मूलं श्लोकान्तरं पठन् ।
उच्छिष्टोऽप्यशुचिर्वापि यस्य स्मरणमात्रतः ॥ ६९ ॥
शुद्धिमाप्नोति तस्मै ते पुनराचमनीयकम् ।

---

पाद्यद्रव्याण्याह श्यामाकेति ॥ ६० ॥ ६१ ॥
आचमनीयद्रव्याण्याह लवङ्गेति । कक्कोलं सुगन्धद्रव्यं मरिचोपमः ॥६२—६४॥
शिरोमन्त्रः स्वाहा ॥ ६५ ॥ ६६ ॥
सुधामन्त्रो वं ॥ ६७—६९ ॥

स्नानवस्त्रोपवीतान्ते नैवेद्यान्तेऽपि तत् स्मृतम् ॥ ७० ॥
पाद्यादिद्रव्याभावे तु तत्स्मरन्नक्षतान् क्षिपेत् ।
गन्धतैलं ततो दद्यात् मूलं श्लोकं पठन् सुधीः ॥ ७१ ॥
ॐ स्नेहं गृहाण स्नेहेन लोकनाथ ! महाशय ! ।
सर्वलोकेषु शुद्धात्मन् ! ददामि स्नेहमुत्तमम् ॥ ७२ ॥
हरिद्राद्यैस्समुद्वर्त्त्य स्नापयेदुभयं पठन् ।
परमानन्दबोधाब्धिनिमग्ननिजमूर्त्तये ॥ ७३ ॥
साङ्गोपाङ्गमिदं स्नानं कल्पयाम्यहमीश ! ते ।
ततः सहस्रं शङ्खेन शतं वा शक्तितोऽपि वा ॥ ७४ ॥
गन्धयुक्तोदकैरीशमभिषिञ्चेन्मनुं स्मरन् ।
पठन्मूलं ततः श्लोके दद्याद्वस्त्रोत्तरीयके ॥ ७५ ॥
मायाचित्रपटच्छन्ननिजगुह्योरुतेजसे ।
निरावरणविज्ञानवासस्ते कल्पयाम्यहम् ॥ ७६ ॥
यमाश्रित्य महामाया जगत्सम्मोहिनी सदा ।
तस्मै ते परमेशाय कल्पयाम्युत्तरीयकम् ॥ ७७ ॥
पीतं विष्णौ सितं शम्भौ रक्तं विघ्नार्कशक्तिषु ।
सच्छिद्रं मलिनं जीर्णं त्यजेत्तैलादिदूषितम् ॥ ७८ ॥
उपवीतं भूषणानि प्रयच्छेदुभयं पठन् ।
यस्य शक्तित्रयेणेदं सम्प्रोतमखिलं जगत् ॥ ७९ ॥
यज्ञसूत्राय तस्मै ते यज्ञसूत्रं प्रकल्पये ।
स्वभावसुन्दराङ्गाय नानाशक्त्याश्रयाय ते ॥ ८० ॥
भूषणानि विचित्राणि कल्पयाम्यमरार्चितम् ।
मूलमन्त्रेण पुटितमेकैकं मातृकाक्षरम् ॥ ८१ ॥

---

स्नानवस्त्रोपवीतनैवेद्येषु दद्यादाचमनीयं दद्यात् ॥ ७०—८१ ॥

विन्यसेद्दे वताङ्गे षु योगोऽयं लोकमोहनः।
कनिष्ठया एतत्संख्यं पूर्ववत् गन्धमर्पयेत् ॥ ८२ ॥
परमानन्दसौभाग्यपरिपूर्णदिगन्तरम्।
गृहाण परमं गन्धं कृपया परमेश्वर! ॥ ८३ ॥
ततः कनिष्ठाङ्गुष्ठाभ्यां गन्धमुद्रां प्रदर्शयेत्।
मूलं श्लोकं पठन्नानापुष्पाणि विनिवेदयेत् ॥ ८४ ॥
तुरीयवनसम्भूतन्नानागुणमनोहरम्।
अमन्दसौरभं पुष्पं गृह्यतामिदमुत्तमम् ॥ ८५ ॥
तर्जन्यङ्गुष्ठयोगेन पुष्पमुद्रां प्रदर्शयेत्।
अक्षतानर्कधत्तूरौ विष्णौ नैवार्पयेत् सुधीः ॥ ८६ ॥
बन्धूकं केतकीं कुन्दं केसरं कुटजं जयाम्।
शङ्करे नार्पयेद्विद्वान् मालतीं यूथिकामपि ॥ ८७ ॥
शक्तौ दूर्वार्कमन्दारान्मालूरं तगरं रवौ।
विनायके तु तुलसीं नार्पयेज्जातुचिद्बुधः ॥ ८८ ॥
श्वेतं पीतं हरेरिष्टं रक्तं रविगणेशयोः।
निर्गन्धकेशकीटादिदूषितं चोग्रगन्धकम् ॥ ८९ ॥
मलिनन्तुच्छसंस्पृष्टमाघ्रातं स्वविकासितम्।
अशुद्धभाजनानीतं ज्ञात्वा नीतं च याचितम् ॥ ९० ॥
शुष्कं पर्य्युषितं क्षाणं भूमिगं नार्पयेत् सुमम्।

---

पूर्ववत् मूलश्लोकौ पठन् गन्धं अर्पयेत् ॥ ८२ ॥ ८३ ॥

अङ्गुष्ठौ कनिष्ठामूललग्नौ गन्धमुद्राः ॥ ८४ ॥ ८५ ॥

तर्जन्यावङ्गुष्ठमूललग्ने पुष्पमुद्रा पुष्पाण्याह अक्षतानित्यादिना अक्षतान् तण्डुलादीन् तिलकोपर्य्यर्पणे न दोषः ॥ ८६ ॥ ८७ ॥

शक्तौ दूर्वादयो निषिद्धाः महालक्ष्म्यास्तु दूर्वा प्रशस्ता मालूरं बिल्वं तगरं बन्धतगरं तगर इति कान्यकुब्जभाषायां नातु कदाचिदपि ॥ ८८ ॥

निषिद्धान्याह निर्गन्धमिति ॥ ८९ ॥

चम्पकं कमलं त्यक्त्वा कलिकामपि वर्जयेत ॥ ९१ ॥
कुरण्ठकं काञ्चनारं वर्जयेद्बृहतीयुगम् ।
पुष्पं पत्रं फलं देवे न दद्यादधोमुखम् ॥ ९२ ॥
पुष्पाञ्जलौ न तद्दोषस्तथा पर्य्युषितस्य च ।
तुलसी वकुलो वृच्चश्चम्पकश्च सरोजिनी ॥ ९३ ॥
विल्वकह्लारदमनास्तथा मरुवकः कुशः ।
दूर्वाह्विवल्लग्रपामार्गविष्णुक्रान्ता मुनिद्रुमाः ॥ ९४ ॥
धात्रीयुतोनामेतेषां पत्रैः कुर्य्यात् सुरार्चनम् ।
जम्बूदाड़िमजम्बीरतिन्तिड़बीजपूरकाः ॥ ९५ ॥
रम्भा धात्री च वदरी रसालः पनसोऽपि च ।
एषां फलैर्यजेद्देवं तुलसी तु हरेः प्रिया ॥ ९६ ॥
सुवर्णपुष्पतुलसी नैव निर्माल्यतां व्रजेत् ।
पुष्पपूजां विधायेत्थं कुर्य्यादावरणार्चनम् ॥ ९७ ॥
अङ्गादिदिक्पइत्यन्तं ततो धूपादिकं चरेत् ।
अग्निनैर्ऋतिवायूीशकोणेषु हृदयं शिरः ॥ ९८ ॥
शिखां कवचमाराध्य नेत्रमध्ये प्रपूजयेत् ।

---

न तु संसृष्टं शरीरलग्नं स्वविकासितं बलादात्मना विकासितं पर्य्युषितं दिनान्तरानीतं सुमम्पुष्पं चम्पककमलयोः कलिका अपि शस्ता: ॥ ९०—९१ ॥

पुष्पपत्रफलान्यधोमुखानि नार्पयेत् यथोत्पन्नं तथैवार्पयेदित्यर्थः ॥ ९२ ॥

पुष्पाञ्जलौ अधोमुखपर्य्युषितयोर्न दोषः ॥ ९३ ॥

अहिवल्ली नागवल्ली मुनिद्रुमोऽगस्त्यः ॥ ९४ ॥

धात्री आमलकी तुलस्यादीनां पत्रैरपि पूजा जम्बादीनां पत्रैरपि फलैः ॥ ९५ ॥
रसालः आम्रः ॥ ९६ ॥ ९७ ॥

दिक्पइत्यन्तं दिक्पालायुधपर्य्यन्तं आवरणपूजा इदं साम्प्रदायिकं क्वचिदङ्गपूजान्तः प्रागपि वज्रायुधमप्यावरणानि सन्ति अङ्गपूजाख्यानमाह अग्नीति ॥ ९८ ॥

दिक्षस्त्रमङ्गदेव्यस्ता ध्यातव्या वामलोचनाः ॥ ९९ ॥
सिता श्वेतासितास्तिस्रो रक्ता इष्टा भयान्विताः।
स्वदिक्षु प्रयजेद्दिक्पान् जातिहेत्यादिसंयुतान् ॥ १०० ॥
तारादिनिजबीजाद्यान् तत्प्रयोगोऽधुनोच्यते।
तारं बीजव्यथेन्द्रायामुकाधिपतये ततः ॥ १०१ ॥
सायुधाय सवाहान्ते नायसान्ते परीति च।
वारायान्ते सशक्तीति कायसेतिपदं ततः ॥ १०२ ॥
पार्षदाय नमोऽन्तोऽयं दिक्पालानां मनुः स्मृतः।
इन्द्रायेति पदस्थाने वज्रादि पदमुच्चरेत् ॥ १०३ ॥
आद्यामुकपदस्थाने क्रमाज्जातीर्वदेत् सुधीः।
सुरतेजः प्रेतरक्षः सलिलप्राणतारकाः ॥ १०४ ॥
भूताहिलोका विज्ञेया आशा पालकजातयः।
पार्षदात् पूर्वममुकस्थाने स्यात् स्वेष्टदेवता ॥ १०५ ॥
बीजानि पूर्वमुक्तानि वाहनान्यायुधान्यपि।
यातु तोयपयोर्मध्येऽनन्तस्पूर्वेशयोऽस्तु कम् ॥ १०६ ॥

---

अङ्गदेवताध्यानमाह वामलोचनाः स्त्रीरूपाः ॥ ९९ ॥

तिस्रः कवचनेत्रास्त्ररूपाः रक्ताः इष्टाभयान्विता वराभययुताः स्वदिक्षु प्रसिद्धासु दिक्पालानिन्द्रादीन् जातिहेत्यादिसंयुतान् जातयः सुरादय हेतयो वज्रादयः आदिशब्दाद्वाहनशक्ती ॥ १०० ॥

प्रणवादीनि यानि निजबीजानीन्द्रादिबीजानि पूर्वमुक्तानि लं रं मं चं वं यं सं हं क्रीं आमिति प्रयोगमाह तारमिति ॥ १०१—१०२ ॥

आद्येति। 'अधिपतय इत्येतस्मात् पूर्वस्यामुकपदस्थाने सुरादिजातीर्वदेत् ॥ १०४ ॥

बीजानि ते दिक्पालाय पूर्वमुक्ताः यातुतोयपयोर्निर्ऋतिवरुणयोः कं ब्रह्माणं यथा—ओं लं इन्द्राय सुराधिपतये सायुधाय सवाहनाय सपरिवाराय सशक्तिकाय सपार्षदाय नमः ओं रं अग्नये तेजोऽधिपतये मं यमाय प्रेताधिपतये क्षं नैर्ऋतये रक्षोऽधिपतये वं वरुणाय जलाधिपतये यं वायवे प्राणाधिपतये सं सोमाय

प्रत्याहृति क्षिपेद्देवे पुष्पं मन्त्रमिमं जपन् ।
ओं अभीष्टसिद्धिं मे देहि शरणागतवत्सल ! ॥ १०७ ॥
भक्त्या समर्पयेत्तुभ्यमिदमावरणार्चनम् ।
आह्वानाद्युपचारेषु प्रत्येकं पुष्पपाथसी ॥ १०८ ॥
दत्त्वा प्रक्षाल्य च करमुपचारान्तरञ्चरेत् ।
धूपपात्रस्थिताङ्गारे क्षिप्तागुरुपुरादिकम् ॥ १०९ ॥
पात्रमस्त्रेण सम्प्रोक्ष्य हृदा पुष्पं समर्पयेत् ।
संस्पृशन् वामतर्जन्या मूलं श्लोकञ्च संपठेत् ॥ ११० ॥
ओं वनस्पतिरसोपेतो गन्धाढ्यः सुमनोहरः ।
आघ्रेयः सर्वदेवानां धूपोऽयं प्रतिगृह्यताम् ॥ १११ ॥
साङ्गाय सपरीत्यन्ते वाराय ङेन्तदेवता ।
धूपं समर्पयामीति नमोऽन्तं मन्त्रमुच्चरन् ॥ ११२ ॥
शङ्खाम्बु प्रक्षिपेद्भूमौ धूपमुद्रां प्रदर्शयेत् ।
तर्जन्यङ्गुष्ठयोगेन घण्टामर्चेत् स्वमन्त्रतः ॥ ११३ ॥
जयध्वनिमन्त्रमातः स्वाहान्तः सदृशाक्षरः ।
वादयन् वामहस्तेन कीर्त्तयन् देवतागुणान् ॥ ११४ ॥
धूपयेद्दक्षहस्तेन देवतांनाभिदेशतः ।
जलं पुष्पाञ्जलिं दद्यात् दीपदानमपीदृशम् ॥ ११५ ॥

---

नक्षत्राधिपतये हं ईशानाय भूताधिपतये क्लीं अनन्ताय नागाधिपतये ग्लां ब्रह्मणे लोकाधिपतये इति प्रयोगः ॥ १०५—१०७ ॥

पुष्पपाथसी पुष्पोदके दत्त्वा ॥ १०८ ॥

धूपमाह धूपपात्रेति । पुरो गुग्गुलुः आदिशब्दात् घृतकर्पूरशर्कराः ॥१०९॥

अङ्गारेष्वगुर्वादि प्रक्षिप्य फडिति प्रोक्ष्य नम इति पुष्पं समर्प्य वामतर्जन्या संस्पृश्य मूलश्लोकान्ते साङ्गाय सपरिवाराय धूपं समर्पयामीति मन्त्रोदकं क्षिपेत् तर्जनीमूलयोरङ्गुष्ठयोगो धूपमुद्रा। घण्टामन्त्रः ईदृशं दीपदानमपि प्रोक्षणं प्रयोगश्च तद्वत्। विशेषमाह धूपयेदिति ॥ ११०—११५ ॥

वामसध्यमया स्पर्शो मूलश्लोकस्य कीर्त्तनम् ।
ओं सुप्रकाशो महादीपः सर्वतस्तिमिरापहः ॥ ११६ ॥
सबाह्याभ्यन्तरं ज्योतिर्दीपोऽयं प्रतिगृह्यताम् ।
धूपस्थाने दीपपदं मध्यमाङ्गुष्ठयोगतः ॥ ११७ ॥
दीपमुद्रादर्शनञ्च तद्दानं नेत्रदेशतः ।
भूयः पक्षे तु वर्त्तीनां विषमा वर्त्तिका मताः ॥ ११८ ॥
घृतदीपो दक्षिणे स्यात्तैलदीपस्तु वामतः ।
सितवर्त्तियुतो दक्षे वामाङ्गे रक्तवर्त्तिका ॥ ११९ ॥
अत्रान्यद्धूपवत् ज्ञेयं ततो नैवेद्यमर्पयेत् ।
स्वर्णादिभाजने साज्यं पायसं शर्करादिकम् ॥ १२० ॥
परिवेष्य यथाशक्ति प्रोक्षेत् कैरस्त्रमन्त्रितैः ।
चक्रमुद्रामथारच्य प्रोक्षेत्तन्मन्त्रितैर्जलैः ॥ १२१ ॥
वायुवीजेनार्कवारं ततस्तज्जातमारुतैः ।
नैवेद्यदोषं संशोध्य चिन्तयेद्दक्षिणे करे ॥ १२२ ॥
अग्निवीजं तस्य पृष्ठे वामं करतलं न्यसेत् ।
तं दर्शयित्वा नैवेद्ये तदुत्थेनाग्निनाखिलम् ॥ १२३ ॥
नैवेद्यदोषं सन्दह्य ध्यायेद्वामकरेऽमृतम् ।
तत्पृष्ठे दक्षिणं हस्तं कृत्वा तत्र प्रदर्शयेत् ॥ १२४ ॥

---

धानेति । मध्यमामूलयोरङ्गुष्ठयोगो दीपमुद्रा दीपदानं नेत्रप्रदेशे वर्त्तीनाम्भूरिपक्षे बहुत्वपक्षे विषमाख्याज्या ॥ ११६—११८ ॥

सितवर्त्तियुततैलदीपोऽपि दक्षिणतः रक्तवर्त्तियुतो घृतदीपोऽपि वामत इत्यर्थः ॥ ११९ ॥

अन्यज्जलप्रक्षेपादि ॥ १२० ॥

कैर्जलैः चक्रमुद्रोक्ता वायुवीजेन द्वादशवारं मन्त्रितैर्जलैस्तन्नैवेद्यं प्रोक्षेत् ॥ १२१ ॥

वायुवीजोत्थमारुतैर्नैवेद्यदोषं संशोध्य दक्षिणकरे रं वीजं विचिन्त्य दक्षकरपृष्ठे वामकरं दत्त्वा नैवेद्यं प्रदर्श्याग्निवीजोत्थाग्निना दोषं दग्ध्वा वामकरे वं वीजं

आप्लावितं स्मरेद्भोज्यं बीजोत्थामृतधारया।
प्रोक्ष्य मूलेन तत् स्पृष्ट्वाष्टशो मूलमनुं जपेत् ॥ १२५ ॥
दर्शयित्वा धेनुमुद्रां गन्धपुष्पैस्तदर्चयेत्।
देवे पुष्पाञ्जलिं दत्त्वा तेजो देवमुखोत्थितम् ॥ १२६ ॥
विचिन्त्य वामाङ्गुष्ठेन स्पृशेन्नैवेद्यभाजनम्।
दक्षहस्तेर्जलं धृत्वा मूलश्लोकं शिरः पठेत् ॥ १२७ ॥
सत्पात्रसिद्धं सुहविर्विविधानेकभक्षणम्।
निवेदयामि देवेश ! सानुगाय गृहाण तत् ॥ १२८ ॥
साङ्गायेत्यादिकं प्रोच्य जलमुत्सृज्य भूतले।
नैवेद्यमुद्रामङ्गुष्ठानामिकाभ्यां प्रदर्शयेत् ॥ १२९ ॥
सपुष्पाभ्याङ्कराभ्यान्तिः प्रोद्धरन् भक्ष्यभाजनम्।
निवेदयामि भवते जुषाणेदं हविर्हरे ॥ १३० ॥
षोड़शार्णानिमान् प्रोच्य ग्रासमुद्रां प्रदर्शयेत्।
वामहस्तेन पद्माभ्यां प्राणाद्या दक्षिणेन तु ॥ १३१ ॥
कनिष्ठानामिकाङ्गुष्ठैर्मुद्रा प्राणस्य कीर्त्तिता।
तर्जनीमध्यमाङ्गुष्ठैरपानस्य तु सा स्मृता ॥ १३२ ॥
अनामामध्यमाङ्गुष्ठैरुदानस्य च मुद्रिका।
तर्जन्यनामामध्याभिः साङ्गुष्ठाभिश्चतुर्थिका ॥ १३३ ॥

---

ध्यात्वा तत्पृष्ठे दक्षहस्तं दत्त्वा नैवेद्यं प्रदर्श्यामृतबीजोत्थामृतमुतं कृत्वा मूलेन प्रोक्ष्य तत् स्पृष्ट्वाऽष्टवारं मूलं प्रजप्य धेनुमुद्रां प्रदर्श्य संपूज्य देवे पुष्पं दत्त्वा देवमुखोद्गतं तेजः कृत्वा वामाङ्गुष्ठस्पृष्टं नैवेद्यं सजलदक्षहस्तेन मूलश्लोकमुक्त्वाद्यान्ते साङ्गायेति पठन् निवेद्य मुद्रां प्रदर्शयेत्। अनामामूलयोरङ्गुष्ठयोगो नैवेद्यमुद्रा ॥ १२२—१२८ ॥

सपुष्पकराभ्यां पात्रमुद्धरन्निवेदयामीति पठन् ॥ १३० ॥

पद्माभौ वामहस्तौ ग्रासमुद्रा ॥ १३१ ॥

प्राणादिमुद्रा आह कनिष्ठेति ॥ १३२ ॥

चतुर्थिका व्यानमुद्रा ॥ १३३ ॥

सर्वाभिः सा समानस्य प्राणाद्यान् ङेद्विठान्वितान्।
तारपूर्वान् जपन्मुद्राः प्राणादीनां प्रदर्शयेत् ॥ १३४ ॥
ततो जवनिकां कृत्वा ब्रह्मेशाद्यैरिदं पठेत्।
पक्वं शालीभक्तमिति-मूलमन्त्रञ्च सप्तधा ॥ १३५ ॥
प्रतिसीरामपाकृत्य दद्यात् श्लोकं पठन् जलम्।
समस्तदेवदेवेश सर्वतृप्तिकरं परम् ॥ १३६ ॥
अखण्डानन्दसम्पूर्णं गृहाण जलमुत्तमम्।
स्थण्डिलेऽग्निमुपाधाय वैश्वदेवक्रियाञ्चरेत् ॥ १३७ ॥
मूलेन वीक्ष्य चास्त्रेण कृत्वा प्रोक्षणताड़ने।
कुशैस्तद्वर्मणाभ्युक्ष्य पूर्ववत् स्थापयेत् शुचिम् ॥ १३८ ॥
तन्मन्त्रेण तमभ्यर्चाह्वयेत्तत्रेष्टदेवताम्।
पूजयेद्गन्धपुष्पैस्तां महाव्याहृतिभिस्ततः ॥ १३९ ॥
हुत्वा व्यस्तसमस्ताभिराहुतीनां चतुष्टयम्।
अग्नेर्मूलेन जुहुयात् पञ्चविंशतिसङ्ख्यया ॥ १४० ॥
पुनर्व्याहृतिभिर्हुत्वा मूर्त्तौ देवं नियोजयेत्।
वह्निं विसृज्य देवाय दद्यादाचमनोदकम् ॥ १४१ ॥

---

सर्वाङ्गुलिभिः समानमुद्राः द्विठं स्वाहा श्रीं प्राणाय स्वाहेत्यादि ॥ १३४ ॥

जवनिका तिरस्करिणी तं धृत्वा शालीभक्तं ब्रह्मेशाद्यैरिति पद्यद्वयं पठेत्। ते यथा—ब्रह्मेशाद्यैः परित उरुभिः सूपविष्टैः समेतैर्लक्ष्यासिञ्जद्वलयकरया सादरं वीज्यमानः नर्मच्छेकी प्रहसन्मुखैर्व्याप्नुवन्पंक्तिमध्यं तुल्यैपीठे कनकघटिते षड्रसं क्षीरमिश्रः शालीभक्तं सुभक्तं शिशिरकरसितं पायसापूपसूपं लेह्यं पेयं च चोष्यं सितममृतफलं हारिकाद्यं सुखाद्यं आज्यं प्राज्यं सभोज्यं नयनरुचिकरं राजिकैलामरीचस्वादी यः शाकराजी परिकरममृताहारजोषं जुषस्वेति श्लोकद्वयं स्त्रीशपदेऽनदैवते ऊहः कार्यः स्वप्रतिपदेऽपि गौर्य्यापार्वतीश इत्यादि ॥ १३५ ॥

प्रतिसीरां जवनिकाम् ॥ १३६ ॥

शुचिं वह्निं पूर्ववत् प्रथमतरङ्गोक्तविधिना ॥ १३७ ॥ १३८ ॥

तेजः संयोज्य देवस्य निर्गतं देववक्त्रतः ।
नैवेद्यांशं तदुच्छिष्टभोजिने विनिवेदयेत् ॥ १४२ ॥
विष्वक्सेनो हरेस्तत्र चण्डेश्वर उमापतेः ।
विकर्त्तनस्य चण्डांशुर्वक्रतुण्डो गणेशितुः ॥ १४३ ॥
शक्तेरुच्छिष्टचाण्डाली स्मृता उच्छिष्टभोजिनः ।
ततो लवणमुत्तार्य्य कुर्य्यादारात्रिकं सुधीः ॥ १४४ ॥
अथो निवेद्य ताम्बूलं दर्शयेत् छत्रचामरे ।
पठेद्देवमना भूत्वा सार्द्धश्लोकचतुष्टयम् ॥ १४५ ॥
बुद्धिः सवासना क्लृप्ता दर्पणं मङ्गलानि च ।
मनोवृत्तिर्विचित्रा ते नृत्यरूपेण कल्पिता ॥ १४६ ॥
ध्वनयो गीतरूपेण शब्दवाद्यप्रभेदतः ।
छत्राणि नवपद्मानि कल्पितानि मया प्रभो ! ॥ १४७ ॥
सुषुम्ना ध्वजरूपेण प्राणाद्या चामरा मताः ।
अहङ्कारो गजत्वेन वेगः क्लृप्तो रथात्मना ॥ १४८ ॥
इन्द्रियाण्यश्वरूपाणि शब्दादौ रथवर्त्मना ।
मनः प्रग्रहरूपेण बुद्धिः सारथिरूपतः ॥ १४९ ॥
सर्वमन्यत्तथा क्लृप्तं तवोपकरणात्मना ।
श्लोकानेतान् पठित्वा तु मूलमन्त्रमनन्यधीः ॥ १५० ॥
यथाशक्ति जपित्वा तं मन्त्रेण विनिवेदयेत् ।
क्षिपन्नर्घस्य पानीयं देवता दक्षिणे करे ॥ १५१ ॥
गुह्यातिगुह्यगोप्ता त्वं गृहाणास्मत्कृतं जपम् ।

---

तत्मन्त्रेण वैश्वानरमन्त्रेण पूर्वोक्तेन ॥ १२९—१४२ ॥
उच्छिष्टभोजिनं चाह विष्वक्सेन इत्यादिना विकर्त्तनस्य रवेः ॥१४२—१४४॥
सार्द्धश्लोकचतुष्टयं शिवोक्तम् ॥ १४५ ॥
तदेवाह बुद्धिरिति ॥ १४६—१५० ॥

सिद्धिर्भवतु मे देव ! त्वत्प्रसादात् त्वयि स्थितिः ॥ १५२ ॥
कीर्त्तितश्लोकरूपोऽयं मन्त्रो जपनिवेदने।
दत्त्वा पराङ्मुखश्चार्घ्यं पुष्पैः षडङ्गं प्रपूजयेत् ॥ १५३ ॥
दण्डवत् प्रणिपत्येशन्देवे कुर्य्यात् प्रदक्षिणम्।
अजेशशक्तिगणपभास्कराणां क्रमादिमाः ॥ १५४ ॥
वेदार्द्धचन्द्रवह्निशाद्रिसङ्ख्याः स्युः सर्वसिद्धये।
स्तुत्वा ब्रह्मार्पणाख्येन मनुनात्मानमर्पयेत् ॥ १५५ ॥
इतः पूर्वं प्राणबुद्धिदेहधर्माधिकारतः।
जाग्रत्स्वप्नसुषुप्त्यन्तेऽवस्था सुमनसा वदेत् ॥ १५६ ॥
वाचा हस्ताभ्यां पद्भ्यामुदरेण शिवकस्ततः।
शेषोऽनन्तान्वितो यत् स्मृतं यदुक्तं च यत् कृतम् ॥ १५७ ॥
तत् सर्वं प्रोच्य ब्रह्मार्पणं भवत्वग्निवल्लभा।
मां मदीयञ्च सकलं हरये ते समर्पये ॥ १५८ ॥
तारस्तत् सदिति प्रोक्तो ब्रह्मार्पणमनुर्बुधैः।
प्रणवादिर्द्व्यशीत्यर्णो देवतात्मसमर्पणे ॥ १५९ ॥
संहारमुद्रया देवं संहरेत् हृदये निजे।
अन्यस्मिन् दैवते कार्य्ये ज्ञेयो हरिपदे बुधैः ॥ १६० ॥
एवं सम्पूज्य देवेशं ब्रह्मयज्ञं समाचरेत्।

---

मन्त्रेण गुह्यातिगुह्येत्यादिना तं जपं देवदक्षकरेऽर्घ्यं जलेनार्पयेत् ॥१५१—१५४॥
प्रदक्षिणसङ्ख्यामाह अजेति। अजे विष्णौ वेदाश्चतस्रः प्रदक्षिणा ईशेऽर्द्धं अशक्तावेका गणेशस्य तिस्रः रवेः सप्त ॥ १५५ ॥
ब्रह्मार्पणमन्त्रमाह इत इति ॥ १५६ ॥
वक्तः शः शेषोऽनन्तान्वितः न आयुतः मा यथा ओं इतः पूर्वं प्राणबुद्धिदेह धर्माधिकारतो जाग्रत्स्वप्नसुषुप्त्यवस्थासु मनसा वाचा हस्ताभ्यां पद्भ्यामुदरेण शिश्ना यत् स्मृतं यदुक्तं यत् कृतं तत् सर्वं ब्रह्मार्पणं भवतु स्वाहा मां मदीयञ्च सकलं हरये ते समर्पये। ओं तत् सदिति ॥ १५७—१५९ ॥

योगक्षेमं ततः कृत्वा मध्याह्ने स्नानमाचरेत् ॥ १६१ ॥
स्मार्त्तं तान्त्रञ्च पूर्वोक्तं सन्ध्या तर्पणमप्यथ ।
सम्पूज्य पूर्ववद्देवं वैश्वदेवादिकञ्चरेत् ॥ १६२ ॥
देवप्रसादं भुञ्जीत सम्भोज्य ब्राह्मणोत्तमान् ।
आचम्य देवं संस्मृत्य पुराणं शृणुयात् सुधीः ॥ १६३ ॥
सन्ध्याहोमञ्च निर्वृत्य देवं सम्पूज्य पूर्ववत् ।
शयीत शुद्धशय्यायां भुक्त्वाल्पं देवतां स्मरन् ॥ १६४ ॥
एवं यः पूजयेद्देवं त्रिकालं धर्ममाचरन् ।
न जातु वैरिभिर्दुःखैः पीड्यते हरिरक्षितः ॥ १६५ ॥
त्रिकालं पूजनाशक्तैः कार्य्यन्त्विः सकृदप्यथ ।
विशेषेण यजेद्देवं संक्रान्त्यादिषु पर्वसु ॥ १६६ ॥
दशभिः पञ्चभिर्वापि पूजयेदुपचारकैः ।
अशक्तः कारयेत् पूजां दद्यादर्चनसाधनम् ॥ १६७ ॥
दानाशक्तः समर्चन्तं पश्येत्तत्परमानसः ।
साधनाभाविनी त्रासी दौर्बोधी सौतकी तथा ॥ १६८ ॥
आतुरी पञ्चधोक्तासौ पूजा सा कीर्त्त्यते क्रमात् ।
पूजासाधनवस्तूनामभावात् मनसैव सा ॥ १६९ ॥
पूजाम्भसा वा शुद्धेन साधनाभाविनी तु सा ।
त्रस्तः सम्पूजयेद्देवं यथालब्धोपचारकैः ॥ १७० ॥
मानसैर्वापि सा त्रासी ज्ञेया सम्पूर्णसिद्धिदा ।
बाला वृद्धाः स्त्रियो मूर्खा दुर्बोधा तत्कृता तु या ॥१७१॥

---

संहारमुद्रीका हरये इत्यत्र ईशाय गौर्य्यै इत्यादूहः ब्रह्मयज्ञं वेदाध्ययनं अलब्धलाभो योगः लब्धस्य परिपालनं क्षेमः ॥ १६०—१६५ ॥

तान्त्रं स्नानं पूर्वोक्तं प्रथमतरङ्गोक्तम्। दशभिरुपचारैरावाहनासनस्नाना-चमनं वस्त्रं चन्दनपुष्पधूपदीपनैवेद्यैः पञ्चभिर्गन्धाद्यैः ॥ १६६ ॥ १६७ ॥

यथाज्ञानं परार्चासौ दौर्बोधी कीर्त्तिता बुधैः ।
सौतकी तु नरः स्नात्वा सन्ध्याञ्च मानसीञ्चरेत् ॥ १७२ ॥
मानसैर्वार्चयेत् कामी निष्कामः सर्वमाचरेत् ।
सौतक्युक्तातुरा रोगान्न स्नायान्न च पूजयेत् ॥ १७३ ॥
विलोक्य मूर्त्तिं देवस्य यदि वा सूर्य्यमण्डलम् ।
सकृन्मूलमनुं जप्त्वा तत्र पुष्पं विनिक्षिपेत् ॥ १७४ ॥
ततो रोगे गते स्नात्वा पूजयित्वा गुरून् द्विजान् ।
पूजाविच्छेददोषो मे मास्त्विति प्रार्थयेत तान् ॥ १७५ ॥
तेभ्यश्चाशिषमादाय देवेशं पूर्ववद्यजेत् ।
आतुरी कीर्त्तिता पूजाः पञ्चैवं नारदोदिताः ॥ १७६ ॥
स्वयं सम्पाद्य सर्वाणि श्रद्धया साधनानि यः ।
पूजयेत्तत्परो देवं स लभेताखिलं फलम् ॥ १७७ ॥
पूजनेन फलार्द्धं स्यादन्यदत्तैस्तु साधनैः ।
तस्मात् स्वयं समानीय साधनान्यार्चनं चरेत् ॥ १७८ ॥
देवपूजाविहीनो यः स नरो नरके पचेत् ।
यथा कथञ्चिद्देवार्चा विधेया श्रद्धयान्वितैः ॥ १७९ ॥

इति मन्त्रमहोदधौ पूजाकथनं नाम द्वाविंशस्तरङ्गः ।

---

पञ्चमप्रकारां पूजामाह साधनाभाविनीति । साधनानां पूजोपकरणानामभावो यस्याः सा साधनाभाविनी ब्राह्मो यस्याः सा तत्कृता ब्राह्मी दुर्बोधानामियं दौर्बोधी सूतके कृता सौतकी आतुरस्येयमातुरी । क्रमाल्लक्षणमाह पूजेति । ब्राह्मीमाह वस्त इति । दौर्बोधीमाह यात्रा इति । सौतकीमाह सौतकेति । आतुरीमाह आतुर इति । सुरार्चाया नित्यतामाह देवेति ॥ १६८—१७९ ॥

इति नौकासमाख्यायां मन्त्रमहोदधिटीकायां देवार्चा-
निरूपणं नाम द्वाविंशस्तरङ्गः ।

# त्रयोविंशस्तरङ्गः ।

वक्ष्येऽथो सर्वदेवानां पवित्रदमनार्पणम् ।
पवित्रैः श्रावणे पूजा चैत्रे दमनकैरपि ॥ १ ॥
प्रत्यब्दं विधिवत् कुर्य्यात् वर्षार्चाफलसिद्धये ।
चैत्रे शुक्लचतुर्दश्यां दमनैः पूजयेद्धरम् ॥ २ ॥
नारायणन्तु द्वादश्यामष्टम्यां गिरिनन्दिनीम् ।
सप्तम्यां भास्करं देवं चतुर्थ्यां गणनायकम् ॥ ३ ॥
एवं तत्तत्तिथौ तन्तं पवित्रैः श्रावणेऽर्चयेत् ।
पूर्वेऽह्नि दमनार्चायाः कृत्वा नित्यार्चनं विभोः ॥ ४ ॥
गत्वा दमनकारामं गृह्णीयात्तं क्रयार्पणात् ।
उपविश्य शुचौ देशे मनुनानेन चार्पयेत् ॥ ५ ॥
अशोकाय नमस्तुभ्यं कामस्त्रीशोकनाशन ।
शोकार्त्तिं हर मे नित्यमानन्दं जनयस्व मे ॥ ६ ॥
इति सम्प्रार्थ्य तत्रार्च्चे इति कामौ स्वमन्त्रतः ।
कामदेवाय कामादिहृदन्तोऽष्टाक्षरो मनुः ॥ ७ ॥
कामस्य माया रत्यै हृत् पञ्चार्णस्तु रतेर्मनुः ।
इष्टदेवस्य पूजार्थं नेष्यामि त्वामिति ब्रुवन् ॥ ८ ॥
उत्पाट्य पञ्चगव्येनाभिषिच्य क्षालयेज्जलैः ।
गन्धादिभिर्हृदाभ्यर्च्य छादयेत् पीतवाससा ॥ ९ ॥

---

पवित्रदमनार्चनं वक्तुमुपक्रमते वक्ष्य इति ॥ १—२ ॥
पूर्वेऽह्नि पूर्वदिने ॥ ४ ॥
क्रयार्पणान्मूल्यदानेन ॥ ५ ॥

निधाय वंशपात्रे तं गीतवादित्रनिःस्वनैः।
गृहमानीय तद्देशे स्थापयेद्देवतां स्मरन् ॥ १० ॥
ततो देवस्य पुरतः कृत्वाष्टदलमम्बुजम्।
सितकृष्णरक्तपीतवर्णैः सम्पूरयेत्तु तम् ॥ ११ ॥
भूपुरं तद्बहिः कृत्वा पीतवर्णेन पूरयेत्।
सितरक्तपीतवर्णं तद्बहिर्वर्त्तुलत्रयम् ॥ १२ ॥
रक्तवर्णेन तद्बाह्ये विदध्याच्चतुरस्रकम्।
एवं विरचिते रम्ये मण्डले सार्वकामिके ॥ १३ ॥
यदि वा सर्वतोभद्रे सुधेद्दमनभाजनम्।
सायंकालीनपूजान्ते कुर्य्यात्तस्याधिवासनम् ॥ १४ ॥
ताराद्याभ्यां कामरतिमन्त्राभ्यां तत्र तौ यजेत्।
दलेष्वष्टसु रत्याद्यानष्टौ कामान् पृथग्धवैः ॥ १५ ॥
कामो भस्मशरीरश्च ततोऽनङ्गश्च मन्मथः।
वसन्तसखसंज्ञश्च स्मर इक्षुधनुर्द्धरः ॥ १६ ॥
पुष्पबाण इमे कामास्तान् यजेन्नामभिर्निजैः।
प्रणवानङ्गबीजाद्यैश्चतुर्थीहृदयान्वितैः ॥ १७ ॥
कर्पूररोचनान्यङ्कुनाभिजागुरुकुङ्कुमैः।
धात्रीफलैश्चन्दनेन पुष्पैः कामान् क्रमाद् यजेत् ॥ १८ ॥
दमनं गन्धपुष्पाद्यैरभिपूज्याभिमन्त्रयेत्।

---

क्लीं कामदेवाय इति काममनुः। ह्रीं रत्यै नम इति रतेः ॥ ६—१४ ॥
ताराद्याभ्यां प्रणवादिकाभ्यां कामरतिमन्त्राभ्यामुक्ताभ्यां तत्र मण्डलमध्ये तौ रतिकामौ ॥ १५ ॥
कामानाह काम इति ॥ १६ ॥
प्रणवेति। ओं क्लीं कामाय नम इत्यादि ॥ १७ ॥

अष्टोत्तरशतं कामगायत्र्या मन्त्रवित्तमः ॥ १९ ॥
कामदेवाय वर्णान्ते विद्महे पदमुच्चरेत्।
पुष्पबाणाय पदान्ते धीमहीति ततो वदेत् ॥ २० ॥
तन्नोऽनङ्गः प्रचोवर्णाद्दयादिति मनोभुवः।
गायत्र्येषा बुधैरुक्ता जप्ता जनविमोहिनी ॥ २१ ॥
हृदा पुष्पाञ्जलिं दत्त्वा मनुनानेन तं नमेत्।
नमोऽस्तु पुष्पबाणाय जगदानन्दकारिणे !॥ २२ ॥
मन्मथाय जगन्नेत्र रतिप्रीतिप्रदायिने !।
ततो निमन्त्रयेद्देवमनेन मनुना सुधीः ॥ २३ ॥
आमन्त्रितोऽसि देवेश ! प्रातःकाले मया प्रभो !।
कर्त्तव्यन्तु यथालाभं पूर्णपर्व तवाज्ञया ॥ २४ ॥
देवे पुष्पाञ्जलिं दत्त्वा दण्डवत् प्रणिपत्य च।
दमने वर्मणास्त्रेण विदध्यादवगुण्ठनम् ॥ २५ ॥
रक्षणञ्च क्रमादेतदधिवासनमीरितम्।
ततो जागरणं कुर्य्यात् देवं गायन् स्तुवन् जपन् ॥ २६ ॥
सर्वाधिवासनञ्चापि कुर्य्यात्तत्र तु जागरः।
प्रातःस्नानादि निर्वर्त्त्य कृत्वा नित्यार्चनं विभोः ॥ २७ ॥
सङ्कल्पं दमनार्चाया विदध्याद्देवताज्ञया।
गृहीत्वा दमनस्याथ हस्ताभ्यां मञ्जरीं शुभाम् ॥ २८ ॥
हृदाभिमन्त्रयेन्मन्त्री ततः श्लोकमिमं पठेत्।

---

पुन्नाद्रव्याण्याह कर्पूरेति। न्यंकुनाभिजाता कस्तूरी कर्पूरेण कामपूजा दीपनया अङ्गशरीरपूजा कस्तूर्यानङ्गस्येत्यादिक्रमः ॥ १८ ॥ १९ ॥

कामगायत्रीमाह कामदेवायेति ॥ २० ॥

जनविमोहिनीत्युक्तत्वात् स्वतन्त्रताप्येषा। वर्मणावगुण्ठनं अस्त्रेण रक्षणं कुर्य्यात् ॥ २१—२७ ॥

ओं सर्वरत्नमयीं दिव्यां सर्वगन्धमयीं शुभाम् ॥ २९ ॥
गृहाण मञ्जरीं देव ! नमस्तेऽस्तु कृपानिधे ! ।
मूलमन्त्रेण घण्टादिघोषैर्देवस्य मस्तके ॥ ३० ॥
समर्प्य तां ततः कुर्य्यात् मालां दमननिर्मिताम् ।
हृदाभिमन्त्र्य चानेन श्लोकेनाप्यभिमन्त्रयेत् ॥ ३१ ॥
ओं सर्वरत्नमयीं नाथ ! दामिनीं वनमालिकाम् ।
गृहाण देव ! पूजार्थं सर्वगन्धमयीं विभो ! ॥ ३२ ॥
मूलमन्त्रं जपन् देवमुकुटे तां समर्पयेत् ।
दमनेनेष्टदेवस्य परिवारान् समर्चयेत् ॥ ३३ ॥
ततो नैवेद्यताम्बूले दत्त्वा नत्वा च दण्डवत् ।
दमनार्चां कृतां तस्मै श्लोकेन विनिवेदयेत् ॥ ३४ ॥
देवदेव ! जगन्नाथ ! वाञ्छितार्थप्रदायक ! ।
कृत्स्नान् पूरय मत्वर्थकामान् कामेश्वरीप्रिय ! ॥ ३५ ॥
जप्त्वा मूलमनुं वह्नौ हुत्वा देवं विसृज्य च ।
गुरुं गत्वा दमनकैर्यजित्तं तोषयेद्धनैः ॥ ३६ ॥
विप्रान् सम्भोज्य भुञ्जीत स्वदेवाय निवेदितम् ।
एवं कृते कृतार्थः स्याद्वर्षार्चाफलभाग् नरः ॥ ३७ ॥
कथिता दमनार्चैषा पवित्रयजनं ब्रुवे ।
पवित्रयजनादौ तु पूर्वस्मिन् वासरे सुधीः ॥ ३८ ॥
विदध्यान्नित्यपूजान्ते पवित्राणि यथाविधि ।
हेमदुर्वर्णताम्रोत्थतन्तुभिः पट्टसूत्रतः ॥ ३९ ॥

---

देशकालावुच्चार्य्य वर्षपूजासाङ्गत्वाय दमनार्चां करिष्य इति सङ्कल्पः ॥ २८—२७ ॥

पवित्रविधिमाह पवित्रेति ॥ ३८ ॥

दुर्वर्णं रूप्यम् ॥ ३९ ॥

यद्वा कार्पाससूत्रैस्तु निर्मिते विप्रभार्य्यया ।
अन्यया वा सधवया सदाचारप्रसक्तया ॥ ४० ॥
कर्त्तितैस्तानि कुर्वीत न पुंस्त्र्यादिनिर्मितैः ।
त्रिगुणं त्रिगुणीकृत्य निर्मायान्नवसूत्रिकाः ॥ ४१ ॥
तां प्रोक्ष्य पञ्चगव्येन क्षालयेदुष्णवारिणा ।
प्रणवेनाभिषिञ्चेत्तां मूलेनाष्टोत्तरं शतम् ॥ ४२ ॥
मन्त्रयेन्मूलगायत्र्या तावदेव ततः सुधीः ।
रचयेन्नवसूत्रीभिरष्टोत्तरशतेन च ॥ ४३ ॥
तदर्द्धेन तदर्द्धेन जानूरुनाभिमानतः ।
देवेशस्य पवित्राणि शुचौ देशे प्रसन्नधीः ॥ ४४ ॥
ज्येष्ठमध्यकनिष्ठानि तेषु ग्रन्थीन् दधीत च ।
षट्त्रिंशत्तत्त्वमार्त्तण्डमितान् ज्येष्ठादिषु क्रमात् ॥ ४५ ॥
अष्टोत्तरसहस्रेण नवसूत्र्या विनिर्मितम् ।
अष्टोत्तरशतं ग्रन्थि वनमालापवित्रकम् ॥ ४६ ॥
कृत्वा तान् रञ्जयेद् ग्रन्थीन् रोचनाकुङ्कुमादिभिः ।
वंशवे पटले तानि सञ्छाद्य सितवाससा ॥ ४७ ॥
स्थापयित्वा विनिर्मायादन्यान्यावरणार्चनम् ।
सप्तविंशत्यष्टिरविनवसूत्रीमितानि तु ॥ ४८ ॥
अद्रिनेत्रमिताभिस्तु कुर्य्याद् गुरुपवित्रकम् ।
तावतीभिः कृशानोस्तत् षड्विंशत्या तदात्मनः ॥ ४९ ॥

---

अष्टोत्तरशतनवसूत्र्या ज्येष्ठं चतुःपञ्चाशता मध्यमं सप्तविंशत्या कनिष्ठं पवित्रं कुर्य्यात् ज्येष्ठं षट्त्रिंशद् ग्रन्थियुतं मध्यं चतुर्विंशतिग्रन्थिं कनिष्ठं द्वादशग्रन्थिम् ॥ ४०—४७ ॥

अष्टिः षोडश ॥ ४८ ॥

अद्रिनेत्रमिताभिः सप्तविंशतिसंख्यामिताभिर्नवसूत्रीभिर्गुरुपवित्रं तावतीभि-

तत्र ग्रन्थीन् यथाशोभं दत्त्वा संरञ्जयेदपि ।
तानि पात्रान्तरे न्यस्य कुर्य्याद्गन्धपवित्रकम् ॥ ५० ॥
द्वादशग्रन्थि तिग्मांशोर्नवसूत्रैर्विनिर्मितम् ।
निर्मायैवं पवित्राणि कुर्य्यात् पूजार्थमण्डलम् ॥ ५१ ॥
पङ्कजं षोड़शदलं पूरयेदष्टवर्णकैः ।
नीलहारिद्रशोणाभ्रमाञ्जिष्ठश्वेतसंज्ञकैः ॥ ५२ ॥
सिन्दूरधूम्रकृष्णाख्यैस्तद्वहिर्मण्डलत्रयम् ।
सूर्य्यसोमाग्निसंज्ञन्तत् सितपीतारुणं क्रमात् ॥ ५३ ॥
तद्वाह्याष्टदलं कुर्य्यादरुणं यदि वा सितम् ।
एवं मण्डलमालिख्य पूजयेत् कुसुमादिभिः ॥ ५४ ॥
तस्योपरि निबध्नीयात् वितानं समलङ्कृतम् ।
मण्डले स्थापयेदेव प्रतिमां यदि वा घटम् ॥ ५५ ॥
तत्रेष्टदेवं सम्पूज्य पायसं विनिवेदयेत् ।
देवताग्रे पवित्राणां पात्रे न्यस्याधिवासयेत् ॥ ५६ ॥
उक्तसंख्यस्य सूत्रस्यालाभे तानि यथारुचि ।
ज्येष्ठादीनि पवित्राणि विदध्यात् सर्वथा सुधीः ॥ ५७ ॥
तत्र द्वाविंशतीं देवानाहूय प्रतिपूजयेत् ।
ब्रह्मविष्णुमहेशानास्त्रिसूत्र्या देवताः स्मृताः ॥ ५८ ॥
ओङ्कारचन्द्रमावह्निब्रह्मनागशिखिध्वजाः ।
सूर्य्यः सदाशिवो विश्वे नवसूत्र्यधिदेवताः ॥ ५९ ॥
क्रिया च पौरुषी वीरा चतुर्थी त्वपराजिता ।

---

स्ताभिः सप्तविंशत्यैतत् शुचैरर्चैः तत् पवित्रं षड्विंशत्या स्वपवित्रञ्च कुर्य्यात् तत्र ग्रन्थयः स्वेच्छया देयाः ॥ ४९ ॥ ५० ॥

तिग्मांशोर्द्वादशः । पात्रे देवपवित्रपात्रं आवरणपवित्रपात्रञ्च ॥ ५१—५७ ॥

विजया जयया युक्ता मुक्तिदा च सदाशिवा ॥ ६० ॥
मनोन्मनी तु नवमी दशमी सर्वतोमुखी ।
एताः पवित्रग्रन्थीनां देवताः परिकीर्त्तिताः ॥ ६१ ॥
आवाहन्यादिमुद्राभिर्नवभिः साधकोत्तमः ।
तदाह्वानादिकं तत्र कृत्वार्चेच्चन्दनादिभिः ॥ ६२ ॥
एवं पवित्राण्यभ्यर्च्य दद्याद्गन्धपवित्रकम् ।
तद्धूपयित्वा तारेण हृदयेनाभिमन्त्रयेत् ॥ ६३ ॥
प्रणम्य प्रार्थयेद्देवं श्लोकयुग्ममिदं पठन् ।
आमन्त्रितोऽसि देवेश ! सार्द्धं देव्या गणेश्वरैः ॥ ६४ ॥
मन्त्रेशैर्लोकपालैश्च सहितः परिवारकैः ।
आगच्छ भगवन्नीश ! विधिसम्पूर्त्तिकारक ! ॥ ६५ ॥
प्रातस्त्वां पूजयिष्यामि सान्निध्यं कुरु केशव ! ।
ततो गन्धपवित्रं तत् पादयोर्विन्यसेत् प्रभोः ॥ ६६ ॥
केशवेति पदस्थाने कार्य्य ऊहोऽन्यदैवते ।
भगवत्याः पदेष्वत्र लिङ्गोहो मन्त्रवित्तमैः ॥ ६७ ॥
अधिवासं विधायेत्थं निशि जागरणञ्चरेत् ।
देवस्य स्तुतिनामानि वदन् गायंश्च तद्गुणान् ॥ ६८ ॥
प्रातर्नित्यार्चनं कृत्वा मूलेनाष्टोत्तरं शतम् ।
कनिष्ठाख्यं पवित्रन्तत् गृहीत्वा चाभिमन्त्रयेत् ॥ ६९ ॥

---

अधिवासनमाह तत्रेति । शिखिध्वजः कार्त्तिकेयः विश्वे विश्वेदेवाः ॥ ५८—६१ ॥

आवाहनी-स्थापनी-सन्निधापनी-सन्निरोधिनी-सम्मुखीकरणी-सकलीकरणी-अवगुण्ठनी-अमृतीकरणी-परमीकरण्यो नवावाहन्यादिमुद्राः ता उक्ताः ताभि-स्तदाह्वानादिकं पवित्रदेवतानां ब्रह्मादीनां पदार्थानुसमयेन काण्डानुसमयेनावा-हनादि कृत्वा गन्धादिनार्चयेत् ॥ ६२—६६ ॥

केशवपदस्थाने ऊहः शङ्करः विघ्नराट् इति भगवत्यां पवित्रारोपणे तु पदेषु

घण्टावादित्रवेदानां कारयन् घोषमुत्तमम्।
जयशब्दांश्च देवस्य कण्ठे मूलेन चार्पयेत्॥ ७० ॥
एवमेवार्पयेदन्ये पवित्रे मध्यमोत्तमे।
श्वेतं रक्तं क्रमात् पीतं ध्यायेद्देवं तदर्पणे॥ ७१ ॥
वनमाला पवित्रन्तु तावन्मूलेन मन्त्रितम्।
अर्पयेदिष्टदेवस्य मुकुटे मूलमुच्चरन्॥ ७२ ॥
ततः सुवर्णकुसुमैः पुष्पैः शतमितैः सह।
मूलाभिमन्त्रितं देवमूर्ध्नि मूलेन चार्पयेत्॥ ७४ ॥
हृदान्यपटलस्थानि पवित्राण्यभिमन्त्र्य च।
तत्तन्नाम्ना नमोऽन्तेन परिवारान् सुरान् यजेत्॥ ७४ ॥
एवं पवित्रैः सम्पूज्य धूपादीनि प्रकल्पयेत्।
पावके देवमावाह्य नित्यहोमं विधाय च॥ ७५ ॥
मूलेनाग्निपवित्रन्तदर्पयेद्देवतां स्मरन्।
मूर्त्तौ देवं समुद्वास्य वह्निं संयोज्य चात्मनि॥ ७६ ॥
पुष्पाञ्जलिं विधायेशे कर्मान्तेन निवेदयेत्।
मन्त्रहीनं क्रियाहीनं भक्तिहीनं कृपानिधे!॥ ७७ ॥
पूजनं पूर्णतामेतु पवित्रेणार्पितेन ते।
इति सम्प्रार्थ्य देवेशं योजयेत् हृदये निजे॥ ७८ ॥
गुर्वन्तिकं ततो गत्वा दत्त्वा पुष्पाञ्जलिं गुरौ।
स्वाङ्गे षडङ्गं विन्यस्य गुरुदेहेऽपि विन्यसेत्॥ ७९ ॥
पाद्यं दत्त्वा तथैवार्घ्यं वस्त्रालङ्कारचन्दनम्।

---

लिङ्गोह्योऽपि कार्य्यः। आमन्त्रितासि देवेशि आगच्छेया भवानीशि विधिसंपूर्तिकारिके सान्निध्यं कुरु पार्वतीत्यादि लिङ्गपदानामूहः॥ ६७—७० ॥

कनिष्ठपवित्रारोपणे देवं श्वेतं ध्यायेत् मध्यमारोपणे रक्तं श्रेष्ठारोपणे पीत-

पुष्पैः सम्पूज्य मूलेन पवित्रं तत्तलेऽर्पयेत् ॥ ८० ॥
स्वशक्त्या दक्षिणां दत्त्वा दण्डवत् प्रणमेद् गुरुम् ।
अन्येभ्यः शिष्टवृद्धेभ्यः पवित्राणि ददीत च ॥ ८१ ॥
सर्वथैव गुरोः पूजा कर्त्तव्या मन्त्रिणा सदा ।
अपूजिते गुरौ सर्वा पूजा भवति निष्फला ॥ ८२ ॥
गुरोरभावे तत्पुत्रं तदभावे तदात्मजम् ।
दौहित्रं तदभावेऽन्यं पूजयेत् गुरुगोत्रजम् ॥ ८३ ॥
ततो धृत्वा पवित्रं स्वं भोजयित्वा द्विजोत्तमान् ।
भुञ्जीत तदनुज्ञातो बन्धुभिस्तनयैः सह ॥ ८४ ॥
यथाकथञ्चित् कुर्वीत पवित्राणि सुरार्चने ।
विधिरुक्तस्य चाशक्त्या पूजा सम्पूर्त्तिहेतवे ॥ ८५ ॥
यस्यां कस्यां तिथौ कुर्य्यात्तिथावुक्ते कृतं न चेत् ।
सर्वथा श्रावणे चैव पवित्रन्तु निवेदयेत् ॥ ८६ ॥
प्रत्यब्दं यः पवित्रेण पूजां कुर्वीत दैवते ।
ऐश्वर्य्यारोग्यसंयुक्तोऽनेकवर्षाणि जीवति ॥ ८७ ॥
सम्पूर्णहायनं पूजा देवतानां कृता तु या ।
सर्वा सम्पूर्णतामेति पवित्रदमनार्पणात् ॥ ८८ ॥
अन्येष्वप्युपरागार्द्धोदयसौम्यायनादिषु ।

---

मिति। तावदष्टोत्तरशतम्। सर्वथा गुरुवंशाभावे कञ्चिच्छिष्टं सम्पूज्य तस्य पवित्रं समर्प्य दक्षिणाञ्च दत्त्वा पवित्रपूजा पूर्णास्त्विति तद्वचनं प्रार्थयेत् ॥ ७१—८५ ॥

यस्यामिति। उक्ततिथौ करणासम्भवे सर्वथा श्रावणे पवित्रपूजा चैत्रे दमनार्पणं च नित्यत्वेनावश्यं कार्य्यमित्यर्थः ॥ ८६—८८ ॥

अन्येष्वपीति। उपरागश्चन्द्रसूर्य्यग्रहणं चार्द्धोदयलक्षणन्तु—
अमार्कश्रवणं पातो मध्ये चेत् पौषमाघयोः ।

कुर्य्यादलभ्ययोगेषु विशेषाद्देवतार्चनम् ॥ ८९ ॥
यथायथेष्टदेवेषु नृणां भक्तिः समेधते।
प्राप्यते तदयत्नेन मनोऽभीष्टं तथा तथा ॥ ९० ॥
शुचौ तत्तदहे कुर्य्याद्देवप्रस्थापनोत्सवम्।
ऊर्जे तथैव देवानामुत्थापनविधिं सुधीः ॥ ९१ ॥
माघकृष्णचतुर्दश्यां विशेषात् शिवपूजनम्।
आश्विनोत्थनवाहेषु दुर्गापूजा यथाविधि ॥ ९२ ॥
गोपालं पूजयेद्विद्वान् ततः कृष्णाष्टमी दिने।
रामं चैत्रसिते पक्षे नवम्यामर्चयेत् सुधीः ॥ ९३ ॥
वैशाखाद्यचतुर्दश्यां नरसिंहं प्रपूजयेत्।
यजेत् शुक्लचतुर्थ्यान्तु गणेशं भाद्रमाघयोः ॥ ९४ ॥
महालक्ष्मीं यजेद्विद्वान् भाद्रकृष्णाष्टमीदिने।
माघस्य शुक्लसप्तम्यां विशेषाद्दिननायकम् ॥ ९५ ॥
या काचित् सप्तमी शुक्ला रविवारयुता यदि।
तस्यां दिनेशं सम्पूज्य दद्यादर्घ्यं पुरोदितम् ॥ ९६ ॥
तत्तत्कल्पोदितानन्यान् देवताप्रीतिवर्द्धनात्।
विशेषनियमान् ज्ञात्वा भजेद्देवमनन्यधीः ॥ ९७ ॥
आषाढ़ी कार्त्तिकीमध्ये किञ्चिन्नियममाचरेत्।

---

अर्द्धोदयाभिधो योगः कोटिसूर्य्यग्रहाधिकः ॥ इति।
सौम्यायनं मकरसंक्रान्तिः। आदिशब्दाद् युगाद्यो मन्वादयः श्रवणद्वादशीप्रमुखा
याह्या. तत्रेष्टदेवमहोत्सवो महापूजा च विधेया ॥ ८९ ॥

तत्र हेतुमाह यथेति ॥ ९० ॥

शुचावाषाढ़े तत्तदहे चतुर्थ्यादौ गणेशादीनां ऊर्जे कार्त्तिके ॥ ९१ ॥

माघकृष्णचतुर्दश्यां शुक्लपक्षादिमासाभिप्रायेण शिवरात्रौ शिवपूजाप्रकारः शिवागमाद्बोध्यः नवरात्रे दुर्गार्चनविधिरपि तदागमादेव एवम् गन्गोरक्षया- शोच्यते ॥ ९२—९७ ॥

देवसम्प्रीतये विद्वान् जपपूजादितत्परः ॥ ९८ ॥
एवं यो भजते विष्णुं रुद्रं दुर्गां गणाधिपम् ।
भास्करं श्रद्धया नित्यं स कदाचिन्न सीदति ॥ ९९ ॥
स धर्ममाचरन्नित्यं देवपूजापरायणः ।
जितेन्द्रियोऽखिलान् भोगान् प्राप्येहानन्ततां व्रजेत् ॥१००॥

इति मन्त्रमहोदधौ दमनपवित्रार्चननिरूपणं
नाम त्रयोदशस्तरङ्गः ।

---

## चतुर्विंशस्तरङ्गः ।

साधकानां शीघ्रसिद्धैय मन्त्रशुद्धिमथो ब्रुवे ।
साधकस्य तु नामादिवर्णमारभ्य शोधयेत् ॥ १ ॥
मन्त्राद्यक्षरपर्य्यन्तं चक्रे सिद्धादिके क्रमात् ।
जन्मर्क्षोत्थं प्रसिद्धं वा नाम ग्राह्यं विशोधने ॥ २ ॥
ऊर्द्ध्वगाः पञ्चरेखाः स्युः पञ्च तिर्य्यग्गताः पुनः ।
कोष्ठानि तत्र जायन्ते षोड़शैवात्र संलिखेत् ॥ ३ ॥

---

चापाढ़ीति । चातुर्मास्येऽवश्यं तत्तद्देशवश्यं खेटं किञ्चिद्वस्तु वर्जयेत् यो विना नियमं सर्व्वो व्रतं वा गाप्यमेव वा चातुर्मास्यं नयेन्मूढ़ो जीवन्नपि मृतो हि स इत्यादिनिन्दाश्रवणात् ॥ ९८—१०० ॥

इति नौकासमाख्यायां मन्त्रमहोदधिटीकायां दमनपवित्रार्चन-
कथनं नाम त्रयोविंशस्तरङ्गः ।

---

मन्त्रशुद्धिं वक्तुमाह । साधकानामिति ॥ १—२ ॥

भूरामशिवनन्दाश्चिवेदार्कदिग्रसाष्टभिः।
कलामनुशरैरद्रितिथिविश्वैर्मितेषु च ॥ ४ ॥
कोष्ठेषु मातृकावर्णान् तत्र नामादितः क्रमात्।
सिद्धः साध्यः सुसिद्धोऽरिर्ज्ञेयो मन्त्रचरावधिः ॥ ५ ॥
यस्मिंश्चतुष्के नामार्णस्तत् स्यात् सिद्धचतुष्टयम्।
प्रादक्षिण्यात् द्वितीयं स्यात् साध्याख्यं तत् तृतीयकम् ॥६॥
सुसिद्धाख्यश्चतुर्थन्तु सपत्नाख्यं स्मृतं बुधैः।
एककोष्ठे द्वयोर्वर्णः सिद्धसिद्धः प्रकीर्त्तितः ॥ ७ ॥
तद्द्वितीये मन्त्रवर्णे सिद्धसाध्य उदाहृतः।
तृतीये सिद्धसुसिद्धः सिद्धारिः स्याच्चतुर्थके ॥ ८ ॥
नामादियुक् चतुःकोष्ठान्मन्त्रवर्णश्चेद्द्वितीयके।
चतुष्के तत्र पूर्वन्तु यत्र नामाक्षरस्थितम् ॥ ९ ॥
तत्र तत् कोष्ठमारभ्य गणयेत् पूर्ववत् क्रमात्।
साध्यसिद्धः साध्यसाध्यस्तं सुसिद्धश्च तद्रिपुः ॥ १० ॥
एवं ज्ञेयस्तृतीये चेच्चतुष्के मन्त्रकर्णकः।
तदा पूर्वोक्तया रीत्या क्रमात् ज्ञेया विचक्षणैः ॥ ११ ॥
सुसिद्धसिद्धस्तत्साध्यस्तत् सुसिद्धश्च तद्रिपुः।
चतुर्थे तु चतुष्के स्यादरिसिद्धारिसाध्यकः ॥ १२ ॥
तत् सुसिद्धोऽथारिः पश्चादेवं मन्त्रं विचारयेत्।
सिद्धसिद्धो यथोक्तेन द्विगुणात् सिद्धसाध्यकः ॥ १३ ॥

---

ककचटचक्रमाह ऊर्ध्वगा इति। षोड़शकोष्ठानि विधाय तत्रैकत्र्येकादशनव-
विचतुर्द्वादशदशषड़ष्टषोड़शचतुर्दशपञ्चसप्तपञ्चदशत्रयोदशेषु कोष्ठेषु क्रमादकारादि-
वर्णान् पुनः पुनर्विलिख्य कोष्ठचतुष्के सिद्धसाध्यादि विचिन्त्य पुनश्चतुष्के सिद्धादि-
गणनं कार्य्यं तत्र प्रथमचतुष्के यस्यां दिशि नामार्णं द्वितीयादिचतुष्केषु
तद्दिग्भागमारभ्य सिद्धादि गणयेत् एवं गणसाध्यः सिद्धसुसिद्धः सिद्धारिः साध्य-
सिद्धः। साध्यसाध्यः। साध्यसुसिद्धः। साध्यारिः। सुसिद्धसिद्धः। सुसिद्ध-

सिद्धसुसिद्धोऽर्द्धजपात् सिद्धारिर्हन्ति बान्धवान् ।
साध्यसिद्धो द्विगुणतः साध्यसाध्यो निरर्थकः ॥ १४ ॥
द्विगुणाज्जपात् सुसिद्धः साध्यारिर्हन्ति गोत्रजान् ।
सुसिद्धसिद्धोऽर्द्धजपात् तत्साध्यो द्विगुणाज्जपात् ॥ १५ ॥
तत्सुसिद्ध ग्रहादेव सुसिद्धारिः कुटुम्बहा ।
अरिसिद्धः सुतं हन्यादरिसाध्यस्तु कन्यकाम् ॥ १६ ॥
तत्सुसिद्धस्तु पत्नीघ्नस्तदरिः साधकापहः ।
नाम्नो मन्त्रस्य वर्णांश्च लिखित्वा प्रतिवर्णकम् ॥ १७ ॥
सिद्धादिगणना कार्य्या यावन्मन्त्रसमापनम् ।
नाम्नो यदि समाप्तिः स्यात् पुनर्नाम लिखेत् सुधीः ॥१८॥
एवं संशोधितेषु स्युर्भूयः साध्यवैरिणः ।
अल्पाः सिद्धसुसिद्धाश्चेदशुभं व्युत्क्रमात् शुभम् ॥ १९ ॥
मत्तमित्यन्तु केषाञ्चित् तदपि प्राज्ञसम्मतम् ।
अथवान्यत्प्रकारेण सिद्धादीनां विशोधनम् ॥ २० ॥
द्वादशारे लिखेच्चक्रे वर्णान् पूर्वोदितान् क्रमात् ।
ईशानान्तमकाराद्यान् हान्तान् षड्विवर्जितान् ॥ २१ ॥
तत्र नामार्णमारभ्यमष्टाद्यर्णावधि क्रमात् ।
गणयेत् सिद्धसाध्यादिफलं तेषां विनिर्दिशेत् ॥ २२ ॥

---

साध्यः । सुसिद्धसिद्धः । सुसिद्धारिः । अरिसिद्धः । अरिसाध्यः । अरिसुसिद्धः । अर्य्यरिति । इति षोड़शभेदा भवन्ति । तेषां फलमाह सिद्धसिद्धो यथोक्तेनेत्यादि । यथोक्तेन कल्पोक्तेन जपादिना सिद्धो भवतीत्यर्थः । द्विगुणात्कल्पोक्तद्वैगुण्यात् तत् सुसिद्धः साध्यसुसिद्धः । प्रकारान्तरेण सिद्धादिशोधनमाह नाम्न इति ॥ २—१८ ॥

व्युत्क्रमात् सिद्धसुसिद्धानां बहुत्वे साध्यारीणामल्पत्वे शुभमित्यर्थः ॥ १९ ॥

इदंमतं प्राज्ञसम्मतं बहुसम्मतम् ॥ २० ॥

अकर्डमचक्रमाह द्वादशार इति । षड़ा ऋ ॠ ऌ ॡ व इति तान् ॥ २१ ॥ २२ ॥

सिद्धः सिध्यति कालेन साध्यस्तु जपहोमतः।
सुसिद्धाः प्राप्तिमात्रेण साधकं भक्षयेदरिः॥ २३॥
सिद्धो नवैकबाणेषु साध्यो रसदिशाच्चिषु।
सुसिद्धस्त्रिसुनीशेषु रिपुर्वेदाष्टभानुषु॥ २४॥
अन्योऽपीह प्रकारोऽस्ति सिद्धसाध्यादिशोधने।
चतुःकोष्ठेषु विलिखेदादिवर्णान् पुनः पुनः॥ २५॥
नामार्णात् सिद्धसाध्यादि ज्ञेयं मन्त्रचरावधिः।
चतुर्थोऽपि प्रकारोऽस्ति सिद्धादीनां विशोधने॥ २६॥
नाम्नो मन्त्रस्य वर्णाद्यं चतुर्भिर्विभजेत् सुधीः।
एकादिशेषे सिद्धादि क्रमात् ज्ञेयं विचक्षणैः॥ २७॥
सिद्धादिशोधनं प्रोक्तमथ वच्मि भशोधनम्।
नेत्रभूगुणवेदक्ष्माधरानयनभूभुजाः॥ २८॥
द्विचन्द्रभुजबाह्वच्चिभूनेत्रत्रिधरागुणाः।
एकैकं भूभुजेन्द्वच्चिरामचन्द्रानुडुष्वथ॥ २९॥
अश्विन्यादिषु विज्ञेया आदिवर्णाः क्रमाद् बुधैः।
चान्ताविन्दुविसर्गौ तु पौष्णभागे व्यवस्थितौ॥ ३०॥
जन्मसम्पद्विपत्क्षेम प्रत्यरिः साधको वधः।
मैत्रं परममैत्रञ्च गणनीयं स्वनामभात्॥ ३१॥
विपद्वधः प्रत्यरिश्च त्याज्या अन्यदुडूत्तमम्।

---

जपहोमाधिक्येन॥ २३॥

स्पष्टार्थमाह सिद्धो नवैकादशबाणेष्विति॥ २४—२६॥

प्रकारान्तरमाह नाम्न इति। नाममन्त्रयोर्वर्णानेकीकृत्य चतुर्भक्ते एकशेषे सिद्धः द्विशेषे साध्यः त्रिशेषे सुसिद्धः शून्येऽरिः फलं पूर्वोक्तम्॥ २७॥

भशोधनं नक्षत्रशोधनं तत्र नक्षत्रेषु वर्णविभागमाह नेत्रेति॥ २८॥

उडुषु नक्षत्रेषु॥ २९॥

अथर्णधनसंशुद्धिः कथ्यन्ते सिद्धिदायिनी ॥ ३२ ॥
सप्त तिर्य्यक् लिखेद्रेखा द्वादशे वोर्द्ध्वगाः पुनः ।
एवं कृते तु जायन्ते कोष्ठाः षट्षष्टिसम्मिताः ॥ ३३ ॥
आद्यपंक्तौ लिखेदङ्कास्ते कथ्यन्ते यथाक्रमम् ।
मनुनक्षत्रनेत्रार्कतिथिषट्वेदवह्नयः ॥ ३४ ॥
सायकावयवो नन्दा कोष्ठेषु क्रमतः स्थिताः ।
द्वितीयपंक्तौ संलेख्याः पञ्च दीर्घोज्झिताः स्वराः ॥ ३५ ॥
तृतीयपंक्तौ काद्यर्णाः टकारान्ताः शिवैर्मिताः ।
ठादिफान्ताश्चतुर्थ्यान्तु पञ्चम्यां वादिहान्तिमाः ॥ ३६ ॥
षष्ठ्यां पंक्तौ क्रमाल्लेख्या अङ्काः कथ्यन्त एव ते ।
दिक्चन्द्रमुनिवेदाष्टगुणसप्तेषु सागराः ॥ ३७ ॥
रसाश्च रामे संख्याता एवमङ्का उदीरिताः ।
मन्त्रवर्णान् पृथक् कुर्य्यात् स्वरव्यञ्जनरूपतः ॥ ३८ ॥
कोष्ठे यावतिवर्णः स्याद् गुणयेतावदङ्ककम् ।
कोष्ठोपरिस्थेनाङ्केन सर्ववर्णेष्वयं विधिः ॥ ३९ ॥
दीर्घाक्षराणामङ्कास्तु ज्ञेया लघ्वाक्षरस्थिताः ।
एकीकृत्याखिलानङ्कानष्टभिर्विभजेत् पुनः ॥ ४० ॥
शेषोऽङ्को मन्त्रराशिः स्यात् नामवर्णेष्वयं विधिः ।
अधःपंक्तिस्थितैरङ्कैर्गुणनीयास्तु तेऽखिलाः ॥ ४१ ॥

---

पीठभागे इत्यंशे ॥ ३०—३२ ॥

ऋणधनशोधनमाह सप्तेति । तिर्य्यक् सप्तरेखाः ऊर्द्धगाः द्वादश कृत्वाद्य-पंक्तौ चतुर्दशाद्यङ्का द्वितीयायां ऋ-ॠ-ऌ-ॡ हीनाः स्वरा एकादश ॥ ३३—३५ ॥

तृतीयायां कादिठान्ताः चतुर्थ्यां डादिफान्ताः पञ्चम्यां वादिहान्ताः षष्ठ्यां दशाद्यङ्का लेख्याः ॥ ३६—३८ ॥

कोष्ठे यावतीति । यावतितमे कोष्ठे वर्णसमूहं उपर्य्यङ्केन गुणयेत् । यथा

अधमर्णोऽधिको राशिरृनी राशिर्धनी स्मृतः।
मन्त्रो यदाधमर्णः स्यात् तदा ग्राह्यो धनी न तु ॥ ४२ ॥
एवं धनर्णो सम्प्रोक्तमन्यथा प्रोच्यते पुनः।
नामाद्यचरमारभ्य यावन्मन्त्रादिमाचरम् ॥ ४३ ॥
गणयेन्मातृकाद्यर्णक्रमेण गुणयेत्त्रिभिः।
विभक्ते सप्तभिः शिष्टो नामराशिरुदीरितः ॥ ४४ ॥
एवं मन्त्रार्णमारभ्य यावन्नामादिमाचरम्।
गणयित्वा त्रिभिर्हत्वा विभजेत् सप्तभिः सुधीः ॥ ४५ ॥
मन्त्रराशिः स्मृतः शिष्टः पूर्ववद्धनितार्णता।
यद्वा मन्त्राचरार्णाद्द स्वरव्यञ्जनरूपतः ॥ ४६ ॥
पृथक्कृत्य द्विगुणयेत् योजयेत् साधकाचरैः।
तादृशैरष्टभिर्भक्तैर्मन्त्रराशिरुदाहृतः ॥ ४७ ॥
एवं नामार्णसङ्घोऽपि द्विगुणीकृत्य योजितः।
मन्त्रवर्णैरष्टभक्तो नामराशिः स्मृतो बुधैः ॥ ४८ ॥
ऋणिता धनिता चात्र पूर्ववत् परिकीर्त्तिता।
उक्तान्यतममार्गेण शोधनीयमृणं धनैः ॥ ४९ ॥
यो मन्त्रः पूर्वजनुषि सेवितो नाददात् फलम्।
पापात् पापक्षये जाते फलावाप्तिरनेहसि ॥ ५० ॥

---

प्रथमकोष्ठस्य अकारश्चतुर्दशगुणितश्चतुर्दशैव द्वितीयकोष्ठस्य इकारः सप्तविंशत्या गुणितश्चतुःपञ्चाशत्। एवं तृतीयकोष्ठस्थः उकारः स द्वाभ्यां गुणितः षट् एवमन्येऽपि साधकनामवर्णास्तु दिगादिभिरेवं गुणनीयाः साध्यस्याङ्कानेकीकृत्याष्टभिर्भक्ते शेषः साध्यराशिः एवं साधकाङ्कान् गुणितानेकीकृत्याष्टभक्ते शेषः साधकराशिः मन्त्रराशिरधिकश्चेद् ग्राह्यः। प्रकारान्तरेण ऋणशोधनमाह नामादीति। धनिता ऋणिता च पूर्ववत् अधिकश्चेत् ऋणी ऊनो धनीत्यर्थः। प्रकारान्तरमाह यद्वेति। तादृशैः स्वरव्यञ्जनरूपेण पृथक्कृतैः साधकनामाचरैर्योजयेत्। ऋणिता धनिता च पूर्ववत् अधिकऋणीत्यादि ॥ ३९—४९ ॥

आयुःक्षयाद्गतो नाशं साधकोऽस्य भवान्तरे ।
ऋणित्वात् प्राप्तिमात्रेण मन्त्रोऽभीष्टं प्रयच्छति ॥ ५१ ॥
समाङ्गौ यद्युभौ राशी तदा संसेवनात् फलम् ।
धनीमन्त्रस्तु सम्प्राप्तः फलत्यधिकसेवया ॥ ५२ ॥
मन्त्राणां शोधने भूयः प्रकारान्तरमुच्यते ।
षट्कोणे विलिखेत् पूर्वकोणाद्येकैकवर्णकान् ॥ ५३ ॥
अकारादि हकारान्तान्नपुंसकविवर्जितान् ।
नामाद्यक्षरमारभ्य मन्त्रार्णावधि शोधयेत् ॥ ५४ ॥
प्रथमे सम्पदां प्राप्तिर्द्वितीये धनसंचयः ।
तृतीये धनसम्प्राप्तिश्चतुर्थे बन्धुविग्रहः ॥ ५५ ॥
पञ्चमे तु भवेदाधिः षष्ठे सर्वस्य संचयः ।
एवं संशोधितं मन्त्रं दद्याच्छिष्याय मान्त्रिकः ॥ ५६ ॥
येषां मनूनां सिद्धादिशोधनं नास्ति तान् ब्रुवे ।
एकवर्णस्त्रिवर्णो वा पञ्चार्णो रसवर्णकः ॥ ५७ ॥
सप्तार्णो नववर्णश्च रुद्रार्णो रदनाक्षरः ।
अष्टार्णो हंसमन्त्रश्च कूटो वेदोदितो ध्रुवः ॥ ५८ ॥
स्वप्नलब्धः स्त्रिया प्राप्तामालामन्त्रो नृकेशरी ।
प्रासादो रविमन्त्रश्च वाराहो मातृकापरा ॥ ५९ ॥

---

मन्त्रस्य ऋणित्वे हेतुमाह यो मन्त्र इति। पूर्वजन्मन्युपासनसमये पापसद्भावात् पापक्षयं कुर्वन्नान्यत् फलं ददौ ततः पापक्षये कृते फलदानकाले उपासितुरायुःक्षयो जातः स मन्त्रः फलदानाज्जन्मान्तरऋणी जातः स प्राप्तिमात्रेणेष्टफलदो भवतीत्यर्थः। धनीर्धमि काले। नपुंसका ऋॠऌॡ वर्णाः ॥ ५०—५६ ॥

रसवर्णः षड्वर्णः ॥ ५७ ॥

रदनाक्षरो द्वात्रिंशद्वर्णः। कूटो व्यञ्जनसमूहः। ध्रुवः प्रणवः ॥ ५८ ॥

परा ह्रीं ॥ ५९ ॥

त्रिपुरा काममन्त्रश्च ज्ञासिद्धः पक्षिनायकः ।
बौद्धमन्त्रा जैनमन्त्रा नैव सिद्धादिशोधनम् ॥ ६० ॥
एतद्भिन्नेषु मन्त्रेषु शुद्धिरावश्यकी मता ।
विद्यां मन्त्रं स्तवं सूक्तमरिभूतं त्यजेत् ध्रुवम् ॥ ६१ ॥
अरिमन्त्रो गृहीतश्चेदज्ञानवशतस्तदा ।
तस्य त्यागः प्रकर्त्तव्यस्तत्प्रकारोऽधुनोच्यते ॥ ६२ ॥
सुदिने स्थापयेत् कुम्भं सर्वतोभद्रमण्डले ।
विलोमः संजपन्मन्त्रं पूरयेत्तं सुपायसा ॥ ६३ ॥
तत्र देवं समावाह्य यजेदावरणान्वितम् ।
तदग्रे स्थण्डिलं कृत्वा प्रतिष्ठाप्यानलं ततः ॥ ६४ ॥
जुहुयान्मूलमन्त्रेण विलोमेन शतं घृतैः ।
दिक्पतिभ्यो बलिं दद्यात् पायसान्नैर्घृतान्वितैः ॥ ६५ ॥
पुनः सम्पूज्य देवेशं प्रार्थयेन्मनुनाऽसुना ।
आनुकूल्यमनालोच्य मया तरलबुद्धिना ॥ ६६ ॥
यदुपात्तं पूजितञ्च प्रभो मन्त्रस्वरूपकम् ।
तेन मे मनसः क्षोभमशेषं विनिवर्त्तय ॥ ६७ ॥
पापं प्रतिहतञ्चास्तु भूयात् श्रेयः सनातनम् ।
तनोतु मम कल्याणं पावनी भक्तिरस्तु ते ॥ ६८ ॥
एवं सम्प्रार्थ्य देवेशं कर्पूरागुरुचन्दनैः ।
विलोमं विलिखेन्मन्त्रं ताड़पत्रे तदर्चयेत् ॥ ६९ ॥
प्रबध्य निजमूर्ध्नि तत् स्नायात् कुम्भस्थितैर्जलैः ।
पुनः सम्पूज्य तं तोयैस्तस्यास्ये मन्त्रपत्रकम् ॥ ७० ॥

---

पक्षिनायको गरुड़मन्त्रः ॥ ६०—६२ ॥
अरिमन्त्रत्यागप्रकारमाह सुदिन इति । सुपायसा क्षीरमोदकेन ॥ ६३—६४ ॥

सम्पूज्य कुम्भं सरिति तड़ागे वा विनिक्षिपेत् ।
विप्रान् सम्भोज्य मुच्येत पीड़यासौ मनूत्थया ॥ ७१ ॥
अनेकधा शोधने चेत् शुद्धेरत प्राप्यते मनुः ।
मायां कामं श्रियञ्चादौ दद्यात्तद्दोषमुक्तये ॥ ७२ ॥
यद्वा दुष्टो मनुर्जप्तः सिध्येत् प्रणवसम्पुटः ।
यद्वा क्रमोत्क्रमगया प्रजप्तो वर्णमालया ॥ ७३ ॥
यत्र यस्य भवेद्भक्तिर्विशेषः स मनूत्तमः ।
वैरिकोष्ठमनुप्राप्तः सिद्धिदस्तस्य जायते ॥ ७४ ॥
वीजमन्त्रास्तथा मन्त्रा मालामन्त्रास्तथापरे ।
त्रिधा मन्त्रगणाः प्रोक्ता बुधैरागमवेदिभिः ॥ ७५ ॥
बीजमन्त्रा दशार्णान्तास्ततो मन्त्रा नखावधिः ।
विंशत्यधिकवर्णा ये मालामन्त्रास्तु ते स्मृताः ॥ ७६ ॥
बाल्ये वयसि सिद्ध्यन्ति बीजमन्त्रा उपासितुः ।
मन्त्राः सिद्धा यौवने तु मालामन्त्राश्च वार्द्धके ॥ ७७ ॥
उक्तान्यस्यामवस्थायामभीष्टप्राप्तये सुधीः ।
बीजमन्त्रादिमन्त्राणां द्विगुणं जपमाचरेत् ॥ ७८ ॥
स्वकुलान्यकुलाख्योऽथ मन्त्राणां भेद उच्यते ।
प्रकृतिः पञ्चभूतात्मा ततो जाता तु मातृका ॥ ७९ ॥
तस्माद्वर्णास्तु पञ्चाशत् पञ्चभूतमया यतः ।
तृतीया वर्गगा वर्णा वोलसाः पार्थिवा मताः ॥ ८० ॥

---

तं कुम्भं जलैरापूर्य तत्र कुम्भे मन्त्रयुक्तं ताम्रपत्रं क्षिपेत् । क्रमोत्क्रमगतया वर्णमालया रामाय नमः अं इत्यादि क्षान्तं प्रजप्य तत्र आरभ्य पुनरकारपर्यन्तं जपेत् एवं जप्तोऽरिमन्त्रोऽपि सिद्धिदः ॥ ७०—७४ ॥

त्रिविधान् मन्त्रानाह बीजेति ॥ ७५ ॥

नखावधि विंशत्यर्णावधि ॥ ७६—७९ ॥

वर्गयास्तृतीयाः गजडदबा वर्णा ठ ओ ल स एते भूवर्णाः ॥ ८० ॥

नाम्नयौ वर्गतुर्य्याश्च वसौ वर्णाः स्मृता अपाम् ।
नेत्रे द्वितीया वर्गार्णा ऐरचा पावकात्मकाः ॥ ८१ ॥
वर्णाद्यानन्तझिण्टौम्ना अयपा मारुता मताः ।
वर्गान्तिमाः कपौलौम्नो द्वौविन्दुश्चेति नाभसाः ॥ ८२ ॥
विसर्गस्तु प्रकृत्यात्मा सर्वभूतमयो यतः ।
प्राणैरितो विनिर्याति कण्ठादिस्थानमस्पृशन् ॥ ८३ ॥
पार्थिवादिकवर्णानां स्वकीयाः स्वकुलाभिधाः ।
पार्थिवस्य च वर्णस्य मित्रं वारुणमक्षरः ॥ ८४ ॥
तैजसं शत्रुभूतं स्यात् उदासीनन्तु मारुतम् ।
जलोद्भवस्य वर्णस्य पार्थिवं मित्रमीरितम् ॥ ८५ ॥
सपत्नं वह्निसम्भूतमुदासीनन्तु वायवम् ।
तैजसस्याथ वर्णस्य वायवं मित्रमुच्यते ॥ ८६ ॥
विद्वेषी वारुणो वर्णो उदासीनस्तु पार्थिवः ।
पवनोत्थितवर्णस्य मित्रं वह्निसमुद्भवम् ॥ ८७ ॥
शत्रुः पार्थिववर्णः स्यात् उदासीनस्तु पायजः ।
चतुर्णां पार्थिवादीनामाकाशार्णाः सखा सदा ॥ ८८ ॥
मनोः साधकनाम्नोऽपि यौवर्णा कदिमौ तयोः ।
स्वकुलादिकभेदस्तु शोध्यो मन्त्रप्रदित्सता ॥ ८९ ॥

---

ऋ ऋ ओ घ झ ढ ध भ व स एते नववर्णाः । नेत्रे इति । इ ई ख छ ठ थ फ ऐ र च एते आग्नेयाः ॥ ८१ ॥

वर्णाद्या इति । क च ट त प आ ए ष य प एते वायवीयाः । वर्गान्तिमा इति । ङ ञ ण न म ऌ ॡ अ ह क्षं एते नाभसाः ॥ ८२ ॥

विसर्गस्य पञ्चभूतमयत्वमाह विसर्ग इति । अन्ये वर्णाः कण्ठादिस्थानानि स्पृशन्तो निर्यान्ति विसर्गस्तु न तथेति सर्वभूतमयत्वम् ॥ ८३ ॥

एषां स्वकुलान्यकुलत्वमाह पार्थिवेति ॥ ८४—८९ ॥

स्वकुलेऽभीप्सिता सिद्धिः सिद्धिर्मित्रेऽपि कीर्त्तिता ।
अमित्रे मरणं रोग उदसीने न किञ्चन ॥ ९० ॥
उदासीनममित्रञ्च मन्त्रं दूरेण वर्जयेत् ।
स्वकुलं मित्रभूतञ्च गृह्णीयादिष्टकामुकः ॥ ९१ ॥
नक्षत्रैक्येऽपि सम्प्रोक्तं स्वकुलं नाममन्त्रयोः ।
पुंस्त्रीनपुंसकाः प्रोक्ता मनवस्त्रिविधा बुधैः ॥ ९२ ॥
वषड़न्ताः फड़न्ताश्च पुमांसो मनवः स्मृताः ।
वौषट्स्वाहान्तगा नार्य्यो हुं नमोऽन्ता नपुंसकाः ॥ ९३ ॥
वश्योच्चाटनरोधेषु पुमांसः सिद्धिदायकाः ।
क्षुद्रकर्मरुजां नाशे स्त्रीमन्त्राः शीघ्रसिद्धिदाः ॥ ९४ ॥
अभिचारे स्मृताः क्लीवा एवं ते मनवस्त्रिधा ।
नक्षत्रशोधने जन्मनक्षत्रमितरत्र तु ॥ ९५ ॥
शोधने मन्त्रिभिर्ग्राह्यं प्रसिद्धं जन्मना मता ।
संशोधितोऽधितो मन्त्रो भवेत् शिष्येष्टसिद्धये ॥ ९६ ॥
छिन्नत्वादिकदोषा ये पञ्चाशन्मन्त्रसंस्थिताः ।
तैर्दोषैः सकला व्याप्ता मनवः सप्तकोटयः ॥ ९७ ॥
अतस्तद्दोषशान्त्यर्थं संस्कारदशकञ्चरेत् ।
भूर्जपत्रे लिखेत् सम्यक् त्रिकोणं रोचनादिभिः ॥ ९८ ॥

---

फलमाह स्वकुलेऽभीप्सिता सिद्धिरिति ॥ ९० ॥ ९१ ॥
पुनर्मन्त्रत्रैविध्यमाह पुंस्त्रीति ॥ ९२ ॥ ९३ ॥
तेषां विनियोगमाह वश्येति ॥ ९४—९६ ॥
छिन्नत्वादीति । छिन्नो रुद्धो शक्तिहीन इत्यादयः पञ्चाशद्दोषा तल्लक्षणानि च शारदातिलके द्वितीयपटले उक्तानि । ग्रन्थगौरवभयान्न लिख्यन्ते । सप्तकोटिमिता मन्त्राः सन्ति ते सर्वेऽपि तद्दोषाक्रान्ता एव ॥ ९७ ॥
ननन्वाख्यं संस्कारमाह । भूर्जपत्रे रोचनाकुङ्कुमचन्दनैरात्माभिमुखं त्रिकोणं

वारुणं कोणमारभ्य सप्तधा विभजेत् समम्।
एवमीशाग्निकोणाभ्यां जायन्ते तत्र योनयः॥ ९९॥
नववेदमितास्तत्र विलिखेत् मातृकां क्रमात्।
अकारादि हकारान्तामाशादि वरुणावधिः॥ १००॥
देवीं तत्र समावाह्य पूजयेच्चन्दनादिभिः।
ततः समुद्धरेन्मन्त्रं जननं तदुदीरितम्॥ १०१॥
जपो हंसपुटस्यास्य सहस्रं दीपनं स्मृतम्।
नभोवह्नीन्दुयुक्तार्घिसम्पुटस्य जपो मनोः॥ १०२॥
सहस्रपञ्चकमितो बोधनं तत् स्मृतं बुधैः।
सहस्रं प्रजपेदस्त्रपुटितं ताड़नं हि तत्॥ १०३॥
वाक्‌हंसतारैर्जप्तेन सहस्रं पायसा मनुम्।
अभिषिञ्चेत वागाद्यैरभिषेकोऽयमीरितः॥ १०४॥
हरिवह्न्यन्वितस्तारी वषड़न्तो ध्रुवादिकः।
सहस्रं तत्पुटं जप्याद्विमलीकरणे मनुः॥ १०५॥

---

त्वा विभ्योऽपि कोणेभ्यो मध्ये कृताभिषट्पङ्क्तिभिः समाभिर्मध्ये नववेदमिता एकोनपञ्चाशच्चिकोणाः कोष्ठा जायन्ते तत्रैशानादिपश्चिमकोणान्तमातृकां लिखित्वावाह्य सम्पूज्य तत एकैकमन्त्रार्णमुद्धरेत्। ततः सर्वार्णं पत्रान्तरे लिखेदित्यर्थः एतज्जननम्॥ ९८—१०१॥

दीपनमाह जप इति। हंसमन्त्रेण पुटितस्य मन्त्रस्य सहस्रं जपो दीपनं हंसः रामाय नमः सोऽहमिति। बोधनमाह नभ इति। नभो हः वह्निः रः इन्दुर्बिन्दुस्तैर्युक्तोऽर्घो क तेन क्रूं एतत् संपुटितस्य मनोः पञ्चसहस्रजपो बोधनं क्रूं रामाय नमः क्रूमिति फट् रामाय नमः फड़िति। सहस्रजपस्तु ताड़नम्॥ १०२॥ १०३॥

अभिषेकमाह वागिति। ऐं हंसः ओमिति मन्त्रेण सहस्राभिमन्त्रितैर्जलैस्तैनैव मन्त्रेण ताड़पत्रोपरिलिखितं मन्त्रेऽभिषेचनमभिषेकः॥ १०४॥

विमलीकरणमाह हरिरिति। हरिः सः वह्न्यन्वितो रयुक्तः तारो प्रणवः पुनः

स्वधा वषट्पुटं जप्यात् सहस्रं जीवने मनुम् ।
क्षीराज्ययुतपाथोभिस्तर्पणे तर्पयेन्मनुम् ॥ १०६ ॥
जपेन्मायापुटं मन्त्रं सहस्रं गोपनं हि तत् ।
बाला तार्त्तीयबीजेन गगनाद्येन सम्पुटम् ॥ १०७ ॥
सहस्रं प्रजपेन्मन्त्रमेतदाप्यायनम्मतम् ।
संस्कारदशकं प्रोक्तं मनूनां दोषनाशकम् ॥ १०८ ॥
सिद्धिप्रदा कलियुगे ये मन्त्रास्तान् वदाम्यतः ।
त्र्यर्णो एकाक्षरोऽनुष्टुप् त्रिविधो नरकेशरी ॥ १०९ ॥
एकाक्षरोऽर्जुनोऽनुष्टुप्द्विविधस्तुरगाननः ।
चिन्तामणिः क्षेत्रपालो भैरवो यक्षनायकः ॥ ११० ॥
गोपालो गजवक्त्रश्च चेटका यक्षिणी तथा ।
मातङ्गी सुन्दरी श्यामा तारा कर्णपिशाचिनी ॥ १११ ॥
शवर्य्येकजटा वामा काली नीलसरस्वती ।
त्रिपुरा कालरात्रिश्च कलाविष्टप्रदा इमे ॥ ११२ ॥
अघोरा दक्षिणामूर्त्तिरुमामाहेश्वरो मनुः ।
हयग्रीवो वराहश्च लक्ष्मीनारायणस्तथा ॥ ११३ ॥

---

ॐ भुवादिकः ॐ नायः ॐ व्रीं वषट् रामाय नमः वषट् स्वधेति सहस्रजपो जीवनम् ॥ १०५ ॥

तर्पणमाह क्षीरेति । दुग्धघृतोदकैस्तैनैव मन्त्रेण तत्त्विन्नेव शतं तर्पयेदिति तर्पणम् ॥ १०६ ॥

गोपनमाह जपेदिति । ह्रींपुटस्य सहस्रं जपो गोपनम् । आप्यायनमाह बालेति । बालायास्तार्त्तीय सौः गगनं हः तदाद्येन तेन हँसौः इति बीजेन संपुटस्य सहस्रं जप आप्यायनम् । एकवर्णेनसंपुटत्वमादावन्ते बीजारवणैव एकस्य विनीनत्वाशक्तेः ॥ १०७ ॥ १०८ ॥

सिद्धमन्त्रानाह त्र्यर्ण इति । वर्णादिस्त्रिविधो नरसिंहः एकार्णो द्विविधो हयग्रीवः चिन्तामणिः क्ष्रौं इति ॥ १०९—११२ ॥

प्रणवाद्याश्चतुर्वर्णा वह्नेर्मन्त्रास्तथा रवेः।
प्रणवाद्यो गणपतिर्हरिद्रागणनायकः॥ ११४॥
सौराष्टाक्षरमन्त्रश्च तथा रामषड़क्षरः।
मन्त्रराजो ध्रुवादिश्च प्रणवो वैदिको मनुः॥ ११५॥
वर्णत्रयाय दातव्या एते शूद्रायनो बुधैः।
सुदर्शनं पाशुपतमाग्नेयास्त्रं नृकेशरी॥ ११६॥
वर्णद्वयाय दातव्या नान्यवर्णे कदाचन।
छिन्नमस्ता च मातङ्गी त्रिपुरा कालिका शिवः॥ ११७॥
लघुश्यामा कालरात्रिर्गोपालो जानकीपतिः।
उग्रतारा भैरवश्च देया वर्णचतुष्टये॥ ११८॥
स्तगीदृशां विशेषेण मन्त्रा एते सुसिद्धिदाः।
ब्राह्मणाः क्षत्रिया वैश्याः शूद्रानार्य्योऽधिकारिणः॥११९॥
श्रद्धावन्तो देवगुरुद्विजपूजासु सर्वथा।
मायाकामं श्रियं वाचं प्रदद्यात्सुखजन्मने॥ १२०॥
मायास्तते बाहुजेभ्य उरुजेभ्यः श्रियङ्गिरम्।
वाणीबीजन्तु शूद्रेभ्योऽन्येभ्यो वर्मवषड़ादयः॥ १२१॥
सर्वसाधारणमथ होमद्रव्यमथोच्यते।
फलैर्हुतैः सुखावाप्तिः पालाशैरिष्टसिद्धये॥ १२२॥

---

विप्रक्षत्रियविड्भ्यो देयान्मन्त्रानाह प्रणव इति। उमामहेश्वरः ह्रीं श्रीं क्लीं नमः शिवायेत्यादि॥ ११३॥ ११४॥

मन्त्रराजो नरसिंहः॥ ११५॥

विप्रक्षत्रदेयानाह सुदर्शन इति॥ ११६॥

वर्णचतुष्टयान्मन्त्रानाह छिन्नमस्तेति॥ ११७—११९॥

बीजेषु विशेषमाह मायामिति। माया कामं श्रीवाग्बीजानि, सुखजन्मने विप्राय॥ १२०॥

कामश्रीवाचो बाहुजेभ्यः क्षत्रियेभ्यः श्रीवाचौ उरुजेभ्यो विड्भ्यः वाचं शूद्राय अन्येभ्यः प्रतिलोमानुलोमजेभ्यो वर्मादयः॥ १२१॥ १२२॥

हयमारैस्त्रियो वश्या गुडूच्या रोगसङ्क्षयः।
दूर्वया बुद्धिवृद्धिः स्यात् गुड़ेन जनवश्यता॥ १२३॥
बिल्वपत्रैर्घृतैः पद्मैः पाटलैश्चम्पकैः श्रियः।
सिद्धार्थैर्मल्लिकाभिश्च कीर्त्तये जातिभिर्गिरः॥ १२४॥
व्रीहिभिश्च यवैः प्लक्षोडुम्बराश्वत्थजैन्धसा।
तिलैस्त्रिमधुरैरिष्टाः सम्पदः स्युर्नृणां हुतैः॥ १२५॥
किंशुकैः कासमर्दैश्च शतमालैश्च पाटलैः।
विप्रादयः क्रमाद्वश्याः सौभाग्यं गन्धवस्तुभिः॥ १२६॥
कोद्रवैर्व्याधयोऽरीणामुन्मत्तत्वं विभीतकैः।
कलापैः साध्वसोत्पत्तिर्माषैस्तेषान्तु मूकता॥ १२७॥
समिद्भिः शाल्मलैर्नाशो रिपूणामचिराद्भवेत्।
किम्भूरिणा ददातीष्टं देवता समुपासिता॥ १२८॥
पुरश्चरण एकस्मिन् कृते जन्मान्तराघतः।
मन्त्रो यदि न सिद्धः स्यात्तदा तत् पुनराचरेत्॥ १२९॥
यद्वा समुद्रगामिन्यां नद्यामिन्दुरविग्रहे।
स्पर्शान्मोचान्तमाजप्य जुहुयात्तद्दशांशतः॥ १३०॥
विप्रान् सम्भोज्य नानान्नैर्मन्त्राणां सिद्धिमाप्नुयात्।

---

हयमारैः करवीरः॥ १२३॥

जातिभिर्जातिपुष्पहोमेन गिरो वाक्सिद्धिः॥ १२४॥

प्लक्षादिजातेन ऐन्धसा समिद्भिः॥ १२५॥

किंशुकादिभिर्हुतैः क्रमाद्विप्रादयो वश्याः। शतमालो राजवृक्षः। गन्धवस्तुभिः कर्पूरादिभिः॥ १२६॥

कलापैर्मयूरपिच्छैररीणां भयोत्पत्तिः। जन्मान्तरोपार्जितपापबाहुल्यादिकपुरश्चरणे कृते यदीष्टसिद्धिर्न भवेत्तर्हि पुनः पुरश्चरणं कुर्यात्॥ १२७—१२९॥

संक्षेपपुरश्चरणप्रकारमाह यद्वेति। समुद्रगामिन्यां गङ्गादिकायाम्। विप्रान्

शश्वज्जपपरस्यापि सिध्यन्ति मनवोऽचिरात् ॥ १३१ ॥

इति मन्त्रमहोदधौ मन्त्रशोधनं नाम चतुर्विंशस्तरङ्गः।

---

## पञ्चविंशस्तरङ्गः।

कर्माणि षड़थो वक्ष्ये सिद्धिदानि प्रयोगतः।
शान्तिर्वश्यं स्तम्भनञ्च द्वेषमुच्चाटमारणे ॥ १ ॥
उक्तानीमानि कर्माणि शान्तिरोगादिनाशने।
वश्यं वचनकारित्वं स्तम्भो वृत्तिनिरोधनम् ॥ २ ॥
द्वेषोऽप्रीतिः प्रीतिमतोरुच्चाटः स्थानतश्च्युतिः।
मारणं प्राणहरणमिति षट्कर्मलक्षणम् ॥ ३ ॥
देवता देवता वर्णाः ऋतु दिक्दिवसासनम्।
विन्यासा मण्डलं मुद्राक्षरं भूतोदयः समित् ॥ ४ ॥
मालाग्निर्लेखनं द्रव्यं कुण्डस्रुक्स्रुवलेखनीः।
षट्कर्माणि प्रयुञ्जीत ज्ञात्वैतानि यथायथम् ॥ ५ ॥

---

सम्भोज्य होमसमानसंख्याने वेत्यर्थः। तद्दशांशत इत्युभयत्रापि सम्बन्धात् तद्दशांशतो जपदशांशेन च जुहुयात्। विप्रान् सम्भोज्य च सिद्धिमवाप्नुयादिति सम्बन्धः ॥ १३० ॥ १३१ ॥

इति नौकासमाख्यायां श्रीमन्त्रमहोदधिटीकायां
मन्त्रशोधनं नाम चतुर्विंशस्तरङ्गः।

---

षट्कर्माणि वक्तुमुपक्रमते कर्माणीति तान्याह शान्तिरिति ॥ १ ॥
लक्षणमाह शान्तिः रोगादिनाशनमिति देवताद्यैकोनविंशतिपदार्थान्

रतिर्वाणी रमा ज्येष्ठा दुर्गा काली च देवता ।
सितारुणहरिद्रातमिश्रश्यामलधूसराः ॥ ६ ॥
प्रपूजयेत कर्मादौ स्ववर्णैः कुसुमैः क्रमात् ।
ऋतुषट्कं वसन्ताद्यमहोरात्रं भवेत् क्रमात् ॥ ७ ॥
एकैकस्य ऋतोर्मानं घटिकादशकं मतम् ।
हेमन्तश्च वसन्ताख्यं शिशिरं ग्रीष्मतोयदौ ॥ ८ ॥
शरदं कर्मणां षट्के योजयेत् क्रमतः सुधीः ।
शिवसोमेन्द्रनिऋतिपवनाग्निदिशः क्रमात् ॥ ९ ॥
तत्तत्कर्माणि कुर्वीत जपं तत्तद्दिशा मुखः ।
शुक्लपक्षे द्वितीया च सप्तमी पञ्चमी तथा ॥ १० ॥
तृतीया बुधजीवाभ्यां युता शान्तिविधौ मता ।
चतुर्थी नवमी षष्ठी त्रयोदशीतिथिस्तथा ॥ ११ ॥
जीवसोमयुता शस्ता वशीकरणकर्मणि ।
एकादशी च दशमी नवमी चाष्टमी पुनः ॥ १२ ॥
शनैश्चरसितोपेता प्रोक्ता विद्वेषकर्मणि ।
कृष्णे चतुर्दश्यष्टम्यौ भानुसूनुयुते यदि ॥ १३ ॥
उच्चाटनाख्यं कर्मात्र कर्त्तव्यं फलसिद्धये ।

---

प्रतिकर्मभिन्नान् यथा स्वं ज्ञात्वा षट्कर्माणि कुर्यादित्याह देवता देवतावर्णा इत्यादिना ॥ २—५ ॥

उक्तं षट्कर्मसु आदौ देवता आह रतिरिति । शान्त्यादिकर्मारम्भे क्रमा इत्यादि पूजा । देवतावर्णानाह सितेति । रतिः सिता: वाणी अरुणेत्यादि ॥ ६ ॥

स्ववर्णैः सितादिवर्णैः । ऋतूनाह ऋतुषट्कमिति । शान्त्यादौ वसन्तादीन् पूजीत प्रत्यहं सूर्योदयान्नाड़ीदशकं वसन्तः तदग्रिमं नाड़ीदशकं शिशिर इत्यादि ॥ ७—८ ॥

दिशि आह शिवेति । शिवादिगीशानी दिवसानाह शुक्लपक्षेति ॥ ९—१२ ॥

भूताष्टम्यौ क्षणगते अमावास्या तदन्तगा ॥ १४ ॥
भानुमन्दकुजोपेताः स्तम्भमारणयोः शुभाः।
पद्मं स्वस्तिकविकटे कुक्कुटं वज्रभद्रके ॥ १५ ॥
शान्त्यादिषु प्रकुर्वीत क्रमादासनमुत्तमम्।
गोखड्गगजफेरूणां मेषीमहिषयोस्तथा ॥ १६ ॥
कृत्तौ निवेश्य कुर्वीत जपं शान्त्यादिकर्मणि।
आसनान्येव सङ्कीर्त्य विन्यासः प्रोच्यतेऽधुना ॥ १७ ॥
ग्रथनञ्च विदर्भाख्यः सम्पुटो रोधनन्तथा।
योगः पल्लव एते षट् विन्यासाः कर्मसु स्मृताः ॥ १८ ॥
प्रत्येकमेषां षण्णान्तु लक्षणं प्रणिगद्यते।
एको मन्त्रस्य वर्णः स्यात्ततो नामाक्षरं पुनः ॥ १९ ॥
मन्त्रार्णौ नामवर्णश्चेत्येवं ग्रथनमीरितम्।

---

तदन्तगा शुक्लप्रतिपत् ॥ १४ ॥

आसनान्याह पद्ममिति। पद्मस्वस्तिके उक्ते। विकटलक्षणं यथा—

नानुजङ्घान्तराले तु भुजयुग्मं प्रकल्पयेत्।

विकटासनमेतत् स्यादिति। कुक्कुटासनं यथा—

उपविश्योत्कटासने कृत्वोत्कटासनं पूर्वं समयादद्वयन्ततः।
अन्तर्जानुकरद्वन्द्वं कुक्कुटासनमीरितम् ॥ इति।
ऊर्वोः पादौ क्रमान्न्यसेज्जान्वोः प्रत्यङ्मुखाङ्गुली।
करौ निदध्यादाख्यातं वज्रासनमनुत्तमम् ॥ इति।
सीवन्याः पार्श्वयोर्न्यस्येद् गुल्फयुग्मं सुनिश्चलम्।
वृषणाधः पादपार्ष्णी पाणिभ्यां परिबन्धयेत् ॥
भद्रासनं समुद्दिष्टं योगिभिः पूजितं परम्। इति च ॥ १५ ॥

शारीरमासनमुपवेशार्थमासनमाह गोखड्गेति। फेरुः शृगालः. मृगादीनां कृत्तौ चर्मण्युपविश्य शान्त्यादि विधेयम् ॥ १६ ॥ १७ ॥

विन्यासानाह ग्रथनमिति ॥ १८ ॥

ग्रथनलक्षणमाह एक इति ॥ १९ ॥

आदौ मन्त्राक्षरं द्वन्द्वमेकं नामाक्षरं ततः ॥ २० ॥
एवं पुनः पुनः प्रोक्तो विदर्भो मन्त्रवित्तमैः ।
मन्त्रमादौ समुच्चार्य्य ततो नामाखिलं पठेत् ॥ २१ ॥
अन्ते व्युत्क्रमतो मन्त्र एष सम्पुट ईरितः ।
आदिमध्यावसानेषु नाम्नो मन्त्रस्तु रोधनम् ॥ २२ ॥
नामान्ते तु मनोर्योगो मन्त्रान्ते नामपल्लवः ।
अर्द्धचन्द्रनिभं पार्श्वद्वये पद्मद्वयाङ्कितम् ॥ २३ ॥
जलस्य मण्डलं प्रोक्तं प्रशस्तं शान्तिकर्मणि ।
त्रिकोणं स्वस्तिकोपेतं वश्ये वह्नेस्तु मण्डलम् ॥ २४ ॥
चतुरस्रं वज्रयुक्तं स्तम्भे भूमेस्तु मण्डलम् ।
वृत्तं दिवस्तद्विद्वेषे विन्दुषट्काङ्कितन्तु तम् ॥ २५ ॥
वायुमण्डलमुच्चाटे मारणे वह्निमण्डलम् ।
सरोरुहं पाशगदे मुषलं कुलिशन्त्वसिः ॥ २६ ॥

---

विदर्भलक्षणमाह आदाविति । ग्रन्थनविदर्भयोर्मन्त्रनामवर्णलेखनेऽन्यतर-समाप्तौ पुनर्लेखनम् ॥ २० ॥

संपुटलक्षणमाह मन्त्रमिति ॥ २१ ॥

रोधनमाह आदीतियोगमाह नाम्न इति । पल्लवमाह मन्त्रान्त इति । मण्डलमाह अर्द्धचन्द्रेति ॥ २२—२४ ॥

तद्वृत्तं विन्दुषट्काङ्कितं वायुमण्डलम् ॥ २५ ॥

मुद्रा आह सरोरुहमिति । सरोरुहं पद्ममुद्रा सा यथा—

करौ च सम्मुखौ कृत्वा संहताभ्युन्नतौ पुनः ।
अङ्गुलीः प्रसृता मध्येऽङ्गुष्ठौ पद्मस्य मुद्रिका ।' इति ।

पाशमुद्रा यथा—

तर्जनी मध्यमे वामे ऊर्द्ध्वमुख्यौ विधाय च ।
दक्षिणे ह्यधोमुख्यौ सम्मुख्यौ च परस्परम् ।
पाशमुद्रा भवेदेषा मिथः सम्पीडने तयोः ॥ इति ।

गदामुद्रा यथा—

षण्मुद्राः कर्मषट्के स्युरथ होमे निगद्यते ।
मृगी हंसी शूकरीति होमे मुद्रात्रयं मतम् ॥ २७ ॥
मध्यमानामिकाङ्गुष्ठयोगे मुद्रा मृगी मता ।
हंसी कनिष्ठाहीनानां सर्वासां योजने मता ॥ २८ ॥
शूकरी करसङ्कोचे मुद्रालक्षणमीरितम् ।
शान्तौ वश्ये मृगी हंसी स्तम्भनादिषु शूकरी ॥ २९ ॥
चन्द्रतोयधराकाशपवनानलवर्णकाः ।
षट्सु कर्मसु यन्त्रस्य बीजान्युक्तानि मन्त्रिभिः ॥ ३० ॥
स्वराः सठौ चन्द्रवर्णा भूतवर्णा उदीरिताः ।
चन्द्रार्णहीनास्ते ग्राह्या वशीकृत्यादिकर्मणि ॥ ३१ ॥

---

अन्योन्याभिमुखौ कृत्वा हस्तौ तु ग्रथितावुभौ ।
अङ्गुष्ठौ मध्यमे तद्वत् संयुक्ते सुप्रसारिते ॥
गदामुद्रेयमुदिता दर्शिता विघ्नहारिणि ॥

इति मुपचमुद्रोक्ता ।

कुलिशं वज्रमुद्रा सा यथा—

कनिष्ठाङ्गुष्ठयुक् मुद्रा त्रिकोणत्वशनिर्मता । इति ।

अशनेर्वज्रस्य कनिष्ठाङ्गुष्ठयोगादन्यासां प्रसारणात्त्रिकोणेत्यर्थः । असिः खड्गमुद्रा सा यथा—

ऊर्द्धस्य वामहस्तस्य तर्जन्याद्यङ्गुलित्रयम् ।
प्रसार्य्य योजयेदन्ये मिथोऽङ्गुष्ठकनिष्ठिके ॥
खड्गमुद्रेयमुदिता सर्वशत्रुनिकृन्तनी ॥ इति ॥ २६ ॥

होममुद्रा आह मृगीति तासां लक्षणमाह मध्यमेति ॥ २७ ॥

वर्णानाह चन्द्रेति । शान्तौ चन्द्रवर्णा यन्त्रे बीजत्वेन लेख्याः । वशीकरणादौ जलादिवर्णाः ॥ २८ ॥

चन्द्रवर्णानाह स्वरा इति षोडशस्वराः सठ एतेऽष्टादश चन्द्रवर्णाः । प्रतिसन्ति तथापि वश्यादौ पञ्चभूतवर्णास्तु प्राक्तरङ्गे स्वकुलाकुलभेदे उक्ताः तत्र यद्यपि चन्द्रवर्णा अपि सन्ति तथापि वश्यादौ तोयादिवर्णलेखने चन्द्रवर्णरहितानामेव जलादिवर्णानां लेखनम् ॥ २९ ॥ ३० ॥

केषाञ्चिन्मते सवलयहराः क्रमाच्चन्द्रो भुवनभोऽनिलानलवर्णाः ॥ ३१ ॥

केचित् सबलहान् यं रमाहुश्चन्द्रादिवर्णकान् ।
शान्त्यादिकर्मसु ज्ञेया जातयः षड़मू क्रमात् ॥ ३२ ॥
नमः स्वाहा स्वधा वौषट् हुं फट् च मन्त्रवित्तमैः ।
नासासु टहयाधस्तादुयदा प्राणगतिर्भवेत् ॥ ३३ ॥
तोयोदयस्तथा ज्ञेयाः शान्तिकर्मणि सिद्धिदाः ।
नासादक्षाश्रितगतौ प्राणे स्तम्भे धरोदयः ॥ ३४ ॥
पुटमध्यगतौ तस्मिन् द्वेषे व्योमोदयः शुभः ।
पुटोपरिष्टाद् गमने प्राणे स्यात् पावकोदयः ॥ ३५ ॥
तदा कर्मद्वये सिद्धिर्मारणे च वशीकृतौ ।
प्राणे तिर्य्यग्गतौ ज्ञेय उच्चाटे मारुतोदयः ॥ ३६ ॥
दूर्वायाः समिधः शान्तौ गोघृतेन समन्विताः ।
दाड़िमप्रसवो होमे वश्येऽजाघृतसंयुताः ॥ ३७ ॥
मेषीघृताक्ताः समिधः स्तम्भे राजतरूद्भवाः ।
धत्तूरसमिधो द्वेषे अतसीतैलसंयुताः ॥ ३८ ॥
चूतजा कटुतैलाक्ता उच्चाटनविधौ मताः ।
कटुतैलयुताः शस्ता मारणे खदिरोद्भवाः ॥ ३९ ॥
शङ्खजा पद्मबीजोत्था निम्बारिष्टफलोद्भवा ।
प्रेतदन्तभवावाहरदोत्था खरदन्तजाः ॥ ४० ॥

---

जातिरूपान् दर्शानाह नम इति ॥ ३२ ॥

भूतोदयमाह नासेति नासाविवरयोरधस्तात् प्राणगतौ जलोदयः ॥ ३३ ॥

उपरिप्राणगते वह्न्युदयः ॥ ३४ ॥ ३५ ॥

नासामध्यदक्षाश्रितगमनेऽधरोदयः संस्तम्भने ज्ञेयः नासाविवरमध्ये प्राणं प्राणे वायूदयः समिध आह दूर्वाया इति ॥ ३६ ॥ ३७ ॥

दाड़िमीति वश्यार्थं होमे अजाघृताक्ता दाड़िमसमिधः स्तम्भने मेषीघृताक्ता राजवृक्षसमिधः ॥ ३८॥

जपमाला क्रमात् ज्ञेया शान्तिमुख्येषु कर्मसु।
मध्यमायां स्थितां मालां ज्येष्ठेनावर्त्तयेत् सुधीः ॥ ४१ ॥
शान्तौ वश्ये तथा पुष्टौ भोगमोक्षार्थके जपे।
अनामाङ्गुष्ठयोगेन स्तम्भनादौ जपेत् सुधीः ॥ ४२ ॥
तर्जन्यङ्गुष्ठयोगेन द्वेषोच्चाटनयोः पुनः।
कनिष्ठाङ्गुष्ठसंयोगान्मारणे प्रजपेत् सुधीः ॥ ४३ ॥
अष्टोत्तरशतं संख्या तदर्द्धञ्च तदर्द्धकम्।
मणीनां शुभकार्य्ये स्यात् तिथिसंख्याभिचारके ॥ ४४ ॥
शान्तिर्वश्यं लौकिकाग्नौ स्तम्भनं वटजेऽनले।
द्वेषः कलितरूत्पन्ने शेषे पितृवनस्थिते ॥ ४५ ॥
शुभे कर्मणि विल्वार्कपलाशक्षीरवृक्षजैः।
अशुभे विषवृक्षाक्षैर्निम्बधत्तूरशेलुजैः ॥ ४६ ॥
काष्ठैः प्रदीपयेदग्निं होमकर्मणि मन्त्रवित्।
वह्नेर्जिह्वां सुप्रभाख्यां शान्तिकर्मणि पूजयेत् ॥ ४७ ॥

---

उच्चाटे सर्षपतैलाक्ता आम्रसमिधः। मालामाह प्रवालेति स्तम्भने निम्बफलजा अरिष्टः फेनिलस्तत्फलजा वा मालाविधेया उच्चाटने वाराहरदोत्था अश्वदन्तजा। मालायां गणनप्रकारमाह मध्यमायामिति। ज्येष्ठेनाङ्गुष्ठेनावर्त्तयेत् भ्रामयेत् ॥ ३९—४३ ॥

मालामणिसंख्यामाह अष्टोत्तरशतमिति। तदर्द्धं चतुःपञ्चाशत् तदर्द्धकं सप्तविंशतिः। एषा त्रिविधा माला शुभे कार्य्या अभिचारे स्तम्भनादौ पञ्चाशत् तिथियुक्ता माला ॥ ४४ ॥

अग्निमाह शान्तिरिति। वटजे वटकाष्ठान्मथनोत्पादिते। कलितरुः। विभीतकजाते शेषे उच्चाटनमारणकर्मणि श्मशानवह्नौ होमः वह्निप्रसङ्गात् काष्ठप्रमाणमाह शुभ इति। शुभे शान्तिपुष्ट्यादौ कर्मणि विल्वादिकाष्ठैरग्निं प्रज्वालयेत्। अशुभे स्तम्भनादौ विषवृक्षादिकाष्ठैः विषवृक्षः कुचिला इति प्रसिद्धः। अक्षो विभीतकः शेलुः श्लेष्मातकः ॥ ५६ ॥ ४६ ॥

वश्यकार्य्ये हि रक्ताख्यां स्तम्भने कनकाभिधाम् ।
विद्वेषे गगनां जिह्वामुच्चाटेऽप्यतिरक्तिकाम् ॥ ४८ ॥
कृष्णान्तु मारणे चार्चेद्बहुरूपान्तु सर्वतः ।
भोज्ये संख्याविशेषोऽपि ज्ञेयः शान्त्यादिकर्मसु ॥ ४९ ॥
शान्तौ वश्ये भोजयेत होमाद्विप्रान् दशांशतः ।
उत्तमं तद्भवेत् कर्म तत्त्वांशेन तु मध्यमम् ॥ ५० ॥
होमाच्छतांशतो विप्रभोजनन्त्वधमन्तु तत् ।
शान्तेर्द्विगुणितं विप्रभोजनं स्तम्भने मतम् ॥ ५१ ॥
त्रिगुणं द्वेषणोच्चाटे मारणे होमसम्मितम् ।
अतिशुद्धकुलोत्पन्नाः साङ्गवेदविदोऽमलाः ॥ ५२ ॥
सदाचाररता विप्रा भोज्या भोज्यैर्मनोहरैः ।
पूज्यास्ते देवताबुद्ध्या नमस्कार्य्याः पुनः पुनः ॥ ५३ ॥
सन्तोष्या मधुरैर्वाक्यैर्हिरण्यादिप्रदानतः ।
अचिराल्लभतेऽभीष्टं गृहीतायां तदाशिषि ॥ ५४ ॥
एनोऽभिचारकर्मोत्थं नश्यन्ति द्विजवाक्यतः ।
चन्दनं रोचना रात्रिगृहधूमचिताभवः ॥ ५५ ॥
अङ्गारोऽष्टविषाणीति शान्त्यादौ यन्त्रलेखने ।
पूर्वोक्तं लेखनं द्रव्यं गृह्णीयात्तदपि ध्रुवम् ॥ ५६ ॥

---

अग्निप्रसङ्गादेव कर्मविशेषे वह्निजिह्वापूजामाह वश्य इति । कनकाभिधा हिरण्या ॥ ४७—४८ ॥

होमप्रसङ्गाद्विप्रभोजनसंख्यामाह भोज्य इति । शान्तिवश्ययोर्होमाद्दशांशेन द्विजानां भोजनमुत्तमम् । होमान्त्यत्र विंशांशेन तन्मध्यमं शतांशेनाधमम् ॥ ४९—५१ ॥

विप्रस्वरूपमाह अतिशुद्धेति ॥ ५२—५४ ॥

उक्तब्राह्मणभोजने अभिचारोत्थमेनः पापं नश्यति तस्मादुत्तमा द्विजा भोज्याः ।

पिप्पली मरिचं शुण्ठी श्येनविष्ठा च चित्रकः।
गृहधूमोन्मत्तरसो लवणञ्च विषाष्टकम् ॥ ५७ ॥
शान्तौ वश्ये लिखेद्भूर्जे स्तम्भने द्वीपिचर्मणि।
खरचर्मणि विद्वेषे उच्चाटे ध्वजवाससि ॥ ५८ ॥
नरास्थिनि लिखेद् यन्त्रं मारणे मन्त्रवित्तमः।
ये त्वाधाराः स्मृता यन्त्रतरङ्गे तेऽपि सम्मताः ॥ ५९ ॥
वृत्तं पद्मं चतुष्कोणं त्रिषट्कोणं दलेन्दुवत्।
तोयेशसोमशक्राणां यातु वायोर्यमस्य च ॥ ६० ॥
आशासु क्रमतः कुण्डं शान्तिमुख्येषु कर्मसु।
सौवर्णौ यज्ञवृक्षोत्थौ स्रुक्स्रुवौ शान्तिवश्ययोः ॥ ६१ ॥
स्तम्भनादिषु कार्य्येषु स्मृतौ लोहमयौ हितौ।
हेमजा रूप्यजा जातीसम्भवा लेखनी शमे ॥ ६२ ॥
वश्ये दूर्वाङ्कुरोत्पन्ना स्तम्भनेऽगस्त्यवृक्षजा।
राजवृक्षभवा वा स्याद्विद्वेषे तु करञ्जजा ॥ ६३ ॥
शुभे कर्मणि रम्याहे लेखनी रचयेत् सुधीः।
विभीतकोत्थितोच्चाटे मारणे तु मस्थिजा ॥ ६४ ॥
रिक्तातिथौ कुजदिने विष्टौ तासमशुभे पुनः।

---

लेखनद्रव्यमाह चन्दनमिति। रात्रिर्हरिद्रा सा स्तम्भने लेखनद्रव्यं षट्विषाणि मारणे पूर्वोक्तं यन्त्रतरङ्गोक्तं लेखनद्रव्यं तदपि तत्तत्कामनया ग्राह्यम्। षट्विषाण्याह पिप्पलीति ॥ ५५—५७ ॥

लेखनद्रव्यप्रसङ्गाल्लेखनाधारमाह शान्ताविति ॥ ५८ ॥ ५९ ॥

कुण्डान्याह वृत्तमिति। शान्तौ वृत्तकुण्डं पश्चिमायां पद्माकारं वश्ये उत्तरे स्तम्भने चतुरस्रं पूर्वे द्वेषे त्रिकोणं नैरृत्ये उच्चाटे षट्कोणं वायव्यां मारणेऽर्द्धचन्द्राकारं दक्षिण इत्यर्थः ॥ ६० ॥

स्रुक्स्रुवावाह सौवर्णाविति ॥ ६१ ॥

लेखनीमाह शमे शान्तौ ६२ ॥

भक्ष्यञ्च तर्पणं द्रव्यं तत्पात्रमथ कीर्त्त्यते ॥ ६५ ॥
शान्तौ वश्ये हविष्यान्नं स्तम्भने परमान्नकम्।
माषा मुद्गाश्च विद्वेषे गोधूमा भ्रंसने स्थलात् ॥ ६६ ॥
मसूरान्नं तथा श्यामा अजादुग्धोत्थपायसम्।
मारणे प्रोदितं भक्ष्यं मन्त्रिणां कर्म्मकुर्वताम् ॥ ६७ ॥
शान्तौ वश्ये हरिद्राक्तं जलं तर्पण ईरितम्।
मरीचाद्यङ्ग्वोष्णं तत् स्तम्भनं मारणे तथा ॥ ६८ ॥
मेषरक्तान्वितं तोयं विद्वेषोच्चाटयोर्मतम्।
स्वर्णपात्रं तर्पणे स्यात् शान्तौ वश्ये च कर्म्मणि ॥ ६९ ॥
स्तम्भने मृत्तिकापात्रं विद्वेषे खदिरोद्भवम्।
लोहनिर्मितमुच्चाटे कुक्कुटाण्डन्तु मारणे ॥ ७० ॥
मृद्वासने समासीनः शान्तौ वश्ये प्रतर्पयेत्।
जानुभ्यामुत्थितः स्तम्भे द्वेषादविकयात् स्थितः ॥ ७१ ॥
षट्कर्म्मणां विधिः प्रोक्त एवं मन्त्रज्ञ तुष्टये।
सम्यक् ज्ञात्वा न्यासजातमात्मरक्षां विधाय च ॥ ७२ ॥
काम्यं कर्म प्रकर्त्तव्यमन्यथाभिभवो भवेत्।
शुभं वाप्यशुभं वापि काम्यं कर्म करोति यः ॥ ७३ ॥
तस्यारित्वं व्रजेन्मन्त्रो न तस्मात्तत्परो भवेत्।
विषयासक्तचित्तानां सन्तोषाय प्रकाशितम् ॥ ७४ ॥

---

देवताद्येकोनविंशतिवस्तूनि शान्त्यादौ निरूप्य पुनरधिकं वक्तुं प्रतिजानीते भक्ष्यमिति। परमान्नकं पायसम् ॥ ६२—६५ ॥

स्थानात् भ्रंसने उच्चाटने ॥ ६६ ॥

एवं काम्यं कर्म निरूप्य तत्प्रसक्तिं वारयति शुभं वेति ॥ ६८—७३ ॥

एवं चेत् किमित्युक्तं तदित्यत आह विषयेति। पूर्वाचार्य्योक्तत्वादुक्तं तदवगत्या हितं न भवति ॥ ७४ ॥

पूर्वाचार्य्योदितं काम्यं कर्म नैतद्धितावहम्।
काम्यकर्मप्रसक्तानां तावन्मात्रं भवेत् फलम् ॥ ७५ ॥
निष्कामभजतां देवमखिलाभीष्टसिद्धयः।
प्रतिमन्त्रं समुदिता ये प्रयोगाः सुखाप्तये।
तदासक्तिं विहायैव निष्कामो देवतां भजेत् ॥ ७६ ॥
वेदे काण्डत्रयं प्रोक्तं कर्मोपासनबोधनम्।
साधनं काण्डयुग्मोक्तं तृतीयं साध्यमीरितम् ॥ ७७ ॥
तस्माद्वेदोदितं कुर्य्यादुपासीतञ्च देवताः।
शुद्धान्तःकरणास्तेन लभन्ते ज्ञानमुत्तमम् ॥ ७८ ॥
कार्य्यकारणसङ्घातं प्रविष्टश्चेतनात्मकः।
जीवब्रह्मैव सम्पूर्णमिति ज्ञात्वा विमुच्यते ॥ ७९ ॥
मनुष्यदेहं सम्प्राप्य उपासीतञ्च देवताः।
यन्नो मुच्येत संसारात् महापापयुतो हि तः ॥ ८० ॥
आत्मज्ञानाप्तये तस्माद् यतितव्यं नरोत्तमैः।
कर्मभिर्देवसेवाभिः कामाद्यरिगणक्षयात् ॥ ८१ ॥

---

तत्र हेतुमाह काम्येति ॥ ७५ ॥ ७६ ॥

निष्कामभजने फलमाह वेद इति। कर्मोपासनबोधनं कर्मकाण्डं ज्योतिष्टोमेन स्वर्गकामो यजेदित्यादि उपासनाकाण्डं सूर्य्यो ब्रह्मेत्युपासीत यो ह वै ज्येष्ठञ्च वेदेत्यादि इदं काण्डद्वयं साधनज्ञानस्य तृतीयं ज्ञानकाण्डं अयमात्मा ब्रह्मेत्यादि। तस्मात् साध्यं फलभूतं स्याद् ज्ञानप्राप्तये प्रयतितव्यमित्यर्थः। तत्रोपायमाह तस्मादिति। निष्कारणवेदोक्ताचरणे देवतोपासने चान्तःकरणशुद्धिस्ततो ज्ञानप्राप्तिरित्यर्थः ॥ ७७ ॥ ७८ ॥

ज्ञानस्वरूपमाह कार्य्येति। कार्य्याणि कारणानि भूतानि च तत् सङ्घातशरीरं तत्रात्मकश्चेतनो जीवो वस्तुतो ब्रह्मैवेति साक्षात्कारो ज्ञानं तस्मान्मुक्तिः तत्त्वमसि श्वेतकेतो अहं ब्रह्मास्मीत्यादि श्रुतेः। ज्ञानायाप्रयतमानं निन्दति मनुष्येति ॥ ७९ ॥ ८० ॥

फलितमाह आत्मज्ञानेति। कामक्रोधलोभा अरयस्तेषां क्षयं कृत्वा कृतैः कर्मभिर्वैदिकैर्देवोपासनादिभिश्चान्तःकरणशुद्धिद्वारा ज्ञानाप्तिरित्यर्थः ॥ ८१ ॥

चिकीर्षुर्देवतोपाप्तिमादौ भावि विचारयेत् ।
स्नानदानादिकं कृत्वा स्मृत्वा हरिपदाम्बुजम् ॥ ८२ ॥
शयीत कुशशय्यायां प्रार्थयेद् वृषभध्वजम् ।
ओं भगवन् देवदेवेश ! शूलभृद् वृषवाहन ! ॥ ८३ ॥
इष्टानिष्टे समाचक्ष्व मम सुप्तस्य शाश्वत ! ।
नमोऽजाय त्रिनेत्राय पिङ्गलाय महात्मने ॥ ८४ ॥
वामाय विश्वरूपाय स्वप्नाधिपतये नमः ।
स्वप्ने कथय मे तथ्यं सर्वकार्य्येष्वशेषतः ॥ ८५ ॥
क्रियासिद्धिं विधास्यामि त्वत्प्रसादान्महेश्वर ! ।
एभिर्मन्त्रैः शिवं प्रार्थ्य निद्रां कुर्य्यान्निराकुलः ॥ ८६ ॥
स्वप्नं दृष्टं निशि प्रातर्गुरवे विनिवेदयेत् ।
तमन्तरेण मन्त्रज्ञः स्वयं स्वप्नं विचारयेत् ॥ ८७ ॥
लिङ्गं चन्द्रार्कयोर्विम्बं भारतीं जाह्नवीं गुरुम् ।
रक्ताब्धितरणं युद्धे जपोऽनलसमर्चनम् ॥ ८८ ॥
शिखिहंसरथाङ्गाढ्ये रथे स्थानञ्च मोहनम् ।
आरोहणं सारसस्य धरालाभश्च निम्नगाम् ॥ ८९ ॥
प्रासादः स्यन्दनं पद्मं छत्रं कन्याद्रुमः फली ।
नागो दीपो हयः पुष्पं वृषभोऽश्वश्च पर्वतः ॥ ९० ॥

---

देवीप्राप्तिं कुर्वती भविष्यद्विचार्य्य प्रवर्त्तितव्यमित्याह चिकीर्षुरिति । विचारप्रकारमाह स्नानसन्ध्यादिकं कृत्वेत्यादिना ॥ ८२ ॥

शिवप्रार्थनामन्त्रमाह भगवन्निति ॥ ८३—८६ ॥

तमन्तरेण गुरुं विना शुभाशुभं स्वप्नं स्वयमेव विचारयेत् ॥ ८७ ॥

तत्र शुभस्वप्नानाह लिङ्गमिति ॥ ८८ ॥

शिखीति । मयूरयुक्ते हंसयुक्ते चक्रयुक्ते वा रथे स्थितिः मोहनं सुरतम् ॥ ८९ ॥

निम्नगा नदीमात्रं स्यन्दनं रथः निम्नगापि सरीऽन्तानां दर्शनमेव शुभम् ॥९०॥

सुराघटं ग्रहास्तारा नारी सूर्य्योदयोऽप्सराः ।
हर्म्यशैलविमानानामारोहो गगने गमः ॥ ९१ ॥
मद्यमांसादनं विष्ठालेपो रुधिरसेचनम् ।
दध्योदनादनं राज्याभिषेको गोवृषध्वजाः ॥ ९२ ॥
सिंहं सिंहासनं शङ्खो वादित्रं रोचना दधि ।
चन्दनं दर्पणश्चैषां स्वप्ने सन्दर्शनं शुभम् ॥ ९३ ॥
तैलाभ्यक्तः कृष्णवर्णो नग्नो ना गर्त्तवायसौ ।
शुष्कं कण्टकीवृक्षश्च चाण्डालो दीर्घकन्धरः ॥ ९४ ॥
प्रासादस्तटहीनश्च नैते स्वप्ने शुभावहाः ।
शान्तिं कुर्वीत दुःस्वप्ने जपेन्मन्त्रमनन्यधीः ॥ ९५ ॥
अब्दत्रिकं जपन्तस्य कुर्वतो विघ्नसम्भवः ।
विघ्नसङ्गमनादृत्य तदा जपपरो भवेत् ॥ ९६ ॥
सिद्धौ विश्वस्तचित्तः संस्तुरीयेऽब्दे स सिद्धिभाक् ।
मनःप्रसादः सन्तोषः श्रवणं दुन्दुभिध्वनेः ॥ ९७ ॥
गीतस्य तालशब्दस्य गन्धर्वाणां समीक्षणम् ।
स्वतेजसः सूर्य्यसाम्येक्षणं निद्रा क्षुधा जपः ॥ ९८ ॥
रम्यतारोग्यगाम्भीर्य्यमभावः क्रोधलोभयोः ।
एवमादीनि चिह्नानि यदा पश्यति मन्त्रवित् ॥ ९९ ॥
सिद्धिं मन्त्रस्य जानीयाद्देवतायाः प्रसन्नताम् ।
ततो जपेऽधिकं यत्नं प्रकुर्य्यात् ज्ञानलब्धये ॥ १०० ॥

---

हर्म्यादीनामारोहणम् ॥ ९१ ॥

मद्यमांसयोर्भक्षणं विष्ठया शरीरलेपः रुधिरेण स्नानं दधिसिक्तभक्ष्यः राज्य-प्राप्तिः एतानि । शुभानि गवादीनां दर्शनमेव शुभम् ॥ ९२ ॥

अशुभस्वप्नानाह तैलेति । तैलाभ्यक्तो ना पुरुषः नदादीनां दर्शनमशुभम् ॥ ९४—९६ ॥

मन्त्रसिद्धेर्लक्षणमाह मनःप्रसाद इति ॥ ९७—१०० ॥

लब्धज्ञानः कृतार्थः स्यात् संसारात् प्रतिमुच्यते ।
ज्ञात्वात्मानं परं ब्रह्म वेदान्तैः प्रतिपादितम् ॥ १०१ ॥
तं वन्दे परमात्मानं सर्वव्यापिनमीश्वरम् ।
यो नानादेवतारूपा नृणामिष्टं प्रयच्छति ॥ १०२ ॥
विलोक्य नानातन्त्राणि प्रार्थितो द्विजसत्तमैः ।
स्वमतेरनुसारेण कार्य्ये मन्त्रमहोदधिः ॥ १०३ ॥
बाणनेत्रमितास्तस्मिंस्तरङ्गाः सन्ति निर्मिताः ।
तत्रानुक्रमणीं वच्ये मन्त्रिणां सुखबुद्धये ॥ १०४ ॥
भूतशुद्धिस्तथा प्राणप्रतिष्ठा न्यसनं लिपेः ।
पुरश्चर्य्या होमविधिस्तर्पणाद्याद्य ईरितम् ॥ १०५ ॥
द्वितीयोर्मौ गणेशस्य मन्त्राः सम्यक् समीरिताः ।
काली कालीभिधानानां सुमुखीति तृतीयके ॥ १०६ ॥
तारा तुरीये सम्प्रोक्ता ताराभेदास्तु पञ्चमे ।
षष्ठे तरङ्गे गदिता छिन्नमस्ता शवर्य्यपि ॥ १०७ ॥

---

आत्मसाक्षात्कारपर्य्यन्तमेव मन्त्रोपास्तिरित्याह लब्धज्ञान इति । अहं ब्रह्मेति साक्षात्कारीज्ञानमित्यर्थः ॥ १०१ ॥

ग्रन्थसमाप्तौ मङ्गलमाचरति तं वन्दे इति । ब्रह्मैव नानादेवतारूपेण जनैः सेव्यत इत्यर्थः ।

यो यो यां यां तनुं भक्तः श्रद्धयार्चितुमिच्छति ।
तस्य तस्याचलां श्रद्धां तामेव विदधाम्यहम् ॥
एतया श्रद्धया युक्तस्तस्याराधनमीहते ।
लभते च ततः कामान्मयैव विहितान् हितान् ॥

इति भगवद्वचनात् ॥ १०२ ॥

ग्रन्थकरणे हेतुमाह विलोक्येति ॥ १०३ ॥

ब्राह्मणप्रार्थनमेव हेतुः बाणनेत्रमिताः पञ्चविंशतिः ॥ १०४ ॥

अनुक्रमणीमाह भूतशुद्धिरिति । लिपेर्मातृकाया न्यसनं न्यासः आद्ये प्रथमतरङ्गे एतदीरितम् ॥ १०५ ॥

द्वितीयोर्मौ द्वितीयतरङ्गे गणेशमन्त्राः । काल्यादि तृतीये ॥ १०६ ॥ १०७ ॥

स्वयम्बरा मधुमती प्रमदा च प्रमोदया ।
बन्दी बन्धनहारीति सप्तमे वटयक्षिणी ॥ १०८ ॥
तस्या भेदाश्च वाराही ज्येष्ठा कर्णपिशाचिनी ।
स्वप्नेश्वरी च मातङ्गी वाग्देवी मदनेश्वरी ॥ १०९ ॥
अष्टमे विस्तरात् प्रोक्ता बाला बालाभिधा अपि ।
नवमे त्वन्नपूर्णोक्ता तद्भेदा मोहनाद्रिजा ॥ ११० ॥
ज्येष्ठा लक्ष्मीरन्ये मन्त्रा उक्ता प्रत्यङ्गिरारिहा ।
दशमे बगला प्रोक्ता वाराहीद्वितयं तथा ॥ १११ ॥
श्रीविद्यैकादशे प्रोक्ता द्वादशे तु तदावृतिः ।
त्रयोदशे तु हनुमान् विस्तरात् प्रतिपादितः ॥ ११२ ॥
चतुर्दशे नारसिंहो गोपालो गरुड़ोऽपि च ।
अथ पञ्चदशे सूर्यो भौमो जीवः सितो मुनिः ॥ ११३ ॥
षोड़शेऽमौ महामृत्युञ्जयो रुद्रो धनेश्वरः ।
जाह्नवी मणिकर्णी च प्रोक्ता सप्तदशेऽर्जुनः ॥ ११४ ॥
अष्टादशे कालरात्रिश्चण्डिकाया नवाक्षरः ।
एकोनविंशे चरणायुधः शास्तृसमन्वितः ॥ ११५ ॥
पार्थिवार्चनकीनाशचित्रगुप्तासुरीविधिः ।
विंशे तरङ्गे यन्त्राणि स्वर्णाकर्षणभैरवः ॥ ११६ ॥
स्नानादिरन्तर्यागान्त एकविंशेऽर्चनाविधिः ।
द्वाविंशेऽर्घ्यं समारभ्य पूजनं तद्भिदा अपि ॥ ११७ ॥

---

बन्धनहारीति बन्दीविशेषणं छिन्नमस्तादिमन्त्रं षष्ठे वाराही वार्त्ताली वटयक्षिण्यादिकथनं कर्णपिशाचिनी च सप्तमे। मोहनाद्रिजा मोहनगौरी। अरिहा शत्रुनाशकः षोड़शार्णः बगलावक्त्रा बगलामुखी। तदावृतिः श्रीविद्याया आवरणपूजाः ॥ १०८—११२ ॥

मुनिर्वेदव्यासः ॥ ११२ ॥

चरणायुधः कुक्कुटमन्त्रः ॥ ११४ ॥

त्रयोविंशे तु दमनैः पवित्रैश्च समर्चनम् ।
चतुर्विंशे च भेदेन मन्त्राणां परिशोधनम् ॥ ११८ ॥
तरङ्गे चरमे प्रोक्तं कार्यं षट्कर्मानुक्रमात् ।
एवं मन्त्रोदधावस्मिन् पञ्चविंशतिरूर्मयः ॥ ११९ ॥
विशोधनीया विद्वद्भिः क्षन्तव्यं साहसं मम ।
चापलं निजबालानां क्षमते जनको यथा ॥ १२० ॥
अहिच्छत्रद्विजच्छत्रं वत्सगोत्रसमुद्भवः ।
आसीद्रत्नाकरो नाम विद्वान् ख्यातो धरातले ॥ १२१ ॥
तत्तनूजो रामभक्तः फनूभट्टाभिधोऽभवत् ।
महीधरस्तदुत्पन्नः संसारासारताविदन् ॥ १२२ ॥
निजदेशं परित्यज्य गतो वाराणसीं पुरीम् ।
सेवमानो नरहरिं तत्र ग्रन्थमिमं व्यधात् ॥ १२३ ॥
कल्याणाभिधपुत्रेण तथान्यैर्द्विजसत्तमैः ।
अनेकानागमग्रन्थान् विलोकितमुनीश्वरैः ॥ १२४ ॥
एकग्रन्थस्थितं सर्वं मन्त्राणां सारमिप्सुभिः ।
सम्प्रार्थितः स्वमत्यासौ नाम्ना मन्त्रमहोदधिः ॥ १२५ ॥
अविच्छिन्नान्वयाः सन्तु निजधर्मपरायणाः ।
मङ्गलानि प्रपश्यन्तु सर्वे द्रोहपराङ्मुखाः ॥ १२६ ॥
हरिः करोतु कल्याणं सर्वेषां जगदीश्वरः ।
प्रवर्त्तयन्त्विमं ग्रन्थं यावद्वेदो रविः शशी ॥ १२७ ॥
नरसिंहो महादेवो महादेवार्त्तिनाशनः ।
मुदे परां महालक्ष्म्या देवावरनतोऽस्तु मे ॥ १२८ ॥

---

कीनाशो यमः तद्भेदाः पूजाभेदाः ॥ ११६—११८ ॥
चरमे पञ्चविंशे तरङ्गे शान्त्यादिकर्मषट्कर्मानुक्रमणी चेति ॥ १२० ॥
स्ववंशमाह अहिच्छत्रेति ॥ १२१—१२५ ॥
ग्रन्थान्ते चाशिषमाह अविच्छिन्नेति । श्लोकद्वयेन देवं प्रार्थयते नरसिं

नृसिंह उत्सङ्गसमुद्रजो मां समुद्रजद्वीपगृहे निषण्णः ।
समुद्रजो हीनमतिः सदाव्यात् समुद्रभक्ताखिलसिद्धिदायी ॥१२९॥
राजालक्ष्मीनृसिंहो जयति सुखकरं श्रीनृसिंहं विजेयं
दैत्याधीशा महान्तो वधत नृहरिणा श्रीनृसिंहाय नौमि ।
सेव्योऽन्यो नृसिंहादपर इह न हि श्रीनृसिंहस्य पादौ
सेवे लक्ष्मीनृसिंहं वसतु मम मनः श्रीनृसिंहाच्च भक्तम् ॥ १३० ॥

विश्वेशो गिरिजा बिन्दुमाधवो मणिकर्णिका ।
भैरवो जाह्नवी दण्डपाणिर्मे तन्वतां शिवम् ॥ १३१ ॥
अब्दे विक्रमतो जाते वेदबाणनृपैर्मिते ।
ज्येष्ठाष्टम्यां शिवस्याग्रे पूर्णो मन्त्रमहोदधिः ॥ १३२ ॥

इति श्रीमन्महीधरविरचिते मन्त्रमहोदधौ षट्कर्मादि-
निरूपणं नाम पञ्चविंशस्तरङ्गः ।

---

इति । नृसिंहो मे हृदि स्थीयात्तु देवानां वारेण समूहेन नतः । नृसिंह इति । नृसिंहो मां सदाव्यात् कीदृशः उत्सङ्गे समुद्रजा लक्ष्मीर्यस्य सः समुद्रे जातं यच्छ्वेतद्वीपं तत्र यद् गृहं तत्रोपविष्टः समुत्सर्पः रत्नोहीनमतिर्विरता समुद्रो पञ्चत्यादिमुद्राविदो ये भक्तास्तेषां सर्वसिद्धिदाता: । राजा लक्ष्मी नृसिंह इति विभक्तिसप्तकेन हरिं स्तौति नृहरिणा महान्तो दैत्याधीशा अवहतहतां हन्तेर्लुङि कर्मणि चिरावदिङ्गाभेदपं श्रीनृसिंहाय श्रीनृसिंहभक्तं भव रव । ग्रन्थनिष्पत्ति-स्थानं काशीस्थानं देवान् चरति विश्वेश इति । ग्रन्थनिर्मितिकालमाह विक्र-मार्कादि बाणदेवनृपैर्मिते वर्षे पञ्चचत्वारिंशदुत्तरषोडशशततमे विक्रमनृपाद्गते सति शिवस्य रामेश्वरस्याग्रे मन्त्रमहोदधिः समाप्तिमगमत् ॥ १२९—१३२ ॥

इति नौकासमाख्यायां मन्त्रमहोदधिटीकायां षट्कर्म-
निरूपणं नाम पञ्चविंशस्तरङ्गः समाप्तः ॥

॥ समाप्तोऽयं ग्रन्थः ॥

त्रयोविंशे तु दमनैः पवित्रैश्च समर्चनम् ।
चतुर्विंशे च भेदेन मन्त्राणां परिशोधनम् ॥ ११८ ॥
तरङ्गे चरमे प्रोक्तं कर्म षट्कर्मानुक्रमात् ।
एवं मन्त्रोदधावस्मिन् पञ्चविंशतिरूर्मयः ॥ ११९ ॥
विशोधनीया विद्वद्भिः क्षन्तव्यं साहसं मम ।
चापलं निजबालानां क्षमते जनको यथा ॥ १२० ॥
अहिच्छत्रद्विजच्छत्रं वत्सगोत्रसमुद्भवः ।
आसीद्रत्नाकरो नाम विद्वान् ख्यातो धरातले ॥ १२१ ॥
तत्तनूजो रामभक्तः फनूभट्टाभिधोऽभवत् ।
महीधरस्तदुत्पन्नः संसारासारताविदन् ॥ १२२ ॥
निजदेशं परित्यज्य गतो वाराणसीं पुरीम् ।
सेवमानो नरहरिं तत्र ग्रन्थमिमं व्यधात् ॥ १२३ ॥
कल्याणाभिधपुत्रेण तथान्यैर्द्विजसत्तमैः ।
अनेकानागमग्रन्थान् विलोकितमुनीश्वरैः ॥ १२४ ॥
एकग्रन्थस्थितं सर्वं मन्त्राणां सारमिप्सुभिः ।
सम्प्रार्थितः स्वमत्यासौ नाम्ना मन्त्रमहोदधिः ॥ १२५ ॥
अविच्छिन्नान्वयाः सन्तु निजधर्मपरायणाः ।
मङ्गलानि प्रपश्यन्तु सर्वे द्रोहपराङ्मुखाः ॥ १२६ ॥
हरिः करोतु कल्याणं सर्वेषां जगदीश्वरः ।
प्रवर्त्तयन्त्विमं ग्रन्थं यावद्वेदो रविः शशी ॥ १२७ ॥
नरसिंहो महादेवो महादेवार्त्तिनाशनः ।
मुदे परां महालक्ष्म्या देवावरनतोऽस्तु मे ॥ १२८ ॥

---

कौन्नामी यमः तद्भेदाः पूजाभेदाः ॥ ११६—११८ ॥
चरमे पञ्चविंशे तरङ्गे शान्त्यादिकर्मषट्कर्मानुक्रमणी चेति ॥ १२० ॥
स्ववंशमाह अहिच्छत्रेति ॥ १२१—१२५ ॥
ग्रन्थान्ते आशिष आह अविच्छिन्नेति । श्लोकद्वयेन देवं प्रार्थयते नरसि.ए

नृसिंह उत्सङ्गसमुद्रजो मां समुद्रजद्वीपगृहे निषण्णः।
समुद्रजो हीनमतिः सदाव्यात् समुद्रभक्ताखिलसिद्धदायी॥१२९॥
राजालक्ष्मीनृसिंहो जयति सुखकरं श्रीनृसिंहं विजेयं
दैत्याधीशा महान्तो वसत नृहरिणा श्रीनृसिंहाय नौमि।
सेव्योऽन्यो नृसिंहादपर इह न हि श्रीनृसिंहस्य पादौ
सेवे लक्ष्मीनृसिंहं वसतु मम नः श्रीनृसिंहाच्च भक्ताम्॥ १३०॥

विश्वेशो गिरिजा विन्दुमाधवो मणिकर्णिका।
भैरवो जाह्नवीदण्डपाणिर्मे तन्वतां शिवम्॥ १३१॥
अब्दे विक्रमतो जाते वेदबाणनृपैर्मिते।
ज्येष्ठाष्टम्यां शिवस्याग्रे पूर्णो मन्त्रमहोदधिः॥ १३२॥

इति श्रीमन्महीधरविरचिते मन्त्रमहोदधौ षट्कर्मादि-
निरूपणं नाम पञ्चविंशस्तरङ्गः।

---

इति। नृसिंहो मे मुदे हर्षायास्तु देवानां वारेण समूहेन नतः। नृसिंह इति। नृसिंहो मां सदाव्यात् कीदृशः उत्सङ्गे समुद्रजा लक्ष्मीर्यस्य सः समुद्रे जातं यच्छ्वेतद्वीपं तत्र यद्गृहं तत्रोपविष्टः समुत्सहर्षः रजोहीनमतिर्विरजा समुद्रो पद्मल्यादिमुद्राविदो ये भक्तास्तेषां सर्वसिद्धिदाता। राजा लक्ष्मी नृसिंह इति विभक्तिसप्तकेन हरिं स्तौति नृहरिणा महान्तो दैत्याधीशा असहन्तहतां हन्तेर्लुङि कर्मणि चिरावदिशाभेदपं श्रीनृसिंहाय श्रीनृसिंहभक्तं अव रक्ष। ग्रन्थनिष्पत्ति· स्थानं काशीस्थानं देवान् स्मरति विश्वेश इति। ग्रन्थनिर्मितिकालमाह विक्र- मार्कादि बाणदेवनृपैर्मिते वर्षे पञ्चचत्वारिंशदुत्तरषोडशशततमे विक्रमनृपाद्गते सति शिवस्य रामेश्वरस्याग्रे मन्त्रमहोदधिः समाप्तिमगमत्॥ १२६—१३२॥

इति नौकासमाख्यायां मन्त्रमहोदधिटीकायां षट्कर्म-
निरूपणं नाम पञ्चविंशस्तरङ्गः समाप्तः॥

॥ समाप्तोऽयं ग्रन्थः॥

---

पण्डितकुलपतिः

श्रीजीवानन्दविद्यासागर वि, ए,

PANDIT JIBANANDA VIDYASAGARA, B. A.

Superintendent Free Sanskrit College, Calcutta.

६९ उत्तररामचरितनाटक सटीक १
७० कर्पूरमञ्जरीनाटिका सटीक ॥०
७१ चण्डकौशिकनाटक सटीक ॥०
७२ चैतन्यचन्द्रोदयनाटक सटीक २
७३ धनञ्जयविजयनाटक सटीक |०
७४ नागानन्दनाटक सटीक ॥०
७५ नागानन्दनाटक मूल |०
७६ प्रबोधचन्द्रोदयनाटक सटीक १
७७ प्रसन्नराघवनाटक जयदेवकृत १
७८ प्रियदर्शिका नाटिका सटीक ॥०
७९ वसन्ततिलक भाण नाटक |/
८० बालरामायणनाटक सटीक ३
८१ विक्रमोर्वशी नाटक (सटीक) १
८२ विद्धशालभञ्जिकानाटिका सटीक ॥०
८३ वेणीसंहारनाटक सटीक ॥०
८४ मल्लिकामारुतनाटक सटीक २
८५ महानाटक हनुमन्नाटक सटीक १॥
८६ महानाटकम् (हनुमन्नाटकम्) ॥०
८७ महावीरचरितनाटक सटीक १॥०
८८ महावीरचरितनाटक मूलमात्र ॥०
८९ मालतीमाधवनाटक सटीक ॥०
९० मालविकाग्निमित्रनाटक सटीक १
९१ मुद्राराक्षसनाटक सटीक १
९२ मृच्छकटिकनाटक सटीक १॥०
९३ रत्नावलीनाटिका सटीक ॥०
९४ शकुन्तलानाटक सटीक १
९५ काव्यप्रकाश अलङ्कार सटीक ४
९६ काव्यादर्श सटीक (अलङ्कार) १
९७ काव्यदीपिका अलङ्कार सटीक ॥०
९८ कुवलयानन्द अलङ्कार सटीक २
९९ चन्द्रालोक प्राचीन अलङ्कार |०
१०० दशरूपकम् ( अलङ्कार ) १
१०१ साहित्यदर्पण सटीक अलङ्कार १॥
१०२ साहित्यदर्पणम् ( मूलमात्र ) ॥०
१०३ काव्यालङ्कारसूत्रवृत्तिवामनकृत ॥०
१०४ वाग्भटालङ्कार |०
१०५ सरस्वतीकण्ठाभरण सटीक ३
१०६ सङ्गीतपारिजात[सङ्गीतशास्त्र]१॥०
१०७ छन्दोमञ्जरी वृत्तरत्नाकर सटीक ॥
१०८ श्रुतबोध: (छन्दोग्रन्थ) सटीक /
१०९ पिङ्गलछन्द: शास्त्र वृत्तिसहित १॥
११० महानिर्वाणतन्त्रम् सटीक ४
१११ शारदातिलक तन्त्रम् ३
११२ मन्त्रमहोदधि तन्त्र सटीक ३
११३ रुद्रयामल तन्त्र ३
११४ इन्द्रजालविद्यासंग्रह. ३
११५ कामन्दकी नीतिसार: ॥०
११६ चाणक्यशतकम् सटीक /
११७ शुक्रनीतिसार: सटीक २
११८ गयाश्राद्धादिपद्धति: १
११९ तुलादानादिपद्धति: (वल्लाचरै:)४
१२० धर्मशास्त्रसंग्रह: |०
१२१ वीरमित्रोदय (स्मृतिशास्त्र) ५
१२२ मनुसंहिता कुल्लूकभट्टकृत टीका-
सहित ३
१२३ वेदान्तदर्शन सभाष्य सटीक ९
१२४ भामती(वेदान्त)वाचस्पतिमिश्रकृत३
१२५ वेदान्तपरिभाषा ॥०
१२६ वेदान्तसार सटीक ॥०
१२७ विवेकचूड़ामणि वेदान्त |/
१२८ पञ्चदशी (सटीक) वेदान्त १॥०
१२९ सिद्धान्तबिन्दुसार: (वेदान्त) ॥०
१३० पूर्णप्रज्ञदर्शनम् सभाष्य ॥०
१३१ सांख्यदर्शन ( भाष्यसहित ) २
१३२ सांख्यसूत्र अनिरुद्धवृत्तिसहित ॥०
१३३ सांख्यसार |०
१३४ सांख्यतत्त्वकौमुदी सटीक २
१३५ सांख्यकारिका: गौड़पादभाष्य |०

१३६ मीमांसादर्शनम् भाष्यसहित १२
१३७ मीमांसापरिभाषा ।०
१३८ शाण्डिल्यसूत्र सभाष्य ॥०
१३९ जैमिनीय (न्यायमालाविस्तर:) ६
१४० अर्थसंग्रह (लौगाक्षिमीमांसा) ।०
१४१ न्यायदर्शन सभाष्य सवृत्ति २॥०
१४२ भाषापरिच्छेद: मुक्तावली ॥०
१४३ भाषापरिच्छेदमुक्तावली दिनकरी १॥
१४४ शब्दशक्तिप्रकाशिका (न्याय) ॥।०
१४५ कुसुमाञ्जलि सटीक (न्याय) ।०
१४६ उपमानचिन्तामणि: /
१४७ आत्मतत्त्वविवेक (बौद्धाधिकार) २
१४८ अनुमानचिन्तामणि: सटीक ४॥
१४९ तर्कामृत (जगदीशकृत) न्याय ।०
१५० तर्कसंग्रह इं अनुवादसहित ॥०
१५१ पातञ्जलदर्शन (सभाष्य सटीक) २
१५२ पातञ्जलदर्शन भोजवृत्तिसहित १
१५३ वैशेषिकदर्शनम् सटीक ३
१५४ सर्वदर्शनसंग्रह: [दर्शनशास्त्र] १
१५५ आथर्वणोपनिषद् सभाष्य ३
१५६ आरण्यसंहिता-सभाष्य ॥०
१५७ ईश केन कठ प्रश्न मुण्ड माण्डूक्य
उपनिषद् (सटीक सभाष्य) ३
१५८ गायत्री व्याख्या ॥०
१५९ गोपथब्राह्मण (अथर्ववेदस्य) १
१६० छान्दोग्य उपनिषद् सटीक सभाष्य ३
१६१ तैत्तिरीय ऐतरेय श्वेताश्वतर सभाष्य २
१६२ दैवत तथा षड्विंशब्राह्मणसभाष्य २
१६३ निरुक्त सभाष्य सटीक १२
१६४ नृसिंहतापनी सभाष्य २
१६५ वृहदारण्यक सटीक सभाष्य ७
१६६ मुक्तिकोपनिषत् /
१६७ शुक्लयजुर्वेदसंहिता सभाष्य ४

१६८ शुक्लयजुर्वेदस्य प्रातिशाख्य
सभाष्य २
१६९ सामवेदसंहिता सभाष्य ४
१७० अग्निपुराणम् २
१७१ अध्यात्मरामायणम् सटीक २
१७२ कल्किपुराणम् १
१७३ गरुडपुराणम् २
१७४ सटीक वाल्मीकिरामायण
बालकाण्डम् १
१७५ विष्णुपुराणम् सटीक ३
१७६ ब्रह्मवैवर्त्तपुराण सम्पूर्ण ४
१७७ मत्स्यपुराणम् २
१७८ मार्कण्डेयपुराणम् १॥०
१७९ लिङ्गपुराणम् २
१८० श्रीमद्भगवद्गीता सभाष्य सटीक ४
१८१ अष्टाङ्गहृदय (वाग्भट) वैद्यक ३
१८२ चक्रदत्त (वैद्यक) १॥०
१८३ चरकसंहिता (वैद्यक) सम्पूर्ण ६
१८४ माधवनिदान सटीक १॥०
१८५ भावप्रकाश (वैद्यक) ५
१८६ मदनपालनिर्घण्टु: (वैद्यक) ॥०
१८७ रसेन्द्रचिन्तामणितथारसरत्नाकर ६
१८८ शार्ङ्गधरसंहिता (वैद्यक) १
१८९ सुश्रुतसंहिता सटीक (वैद्यक) १०
१९० सुश्रुतसंहिता मूलमात्र (वैद्यक) ४
१९१ चिकित्सासारसंग्रह वङ्गसेनकृत ५
१९२ गणिताध्याय: भास्कराचार्य्यकृत १
१९३ गोलाध्याय: भास्कराचार्य्यकृत ।०
१९४ वृहत्संहिता वा वाराहीसंहिता २
१९५ भावकुतूहल (ज्योतिष) ॥०
१९६ लीलावती भास्कराचार्य्यरचित ॥०
१९७ बीजगणित भास्कराचार्य्यरचित ॥।०
१९८ सूर्य्यसिद्धान्त सटीक २

कलिकाता संस्कृतविद्यामन्दिरे बि, ए, उपाधिधारिण:
श्रीजीवानन्दविद्यासागर भट्टाचार्य्यस्य सकाशात् लभ्यानि ।